Financial Support:- Sri Narendra Kumar Jain
Virginia, U.S.A
Proccess & Digitized by:-ZEN INFORMATICS,
Devashram, Mahadeva Road,
Arrah, Bihar (INDIA)
Mob:- 09431419369

Only for study & research not for commercial use.

Manuscripts

# NYAY KUMUD CHANDRODAY

By

Acharya Prabha Chandra

Copy ® Reserved for Sri Syadwad Mahavidyalaya, Varanasi

# श्री स्याद्वाद महाविद्यालय,

भदैनी घाट—काशी।

श्री अकलंक सरस्वती भवन।

नाम ग्रंथ श्रीन्यायकुमुदचन्द्रोदय नम्बर [illegible]

विषय [illegible] समय

ग्रन्थकार श्री प्रभाचन्द्राचार्य

भाषा संस्कृत पृष्ठ संख्या [illegible]

दातार

संभवादेशइतिनाभिसंबध्यतेराजशब्दस्यककारःस्वरादेशोभवतिकस्वरादेशार्थ

श्री स्याद्वाद पाठशाला काशी

न्याय कुमुद चन्द्रोदय ... पु: नं: २०

न्यायकुमुदचन्द्रोदय श्रीः ॥ ॐ नमः सिद्धेभ्यः ॥ अथ श्रीन्यायकुमुदचंद्रोदय प्रारभ्यते ॥ वं॰ छंद ॥ सिद्धिप्रदं प्रकटिताखिलवस्तुतत्व ॥ मानंदमंदिरम
१ शेषगुणैकपात्रं ॥ श्रीमज्जिनेंद्रमकलंकमनंतवीर्य्य मानम्यलक्षणपदं प्रवरं प्रवक्ष्ये ॥ १ ॥ शार्दूलविक्रीडितछन्द ॥ यज्ज्ञानोद
धिमध्यमुन्नतमिदं विश्वं प्रपंचार्चितं प्राप्याभाति विचित्ररत्ननिचयप्रख्यंप्रभा भासुरं ॥ श्रीचिंतामणिसुप्रभेंदुसदृशाः ज्ञा
नप्रबंधस्थिरं ॥ जीयात्सोत्रकुलंकदर्पदलनो भव्याब्जतेजोनिधिः ॥ २ ॥ वसंततिलका छन्द ॥ माणिक्यनंदिपदमप्रतिमप्रबोधं
व्याख्यायबोधनिधिरेषपुनः प्रबंधः ॥ प्रारभ्यते सकलसिद्धिविधौ समर्थो ॥ मूलप्रकाशित जगत्त्रयवस्तुसार्थो ॥ ३ ॥ शार्दूलविक्रीडितछंद ॥
बोधः कोप्यसमः समस्तविषयः प्राप्याकलंकं पदं ॥ जातस्तेन समस्तवस्तुविषयं व्याख्यायते तत्पदं किंनश्रीगणभृज्जिनेंद्रपदतः प्राप्त
प्रभावः स्वयं ॥ व्याख्यात्यप्रतिमं वचोजिनपतेः सर्वात्मभाषात्मकं ॥ ४ ॥ येषां न्यायमहोदधौ प्रतरणे वांछास्ति सद्धीमतां ॥ नैतुल्यंनि
खिलार्थसाधनमिदं प्रारभ्यते नान्यतः ॥ यत्तुस्वांतनमस्तरंगतरलं वर्तेभ्रमभ्रामिना ॥ तेरेषेस्मरणातपरः पदमपिप्राप्तुंनचक्षमाः
॥ ५ ॥ रू॰ ॥ श्रीमन्न्यायमहार्णवस्य निखिलप्रमेयरत्नसंदर्भगर्भस्यावगाहनमत्युत्पन्नप्रज्ञैः कर्त्तुमशक्यमिति संक्षेपतस्तद्व्युत्पादना·
यतदवगाहनेपोतप्रख्यं प्रकरणमिदमाचार्य्यः प्राह तत्प्रशास्त्रस्यादौ शास्त्रकारो निर्विघ्नेनशास्त्रपरिसमाप्त्यादिकं फलमभिलष·
न्निष्टदेवताविशेषं नमस्करोति ॥ श्लोक ॥ धर्म्मतीर्थकरेभ्योस्तु ॥ स्याद्वादिभ्यो नमोनमः ॥ ऋषभादिमहावीरांतेभ्यः स्वात्मोपलब्धये ॥
१ धर्म्मः सदेषशुभायुर्नामगोत्रलक्षणं पुण्यं ॥ उत्तमक्षमादिस्वरूपो वा नत्साध्यः कर्तृशुभफलदः पुद्गलपरिणामो वा ॥ जीवादि ॥ १ ॥
वस्तुनोयथावस्थितत्वभावो वा ॥ नपुनः परपरिकल्पितआत्मविशेषगुणो द्रव्यगुणकर्म्मलक्षणो वा ॥ प्रकृतिपरिणामविशेषो वाचे
तनस्वभावो वा ॥ तस्याग्रेयथास्थानं निराकरिष्यमाणत्वात् ॥ स एव तीर्थं संसारार्णवोत्तरणहेतुत्वात् ॥ तस्य वा तीर्थमागमस्तदव
पदि / गाहनेहेतुत्वात् ॥ तत्कृतवंतो उत्पदितवंतः ॥ उपदिष्टवंतश्चेत्यृषभादिमहावीरांताः भगवंतः ॥ तेभ्यो नमोनमोस्तित्याभीक्ष्ण्यप्रयो

गेणात्मर्थं नमः॥ क्रियायां व्यापृतमात्मानं दर्शयति॥ पुनरपि किंविशिष्टेभ्यः स्याद्वादिभ्यः स्याच्छब्देनेकांतार्थः स्यात्स्वपररूपादिना स
दसदाद्यनेकांतात्मकं वस्तु यद्वदनीत्येवंशीलास्तेभ्यः किंपर्यंतेभ्यो नमो नमोस्त्वित्याह॥ सालोपलब्धये॥ स्वस्य नमस्कर्तुरात्मनाति
कतापरिहारादिविशिष्टं स्वरूपं। तस्योपलब्धये सकलजनमनोनतये॥ अथवा स्वस्य नमस्कर्तुरात्मनोनंतज्ञानादिस्वरूपस्योपल
ब्धये सिद्धये सिद्धि॥ स्वात्मोपलब्धिरित्यभिधानान्नो नवैवकस्यापीष्टदेवताविशेषस्य नमस्कारकरणान्नास्तिकतापरिहारादिश्रेयो
जनप्रसिद्धेः शेषस्य तत्करणप्रयासो निःप्रयोजन इति चेन्न॥ नन्वाशेषेष्टदेवताविशेषसंस्तवनस्याशेषविघ्नविनाशेनाशेषप्रमाण-
प्रमेयनयनिक्षेपनिरूपणपरिसमाप्तिप्रयोजनेन सप्रयोजनत्वात्॥ न खलु निखिलं प्रमाणादिप्ररूपणं निखिलविघ्नविनाशाव्य
तिरेकेणासिद्धिमध्यास्ते॥ निखिलविघ्नविनाशो प्यखिलेष्टदेवतासंस्तवनाव्यतिरेकेण॥ अथवा सर्वेषामप्यविशेषेणाविघ्नविना
शानिमित्तत्वस्थापनार्थं तत्करणं॥ उक्तविशेषणविशिष्टेष्टदेवताविशेषस्यैवतास्थापनार्थं वा॥ अस्तु नाम न तथाप्यनंतगुणा
दधिस्वरूपाणां भगवतामनंतगुणसद्भावे किमित्येतद्गुणद्वयद्वारेण संस्तवनमित्यप्ययोद्यं शास्त्रकृतस्तद्गुणार्थित्वाद्योपकृता
र्थी सन् तद्गुणोपेतं परमविशेषं नमस्कुर्वाणो दृष्टो यथा कश्चिद्धनुर्वेदपरिज्ञानार्थी तत्परिज्ञानगुणोपेतं धर्म्मतीर्थकरत्वस्याद्वादि
त्वगुणार्थी चायं शास्त्रकार इति॥ १॥ ननु क्षणिकनित्यत्वादिपर्यायावस्थितवस्तुस्वभाववादित्वात्सुगतेश्वरकपिलब्रह्मणामेव
धर्म्मतीर्थकरत्वमतस्तस्य शास्त्रस्यादौ वंद्यात्वमर्णौ नमेव च प्रमाणादिलक्षणं॥ तत्र युत्पादनाहमित्याशंक्य स्वप्रमाणादि
लक्षणावर्तनं निःकंटकमुद्ययं निराकुर्वन्नाह॥ शार्दूलविक्रीडितच्छन्दः॥ संतानेषु निरन्वयक्षणिकचित्तानामसत्स्वेव चे॥ न
त्वाहेतुफलात्मनां स्वपरसंकल्पे न बुद्धः स्वयं॥ सत्त्वार्थं व्यवतिष्ठते करुणया मिथ्याविकल्पात्मकः॥ स्यान्नित्यत्वबदेव तत्र स
मयेनार्थक्रियावस्तुनः॥ २॥ इति निरन्वयक्षणिकचित्तानामन्योन्यविलक्षणक्षणिकज्ञानानां संतानेषु संततिषु॥ कथंभूतेष्वस

त्वेवाविद्यमानेष्वेव॥ असत्त्वं चैतेषां प्रमाणतो विचार्यमाणानामनुपपद्यमानत्वात्सिद्धं॥ तदनुपपद्यमानत्वं चानंतरमेव समर्थयिष्य
ते॥ ननु माभूवंस्तत्संतानास्तच्चित्तानि तु कार्यकारणभावप्रबंधेन प्रवर्तमानानि भविष्यंतीत्यत्राह॥ तत्त्वाद्धेतुफलात्मनां॥ तत्त्वेन प
रमार्थेन हेतुफलभूतो कार्यकारणभूत आत्मा स्वरूपं येषां तेषां तथाभूतानां न चित्तानां संतानेष्वसत्त्वेन तत्तु चैषां चिद्बुद्धः स्वय
मात्मनाप्यवतिष्ठते स्थितिं लभते॥ केन स्वपरसंकल्पेन स्वपरयोः संकल्पौ सतोः संतानचिंत्यव्यवसायस्तेन किमर्थमप्यवतिष्ठत इत्याह
सत्त्वार्थं दुःखाद्दुःखहेतोर्वा विनेयजनोद्धरणार्थं॥ कया करुणया॥ तदुक्तं॥ श्लोक॥ निर्वाणोपि परे प्राप्ते॥ कृपार्द्रीकृतचेतसां॥ नि
र्वृत्येव पराधीना॥ येषां तु महती कृपा॥१॥ इति सदृश्यं भूतो बुद्धः सन् इति वक्तुं निसत्वाध्यवसायवान्निवधर्मतीर्थकरो यथावस्थित
वस्तुस्वभाववादित्वाभावादीश्वरकपिलवद्सवत्॥ किंतु मिथ्याविकल्पात्मकश्च मिथ्यात्वेयो यो विकल्पः संबद्धपरिणामात्
त्मकएव॥ किंवत् निस्पत्वत्॥ यथा नित्यत्वमीश्वरकपिलवद्यथाणामन्यर्णीननत्वस्य च तयोः प्रतिज्ञानं मिथ्याविकल्पात्मकमे
व॥ न पुनः परमार्थतोऽस्ति तथा बुद्धेपीति॥ ननु स्यसर्वथाभ्युपगमान्न दोषः स्थितिप्रतिभासादेनयारीतं प्रतितत्र इत्याह॥ तत्र तस्मि
न्समयेनार्थक्रियाप्रभवः॥ अंत्यावस्थायामर्थक्रियायस्तु स्वविषयविज्ञानोत्पादनेनानेस्य मिथानात्॥ यथा च नित्यक्षणिकैकांतेष्वे
वार्थक्रियानोपपद्यते तथाग्रे प्रतिपादयिष्यते॥ अतो बुद्धादिप्रतिभासोऽद्वैतमपि मिथ्याविकल्पात्मकमेवेत्यभिप्रायोप्याह॥ प्रमाणादि
लक्षणपरीक्षार्थं शास्त्रमिदमारभ्यते॥ न चासत्प्रमाणादेः परीक्षा घटते॥ तदसत्त्वं च सर्वप्रत्ययानां निरालंबनतया स्वप्नप्रत्ययतुल्य २
त्वादिति तन्मतमपाकर्तुमाह॥ तत्रेत्यादि॥ तत्र तस्मिन्नेतस्मिन्निरंतरे समये समः सदृशो ज्ञानग्रहणप्रज्ञासाधारणो बोधः सर्वकवादि
त्वादेकारस्य परस्परत्वं तस्मिन्किमित्याह॥ नार्थक्रियेति॥ अर्थग्रहणमुपलक्षणं तेनानर्थस्यापि ग्रहणं॥ तत्रार्थः क्षणिकनिरंश
ज्ञानमात्रं तस्य तेनार्थ्यमानत्वात् तेनोपयोगार्थो विपर्ययात् तयोः क्रियाहानोपादानलक्षणा सा न स्यात् तत्स्वार्थस्योपादानमनर्थस्य च प-

रिहारः सर्वज्ञानानां समत्वे युक्त इत्यग्रे प्रतिपादयिष्यते॥ कथं सा न स्यादित्याह॥ वस्तुतः परमार्थेन वस्तुनः रंनिचयोरेसा यन
रूपणात्लक्षणाद्वस्तुनः सकाशादित्यर्थः॥ एतेन भ्रांतिमात्रं निरस्तं न्यायस्य समत्वे॥ ननु चासतस्त्वे चित्तसंतानेष्वित्ययुक्तमुक्तं
तेषां सत्त्वसंभवात्तथाहि॥ परमार्थसंतनः कार्यकारणभावप्रबंधेन प्रवर्तमानाः पूर्वोत्तरचित्तक्षणा विशरारवो ऽपरामृष्टभेदाः सं
तानशब्दवाच्याः॥ न च प्रतिक्षणविशरारुत्वे चित्तक्षणानां कर्मफलसंबंधाश्रयस्यैकस्यात्मनोऽसत्त्वात्कृतनाशाकृता
भ्यागमदोषोपनिपातः॥ संतानापेक्षया तत्संबंधसंभवात् एकसंतानपतितानां हि चित्तक्षणानां प्रतिक्षणं सरागकर्त्तृत्वेपि क-
र्मफलसंबंधस्योपपत्तेर्न दोषोपनिपातप्रसंगः॥ नापि संतानिभ्यः संतानोभिन्नोवस्थायनल्पविकल्पायायानः॥ नस्य वस्तु
विषयत्वात्संतानस्य चावस्तुत्वाद्व्यवहारार्था विभिन्नेष्वपि क्षणेषु अभेदपरामर्शरूपा संवृत्तिः संतानः स वस्तुत्वादिदं भेदवि
कल्पैरवक्तव्य एव॥ यदवस्तु न तद्भेदाभेदादिविकल्पैरवक्तव्यमेव॥ यथा गगनेंदीवरमवस्तु च विभिन्नक्षणेष्वभेदकल्पना सह
तथा संतान इति न तत्त्वेनानयोरन्योन्यविलक्षणचित्तक्षणेषु चान्यभिन्नानुरेकस्यात्मनोऽनभ्युपगमात्प्रत्यभिज्ञानाद्यनुपपत्तिरिति नु।
व्यसमीचीनं सादृश्यादेव तदुपपत्तेः प्रदीपवत्॥ यथैव हि प्रतिक्षणविनाशिष्वपि प्रदीपज्वालादिक्षणेषु सादृश्यात्स एवायं प्रदीप इति
प्रत्यभिज्ञानमाविर्भवत्येवं॥ तन्नापि नित्यैकरूपत्वे चात्मनः क्रमयौगपद्याभ्यामर्थक्रियाकारित्वानुपपत्तितोऽसत्त्वात्कथं प्रत्यभिज्ञा नु।
नु। नादिहेतुत्वं॥ तत्र क्रमयौगपद्याभ्यामर्थक्रियाकारित्वानुपपत्तिस्तदसद्यथा॥ वंध्यास्तनंधयेऽस्ति च नित्यैकरूपतयाभिमतेत्वा
त्मनि तद्वानदनुपपत्तिरिति॥ न चास्य क्रमयौगपद्याभ्यामर्थक्रियाकारित्वानुपपत्तिरसिद्धा॥ तथाहि॥ क्रमेणास्यार्थक्रियाकारि नु। ठा।
त्वे किं येनैव स्वभावेनैकं कार्यं करोति॥ तेनैवापरं स्वभावांतरेण वा यदि तेनैव तर्हि द्वितीयादिक्षणसाध्यकार्यस्य प्रथमक्षण एवोत्पादप्रसंगः तत्
दुमारकस्तरस्य प्रयोगो यदा यदुत्पादहेतुरस्ति॥ तत्तदोत्पत्तिमत्प्रसिद्धं॥ यथा तत्कालाभिमतं कार्यमस्ति चायं हि तीयादिक्षणसाध्यकार्यस्य

प्रथमक्षणोत्पादकोनित्यैकरूपतयाभिमतस्यात्मनः स्वभाव इति॥ अथस्वभावांतरेणासौ तत्करोति॥ तर्हि पूर्वस्वभावस्यप्रच्युतत्वात्
न्या.कु.चं. सिद्धमस्यपरिणामित्वं॥ स्वभावप्रच्युतिलक्षणत्वात्तस्य॥ यौगपद्येनाप्यस्यकार्यकारित्वे युगपदेवाखिलकार्योत्पादकस्वभावतयाप्रथमक्ष-
२ णएवाखिलकार्योत्पादनात्॥ क्षणांतरेतु साध्यकार्याभावतो नर्थक्रियाकारित्वेनास्य विषाणवदसत्त्वानुषंगः॥ किंचक्रमभाविसुखा
दिपर्यायव्यापकत्वमात्मनोभवताभ्युपगम्यते॥ तच्च किमेकेनस्वभावेनास्विध्यतानेकेनवा॥ यद्येकेन तदा तेषामेकरूपतापत्तिर्यदेक
स्वभावेनव्याप्यंते॥ तदेकरूपमेव यथैकपर्यायस्वरूपमेकस्वभावेनव्याप्यंते॥ चात्मनासुखादयोनेकपर्याया इति॥ अथानेकेन तदा
सोप्यनेकस्वभावांतरेणानेकस्वभावेनव्यापनीय इत्यनवस्था॥ अथैकाहत्येनस्वभावेनते व्याप्यंते॥ तत्राप्यनेकस्वभावेनतज्जातीयेन
तुकंस्यात्॥ तत्रच सैवानवस्था नचापरं प्रकारांतरमस्त्यतः कथं क्रमभुवां सुखादीनामन्वितं रूपं सिद्ध्येत्॥ येनात्मसिद्धिः स्यादित्यत्र प्र-
तिविधीयते॥ यत्तावदुक्तं कार्यकारणभावेत्यादि तदसमीक्षिताभिधानं॥ सर्वथैकांते कार्यकारणभावस्यैवासंभवात्॥ नन्वेवं तर्हि किं कार्यं किं
चकारणं यद्भूत्वाभवति तत्कार्यमिति चेत्॥ नन्वभवने भवने च कस्य कर्तृत्वं न सैवान्यस्यवाननावन स्यैवसर्वथाप्यसतः॥ कर्तृत्वधर्मा-
धारत्वानुपपत्तेर्यत्सर्वथाप्यसत्तत्कर्तृत्वधर्माधारो यथा वंध्यास्तनंधयः सर्वथाप्यसत्त्वं परमतेनकार्यमिति॥ भवनं हि स्वरूपस्वीकर- नच
णं तच्च सर्वथाप्यसतो वंध्यास्तनंधयस्येवास्ति दुर्घटं॥ नाप्यन्यस्यास्येव कार्यत्वप्रसंगाद्देवदत्तभवने भवने च कर्तृत्वेनेव कार्यं॥ तस्यापि स-
र्वथाप्यसत्वेन कार्यत्वमुक्तानुमानविरोधात्॥ कारणत्वमपि कार्यमात्रोत्पादकत्वं नियतकार्योत्पादकत्वं वा॥ प्रथमपक्षे सर्वं सर्वस्य २
२८/ कारणं स्यात्ततः॥ कार्यार्थी न कश्चित्प्रतिनियतोपादानं कुर्वीत॥ द्वितीयपक्षोप्ययुपपन्नः स्वबुद्ध्याख्येन कार्यकारणस्वरूपस्य विवेचयि-
तुमशक्यत्वात्॥ यदप्युक्तं रूपं न हि द्वयमानेनैव विशेषणेन विशेष्यते॥ यथा स्वसंवेदनं स्वसंविद्रूपतया कार्यत्वं च कारणात्मं रूपमिति॥ अस-
ताकार्येणोपजनकमिति कारणस्य विशेष्यत्वेचासत्त्वप्रसंगोयत्सर्वथाप्यसतानाविशेष्यते॥ तदसद्यथासत्तृषदंतस्य भावेन विशेष्यमा

णोपदेशः सता सर्वथा कार्य्येण विशेष्यते च परमतेनेश्वरमतेन कारणमिति॥ विकल्पाधिरूढेन कार्य्येण कारणस्य विशेष्यत्वमित्यये
तेन प्रत्याख्यातं॥ न खलु विकल्पाधिरूढं कार्य्यमसद्रूपतां परित्यजति॥ विकल्पाधिरूढेन विशेष्यते च न वास्तवरूपं कारणत्वं सिध्येत्
यद्विकल्पाधिरूढविशेषणसापेक्षं रूपं न न तद्वास्तवं॥ यथा प्रधानवैशेषिकल्पं विकल्पाधिरूढकार्य्यलक्षणविशेषणसापेक्षं च कारणोक्ता
स्यात्वं रूपमिति॥ सर्वथासति च कार्य्ये व्यापियमाणानां कारणानां निरालंबनाप्रवृत्तिरिष्टा स्यात्॥ एवं च विवक्षितं कार्य्यं सन्निवेश
काराकुरोत्पादायुत्पन्नाचपि तत्प्रवृत्तिप्रसंगात्॥ न किंचिदत्यंतमसत् स्यात्॥ न चैतेषां प्रवृत्तौ वा विवक्षितकार्य्यं यत्प्रवृत्तिः सर्वथास
त्वाविशेषाद्यत्सर्वथाप्यसतं च कारणानां प्रवृत्तिर्यथा खपुष्पादी सर्वथाऽसत्त्वभवनमते कार्य्यमिति॥ यदि च विभिन्नत्वनात्यंतकारणानां
प्रवृत्तिः स्यात् तर्हि विवक्षितकारणस्य विवक्षितकार्य्यवत्कार्य्यांतरेऽपि प्रवृत्तिप्रसंगात्कारणांतरकल्पनानर्थक्यं स्यात्॥ अस्तु वा विचारित
मणीयस्वभावं भवन्मते किंचित्कार्य्यं कारणत्वं च तथापि विनष्टात्कारणात्कार्य्यमुत्पद्येत विनष्टाद्विनश्यद्वस्थाद्वा॥ न तावद्विनष्टात्
स्वरूपेणासतः सकलशक्तिविकलस्य तत्प्रतिकारणत्वानुपपत्तेर्यत्स्वरूपेणासत् न ततः किंचित्प्रभवति यथा वंध्यास्तनंधयात् तु तः
स्वरूपेणासच्च परमते कारणमिति॥ विनष्टं कार्य्यं करोतीति किमपि महाद्भुतं न हि मृताः शिखिनः केकायितसंभवः कथं वा नोत्पाद्य
मानं कार्यं सहेतुकं स्यात्॥ अथ विनष्टात्तन्तुद्गमघनेन हि रतोजलांजलिः श्मशानप्रायपभावानामनेकक्षणस्थायित्वाप्रसिद्धेः॥ ने
ह्रि प्रथमक्षणस्य वा कार्य्यकरणास्यव्यापियं तेन तदनंतरं कार्य्यमाविर्भावयंतीति॥ अथोत्पत्तिसमयरूपैव तेन कार्यमाविर्भावयंति॥ तन्न सक
लसंभानोच्छेदप्रसंगः अत्यद्भुत्पाद्य कार्यस्यापि तदैव स्वकार्योत्पादकत्वप्रसंगात्॥ अथ विनश्यद्वस्थात्कारणात्कार्य्यमुत्पद्येत॥ ने
कांतवादिनो विनश्यदवस्थायास्यानुपपत्तेरेकस्य हि वस्तुनः केनचिद्रूपेण विनाशः केनचिच्चावस्थानं विनश्यद्वस्थोच्यते॥ सा
चानेकांतस्वभावत्वादेकांते कथं घटेत किं चासौ विनश्यदवस्था सत्यसती वा परिसमीनि रातयोपि क्षणिकत्वस्वभावधामविनम्भि

न्या·कु·चं· ५

तिकोऽस्यास्तद्गतो विशेषः॥ अथास्तनीकैः कथं नयाकोऽशीकृतस्य जनकत्वं॥ यदसद्रूपेणाकोऽशीकृतं न तत्कस्यचिज्जनकं यथा गगनांभो
जं न सद्रूपतया विनश्यदवस्था कोऽशीकृतं च भवन्मते कारणत्वेनाभिमतं वस्त्विति॥ किंचायं कार्यकारणभावसंबंधः॥ कालनि
को वास्तवो वा काल्पनिको वा कर्म्मफलसंबंधोपि नादृश एव स्यात्॥ नो काल्पनिकत्वप्रसंगस्वपरोभयाल्पचिन्तितरणास्यैहि कदाचिन्न तत्क्ष
णसद्भावस्य संबंधभावात्॥ अथ वास्तवस्तन्नैकांतभिन्नानां क्षणिकार्थानां वास्तवतत्संबंधानुपपत्तेः॥ अथ कार्यस्य भवनं कारण
स्य भवनमित्येतावानेवात्र कार्यकारणभावो न तु परस्य कार्यस्य भवनं तत्कार्यनिष्टमेव। यच्च कारणस्य भवनं तत्तन्निष्टमेवेति नानयोः
कश्चित्संबंधोऽन्यथा घटस्य भवनं पटस्य भवनमित्ययमपि कार्यकारणभावः स्यात्॥ ननु नियतकार्यार्थिना यत्किंचित्कारण
मुपादीयते यथान्वयव्यतिरेकाभ्यां वर्तमानेषु व्यावृत्तिः सततस्मिन्सति भवतीत्यन्वयव्यतिरेकतस्तत्कार्यं तन्न क्षणक्षयैकांतेन्व
यव्यतिरेकासिद्धेः कारणभावस्य च कार्यस्य सदा संभवात्॥ स्वकाले सति समर्थे कारणेऽनंतरं कार्यमुत्पद्यते नासतीत्यन्वयव्यतिरेकसं
भवो॥ किंचित्करस्याविशिष्टः॥ मैथैवरिकार्यं विवक्षितक्षणेन समनंतरभाविना दिनाना विर्भवति॥ एवं पूर्वोत्तरसमानसमयेन्नानाविधेः
क्षणांतरेऽपि नियतकाले हि भवंतात्वेनावश्यं कुतश्चित्पूर्वकालभाविना कुतश्चिदुत्तरकालभाविना केनचित्समानसमयभाविना
भवितव्यं॥ न चैतेषु पूर्वोत्तरसमानसमयवर्त्तिनः संतानांतरक्षणास्तस्य कारणमकिंचित्करत्वादेवं विवक्षितोऽपि क्षणोऽकिंचित्करत्वा
त्पूर्वकालवर्त्यपि न तस्य कारणं स्यात्॥ किंचोपादानसहकारिभावेन कारणं कार्यमाविर्भावयते॥ न च क्षणिकैकांते तद्भावो घटते॥ तत्र
स्वोपादानत्वं पूर्वकालभावित्वं तत्सद्भावसमानदेशत्वं वा कार्यारंभकत्वं वा॥ प्रथमपक्षोऽयुक्तः संतानांतरक्षणेष्वभिचारात् द्वितीयपक्षोप्य
नुपपन्नः सौगतैर्देशसादृश्ययोरनभ्युपगमात्॥ अभ्युपगमे वात्यंतविलक्षणक्षणवादविरोधः॥ नीलादिज्ञानस्य चक्षुरादि
ज्ञानं प्रत्येयोगिचित्तस्य योगिचित्तं प्रत्युपादानत्वाभावः स्यात्तत्त्वं वैसादृश्यात्तरेवं क्षणिकैकांते उपादानकारणस्याव्यवस्थितेः सह

कारिकारणस्याप्यवस्थितिः स्यान्मूलत्वात्तस्याः ॥ अनंतकथंचिदन्वयिन्येवार्थे कार्यकारणभावे उपादानत्वं चोपपद्यते ॥ नन्वेवमन्वयव्य
तिरेकयोस्सन्निबंधनयोः पूर्वाकारपरित्यागाजहद्वृत्तोत्तरोपादानस्य चोपादानलक्षणस्य संभवादनः पूर्वोत्तरचिन्नविशेषाणां का
र्यकारणभावमिच्छतैकद्रव्यात्मकसमन्वयोऽभ्युपगंतव्यः ॥ कार्यकारणभाववत्तदधिगमोप्येकद्रव्यान्वयव्यतिरेकाभ्यामुपपन्नः ॥
प्रत्यक्षानुपलंभपंचकसाधनो हि कार्यकारणभावो बौद्धैरिष्टः ॥ प्रथमं हि कार्यकारणयोरनुपलंभः अनुद्भूतत्वोपलंभलक्षणः ।
तदुत्तरकालं वह्नेरुपलंभस्तदनंतरं च धूमस्य ॥ तदुत्तरकालं वह्नेरनुपलंभे धूमस्याप्यनुपलंभस्तदित्थमनुपलंभद्वयेनोपलंभद्
येन च वह्निधूमयोस्तद्भावो गम्यते ॥ उपलंभद्वयेनानुपलंभद्वयेन वा ॥ प्रथमतो हि वह्निधूमयोरनुपलंभः ॥ तदुत्तरकाले वह्नेरु
पलंभस्तदनंतरं च धूमस्य पुनर्वह्नेरनुपलंभे धूमस्याप्यनुपलंभ इति ॥ तान्येतानि प्रत्यक्षानुपलंभपंचकेन पंच वस्तून्येकसंवित्प्र
सर्वविषयतामेकप्रमात्रैवानीयंते ॥ तावत्कालमप्यशेषसंवेदनानवच्छिन्नान्वयिस्वसंवेदनावभासस्यैवैकप्रमात्राऽवभासो न हि क्रम
वार्त्तिलक्षणमुपायमपगच्छतां ॥ परस्परविषयवार्त्तानभिज्ञानानामेवं धपरामर्शात्मको व्यापारो घटते ॥ विकल्पस्यापि निर्विकल्पकवि
षयस्य व्यापारदर्शनेन युक्तः ॥ यतो वह्निनीलादयोर्थाः निर्विकल्पकेन गृहीतास्तत्रैव तदनुसारी विकल्पः प्रवर्तते ॥ नाधिकविषयप्रतीतेनया
हीनेन प्रमाणांतरत्वं संगतं ॥ अस्तु वा स्यात्तद्व्यापारः तथाप्यसौ क्षणिकोऽक्षणिको वा क्षणिकत्वे नाममात्रभेदः स्यात् आत्माविकल्प
दतिप्रक्षणिकत्वेऽपि निर्विकल्पान्न विशेषस्तथा चैकस्य कार्यकारणतानिष्पत्तिर्न स्यात् ॥ यतिक्षणभेदाद्यस्य हि कारणप्रत्यक्षतानंतर
स्य कार्यप्रत्यक्षता अस्तु वैकस्योभयप्रमातृता तथापि यस्य कारणप्रत्यक्षता । यां कार्यप्रत्यक्षता सोऽन्यो यस्य च कारणोपलंभे कार्यानुपलं
भः सोन्य इति विभिन्नप्रमातृप्रत्यक्षानुपलंभवदेकप्रमातृप्रत्यक्षोपलंभयोरप्यत्यंतभेदात्कथं न तदगमकं स्यात् ॥ तथा हि योपर
स्परतोऽत्यंतविभिन्नो प्रत्यक्षोपलंभौ कस्यचित्कार्यकारणभावमवगच्छतो यथा देवदत्तयज्ञदत्तप्रत्यक्षानुपलंभौ परस्परतः ॥ त्यंतवि

भिन्नो च भवद्भिरभ्युपगम्येत॥ कार्यकारणलक्षणयोः प्रत्यक्षानुपलंभाभ्यां निर्भिन्नैकस्वभावानभ्युपगमे कार्यकारणभावस्याप्र-
तिपत्तिर्घटते॥ तत्कथं तेषां तद्व्यवस्थापने प्रवृत्तिः स्यात्॥ किंच क्षणिकत्वसिद्धेन तेषां कार्यकारणभावप्रबंधेन प्रवर्तितुं युक्तं॥ ननु न-
त्सिद्धं तत्र साधकप्रमाणाभावात्॥ तदभावश्चात्र क्षणिकत्वसिद्धौ प्रसाधयिष्यते॥ किंचार्थानां क्षणिकत्वमिच्छताऽपि प्रमातुरेकत्वमव-
श्याभ्युपगंतव्यं॥ तदभावे पूर्वापरक्षणाविकल्पलक्षणक्षणिकत्वस्य प्रतिपत्त्यनुपपत्तेः पूर्वाकारदर्शनं त्वन्यस्य ज्ञानस्य तं च तत्पुन-
राकारदर्शनं चान्यस्य अनयोस्तत्तावंतं विषयपरिच्छेदमात्रोपक्षीणत्वाक्किं कस्य ज्ञानगृहीतविषयाकारादिलक्षणा यस्मिन्निपतत्य-
स्तु समस्तैषां तद्विषयवार्तानभिज्ञत्वात्॥ यस्तु यथा तद्विषयवार्तानभिज्ञं न तत्तद्विषयस्व विषयस्य वैलक्षण्यपरामर्शसमर्थं॥
यथा चैत्रज्ञानं मित्रज्ञानविषयात् यद्यथा पूर्वज्ञानविषयानभिज्ञं चोत्तरज्ञानमिति॥ न खलु चैत्रेणान्याकारे दृष्टे तदनंतरं मित्रस्या-
न्याकारे दर्शने सति विलक्षणयमिति प्रत्ययप्रभवोऽदृष्ट॥ यच्चान्यदुक्तं॥ यच्चान्यदुक्तं॥ पूर्वोत्तरक्षणाः प्रतिलक्षणविचाराक्षरत्वादित-
द्वयसंदर्शं पूर्वोत्तरक्षणयोर्वर्तमानक्षणकाले सत्त्वेनास्पष्टताभ्यामसंबद्धस्य संज्ञानत्वानुपपत्तेः सतामेव त्वन्योन्यसंबंधानालोके
संततिः प्रसिद्धा पटादिवत्॥ अथ वर्तमानक्षणेनातीतानागतक्षणापेक्षः संतानः स्यात्॥ नन्वनयोर्विनष्टाऽनुत्पन्नत्वेन व्योमोत्पलप्र-
ख्ययोः का क्षणानां॥ अन्यथा शशशृंगवंध्यासुतं संधयापेक्षयापि वर्तमानक्षणस्यैकसंतानतास्यात्॥ ननु चार्थप्रयोगद्वयं चैत्रा-
भिमतो वर्तमानक्षणाल्लघुस्याद्द्युम्नादकाभिमतज्ञानक्षणांतरैकसंतानिको न भवति॥ सत्वा[illegible]लक्षणवत्॥ तथा वि-
वादापन्नानामतीतानागतवर्तमानज्ञानक्षणानां नैकसंतानः सदसद्रूपत्वात् ध्यानलुलक्षणवत्॥ यदप्युक्तमपरामृष्टभेदाः इति ५
तदप्ययुक्तं॥ यतो भेदापरामर्शोऽपि तेषां ज्ञानानां तत्किमस्मदादिसंबंधिनां योगिसंबंधिनां वा न तावद्यक्षः अनुपपन्नोऽस्मदादेरतीतादि-
क्षणगोचरस्य ज्ञानस्यासंभवात्॥ स्वहेतुक्षणमात्रविषयानस्य सौगतैरभ्युपगमात्॥ द्वितीयपक्षोप्यसंभाव्ये योगिज्ञानस्य विष-

नकल्पनाजालतयाभेदपरामर्शहेतुत्वात्॥ अथ स्वत एव तत्त्वातीतानागतक्षणयोरसत्वेनाभेदपरामर्शहेतुत्वानुपपत्तेर्यदस-
न्तरभेदपरामर्शहेतुर्यथा वंध्यासुतयोः स्तोचातीतानागतयोः ज्ञानक्षणयोरिति॥ वर्तमानज्ञानक्षणस्याप्यतीतानागतज्ञा-
नक्षणाभ्यां सहनाभेदपरामर्शहेतुत्वं तत्काले सत्वात्॥ यद्यत्काले सन्निहितस्य तेन सहैकसंतानहेतुर्भेदपरामर्शो यथा रावणा-
शंखचक्रवर्त्यादिना अतीतानागतक्षणकाले असंभवद्वर्तमानक्षण इति॥ ततः प्रतिक्षणविशरारुरूपाणां मुक्तप्रकारेणाका-
र्यकारणभावस्याभेदपरामर्शस्य चानुपपत्तेः॥ कथं पंचोपकलक्षणः संतानो व्यवतिष्ठेत॥ अस्तु वा तथाप्यसौ सत्यादसद्वा यदि स-
न्॥ तदासावनित्यो नित्यो वा प्रथमपक्षे संतानिभ्यो ऽस्याविशेषात्कथं कर्म्मफलसंबंधव्यवस्थाहेतुत्वं यतः कृतनाशाकृताभ्याग-
मदोषो यौ न पातो न स्यात्॥ द्वितीयपक्षे तु नास्ति विवादो नार्थ्यात्मन एव संतान इति नामांतरकरणात्॥ अथासन् कथं तद्व्यवस्थाहे-
तुर्यदसन्न तत्कस्यचिद्व्यवस्थाहेतुर्यथा खरविषाणमसंश्चभवन्मते संतान इति॥ यदप्युक्तं भेदाभेदादिविकल्पैरवक्तव्य एव सं-
तानो वस्तुत्वादित्यादि तदप्ययुक्तमवस्तुनो वस्तुव्यवस्थाहेतुत्वासंभवात्॥ तथाहि॥ संतानः कर्म्मफलसंबंधादिव्यवस्थाहेतु-
र्नभवत्यवस्तुत्वादाकाशकुशेशयवत्॥ न च व्यवस्थाहेतुत्वात् वस्तुत्वविरोधोऽपि वस्तु व्यवस्थाहेतुर्न्नतरवस्तु यथा प्रत्यक्षादिकर्म्मा-
दिवस्तुव्यवस्थाहेतुरभवद्भिः परिकल्पितः संतान इति॥ वस्तुत्वे चास्य संतानिभ्यो भेदोऽभेदो वा स्यात् भेदे प्रतिक्षणं नापि तद्धि
नष्टव्यं॥ ततो भिन्नत्वात्तत्वरूपवत् संतानिवत्संतानस्य भेदप्रसंगश्च तत एव तद्॥ भेदे नित्यो नित्यो वा स्यात् नित्यत्वे स एव नाम
मात्रभेदः सत्वादेर्नश्वरत्वे साध्याने कांतिकत्वं च॥ अनित्यत्वे तु संतानिवद्भेदात्कथं कर्म्मादिप्रतिनियमनिबंधनत्वं कथं वा रूपस्कं-
धपंचकव्यवस्था॥ संतानतस्य पंचस्कंधस्य प्रसंगात् किं चास्य तदिकल्पैरवक्तव्यत्वं सर्म्मत्वाहत्तुरज्ञाकेरज्ञानाद्वा॥ न तावदाद्यविकल्पो
युक्तः संतानस्यासत्वे कर्म्मादिव्यवस्थाहेतुत्वाभावप्रतिपादनात्॥ अस्तु वा सत्वं तथाप्यसद्रूपस्यासद्रूपाद्वेदोपपत्तेः भेदेन वक्तुं शक्य

न्या॰कु॰चं॰
६

केश्च कथमसौ तद्रूपोप्यवक्तव्यः स्यात्॥ असद्रूपो त्वर्थः सद्रूपतयावक्तुमशक्यो न पुनरसद्रूपतयापि द्वितीयविकल्पोप्यसांप्रतं
सुगतस्यावित्वचांक्तिसद्भावाभ्युपगमात्॥ तृतीयविकल्पोप्ययुक्तस्तस्यासर्वज्ञत्वप्रसंगात्॥ यच्चोक्तं संवृतिः संतानरहिततर तु
तं तीवासंगती संवृत्तेर्मृषारूपतया दृष्टादृष्टप्रयोजनप्रसाधकत्वानुपपत्तेः॥ किंच संवृतिः कल्पनोच्यते सा वा सति मुख्येन प्रवर्त्तते
ऽन्यत्र प्रसिद्धस्य धर्म्मस्यान्यत्राध्यारोपः कल्पनेत्यभिधानात्॥ न च मुख्यरूपतयान्वितं रूपं भवतः क्वापि प्रसिद्धं यत्र वीतरस-
गोपुकार्य्यकारणभावप्रबंधेन प्रवर्त्तमानेषु कल्प्येत॥ अतः संवृतिरूपसंतानान्यथानुपपत्त्याप्येकप्रमातृसद्भावोऽवसीयते॥ अत्य ते
भिन्नानामन्यथानुपपत्तेश्च न हि यमहमद्राक्षं तमेतर्हि स्पृशामीत्येकानुसंधानं व्यतिरेके रोवं विधमनुसंधानं संभवति॥ प्रति
सरणाविर्भवतामपरापरज्ञानानां परस्परस्वरूपानभिज्ञतयान्योन्यं प्रत्यवमर्शासामर्थ्यात्॥ परस्परस्वरूपानभिज्ञानां
नरम्योन्यप्रत्यवमर्शविसमर्थं यथा देवदत्तयज्ञदत्तविज्ञानं परस्परस्वरूपानभिज्ञं चोक्तप्रकारं रूपस्पर्शादिज्ञानमिति॥ अ
थैकमेवोभयप्रतिसंधानात्मकमेतत् ज्ञानमिष्यते॥ कथमेवं सति क्षणिकत्वं तदात्मनो ज्ञानस्यानेकक्षणस्थायित्वात्॥ कथं वा नैरा
त्म्यवादः तस्यैवात्मत्वोपपत्तेरेकस्य ग्रहणस्मरणानुसंधातृसिद्धत्वात्॥ न च वस्तुज्ञानादर्थान्तरमात्मानं प्रतिजानीमः॥ पूर्वोत्तरचि
त्तवर्त्तिनोनुस्यूतचैतन्यस्यात्मत्वप्रतिज्ञानात्॥ नहि भिद्यमानानामननुभूतपूर्वं किंचिद्वस्तु किं नहि प्रतिनियतार्थावभासिज्ञाने
घटमहमिक्ष्याप्राक्षिप्रतिभासमानमन्वितं चिद्रूपं तत्त्वमभ्युपगमे प्रतिसंधानवार्त्तोच्छेदः स्यात्॥ न ह्यन्येनानुभूते घटेन्यस्य स दि
स्मरणं घटदर्शनिप्रतिसंधानं प्रतीतं॥ अन्यथा प्रथमदर्शनेपि तत्स्यात्॥ अथ द्वितीयदर्शने सत्येव तद्भवति॥ नत्वेकस्यावस्थातुस्तद्द्वि
तीयदर्शनमप्येकस्य वा॥ यद्येकस्यात्मत्वसिद्धिः अनेकपक्षे त्वेकावस्थातृरहितत्वाद्देवदत्तदर्शनानंतरं यज्ञदत्तदर्शने प्रति
संधानानुपपत्तिः॥ नहि देवदत्तानुभूतमर्थं यज्ञदत्तः स्मृत्यं प्रतिसंधत्ते यमहमद्राक्षं देवदत्तस्तमेवाहं यज्ञदत्तः स्पृशामीति॥ एतेना कु

तेन दृष्टस्य स्मरामीति क्षणिकचित्तपक्षे तदपि वा न स्यात् सर्वोत्तरचित्तक्षणयोर्विभिन्नकालत्वेनान्यार्थदर्शनाभावात्॥ अभि
न्नकालयोरेकत्वहिरेकस्य तदनन्तरस्य पश्यतोऽन्यार्थदर्शिनः सतिरनेन दृष्टस्य स्मरामीति प्रतिसंधानं प्रपनीनं॥ यदपि सादृश्यात्प्रदीपवत्प्रतिसंधानमभि
हितं॥ तस्य प्रकृतेन दृष्टश्रुतकं दर्शनदर्शिनोः क्षणिकयोर्वैयप्यात् प्रदीपादौ हि प्रमातुरवस्थाने सति विषयभेदे सादृश्यात्प्रतिसंधानं युक्तं नात्र
प्रमातृप्रमेययोरत्यन्तभेदात्॥ नत्वान्येन दृष्टेऽन्यस्य सादृश्यादन्यथा दृष्टे यामीति संधानं दृष्टं॥ सोऽयमित्यादिज्ञानं हि स्मृतिमपेक्षते स्मृतिः
संस्कारं सोऽप्यनुभवमित्यनुभवादिज्ञानसूक्ष्मफलानामनुस्यूतैकप्रमातृसत्त्वानुप्रवेशो सत्येवानुभवात्स्मृतिरित्याद्युपपद्यते॥ ना
न्यथा प्रदीपवत्प्रमातुर्मुहुर्निरन्वयनिरुद्धत्वो प्रबोधेन दर्शितो नोभिन्नसंतानवदन्यत्वात्॥ न च पूर्वबुद्धिविशेषात् कुतश्चिद्विधानेनोत्तरं
कुर्यात् न तु सम्बन्धेन संस्कारादेः संभवे इत्यभिधातव्यं॥ पूर्वबुद्धिविशेषस्यानुभवरूपत्वात् न च भवपूर्वं न स्यादप्यनुभवरूपस्यैवात्य-
तिप्रसंगात्॥ प्रमातुरन्वितत्वाभावे च रूपलादिरूपोपलंभेन दृष्टपविनाभाविषु गंधरसादिषु विभिन्नप्रमातृकस्मरणाद्दृष्टैकस्यैवा
भिलाषो रसोपपत्ते स्वरूपभोगाय प्रवृत्तिरिति दुर्घटा स्यादिष्टानिष्टयोः प्राप्तिपरिहारेच्छा त्वेकस्यैवानुभवस्मरणाधारैकप्रमातृनिष्ठानन्त
रं नियमेनोत्पद्यते॥ यथा देवदत्तानुभूते यज्ञदत्ते स्मृतेच्छानुभवाद्यनंतरं नियमेनोत्पद्यते च तत्प्राप्तिपरिहारार्थं प्रवृत्तिर्न खलु विभिन्नक
र्तृकत्वे देवदत्तेनानुभूते दृष्टेऽनिष्टे वा प्रवृत्तिप्राप्तिपरिहारार्थं यज्ञदत्तस्येच्छा प्रादुर्भवंतीत्यतो नोपपत्तेः नो विभिन्नकर्तृकत्वादनुभवनेमानेन प्रमे
ककर्तृत्वेनैव व्याप्यते॥ ततो य एवानुभवति स्मरति च स एव कृतौ न्यैकप्रमातृसिद्धिः॥ अथैकप्रमातृभावोऽपि वासनावशादेवेच्छा
प्रभवतीत्युच्यते॥ ननु सा वासना वस्तु वस्तु वा स्यादवस्तुत्वे नाममात्रभेदो वासनात्मेति च॥ अवस्तुत्वे गगनांभोरुहवत्तद्धेतुत्वानुपप-
त्तिः॥ क्षणिकत्वे च वास्यवासकभावासंभवः स्थिरत्वे स्थिरत्वेन तदर्शनादृष्टश्रुतपादिवत्तदर्थदर्शनादिस्मृतेरेकरूपत्वे चात्मनः॥ क्रम
यौगपद्याभ्यामर्थक्रियाकारित्वानुपपत्तिरिति चेन्न तस्य सर्वथा नित्यैकरूपत्वस्यात्मनोऽनभ्युपगमात् स्वपरिणामिनित्यताप्रतिज्ञा

व्या·कु·चं·
१

त्वात्तत्र च क्रमयौगपद्याभ्यामर्थक्रियाकारित्वं यथा संभवति तथा क्षणिकत्वसिद्धिप्रघट्टके दर्शितं पारदर्शिपथेन॥ यदप्युक्तं सुखादीनां क्रमशो वाऽऽत्मा व्यापको भवतु॥ किमेकेन स्वभावेन भवत्यनेकेन वेत्यादि॥ तदप्यसंगतम् अनेकस्वभावैरेवानेन तेषां व्याप्यत्वात् चैवानव-स्थार्थांतरभूतानां तेषामर्थांतरभूतैः स्वभावैर्व्याप्त्यनभ्युपगमात्॥ तद्रूपतया परिणामो हि तद्व्याप्तिश्चित्रज्ञाने नीलाद्याकारव्याप्ति-वत्॥ नहि तद्रूपतया परिणामो हि तद्व्याप्तिश्चित्रज्ञाने नीलाद्याकारव्याप्तिवत्॥ नहि तद्रूपतया परिणतेरन्या तु तदाकारव्याप्तिरस्ति तज्ज्ञानात् तदाकाराणामर्थांतरत्वानभ्युपगमात्॥ अभ्युपगमे वा तद्दोषोपनिपातप्रसक्तिः॥ यथा चित्रज्ञानस्य नीलाद्याकारात्मक-त्वात्तद्व्यापिनः स्वसंवेदनात् न तत्प्रसक्तिः तद्वदात्मनोऽपि सत्क्रमेण च सुखाद्यनेकाकारव्यापिनः स्वसंवेदनात् कथं तद्दोषोपनि-पातः स्यात्॥ नाहिदृष्टेः सुषुप्तनिर्भासनतत्त्वरूपैव बंधमोक्षयोरभावः स्यात्॥ तयोरेकाधिकरणत्वाभावात् तथाहि। विवादापन्नौ बंध-मोक्षावेकाधिकरणौ तत्त्वात् लोकप्रसिद्धबंधमोक्षवत्॥ सर्वथा भेदे हि बद्धमुक्तपर्याययोरन्यो बद्धोऽन्यश्च मुच्यते। इति बद्धस्यैव-मोक्षार्था प्रवृत्तिर्न स्यात्॥ संतानापेक्षया बद्धस्यैव मोक्ष इत्यप्यनल्पतमोविलसितं। संतानस्यैवोक्तप्रकारेणासंभवात्॥ तथा-चिद्धि तत्संविताधीनत्वस्मृतिर्दर्शनयशस्विन्यैककालापहृवेद्धर्पटरीति तदेवं कंटकशुद्धिं विधाय स्वमतेन प्रमाणादिलक्षणप्ररूपणार्थमा-रब्धमिदमुपक्रमते॥ ननु संबंधाभिधेयवाक्यानुष्ठानेष्टप्रयोजनवत्त्वेन शास्त्राणि विद्वद्भिरादियंते नेतराणि॥ अतः शास्त्रमिद-मारभ्यमाणमभिधेयतत्संबंधवत्तद्रहितं वा स्यात्॥ यदि तद्रहितं तत्प्रारंभप्रयासोऽभिः फलस्यानुन्मत्ततयाकवत्॥ प्रेक्षावतामना-दरणीयत्वात्॥ तद्वद्वेदस्तु तथापि तदभिधेयं निःप्रयोजनं सप्रयोजनं वा॥ निःप्रयोजनं चेत्तर्हि तत्प्रारंभप्रयासो व्यर्थः॥ काकदंतप-रीक्षावत्त्रग्रामारिण्यकानामारणसंभवात्॥ अथ सप्रयोजनं तत्किमभिमतप्रयोजनवदनभिमतप्रयोजनवत्त्वेऽपि तत्प्रयोजनस्या-शक्यानुष्ठानत्वे सर्वज्वरहरतक्षकचूडारत्नालंकारोपदेशवत्कथं कस्यचित्तत्रोपादेयता स्यादित्यारेकापनोदार्थं मसदृशसकल-

शास्त्रार्थसंग्रहसमर्थमादिश्लोकमाह॥ श्लोक॥ प्रत्यक्षं विशदं ज्ञानं॥ मुख्यसंव्यवहारतः॥ परोक्षं शेषविज्ञानं॥ प्रमाणे इति संग्र
हः॥१॥ इति त्रिविधा हि शास्त्राणां प्रवृत्तिरुद्देशो लक्षणं परीक्षा चेति॥ तत्र नाममात्रेणार्थानामभिधानमुद्देशः॥ उद्दिष्टस्य स्वरूपव्यवस्थापको ध
र्मो लक्षणं॥ उद्दिष्टस्य लक्षितस्य च यथावल्लक्षणमुपपद्यते नवेति प्रमाणतोऽर्थावधारणं परीक्षा विभागस्योद्देश एवांतर्भवति॥ सामान्यसंज्ञ
या कीर्तितमुद्देशः॥ प्रकारभेदसंज्ञया पुनः कीर्तनं विभाग इति तत्र प्रत्यक्षेतरत्प्रमाणभेदाः श्रुतभेदाश्च नयनिक्षेपा लक्षणसंख्याविषयफ
लं प्रतसमन्विताः शास्त्रस्यास्याभिधेयाः स्युः देवान्तः सकलशास्त्रार्थस्याभिधेयस्याभिधानेनानेन प्रतिपादनादभिधेयरहितत्वाशंकाव्युदा
सेन॥ न च शास्त्रवाच्यवाचकभावलक्षणः संबंध इति॥ संबंधरहितत्वाशंकानिरासः॥ शक्यानुष्ठानेष्टप्रयोजनं तु साक्षान्नयलक्षणाव्यु
त्पत्तिनिरासः परं परया तु स्वर्गापवर्गः श्रेयसावाप्तिः। परव्युत्पादनार्थं हि शास्त्रकृतः प्रवृत्तिः। न चाभिधेयादिरहितं शास्त्रं कुर्वता परो व्यु
त्पादितो भवति॥ तथाविधस्यास्य परप्रतारकत्वप्रसंगात॥ स च व्युत्पाद्यत्वेनाभिप्रेतः परस्त्रिधा विधेयः॥ संक्षेपरुचिर्विस्तररुचिर्म
ध्यमरुचिश्चेति॥ स च त्रिविधोपि परः प्रत्येकं चतुर्द्धा भिद्यते॥ अव्युत्पन्नो व्युत्पन्नः संदिग्धो विपर्यस्तश्च॥ तत्राव्युत्पन्नो विपर्यस्तश्च
न भवति पात्रं व्युत्पत्तेः विरक्तत्वात॥ अव्युत्पन्नस्तु स्वभावतो व्युत्पित्सारहितोपि लोभभयादिना व्युत्पित्सायामुत्पादितायां व्युत्पाद्यो भव
त्येव॥ यथा पितुः पुत्रः संदिग्धोपि यदा स्वगतसंशयस्यापनयनं क्रमेण तयोः कः सम्यग्निष्ठः परपक्षयोर्यद्दूषणदोषनिरूपणाद्वारेणाप्र
बोधयतु॥ भवानिति तत्त्वज्ञानार्थमाचार्यमुपसर्पति॥ तदेव व्युत्पित्सासंभवात्त्वं लिपायो नान्यदा॥ ननु प्रसिद्धे प्रमाणे अभिधेया-
दिमत्ता शास्त्रस्याव्युत्पत्त्यानः॥ न तु च तत्प्रसिद्धं तस्य हि प्रसिद्धिः प्रमाणांतरात्तदंतरेणानावस्थितप्रमाणांतरात्तदानवस्थाकुतः प्रमा-
णांतरस्यापि प्रमाणांतरात्प्रसिद्धिप्रसंगात॥ प्रमाणांतरमंतरेणान्तत्सिद्धौ च सर्वं सर्वस्येष्टं सिद्ध्येत् तथा च सकलशून्यतासिद्धेरपि प्रसं
गात कथमस्याभिधेयादिमत्तासिद्धेरिति॥ तदसमीक्षिताभिधानं सकलशून्यतामप्युपगच्छताऽपि प्रमाणाभावस्य कर्तुमशक्यत्वा

त॥ न चाखिलसकलशून्यवादिनोऽप्यस्ति प्रमाणाभिधानिश्चेष्टाः साधनदूषणान्यथानुपपत्तेः नैवैवमनवस्था॥ इष्टसिद्धेरनिष्टप्रतिषेधस्य च
प्रतिप्राणिसिद्धत्वेनाशेषवादिनां निर्विवादत्वात् प्रमाणानपेक्षत्वानुपपत्तेः॥ अनेकान्तेऽप्यनेन सकलशून्यतावादाद्यार्थसिद्ध्यवसरे विस्तरतर
त्वलमतिप्रसंगेन॥ ननु सिद्धेऽपि प्रमाणसद्भावे तत्स्वरूपविशेषनिश्चयासिद्धिर्ज्ञानात्मा न रूपतया तत्त्ववादिनां विप्रतिपत्तेरित्याह॥ ज्ञान
मिति यन्निर्दिष्टनिष्टसाधनदूषणान्यथानुपपत्तितः। प्रसाधितं प्रमाणं न ज्ञानं प्रमाणत्वाद् यत्पुनर्ज्ञानं न भवति॥ न तत्प्रमाणं यथा घटा
दि प्रमाणं चेदं विवादापन्नं तस्माज्ज्ञानमिति सामान्यप्रमाणलक्षणं॥ नन्वेवं लक्षणलक्षितं प्रमाणं प्रत्यक्षपरोक्षप्रकारेण द्विधाभिद्यत इत्ये
तत्प्रमाणमित्यनेन दर्शयति॥ न चाद्यप्रकारस्वरूपं प्रत्यक्षं विशदमित्यनेन प्ररूपयति॥ वक्ष्यमाणलक्षणवैशद्येन यदुपलक्षितं ज्ञानं त
देव प्रत्यक्षं॥ प्रयोगो विशदस्वभावमेव ज्ञानं प्रत्यक्षं प्रमाणं न रत्नान्यथानुपपत्तेः न चायमसिद्धो हेतुस्तदन्तरेण तस्य वक्ष्यमाणत्वात्
न चैवंविधं प्रत्यक्षं द्वेधा प्रतिपत्तव्यं कथमित्याह॥ मुख्यसंव्यवहारतः इति॥ इंद्रियाद्यनपेक्षं प्रतिबंधकापायोपेतात्मना च निबंधनं स्वविष
ये निःशेषतो विशदमवधिमनःपर्ययकेवलाख्यं ज्ञानं मुख्यतः प्रत्यक्षं इंद्रियनिमित्तं तु स्वविषये देशतो विशदं चक्षुरादिज्ञानं संव्यवहारतः
प्रत्यक्षं कथं पुनरनयोरक्षाश्रितज्ञानस्य प्रत्यक्षव्यपदेश इति चेत्, अक्षनिमित्तसद्भावाद् आश्रितत्वं हि प्रत्यक्षशब्दस्य व्युत्पत्तिनिमित्तं गतिकि
येव गोशब्दस्य प्रवृत्तिनिमित्तं त्वेकार्थसमवायिना अक्षाश्रितत्वेनोपलक्षितत्वेनोपलक्षितमर्थसाक्षात्कारित्वं गतिक्रिययोपलक्षितगोत्ववद्गो-
शब्दस्यान्यदिशाब्दस्य व्युत्पत्तिनिमित्तमन्यद्वाच्यमन्यथा गच्छंत्येव गौरित्युच्येत॥ नान्या व्युत्पत्तिनिमित्ताभावात्॥ जातत्वं तं च गतिकि
यापरिणतव्युत्पत्तिनिमित्तसद्भावाद्गोशब्दवाच्यं स्यात्॥ यदि वा व्युत्पत्तिनिमित्तमप्यत्र विद्यत एव॥ तथाप्यक्षशब्दोऽपींद्रियवदात्मन्यपि प्र ८
वर्तते॥ अश्नोति व्याप्नोति जानातीत्यक्ष आत्मेति व्युत्पत्तेः तमेव क्षीणोपशांतावरणं क्षीणावरणं वा प्रति नियतस्य ज्ञानस्य प्रत्यक्षशब्दा
भिधापनानुपपत्तेश्च॥ तच्चेदं द्विविधमपि प्रत्यक्षं किं विशिष्टमित्याह॥ विज्ञानमिति निश्चितिविषयं स्वपरस्वरूपवेदिज्ञानभासनं यस्य पस्मिन्या तद्विज्ञानं॥

अनेन। स्वस्यैव परस्यैव वा ज्ञानं याद्दृकमित्येकांतो निरस्तः॥ अथवा विशिष्टं बाधवर्ज्जितं तं यस्य यस्मिन्वेति व्याख्येयं॥ अनेनापि भ्रांतमेव
स्वपरस्वरूपयोः सकलं ज्ञानमित्येकांतः प्रत्याख्यातः परिवादिना नाबुद्ध्यपर्य्याय सामान्यविशेषरूपार्थविषयत्वात्तस्य यस्मिन्वे
ति वृत्तिपतव्यं॥ अनेनापि द्रव्यमात्रस्य पर्य्यायमात्रस्य सामान्यविशेषयोरत्यंतरमात्रस्य अन्योन्यतन्मात्रस्य अन्योन्यविभिन्नोभयस्य
स्य वा ज्ञानं याद्दृकमित्येकांतः प्रतिव्यूढः॥ विगतं वा स्वरूपे पररूपे वा पेक्ष्यं न यस्य न तथोक्तमित्यनेनापि। यत्रैकजनयेरेनां न वैवास्य
प्रमाणतेत्येकांतः प्रतिक्षिप्तः॥ न नेदकांतानां च प्रपंचतः प्रतिक्षेपो ग्रंथविधास्यत इत्यलमतिप्रसंगेन॥ इदानीं द्वितीयं प्रमाणप्रकारं प
रोक्षं चोच्यमित्यनेन प्ररूपयति॥ यत्तद्विशदस्वरूपज्ञानात्॥ शेषमविशदस्वभावं ज्ञानं तत्परोक्षं किंविशिष्टं तदित्याह विज्ञानमिति॥
अस्य व्याख्यानं पूर्ववदत्रापि द्रष्टव्यं॥ तथा च प्रमाणविशेषलक्षणस्य द्विप्रकारस्यैव प्रसिद्धेः द्वे एव प्रमाणे प्रसिद्धे सकलतद्व्यक्ति
भेदानामत्रैवांतर्भावात् इति निर्देशपत्तात्॥ प्रमाणे इति संख्या इति द्वय प्रमाणे इत्येवं संग्रहः॥ सकलशास्त्रार्थस्येति॥ तत्र प्रमाणस्य यत् ज्ञा
नमिति सामान्यलक्षणं तेनेतत्संनिकर्षादेरित्यादिनास्य समर्थयते॥ सन्निकर्षः इंद्रियार्थसंबंधः सत्त्वादिर्यस्य कारकसाकल्यादिपरस्यादेः
वयंभूतस्याज्ञानस्याचेतनस्य प्रमाणत्वमनुपपन्नं कस्यैवार्थांतरवत्॥ अपि सन्निकर्षादिरात्मादन्यः प्रमेयाद्यर्थादिकत्वं त्वंतस्यैव नद्वत्॥ ननु प्र
माणत्वं स्यादज्ञानत्वं च विरोधाभावात् नः संदिग्धविपक्षव्यावृत्तिकत्वादनैकांतिकत्वमित्यनुपपन्नमज्ञानविरोधिना ज्ञानत्वेन प्रमाणत्वस्य
व्याप्तत्वात्तत्र न हि विरोधसिद्धेः प्रकर्षेणाहि संशयादिव्यवच्छेदलक्षणेन मीयते॥ व्यवधानेन परिच्छिद्यतेयेनार्थस्तत्प्रमाणं तत्कथमज्ञानरूपं
सन्निकर्षादिस्वभावं परेणे॥ न खलु सन्निकर्षादिना किंचिन्मीयते ज्ञानकल्पना नर्थक्यप्रसंगात्॥ अतो ज्ञानमेव प्रमाणमित्युपपत्तितस्तु अ
भ्युपगंतव्यं॥ रु॥ स्यान्मतिरेषा ज्ञानमेव प्रमाणमित्ययथा ज्ञानमनुपपन्नमज्ञानरूपस्यापि सन्निकर्षादेः प्रमाजनकत्वेन प्रमाणत्वोपप
त्तेः॥ तथाहि॥ प्रमाजनकं प्रमाणमिति स्फुटं व्याचक्षाणेन भाष्यकारेणोपलब्धिसाधनानि प्रमाणानीत्युक्तं॥ न च व्याख्यातॄणां मतभेदः

न्या·कु·चं· केचित्तु सन्निकर्षोर्थोपलब्धौ साधकतमत्वात्प्रमाणमिति प्रतिपन्नाः अन्ये तु कारकसाकल्यं तच्चाद्यमनन्तरं तत्समर्थयन्ते। नचादृष्टसन्निकर्षे
९ सत्यर्थोपलब्धौ साधकतमत्वात्प्रमाणं साधकतमत्वं हि प्रमाणत्वेन व्याप्तं न तु नर्ते नान्तरं ज्ञानं तत्त्वं वा संज्ञयादिवत्समेयाथैव च। नन्वर्थो
पलब्धौ सन्निकर्षस्यास्त्येव न त्वसन्निकृष्टेर्थे ज्ञानमुत्पत्तुमर्हति सर्वत्र चार्थेन तु न्यनियमसंगात्॥ नत्सद्भावाद्भिरकं च प्रमाणं त्व्यवहितार्थानुप
लब्धिरेव यदि त्वसन्निकृष्टमप्यर्थं चक्षुरादीन्द्रियं गृह्णीयात्तर्हि व्यवहितमपि किं न गृह्णीयादविशेषात्॥ किं चेन्द्रियं कारकं त्वा सन्निकृ
ष्टं न फलप्रादुर्भावाय प्रभवति॥ तथाहीन्द्रियं नासन्निकृष्टे फलमुत्पादयति कारकत्वाद्वास्यादिवत्॥ स्पर्शनवदीन्द्रियं च प्राप्यकारि
त्वं सुस्पष्टं तत्साधर्म्यादिन्द्रियत्वेनेरपि तत्कल्पना न विरोधात्॥ स चैवं प्रसिद्धस्वरूपः सन्निकर्षः षट्प्रकारो भवति॥ संयोगः संयुक्त
समवायः संयुक्तसमवेतसमवायः समवेतसमवायः संबद्धविशेषणीभावश्चेति॥ तत्र चक्षुषो घटेन संयोगः तत्समवेते गुणक
र्म्मसामान्ये संयुक्तसमवायः गुणकर्म्मसमवेतेषु सामान्येषु संयुक्तसमवेतसमवायः श्रोत्रस्य शब्देन समवायः शब्दत्वेन समवेतस
मवायः घटाद्यभावेन समवायेन च संबद्धविशेषणीभावः तत्प्रसक्तं चोत्पद्यमानं चतुस्त्रिद्विसन्निकर्षादुत्पद्यते॥ तत्र बाह्येरूपादौ
चतुःसन्निकर्षादेव प्रत्यक्षमुत्पद्यते॥ आत्मादिमनसा युक्तेन मनइन्द्रियेणेन्द्रियमर्थेन ति सुखादौ तु सन्निकर्षादेव॥ न तु चक्षुरादि
व्यापाराभावात् आत्मनि तु योगिनां द्वयोरेवात्ममनसोः सन्निकर्षादिति नियमश्च प्रतिनिषिध्यते॥ यत्तावदुक्तं सन्निकर्ष एव साधकतमत्वा-
त्प्रमाणमित्यादि तत्र समीचीनमभिधानं तस्यापि प्रमितौ साधकतमत्वासंभवात्॥ यद्भावे हि प्रमितेर्भाववत्ता यदभावे चाभाववत्ता तत्त
त्साधकतमं॥ भावाभावयोस्तद्वत्ता साधकतमत्वमित्यभिधानात्॥ न चैतत्सन्निकर्षे संभवति॥ तस्मिन् सत्यपि क्वचित्प्रमित्यनुपपत्तेः ९
आकाशादिना हि घटवच्चक्षुषः संयोगोस्ति यतस्तेन चासौ तत्प्रमितिमुत्पादयति॥ तथाकाशपरमाणुपांसंयोगादिविशेषाः प्रत्यक्षस्त्वा
त्वेऽनुकत्वाभावानुपगमात्॥ परविशेषेपि यद्धिविशेषेण तन्न तदुक्तं यथापरमाणोरविशेषेपि विशिष्यमाणो घटपटो सन्निकर्षविशेषे

विशिष्यानेव प्रमितिरिति॥ तस्मादप्यवेतालम्बनमव्यवधानेन फलमुत्पादयति॥ नेदं वनं च साधकतमं यथापवरकान्तर्व्वर्त्तिपदार्थप्रका
शे प्रदीपः॥ अव्यवधानेन प्रमितिमुत्पादयति॥ चेत्थं स्वविषये चितानं तस्मान्नेदं वनं च साधकतमं॥ तस्मात्तत्प्रमाणं तत्पुनः सन्नि
कर्षो विपर्य्ययो किं च सन्निकर्षमात्रमपि च प्रमाणान्तरं द्विशेषो वा॥ नन्वा च सन्निकर्षमात्रं संशयादावप्यस्यास्ति विशेषतः अप्रामाण्यप्रसंगा
द्विशिष्टश्चेत्किमिदं तस्य वैशिष्ट्यं विशिष्टकारणात्मलाभो विशिष्टप्रमोत्पादकत्वं वा॥ प्रथमपक्षे यदादिवदाकाशादेरप्यस्य प्रामा-
ण्यप्रसंगो विशिष्टकारणात्मलाभस्योभयत्राविशेषात्॥ न द्वितीयपक्षो घटाय धर्म्मस्य वैशिष्ट्यं प्रामाण्यं वासौ कुर्य्यान्नाकाशे॥ द्वि
तीयपक्षोप्यनुपपन्नो विशिष्टप्रमोत्पादकत्वस्य सन्निकर्षप्रमितिं प्रति साधकतमत्वाभावतोऽसिद्धत्वतद्भावतोऽसिद्धत्वतद्भाववर्ण-
नं तस्यैव प्रतिपादितः॥ सिद्धे वा कथमाकाशादिपरिहारेण घटादावेवास्य तत्स्यात्॥ उभयत्राप्यविशेषेणासौ प्रमामुत्पादयेन्नैक
त्रापि वा॥ नन्वाकाशादावेवं असौ प्रमां नोत्पादयति योग्यताभावान्न घटादेर्विपर्य्ययात्॥ ननु केयं योग्यता नाम शक्तिः प्रतिबंधा-
भावो वा शक्तिश्चेत्किमतीन्द्रिया सहकारिसन्निधिलक्षणा वा॥ प्रथमपक्षोऽयुक्तोऽप्रसिद्धान्तप्रसंगात्॥ द्वितीयपक्षे तु कारकसाकल्यप
समाप्यशेषदोषानुषंगः सहकारिसान्निध्यस्य कारकसाकल्यस्वरूपतानतिक्रमात्॥ सहकारिकारणं च विषयगतातिशयविशेषः करणगतो
ट्वं धर्म्मविशेषो धर्म्मश्च रूपादिद्रव्यं गुणः कर्म्म वा स्यात्॥ यदि विषयगतातिशयविशेषः स किं रूपादिसमवायो हृद्यतनाया॥ नतावद्रू
पादिसमवायोस्य प्रमोत्पत्तिं प्रत्यकारणत्वात्॥ कथमन्यथा गुणकर्म्मसामान्येषु नद्रूपादिनेषु प्रमोत्पत्तिः स्यात्॥ कथं वा परमाणौ न द्रु
ग्पत्तिर्न्निस्यात न च तत्समवायसंभवात्॥ महत्त्वानेकद्रव्यवत्त्वाद्रूपविशेषाच्च रूपोपलब्धिरित्यभ्युपगमेपि नेत्रमलांजनादौ प्रमोत्पत्तिप्र
संगस्तद्विशेषात्॥ अथ द्रव्यताप्रकाशाराच स्येव॥ कथमन्यथास्य स्थूरचनात्वमक्षरणानां च पार्श्वे कांचकामलापत्रपटलस्व-
मालोकादि सह द्रव्यत्वं॥ वाद्रूपमप्याकाशादौ संभवत्येव॥ धर्म्मविशेषोप्याकाशादिना चक्षुषः संयोगे सहकारिण्यस्त्येव॥ न च तस्तु॥

न्या.कु.चं.
१०

तस्येतेनविरोधोयेनतत्सद्भावेधर्मिविशेषस्यानवधानेः प्रध्वंसोवास्यात् विरोधेवानयोरनुपलंभः कदाचिदपिस्यात् इत्यतोधर्मिविशेषस्य स
हकारिणोविरोध्याकारादिसंयोगसद्भावेतोसंभवात् ॥ अथधर्म्मिप्रत्यक्षस्तुप्रतिबंधकाभाव एव तस्यचतानेहेतुत्वमेवंच सत्यंतस्यचप्रमाणान्तरानि
यामकत्वोपपत्तेः ॥ द्रव्यमपिनित्यव्यापिस्वरूपंनहि परितंवासन्निकर्षस्यसहकारिस्यानित्यव्यापिस्वरूपं चेनन्वयतनभः सन्निकर्षस्य स्य
बान्ययाकर्यदिक्कालाकाशात्मनांनित्यव्यापिद्रव्यस्वरूपत्वात् अनित्याव्यापिस्वरूपं चेत् तन्मते नयनमालोकोवास्पर्शेनयमप्याकाशादिस
न्निकर्षसंभवत्येवघटादिवत् गुणोपिप्रमेयगतःप्रमातृगतउभयगतोवानतत्सहकारिस्यात् प्रमेयगतश्चेत्किन्नाकाशस्य एवत्तनागुणसद्भा स
वविशेषात् निर्गुणत्वस्यद्रव्यत्वानुपपत्तेर्गुणवत्त्वलक्षणत्वाद्द्रव्यस्यार्थसिद्धत्वात् स्यात्प्रत्यक्षत्वसामान्याद्रव्यपरत्वप्रसंगश्चेत्कं प्र
मातृगतोप्यदृष्टान्योवागुणोगगनेंद्रियसन्निकर्षसमयेप्यस्त्येव उभयगतपक्षेप्युभयपक्षोक्तदोषप्रसंगः कर्म्मोप्यर्थगतमिंद्रियगतंवानतत्स
हकारिस्यात् नतावदर्थगतंप्रमोत्तमेतस्यानंगत्वात् ॥ कथमन्यथास्थिरार्थानामुपलब्धिः ॥ इंद्रियगतंतुनतत्रास्त्येवाकाशेंद्रियसन्निकर्षेन
यनोन्मीलनादिकर्म्मणः सद्भावात् ॥ तस्मात्प्रतिबंधतुप्रतिबंधाभावरूपैवयोग्यतारीतिकल्प्या ॥ नचैवोक्तदोषदोषाणामसंभवात् ॥ प्र
त्यक्षत्वप्रभावविशेषोहिप्रतिबंधाभावरूपतथाविधप्रमाणम् आलोचनावसरे प्रसाधयिष्यते ॥ नचैवंयोग्यतायाःकार्यपरिच्छिन्नोसाध
कतमत्वतःप्रमाणत्वात् ज्ञानंप्रमाणमितिप्रतिज्ञाविरुध्यते स्याः स्वार्थग्रहणशक्तिस्वभावायाः स्वार्थावभासिज्ञानलक्षणप्रमाण
सामर्थ्येत्वतत्संदृष्टतावेवसाधकतमत्वोपपत्तेः चक्षुषश्चाप्राप्यकारित्वेनप्रसाधयिष्यमाणत्वान्नघटादिनासंयोगस्तस्माच्चरूपा
दिनासंयुक्तसमवायादिः संयुक्तसमवायाच्चचक्षुषोरूपवच्छब्दरसादेर्विशाकरूपवत्कर्मण्यपिचज्ञानमुत्पद्येताविशेषात् संयुक्त १२
समवेतसमवायाच्चरूपत्वादेरिवसमवायाकृष्टत्वगंधमहत्वादेरपिसमवेतसमवायाच्छब्दत्ववत् महत्परिमाणत्वादेरप्यताभ्युपगमेसर्वानि
यामिकास्वनंसन्निकर्षवद्द्रोषगानसंवद्धविशेषणीभावस्तु संयोगादिसंबंधासंभवादेवप्रत्युक्तोनहि संबंधासंभवादेवप्रत्युक्तोनहिसं

त्वं धाने रण संवेदन सुनिश्चयनेन सत्यमिंद्रियवत्/ एतेनाक्षसन्निकर्षस्य ग्रहणेन सर्वस्य सर्वदार्थज्ञानोत्पत्तिः स्यादिति प्रत्युक्तं योग्यस्यैव ग्रहणा

त्कथमन्यथा सन्निकर्षे सर्वत्राप्यर्थज्ञानं नोत्पद्यते. ततोपरस्मिन्नप्यसन्निकर्षेप्यनन्तरहेतुकं प्रत्यक्षं विद्यमानेपि यवबीजादिवदव्यवधानेना

ऽङ्कुरो विद्यमानेपि सन्निकर्षे नोत्पद्यते नार्थपरिच्छित्तिर्भवति।। यदपि सन्निकर्षसद्भावे प्रमाणं व्यवहितार्थानुपलब्धिरेव तु कर्णसिद्धत्वात्सा च का

चाभ्रकपटलस्फटिकस्वच्छोदकादिव्यवहितानामप्यर्थानामुपलब्धेः।। यदपि कारकत्वादित्यादिनाप्यकारित्वसाधनमुक्तं। तदपि चक्षुषो प्रा

प्यकारित्वप्रसाधनप्रस्तावे प्रतिविधास्यते।। अतः प्रत्यक्षं नोत्पद्यमानं चक्षुरिन्द्रियसंनिकर्षाद्युत्पादितं ध्यासुनसो भाग्यत्वान्नाप्रत्यक्षं प्रतिभास

ते।। सन्निकर्षस्यासंभवे संभवे वासाधकतमत्वेन न त्वयापरस्य रूपस्यानुपपत्तेः कथं च सन्निकर्षप्रामाण्याभ्युपगमे सर्वज्ञवार्तापि स्यात्। नहि ज्ञा

ने हि मानसमिन्द्रियं यथा चक्षुरिन्द्रियं सन्निकर्षादनुमाने प्रत्यार्थे कुतश्चातीतानागतेषु तेषामसत्त्वेन तत्रहेतोः सन्निकर्षस्य सत्त्वविरोधात्।। यदस

न्तत्वात् हेतुः सन्निकर्षोस्ति यथा खरविषाणादेर्न संति चातीतानागताः वर्तमानार्थज्ञानोत्पत्तिसमये भाविनि।। अथ यदा ते भविष्यन्ति तदा

त्सन्निकर्षान्न चक्षुर्ज्ञानमुत्पत्स्यते। तत्कथमेव वर्तमानेनापि कालेनेश्वरस्याशेषज्ञता स्यात्। वर्तमानाशेषार्थग्रहणात्तस्याशेषज्ञताभ्युपगमेपि कथं

तदुपदेशस्यानागतेर्थे प्रामाण्यं स्यात्।। यतस्तदर्थिनां तदुपदेशात्तत्र प्रवृत्तिः स्यात्।। नित्यत्वात्ज्ञानस्यायमदोष इत्यप्यसमीचीनं। तन्नित्यत्व

स्य निराकरणावसरे निराकरिष्यमाणत्वात्।। कथं चैवं वादिनः साध्यसाधनयोर्व्याप्तिः सिद्धा यतोनुमानं स्यात्। इन्द्रियप्रत्यक्षस्यैव मानसप्रत्यक्ष

स्यापि सन्निकृष्टे चार्थे प्रवृत्तेः व्याप्तिश्चानियतदेशकालेति कथं सन्निकर्षप्रभवप्रत्यक्षात्प्रतीयेत।। ननु सामान्येन व्याप्तिरत्र तच्च तत्प्रभवप्रत्य

क्षस्य समार्थ्यसंभवात्कथं नातस्तत्सिद्धिरित्यप्यसांप्रतं।। सामान्येन व्याप्तेर्व्याप्तिविचारप्रघट्टके निराकरिष्यमाणत्वात् सन्निकर्षस्याज्ञानात्म

कत्वाच्च वितं प्रामाण्यं घटते।। छ।। नापि कारकसाकल्यस्य प्रथमतमभेदेनैव्यभिचारादिविशेषणार्थोपलब्धिजनिका सामग्री प्रमाणं नच साम

ग्र्याकारककलापरूपा निश्चयाभावान्न कस्यचित्साधकतमत्वमुपपद्यते इत्यभिधातव्यं कारकसाकल्यस्य करणानभ्युपगमे साधकतमत्वस्यो

न्या॰कु॰चं॰ ११

पद्यते॥ नह्येकस्य सामग्र्येकदेशस्य प्रदीपादेः कचित्कार्ये करणताप्रतीपत्ते॥ किंतर्हि सामग्रीस्वरूपस्य कारकसाकल्यस्यैव॥ तच्च प्रमातृप्रमेयप्र
दृग्भावे संपद्यते॥ अतः सामग्र्येकदेशकारकसद्भावेऽपि कार्यस्यानुपपत्तेर्नैकदेशस्य करणता सामग्रीसद्भावे तु तस्यावश्यंभावेनोत्पद्यते स्यादव
संनिहितजनकत्वेन साधकतमत्वादुपपन्नं करणत्वं॥ करणं च प्रमाणं करणसाधनत्वात्प्रमाणशब्दस्य न च साकल्यव्यतिरेकेण कारकसाध ॰नैव।
कतमत्वं संभावयितुं शक्यं॥ परिशिष्टव्यतिरेकेऽपि सकलावस्थायामपि कारके प्रमितिस्वकल्पस्यांत्यस्यापि साधकतमत्वात्कारणत्वेन चा
सौ न वाकल्येन प्रतीतिविरोधात्॥ तस्मात्साकल्यमेव करणं॥ ननु करणं कर्तृकर्मापि संभवति॥ कर्तृकर्मणोश्च सामग्र्यंतःपतितयोः स्वरूप
प्रच्युतितो। संभवात्कथं तद्दोषे संसाकल्यस्य करणत्वमिति॥ तदविचारितरमणीयं॥ साकल्यांतर्गतानाकारकापेक्षयैवास्य करणत्वोपपत्तेः सा
स्वधर्म्म। कल्यं हि नाम कारकाणां धर्मो न तस्वकीयो धर्मः स्वस्यैव स्वरूपावधारणाय प्रभवति॥ साकल्यावस्थायामपि कारकस्वरूपस्य च स्वभिन्नत्वमान-
त्वाच्च॥ न तत्त्वेषां स्वरूपप्रच्युतिः॥ तस्मात्तदंतर्गतकारकापेक्षयालब्धकरणभावं साकल्यं प्रमाणं॥ ननु ज्ञानं फलरूपत्वात्तस्य फलस्य च प्र
माणत्वानुपपत्तेश्च॥ ततोऽभिन्नत्वात्तस्य प्रतीयते हि येनार्थः तत्प्रमाणमिति करणसाधने प्रमाणशब्दव्युत्पादनात्करणस्यैव तद्रूपतोपपत्त्या
अर्थव्यतिरिक्तफलजनकमपि ज्ञानमेव प्रमाणमुच्यते॥ तदयुक्तं सकललोकांगीकृतज्ञानस्वरूपभावस्य तद्व्द्दिलिंगादेरप्रमाणताप्रसंगात्॥
ततो ज्ञानमर्थपि सामग्र्यंतःप्रविष्टमेव विशेषणज्ञानमिव विशेष्यप्रत्यक्षे लिंगप्रतीतौ सारूप्यदर्शनमिवोपमाने शब्दश्रवणज्ञानमिव तदर्थज्ञाने लिंगुज्ञानमिव।
प्रमाणत्वं प्रतिपद्यते॥ तस्माद्बोधाबोधस्वभावं कारकसाकल्यं प्रमाणमित्ययमेव पक्षः प्रमाणोपपन्नतरेति॥ क॥ अत्र प्रतिविधीयते॥ यत्तावदुक्त
मव्यभिचारादिविशेषणोत्पादितत्वपुक्तं॥ यतो मुख्यतया चोरणाकारकसाकल्यस्य प्रामाण्यं स्यात्॥ मुख्योपचारभेदेन हि शब्दानां द्विविधाप्र ११
वृत्तिः प्रतीपत्तेर्म्भेवेशाणात्त्यादिवत्॥ न च तनावन्मुख्यतो ज्ञानरूपस्यास्य स्वपरधर्मितो मुख्यतः साधकतमत्वाभावतो मुख्यतः प्रमाणत्वस्या
नुपपत्तेस्तस्मिन्नो मुख्यतः साधकतमत्वं स्वज्ञानविरोधिना ज्ञानेनैवव्याप्तंजास्यापेरणामवधानात्॥ साकल्यस्य ह ज्ञानेन व्यवधानान्नतस्य-

त्वं॥ प्रयोगो यत्र परेणाव्यवहितं तत्तत्र मुख्यरूपतया साधकतमव्यपदेशमर्हति॥ यथा छिदिक्रियायां कुठारेणाव्यवहितो यस्कारः
स्वपरप्रमितौ विज्ञानेनाव्यवहितं च परंपरिकल्पितं साकल्यमिति॥ उपचारेण तस्याः प्रामाण्याभ्युपगमे तर्हि चिरन्तनं मुख्यरूपतया हि स्वप
रप्रमितौ साधकतमज्ञानस्योत्पादकत्वात्तस्यापि साधकतमत्वं॥ तस्माच्च प्रमाणत्वं कारणे कार्योपचारादन्त्यं वै प्रमाणान्त्यादिवत्॥ किं च प्र
ग्रहणस्य प्रकर्षार्थः प्रकर्षश्चापकृष्टस्यापेक्षया तावत्तत्पृथक् साधकं साधकतरं वा व्यवस्थितं तत्रापि तत्साधकतमत्वं वक्तुं शक्यते॥ न चैतत्
त्वात् सा सामग्री वा नेककारकस्वभावा नैककारकसमुदाये च कस्यचित् स्वरूपातिशयः शक्यते वक्तुं सर्वेषामभिमतकार्यं प्रति व्यापारावि
शेषात्॥ कर्तृकर्मकरणसन्निधौ हि समुत्पद्यमानं प्रतीयते॥ कार्यं तदभावे चानुत्पद्यमानं तत्कथं कस्यचिदतिशयो निर्देष्टुं शक्येत॥ निःशे
षविवक्षायां चापेक्षणीयस्याभावात् कथं साधकतमत्वं॥ सकलकारककलापरूपा किल सामग्री तस्याः किमपेक्ष्य साधकतमत्वमपेक्षणीय
सद्भावे वा न तद्रूपता स्यात्॥ किं चेदं साधकतमत्वं विवक्षातः कस्यचित् स्यात् तत्सन्निपत्यकार्यजननात् सहसा कार्योत्पादनाद्वा॥ तत्र यद्य
नेककारकजन्यं कार्यं तथापि विवक्षातः कारकाणां प्रकर्षनिरतिनि कस्यचिदेव साधकतमत्वं विवक्ष्यते चेत्॥ ननु विवक्षा पुरुषेच्छा न चासनिये
लक्षणे वस्तुनिबन्धनाव्यवस्था युक्ता निप्रसंगात्॥ अथ सन्निपत्य कार्यजननं तदपि ज्ञाने कर्तव्ये सर्वेषामिन्द्रियमनोर्थादीनां तुल्यं कस्यचिद
प्यसन्निपत्यजनकत्वाभावात् एतेन तत्संसर्गसत्त्वे वा स्योसनेः नापि सहसैव कार्योत्पादकत्वं साधकतमत्वं कर्म्मण्यप्यप्रसक्तत्वात् सोमंति
नी समुदायेत्यद्भुतरूपा सीमन्तिनी रूटित्यात्मविषयं विज्ञानमुत्पादयति॥ यदप्युक्तं तत्र करेणास्वरोपादेः करणत्वादि तदप्यनुपपन्नं प्र
तीतिबाधितत्वात्॥ न हि कश्चिल्लौकिकः परीक्षको वा सामग्र्याः करणत्वं प्रतिपद्यते॥ सामग्र्या पश्याम इति तस्याः करणविभक्त्या निर्देशप्रसंगात्
न चैवं कश्चिदपि निर्दिशति दीपेन पश्यामश्चक्षुषा निरीक्षामहे॥ इति तु देककरणानामेव तन्निर्देशप्रतीतेः किं च करणमिति॥ योयं व्यपदेशः
सः कर्तृकर्म्मापेक्षः कर्त्रा कार्ये व्यापार्यमाणस्य कारकविशेषस्य करणत्वप्रतीतेः कुठारादिवत्॥ सामग्र्याश्च करणत्वे कर्तृकर्मणी तदंतर्गते न

न्या॰कु॰वं॰ तोर्थनिरूपितेवाख्यानां॥ प्रथमपक्षे सामग्रीस्वरूपादभिन्नत्वात्तत्स्वरूपवत्तयोः करणत्वेनोपपन्नत्वान्न च करणस्याभावापपत्तयोः कर्तृकर्म्मरूपतायुक्तापरस्प
१२ ते॰ रविरोधात्॥ कर्तृता हि ज्ञानचिकीर्षाप्रयत्नाधारत्वेष्यते॥ निर्व्यापारत्वादिधर्म्मयोगित्वं कर्म्मत्वं करणत्वं तु साधकतमत्वमित्येषां कथमेकत्र संभवः॥ वि
षयाभावे च निरालंबनाः सर्वाः संविदः प्रसज्येत॥ न तु रादिवदालंबनकारकस्य प्रमाणान्तःपातित्वात्कथमिदानीं सामग्र्यात्र्प्रमेयप्रमितौ ते॥ प्रमातुर
प्यस्यामेवान्तर्लीनत्वात्॥ द्वितीयपक्षोप्ययुक्तः सकलकारकव्यतिरेकेणार्थान्तरभूतयोः कर्तृकर्म्मणोरभावात्॥ भावे वा न कारकसाकल्यं कार्य्योत्पत्तौ
हि याचनामुपयोगस्ते सकलशब्दवाच्याः॥ कर्तृकर्म्मणोस्तु व्यतिरेके कथं परिविशिष्टानां साकल्यं। यद्वान्यदुक्तं साकल्यान्तर्गतकारकापेक्षया चास्य
करणत्वोपपत्तेरित्यादि तदप्यसांप्रतं॥ यतः पृथगवस्थायां सर्वाणि कारकाणि कर्म्मादिविभागं भजंते॥ समुदायावस्थायां सर्वाणि तु करणभावं न चाव
यदा कर्म्मादित्वं न तदा करणता यदा तु साकल्यं न तदा कर्म्मादिनैर्निकर्मपरूपं च व्यवतिष्ठन्तान्योन्यापेक्षत्वात्कर्म्मादिरूपेण हि करणत्वरूपापेक्षत्वं च
कर्म्माद्यपेक्षमिति॥ किंच सामग्रीजनने व्याप्रियमाणाः कर्म्मादयः स्वं कारणत्वेन व्यपदिश्यन्ते॥ सा च प्रमितिलक्षणे फले करणत्वेनोत्पन्नफलं चाभिनिर्वर्त
व्याप्रियमाणा कथं विषयान्तरे व्याप्रियतां कर्तृकर्म्मभ्यां च निज्ञापयेदिति पदेन। अपि च सामग्रीजनने व्याप्रियमाणा आत्मादयः सामग्री कारणानां
प्रति पद्यन्ते। न तदा फलविषये कस्य च कर्तृत्वमात्मनः सामग्रीजनने व्यापारात्॥ तदात्माऽत्मानं सामग्र्यां मध्ये प्रक्षिप्य सामग्रीं जनयन्त्यथा
तामेव करणत्वेन व्यापारयन् कर्तृतामनुभवति एकरूपस्यैव चैविधाने कथं व्यापारविरोधात्॥ नित्यैकरूपस्य तु निकार्य्यकारित्वानुपपत्तेश्च॥ किंच स
मग्राश्च साकल्यं समग्राणां धर्म्मो वा॥ तत्राद्यपक्षे सर्वेषां फलं प्रत्यन्वयव्यतिरेकानुविधानात्कस्य करणत्वेन निर्नियमः॥ करणं हि साधकतमं तमार्थ १२
श्च प्रकर्षः कार्यं प्रत्यव्यवधानेन व्यापारः स च सर्वेषां तुल्यस्तदा कथं कस्यचिदेव करणत्वं सिद्ध्येत्॥ अथ येषां धर्म्मः सा किं नित्याऽनित्या वा यद्यनित्या
तदनित्यः कदाचित्कत्वात्सुखादिवत्॥ अथ नित्यः तुलो जायते॥ ततस्तदायतो बालावस्थानाभ्युपगमात्॥ नन्वेवं चेत्तद्यं समर्थः संपन्नः
समग्राणा वसामग्री लक्षणं कार्यं जनयंति सा च फलं नतदानस्याः कत्वात्किमपेक्ष्य साधकतमत्वं स्यात्॥ किंच समग्राणां भावः सामग्री भा

वद्यदेकत्वेनैषां सतां स्वरूपमात्रं समुदायः संबंधो ज्ञानजनकत्वं वाभिधीयेत प्रकारांतरासंभवात्॥ न तावदाद्यविकल्पद्वयेतिप्रसंगात्प्रत्य
क्षाद्यप्रमाणेषु सत्तामात्रस्य च सद्भावात् प्रामाण्यप्रसंगात्॥ समुदायोप्येकाभिप्रायेनाज्ञानस्य एकदेशेपीन प्रत्यक्षादि
वा॥ न तावद्यपक्षोनुपपन्नो विषयेंद्रियादेर्निरभिप्रायत्वात् द्वितीयपक्षोप्ययुक्तः चक्षुरादिविषयस्येंद्रियादेश्चैकदेशे मीलनाद्यभावात्।
संबंधपक्षोप्यनेनैव व्याख्यातः चक्षुरादेश्चक्षुरादिना संबंधाभावात् व्याप्यव्यापकभावात् तद्व्याप्यकालिकं नात्र प्रसक्तं विध्याप्तः॥ अथ ज्ञा
नजनकत्वं भावकारणेनाभिधीयते न हि प्रमाणत्वे नयनयोरपि प्रमाणत्वप्रसंगः ज्ञानजनकत्वाविशेषात् तथा च प्रतीतिसिद्धत्वादावश्याविलोपः स्यात्
न च ज्ञानजनकत्वाविशेषेपि स्वेच्छावशात्कश्चिदेव प्रमाणादिव्यवस्थाप्युक्ता सर्वस्य स्वेच्छानवस्थितिः प्रसंगात् स्वेच्छायाः सर्वत्रानंकुशत्वात् किंच
जास्ते भावा नित्यैकरूपाः ज्ञानजननस्वभावाः संतः ज्ञानं जनयंति न ज्ञानजननस्वभावा नेनादन ज्ञानजननस्वभावाः सर्वस्मात् सर्वस्योत्पत्तिप्र
संगात्॥ अथ ज्ञानजननस्वभावाः किं सर्वदा ज्ञानं जनयंति॥ नित्यानां सर्वदा ज्ञानजननस्वभावानां तेषां सदा सत्वात् सकलप्रमाणोत्पत्ति सम
ये समये समस्तानुत्पत्तिप्रमाणोत्पत्तिप्रसंगश्च यदा हि यज्ज्ञानकमस्ति न तदोत्पत्तिमत्त्वं सिद्धं यथा न कालाभिमतं च प्रमाणं नास्ति च प्र
वृत्तिरकालभाविनां निखिलप्रमाणानां तदानित्याभिमतमात्मादिकारणमिति तत्सद्भावेप्येषामनुत्पत्तौ न कदाचिदुत्पत्तिः स्यादुत्पत्तिः
स्यादित्यखिलं जगत्प्रमाणविकलं प्राप्येत॥ तत्कारणासमर्थस्यत्यपि नात्मादिकारणे भवतां स्वयमेव पश्चाद्भवता तत्कार्येणापि कथमेषाम्
पपद्येत यत्र यस्मिन्समर्थे सत्यपि नोत्पद्येत स्वयमेव पश्चाद्यथा कालसुनिश्चयेन तत्कार्ये यथा सत्यपि कुंभकारेनुत्पद्यमानः पटो नोत्प
द्येत॥ चात्मादेरेतत्करणासमर्थे सत्यप्यखिलप्रमाणानीति यत्र परोपेक्षा यत्प्रमाणोत्पत्तिसुलभता दानत्वात्मादेस्तत्करणासमर्थत्वात् क
दाचित्प्रमाणोत्पत्तिरित्यप्यसमीक्षिताभिधानं॥ स्वभावभूतसामर्थ्यभेदमंतरेण कार्यस्य कालादिभेदानुपपत्तेः॥ यस्य स्वभावभूतसाम
र्थ्यभेदेनास्ति प्रनाशोकालादिभिन्नकार्यकारणव्यापारंशः सौगतपरिकल्पितः क्षणो नास्ति च स्वभावभूतसामर्थ्यभेदो नित्यैकस्वभावाभि

न्या·कु·चं· मतस्यात्मादेर्विलिखस्वभावभूतसामर्थ्यभेदाभ्युपगमेन पार्थिवपरमाण्वादिकारणभेदपरिकल्पनं व्यर्थमेकमेव॥ नित्यैकस्वभावं परम
१३ ब्रह्मादिकारणं शक्तिव्यापनेककार्यकारि परिकल्प्यतां॥ कारणजातिभेदमंतरेण कार्यभेदस्यासंभवात् किंभेदोप्यस्तु नमंतरेणापि न तदसंभ
वात्॥ किं च सकलेभ्यः साकल्यं भिन्नमभिन्नं वा स्यात्॥ भिन्नं चेत् किमिति पृथक् पद्मादिवन्नोपलभ्येत॥ कथं च भिन्नं तत्तत्त्वसंकलसंब
द्धं वा संबद्धं चेत् कथं तद्धर्मोपपद्यते न संबध्येत॥ न तत्तद्धर्मोपपद्यतेत्यसंबद्धो विंध्योपि न तद्धर्मः कारकेषु संबद्धं च तत्स्मात्तत्साकल्यमि
ति। संबद्धं चेत् किं समवायेन संयोगेन विशेषणाभावेन वा न तावत्समवायेनास्यासिद्धत्वस्य हि द्रव्यपरत्र परिशेषपरीक्षायां निराकरिष्यमा
णत्वसिद्धत्वात् नापि संयोगेनास्य गुणत्वेन द्रव्येष्वेव संभवात्॥ साकल्यस्य चाद्रव्यत्वात् नापि विशेषणाभावेन संबंधांतरेणासंबद्धस्य तु वि
शेषणाभावस्यैवासंभवात्॥ अस्तु वा केनचित्तत्र संबद्धं तथापि युगपत्सकलकारकेषु संबध्येत॥ क्रमेण वा युगपच्चेत् किमेकं समस्तं नेकं वा
यद्येकं सामान्यादिरूपताप्रसंगः तद्रूपता च सामान्यादिदोषेण दुष्टत्वान्न श्रेयसि॥ अथानेकं तर्हि यावंति कारककारणानि तावद्धा तद्भेदेन॥
अथ क्रमेण तर्हि सकलकारकधर्मेण साकल्यस्य न स्यात्॥ नैव हि तावस्यैकेन संबंधो न तैरन्येरपीति॥ अथाभिन्नं तत्तेभ्यस्तर्हि तान्येव
न साकल्यं करणरूपत्वे यथोद्देशं कारककारणं स्यात्॥ सापि वा न स्यात् कर्तृकर्मादेरसत्वात् न स्यात् तथाप्यन्यत्र संभवात्॥ तथा च कस्य प्रमा-
णता स्यात्॥ ततः कारकसाकल्यस्य स्वरूपेणाविचार्यमाणस्यानुपपत्तेर्न प्रामाण्यं॥ यत्स्वरूपेणाविचार्यमाणं नोपपद्यते॥ ततस्प्रमाणं
प्रमाणगमेदोऽवरं स्वरूपेणाविचार्यमाणं नोपपद्यते च परपरिकल्पितं कारकसाकल्यमिति॥ उपपद्यतां वा न तथापि न युक्तमतः प्रमाणम्
[illegible] यत्नस्यास्तौ पद्मानस्य [illegible] एषानुपपत्तेः न च लिंगशब्दादिना व्यभिचारस्तस्याप्युपचारादेव प्रामाण्याभ्युपगमात्॥ किं च नि- १३
र्विकल्पकज्ञमित्यपेक्षया सन्निकर्षस्य कारकत्ता कल्पस्य [illegible] जनकत्वेन प्रामाण्यं स्यात्। सविकल्पकज्ञमित्यपेक्षया वा तं [illegible]
नुपपन्नः॥ संज्ञायाश्च हेतुर्निर्विकल्पकस्य ज्ञानजनकस्यापि सन्निकर्षादेः प्रामाण्यप्रसंगात्॥ नेव तत्रास्यतज्ज्ञानकत्वं मालीत्यभिधान

ध्यं॥ संज्ञापदेऽन्तस्यस्त्वाभासत्वाभावप्रसंगात्॥ द्वितीयविकल्पोऽप्ययुक्तः सविकल्पकप्रमोत्पत्तौ सन्निकर्षादेर्निर्विकल्पज्ञानेनव्यवधा
नतः साधकतमत्वानुपपत्तेः यत्तु परस्परोक्तं तेनाव्यवधानेन तस्य तदुत्पत्तौ साधकतमत्वं यथा छिदिक्रियोत्पत्तौ कुठारस्याव्यवहितस्या
यस्कारस्य व्यवधानं च निर्विकल्पकेन सविकल्पकोत्पत्तौ सन्निकर्षादेरिति॥ अतो ज्ञानरूपस्य सन्निकर्षादेर्न मुख्यतः कथमपि प्र
माणत्वमुपपद्यते॥ ननु यद्यपि सन्निकर्षस्य कारकसाकल्यस्य वा ज्ञानरूपस्य प्रमाणत्वं नोपपद्यते तथापि ज्ञानमेव प्रमाणमस्ति
त्विति॥ इंद्रियवृत्तेरर्थप्रमितौ साधकतमत्वेन प्रमाणत्वोपपत्तेरिंद्रियाणां हि वृत्तिर्विषयाकारपरिणतिः न खलु तेषां प्रतिनियतशब्दाद्या
कारपरिणतिव्यतिरेकेण प्रतिनियतशब्दाद्यालोचनं घटते न विषयसंपर्कमात्रमिंद्रियाणां नानुव्यापिनिरिंद्रियवृत्तिः॥ तदुक्तं विष
याकारपरिणतेंद्रियवृत्त्यालंबना मनोवृत्तिः॥ अथ कस्मान्मनोवृत्तिरिंद्रियवृत्त्यालंबना नान्नशब्दाद्यालंबनेति चेत्॥ अन्यथा हि वृत्तिस्थानाद्यन्यथा
बाह्येंद्रियकल्पनानर्थक्यं स्यादित्यभिधानात् सांख्योऽप्येनमेव प्रत्यवस्थान्॥ अचेतनस्वभावायाः इंद्रियवृत्तेरस्याप्रकाशकत्वान्न प्रमि
तौ साधकतमत्वानुपपत्तेः॥ का चेयमिंद्रियवृत्तिर्विषयं प्रति तेषां गमनमाभिमुख्यं वा स्यादाकारधारित्वं वा तत्राद्यपक्षोऽनुपपन्नोऽवि
षयं प्रतींद्रियाणां गमनस्येंद्रियाप्राप्यकारित्वपक्षे निराकरिष्यमाणत्वात्॥ द्वितीयपक्षोऽप्ययुक्तो विषयं प्रत्याभिमुख्यस्य प्रगुण
रजतसाधारणंहिशुक्तिभास्वराकारमपेक्ष्यैवंविज्ञानमुत्पद्यते॥ अतस्तस्यानिसुतसादृश्यमपेक्ष्योत्पद्यतेखपुष्पस्यानिवत॥ नेदंचवि
पर्य्ययज्ञानस्यविपरीतख्यातिस्वरूपस्याप्रामाण्यप्रसिद्धेः॥ एतत्संशयविपर्य्यासकारणस्याकिंचित्करस्यचज्ञानस्वभावाविरोधात्
संशयविपर्य्यासकारणेत्यादि॥ नकेवलंसंशयविपर्य्ययकारणज्ञानस्वभावाविरोधात्॥ नैवज्ञानमित्येवप्रमाणं किंतुअकिंचित्कर
स्यचसत्तापरस्वर्गप्रापणसामर्थ्याहिज्ञानस्वभावाविरोधात्॥ अन्यथातृणादयपिज्ञानस्यापिप्रामाण्यप्रसंगात्अनुमानमर्थकं
स्यात्॥ ननुतत्रनिश्चयाजनकत्वान्नतत्प्रमाणमेनदेवाह॥ नहितत्त्वज्ञानमित्येवपदार्थनिर्णयसाधनमित्यपरः॥ नहीत्यादि॥ हियस्मात्
तत्त्वस्यपरमार्थस्यज्ञानमित्येवपदार्थनिर्णयसाधनमपितुकिंचिदेवनदेवचप्रमाणं॥ तदुक्तं श्लोक यत्रैवजनयेदेनां तत्रैवास्यप्रमा
णतेत्यपरेदिग्भागादिःअथवात त्साहनेनापितत्त्वनिर्णयप्रतिसाधकतमस्यज्ञानस्यैवप्रामाण्यंसमर्थ्यतेन॥ वस्तुबलायातत्वदर्शनस्या
पिपरंपरयातत्कारणत्वोपपत्तेश्चेनापीत्यादि नकेवलंनतज्ज्ञानमात्रंप्रमाणमपवादिनापितुदिग्भागादिनाप्युक्तदोषभयात्तत्त्वनिर्णयप्र
तिसाधकतमस्यैवज्ञानस्यनिश्चयात्मनः प्रामाण्यंसमर्थ्यते न तस्यैवचनंप्रतिसाधकतमत्वादन्यथातदपेक्षानुपपत्तेः॥ न पुनस्तत्त्वज्ञान-
मात्रस्यसंनिकर्षादेर्वातत्समर्थ्येनतदभावात्॥ तत्कारणत्वात्तस्यापितत्समर्थ्येतेनिवेदाह॥ वस्तुबलेत्यादि॥ वस्तुबलायातोविकल्पसामर्थ्य
सिद्धोनुभवोनमवेदेतुश्चसंनिकर्षादिः संनिकर्षादिहेतुश्चविशिष्टाहारदेशादिस्तस्याप्यभावेविकल्पोनुपपत्तेः॥ वस्तुबलायातेषनत्संनिकर्षाहारादि

पन्नं स्यात्॥ न चैतन्नलक्षणां दिवं ह्यदिज्ञाने थेवाथ तद्भावेपि प्रमाणासंभवात्॥ स्वार्थानिश्चये परार्थस्य तन्मध्यस्थसंभाव्यं॥ प्रयत्नन
नस्यतन्निश्चये परनिरपेक्षत्वात्॥ अनभ्यासावस्थायामनुमानस्यार्थनिश्चये परापेक्षत्वं॥ प्रत्यक्षेपि तुल्यं विसंवादकत्वमप्यप्रा
त्युपपन्नं सम्यगनुमानेन प्रतिपन्ने वस्तुनि विसंवादासंभवात्॥ तदाभासेन प्रतिपन्ने तस्मिन् विसंवादेन तस्यैव गौणत्वं युक्तं नान्यस्यान्य
थाप्रत्यक्षाभासे विसंवाददर्शनात् सम्यक्प्रत्यक्षेपि गौणत्वप्रसंगः स्यात्॥ प्रत्यक्षपूर्वकत्वं वासिद्धमनुमानस्योहाख्यप्रमाणपूर्वक
त्वेन वक्ष्यमाणत्वात्॥ किंच लिंगादेवानुमानमुत्पद्यते॥ तच्च कथं प्रत्यक्षाद्वैनुत्पत्तिसंभवत्तत्र लिंगप्रतिपत्तावेव व्यापारात् तस्य तु वाध्यक्ष
सादेव तदुत्पत्तिलयापि न गौणत्वं तस्य तत्सामर्थ्यात्॥ स्वसामर्थ्यात् स्वोपजायमानस्य गौणत्वे प्रत्यक्षस्यापि तत्प्रसंगः॥ किंच प्रत्यक्ष
पूर्वकत्वेनानुमानस्य गौणत्वे प्रत्यक्षस्यापि कस्यचिदनुमानपूर्वकत्वेन गौणत्वप्रसंगः॥ दृश्यते हि साध्यमर्थमनुमानान्निश्चित्य प्रव
र्तमानस्यानुमानपूर्विका प्रत्यक्षप्रवृत्तिः॥ अर्थादनुत्पद्यमानत्वेनास्य मानत्वे साध्यस्यापि तत्प्रसंगस्तस्याप्यर्थादनुत्पत्तेः प्र
तिपादयिष्यमाणत्वात्॥ अवस्तुविषयत्वं चास्यासिद्धं वस्तुसामान्यविशेषात्मकार्थगोचरत्वात्तस्य तत्स्वलक्षणं तु भूतापोहविषयमनु
मानं सौगतवत् जैनेनेष्टं॥ न च तत्र विषयस्य प्रतिनियतस्य मानत्वं स्यात्॥ धर्म्मिणि शब्दोपचारतोपि नास्य गौणत्वसिद्धिः संक्षेपतः अन्यात्सत्वनार्थ
त्वात्तदुपचारस्य नहि लक्षणाकारणं नाधेयत्वं त्राध्वनवं कुर्वतां॥ धर्म्मिणि शब्दोपचारमात्रेणानुमानस्य गौणत्वं भवत्यतिप्रसंगात्
बाध्यमानत्वं च सम्यगनुमानस्य तदाभासस्य वाशयमपक्षोनुपपन्नः॥ सत्यधूमादिसाधनादग्न्याद्यनुमाने बाधासंभवात्॥ अनुमाना
भ्यासस्य तु बाधासंभवे तस्यैव गौणत्वं युक्तं न सम्यगनुमानस्य॥ अन्यथा प्रत्यक्षाभासस्य बाधोपलंभात् सम्यक्प्रत्यक्षस्यापि गौणत्वप्रसंग
त् स्यात् साध्यसाधनयोः प्रतिबंधग्राहकप्रमाणाभावस्त्वसिद्धः॥ तर्काख्यप्रमाणात्तद्ग्रहणप्रसिद्धेः॥ तथा च तत्संबंधग्रहणोपलक्षप्रवर्तिना
उपानं स्पार्शनेन्द्रियादिवत्याख्यानं॥ सार्वत्रिकसंबंधप्रतिपत्तेश्च यथा तस्य सामर्थ्यं तथा वक्ष्यते॥ किंच प्रत्यक्षमेव प्रमाणं नानुमानमिति विधिनिषे

न्या·कु·चं·
२९

धप्रतिपत्तौप्रत्यक्षस्यसामर्थ्यमगोपालादिलिंगस्यवातत्तावत्त्वमवसायात्नहिनेदंद्विधादिसामग्रीनः समुपजातमलमेवप्रमाणानामनु
मानमित्यत्रार्थसमर्थप्रतिनियतरूपादिप्रतिपत्तावेवास्यसामर्थ्यसंभवात्॥ अगोपालादिलिंगस्यापितत्वप्रतिपत्तौसामर्थ्यमनुमान।
प्रमाणेनानुपपन्नम्प्रमाणेनव्यवस्थांकुर्वाणस्यान्यनत्वप्रसंगात्नहिप्रमाणान्तरेणप्रमेयव्यवस्थायुक्तातिप्रसंगात्॥ किंचप्रत्यक्षमे
वप्रमाणमित्यभ्युपगच्छताधर्मसमाचंप्रमाणमभ्युपगम्यते॥ नहिद्वितीयोवाप्रथमपक्षेहिद्विचन्द्रादिप्रत्यक्षस्यापिप्रामाण्यप्रसं
गः॥ द्वितीयपक्षेतुकोयंनहिद्विचन्द्रोनामयथार्थेनेतिचेत्॥ नहियथार्थत्वमसंभवाणां॥ नापयथार्थमिनीष्यतापरः प्रतिपाद्यतेनतत्का
श्चित्प्रत्यक्षव्यक्तेः परिध्वस्तयथार्थाश्चांगीकृत्यापरीक्षितैप्रत्यक्षंतत्वमाणांनान्यादृशामिनिप्रतिपादनीयमेवुनःप्रमाणांतराहि
तानप्रतिपादयितुंशक्यं॥ नखलुचक्षुषानिवर्तमानप्रतिनियतरूपादिविषयैर्लक्षणाभिः प्रत्यक्षव्यक्तिभिरेतत्प्रतिपादयितुंपार्यते॥ परस्य
बुद्धिमत्त्वेनलक्षणादिभ्योविलक्षणः प्रतिपाद्यमानार्थग्रहणासमर्थोनिश्चितप्रतिपाद्योनचतन्निश्चयेप्यनुमानादन्यस्यसामर्थ्यप्र
त्यक्षरूपादिमर्यप्रतिपत्तावेवसामर्थ्यात्॥ कथंचानुमानानस्युपगमेस्वव्यवस्थापितप्रमाणप्रमेयव्यतिरिक्तप्रमाणप्रमेयस्य
स्वर्गादिविशेषणादेश्चनिषेधः॥ प्रत्यक्षस्यात्रासामर्थ्यात्प्रमाणांतरेतत्प्रमेयसिद्धेश्चातिप्रसंगात्॥ किंचानुमानापह्नवस्तत्स्वरूपाभावा ६
न्निरवद्यलक्षणाभावाद्वास्यात्नतावत्स्वरूपाभावात्तत्स्वरूपस्याखिललोकप्रसिद्धत्वात्सकलमखिललोकप्रसिद्धं॥ ननस्याप्यत्वे त्, प्रत्यक्ष
युक्तोयथाप्रत्यक्षस्याखिललोकप्रसिद्धंचानुमानस्यस्वरूपमिति॥ नचेदमसिद्धमबलाबालगोपालादीनांधूमाद्यर्थात्पावकाद्यर्थानरे
भिप्रेरकंप्रत्यक्षप्रतीतेः॥ कथंवातत्स्वरूपापलापप्रसक्तमेवप्रमाणमगोपालादिव्यभिचारः स्ववचनविरोधोनस्यात्तन्निरवद्यलक्ष २९
णाभावोप्ययुक्तः॥ साधनात्साध्यविज्ञानमनुमानमित्यादेर्निरवद्यलक्षणस्यायेप्रतिपादयिष्यमाणत्वात्॥ किंचपरोपरपक्षणीतेन
लक्षणंसावद्यंनदानत्स्वयमनवद्यमावेद्यतां॥ नपुनस्तद्द्वेषेणोतल्स्यमप्यनुमानमपह्नोतुंयुक्तं॥ नहियैत्तसापाल्यूकाभयात्परिधानप

न्या·कु·चं·
२९

५

द्रियवत् संप्रयमर्थो यथैवेंद्रियाणां चक्षुरादीनामनिंद्रियस्य च मनसः कार्यमंगुलीनिवेशादेर्विज्ञानं ॥ तत्सांव्यवहारिकं गौणाध्यक्षत्वमित्यर्थः ॥
ननु चेंद्रियानिंद्रियप्रत्यक्षमित्यनेन सांव्यवहारिकप्रत्यक्षस्य सामग्रीस्वरूपमभ्युक्तं ॥ तत्कारणस्यार्थालोकादेरत्रासंग्रहात् इति चे-
न्, असाधारणस्यैव तत्कारणस्यात्र प्ररूपयितुमभिप्रेतत्वात्, न चात्मनः समनंतरप्रत्ययस्य वाध्यक्षं प्रत्यसाधारणकारणत्वं संभव-
ति, प्रत्ययांतरेप्यस्याविशिष्टत्वात् ॥ नाप्यर्थालोकयोस्तज्ज्ञानकारणत्वं तस्याग्रे प्रतिषेत्स्यमानत्वात् ॥ नापि संनिकर्षादेस्तत्कारणत्व-
स्य, प्रागेव प्रतिविधानात् ॥ अव्यापकत्वाच्चास्य न तत्कारणत्वं ॥ नहि चक्षुरूपयोः संनिकर्षोस्त्यप्राप्यकारित्वाच्चक्षुषः ॥ ननु तु नास्याप्राप्यका-
रित्वं प्रतिज्ञाप्रमाणविरुद्धात् ॥ तथाहि ॥ प्राप्यकारि चक्षुर्बाह्येंद्रियत्वात् यद्बाह्येंद्रियं तत्प्राप्यकारि प्रतिपन्नं यथा त्वगादि बाह्येंद्रियं च चक्षु-
स्तस्मात्प्राप्यकारि तथा च प्रसिद्धो हेतुः पक्षे प्रवर्तमानत्वात् नापि विरुद्धः सपक्षे सत्त्वात् नाप्यनैकांतिकः सपक्षवद्विपक्षेप्यप्रवृत्तेः न च मनसा व्यभिचारः
बाह्यविशेषणाद्बहिरिंद्रियत्वादित्युच्यमाने हि मनसा व्यभिचारः स्यात् तदपेक्षया बाह्यविशेषणं नापि कालात्ययापदिष्टः प्रत्यक्षागमाभ्यामबाधि-
तविषयत्वात् ॥ नापि प्रकरणसमः प्रकरणचिंताप्रवर्तकस्य हेत्वंतरस्यासंभवात् ॥ अथ मतमधिष्ठानदेशे एव चक्षुर्नान्यत्राधिष्ठानापिधाने विषयग्रा-
हकत्वाद्यद्यदधिष्ठानपिधाने विषयग्राहकं तत्तदधिष्ठानापिधाने विषयग्राहकं ॥ तत्तदधिष्ठानदेश एव यथा घ्राणादिः अधिष्ठानापिधाने विषयग्रा-
हकं च चक्षुस्तस्मादधिष्ठानदेश एवातः कथमस्याप्राप्यकारित्वं स्यादिति तदपि न संगतं ॥ यतोऽधिष्ठानदेशे सत्त्वस्य प्राप्यकारित्वाविरोधात् तदधिष्ठान-
देशे ततः स्पर्शनादेः प्राप्यकारित्वविरोधो दृष्टः ॥ द्वितीयविकल्पोप्यनुपपन्नोऽधिष्ठानाद्व्यतिरिक्तस्यास्य कस्यचिदिंद्रियस्याप्रसिद्धेः न खलु स्पर्शनादे-
रप्यधिष्ठानाद्व्यतिरिक्तत्वमुभयोः प्रसिद्धं ॥ तृतीयपक्षोप्यसंगतोऽधिष्ठानादन्यत्रापि तत्सत्त्वसंभवात् अधिष्ठानं हि गोलकरूपं तस्मान्निःसृता २९
रश्मयोऽर्थदेशं यावत्प्रसरंति ॥ प्रदीपादिरश्मिवत् अधिष्ठानापिधाने विषयाग्राहकत्वं च न प्राप्यकारित्वं विहंति घ्राणादेस्तत्सद्भावे-
ऽप्यप्राप्यकारित्वाविरोधात् न च रश्मिवत्त्वं चक्षुषोऽसिद्धं तत्साधकप्रमाणसद्भावात् तथाहि ॥ रश्मिवच्चक्षुस्तैजसत्वात्प्रदीपवत् नचैतदप्यसिद्धं तत्

५ एतेति कोर्थः । किमधिष्ठानदेशे सद्गुताधिष्ठानाद्व्यतिरिक्तं ततोऽन्यत्र सदिति वा । तत्राद्यपक्षोऽयुक्तः । अधिष्ठानदेशे

यद्यपि विशेषेऽनुगमाभाव इत्याद्युक्तं तदप्ययुक्तम्। व्याप्तिप्रयोगकालापेक्षया

रित्यागं विदधाति॥ यदप्युक्तं अवस्थादेशकालादिभेदादित्यादि तदप्युक्तिमात्रमूलत्वमप्रमाणप्रसादात्सम्यगवधृतायां व्याप्तौ विसंवादाभा
तत्रा वात्‌ प्रमातुर्बहिः परार्थो नानानुमानस्य साध्यस्य भेदाद्व्याप्तौ हि साध्यं धर्म्मः प्रयोगकाले तु तद्विशिष्टो धर्म्मीति वक्ष्यति॥ तत्कथम
नुगमाभावः सिद्धसाधनं स्यात् वा पश्चादप्युक्तं॥ सर्वत्रानुमानेऽनुमानविरोधादेः संभाव्यमानत्वादित्यादि॥ तदप्ययुक्तं समीचीनसा
धनेऽप्रयुक्तेऽनुमानविरोधादेरसंभवात्॥ न खलु धूमादिसाधने पर्वतादावग्निमत्त्वसिद्धौ प्रयुक्ते पर्वतोऽयमग्निमान्न भवति पर्वतत्वात्तदन्यपर्व
तवदित्यनुमानविरोधस्य, अत्रत्येन वाग्निनाऽग्निमान्न भवति धूमवत्त्वान्महानसवदिति विरुद्धाव्यभिचारिणः धूमादिसाधनं यथैवाग्निम
१ त्त्वं पर्वतादेः साधयति॥ न यानि मूलनिवृत्तप्रदेशाग्निनाप्यग्निमत्त्वं साधयति॥ महानसादौ तथा दर्शनादिति दृष्टविघातकृतो वाऽसंभवः प्र
त्यक्षादिविरुद्धत्वेनास्यानुमानाभासत्वात्॥ निर्बाधं हि प्रमाणं कस्यचित्साधकं बाधकं वा प्रयुक्तं नान्यदतिप्रसंगात्॥ ततोऽनुमानादेः प्र
माणान्तरत्वोपपत्तेः स्फुटमविशदनिर्भासिनः परोक्षस्येति तथा च प्रत्यक्षपरोक्षयोर्विभिन्नस्वरूपत्वात्परस्परतः सिद्धो भेदः ययोर्विभि
न्नस्वरूपत्वं तयोः परस्परतो भेदो यथा जलानलयोर्विभिन्नस्वरूपत्वं च विशदेतरस्वभावतया प्रत्यक्षपरोक्षयोरिति॥ के पुनर्बुद्धेर्वैशद्या
वैशद्ये यदुपेतत्वेन प्रत्यक्षेतरयोर्भेदः स्यादिति चेदुच्यते॥ अनुमानाद्यतिरेकेण विशेषप्रतिभासनं॥ तद्वैशद्यं मतं बुद्धेरवैशद्यमतः परं॥२॥
अनुमानादिभ्योऽतिरेकेणाधिक्येन वर्णसंस्थानादिविशेषरूपतयार्थग्रहणलक्षणेन प्रचुरतरविशेषान्वितार्थावधारणरूपेण वा यद्वि
शेषाणां नियतदेशकालसंस्थानाद्यर्थाकाराणां प्रतिभासनं॥ तद्बुद्धेर्वैशद्यमभिप्रेतमस्मात्परमन्यथाभूतं यद्विशेषाप्रतिभासनं तदवैशद्य
मिति॥ स्वरूपापेक्षया च सर्वज्ञानं विशदमेव परिस्फुटरूपतया स्वरूपस्य सर्वज्ञानानां स्वसंवेदनेन प्रतिभासनात्॥ बहिरर्थस्तु केषांचिद्ज्ञानानां
परिस्फुटरूपतया प्रतिभाति॥ केषांचित्तु तद्विपरीततया, तत्स्वरूपेक्षयानेयं वैशद्यावैशद्यप्रतिपत्तये॥ न चेदं वैशद्यलक्षणमलक्षितं प्रत्यक्षं हि
प्रकारं भवति गौणं मुख्यं चेति तत्र गौणं सांव्यवहारिकमित्यादिनाऽऽचष्टे॥ संव्यवहारे नियुक्तं सांव्यवहारिकं गौणमित्यर्थः॥ किं तदिंद्रियानिं

तएवतथाहितैजसंचक्षुरूपादीनांमध्येरूपस्यैवप्रकाशकत्वात्तदर्कतेजोरश्मिवत्तस्यात्रप्रसिद्धेः प्राप्यकारित्वेचक्षुषोमहतःपर्वतादेर
प्रकाशकत्वंगरत्वेनन्यत्वाख्यातंधत्तूरकपुष्पवदाशेषसूक्ष्माणामप्यनेनमहत्त्वोपपत्तेस्तद्रूपाणांतेनेत्यालोकाभिनिनायावदर्थंवर्द्धनेम
महतःपर्वतादेःप्रकाशकत्वान्यथानुपपत्ते॥ननुचक्षुषःप्राप्यकारित्वेकथंशाखाचंद्रमसोर्युगपद्ग्रहणमित्यपिवाच्यंयुगपद्ग्रहणास्या
सिद्धत्वात्। प्रथमंनेत्रंहिचक्षुःसंनिकृष्टांशाखांप्राप्यप्रकाशयतिपश्चाद्विप्रकृष्टंचंद्रमसंयुगपत्प्रतिपत्त्यभिमानस्तूत्पलपत्रशतव्यति
भेदवद्भ्रांतिनिबंधनःदूरनिकटादिव्यवहारोपिचक्षुषःप्राप्यकारित्वेनदुर्घटःशरीरांशेपदृश्यावस्तुविषयस्यसंनिकृष्टविप्रकृष्टतोपपत्ति
प्र, नरूपस्यसुघटत्वात् यदिचाप्राप्यकारिचक्षुःस्यात्तर्हिकुड्याद्यव्यवहितवत्तस्यापिपरोक्षमेवादेश्यानेकयोजनशतान्यवहितस्यान्य कुड्या
पित्प्रकाशकःस्यात्तद्विप्रकृष्टत्वासंनिकृष्टविप्रकर्षाभावात्।नचैवंमनःप्राप्यकारित्वप्रतिपत्तव्यंकारकत्वात्प्रयत्नकारकंनत्वप्राप्यकारिय
थावास्यादिकारकंचचक्षुरिति॥यच्चास्याप्राप्यकारित्वेसाधनमभिधीयतेत्वासन्नार्थाप्रकाशकत्वादितिनतत्साध्याविशिष्टत्वात्रसा
धनमेवप्रतिपरासप्रतिषेधेहियदेवास्याप्राप्यकारित्वंतदेवात्वासन्नार्थाप्रकाशकत्वंप्रसज्यप्रतिषेधपक्षस्तुजैनैर्नाभ्युपगम्यते।प्रसिद्धांत
प्रसंगादितिचेत्।अत्रप्रतिविधीयते।यत्तावदुक्तं।बाह्येंद्रियत्वादितितत्रकिमिदंबाह्येंद्रियत्वंनामबहिरर्थग्रहणाभिमुख्यंबहिर्देशाव
स्थायित्वंबहिःकारणप्रभवत्वंइंद्रियस्वरूपातीतत्वंमनसोन्यत्वंवास्यात्॥नचाद्यविकल्पोमनसानेकांतत्वस्याप्राप्यकारित्वेपिबहिरर्थ-
ग्रहणाभिमुख्यतोबाह्येंद्रियत्वसद्भावात्॥द्वितीयविकल्पेपिपरमरूपस्यगोलकस्वभावस्यवाचक्षुषोबहिर्देशावस्थायित्वंस्यात् प्र
थमपक्षेकिमिदंतस्यतत्रावस्थायित्वमाश्रितत्वंप्रकाशकत्वेनप्रवृत्तिर्वा।नचाद्यविकल्पःसिद्धांतोरश्मिरूपस्यचक्षुषोभवताबहिर्दे
शाश्रितत्वस्यानभ्युपगमात्॥गोलकानर्गलेनेत्यादिश्यामश्यामालिरत्रमपोभवद्भिःप्रतिज्ञाना।द्वितीयविकल्पेत्वसिद्धोहेतूरश्मिरूपस्यचक्षु
षोग्राहकप्रमाणाभावतःप्रकाशकत्वेनबहिर्देशेतस्यवृत्तेरसिद्धेः।नह्यग्राहकप्रमाणाभावश्चाग्रेप्रतिपादयिष्यते। दृष्टांतस्यसाधनवि

न्या·कु·चं· कलत्वात्ताविधारोन्द्रियत्वस्य लगानासंभवात् गोलकस्वभावस्य तु चक्षुषो बहिर्देशावस्थायिविषयस्य चाप्राप्यदेशासंबद्धस्य।
३० स्वशरीरप्रदेशवायवत्वस्य न प्रतीतेः बहिःकारणत्वभवत्वमपि मनसेवानेकान्तिकं आत्मोपलब्ध्यादिवहिःकारणत्वं पुद्गलत्वं तत्त्व
भवत्वं च चक्षुरादीन्द्रियवन्मनसोऽप्यस्ति पौद्गलिकत्वेन षट्पदार्थपरीक्षायां प्रसाधयिष्यमाणत्वात्॥ रूपाद्युपलब्धेः स्वरूपातीतत्वं चा
प्रसिद्धान्तप्रसंगात् अनुपपन्नं मनोऽन्यत्वमपि मनसः सिद्धौ सिध्येत्॥ न च तन्नास्तीन्द्रियत्वं परिकल्पितस्य मनसः षट्पदार्थपरीक्षायां निराक
रिष्यमाणत्वात् सिद्धत्वात् तथापि बाह्येन्द्रियत्वं मनोऽन्यत्वे सत्यतीन्द्रियत्वमुच्यते॥ न त्र च मनोव्यवच्छेदार्थं बाह्यविशेषणमुक्तं तस्य
विशेषणस्याप्राप्यकारित्वात् सुखादेर्हि संयुक्तसमवायादिसंबंधाद्यो भेन तु संबन्धसंबन्धात् इति न तु स्पर्शयति रूपादीन् त्वादिवत्
न पुनः रूपादीन् चक्षुरपि संबन्धसंबन्धात्वः संबन्धोऽस्ति तेषु मिति न चाप्नोपात्तं चक्षुर्गोलकस्वभावं रश्मिरूपं वा प्रथमपक्षे प्रत्यक्षविरो
धोऽर्थेनासंबद्धस्यार्थदेशापरिहारेणावादि रश्मिदेशास्य गोलकस्वभावस्य चक्षुषः प्रमसत्ता प्रतीतेः अन्यथा तत्र शरीरत्वेन तत्रापत्य
प्रदेशस्योपलंभः स्यात्। द्वितीयपक्षे तु धर्मिणः सिद्धौ रश्मिरूपस्य चक्षुषः कुतश्चित्प्रमाणात् प्रसिद्धिः तत्साधकं हि प्रमाणं प्रत्यक्षम
नुमानं वा स्यात्। न तावत्प्रत्यक्षं धर्मिणो नत्वरूपा प्रतीतेः न खलु रश्मयः प्रत्यक्षतः प्रतीयन्ते विप्रतिपत्त्यभावप्रसंगात्॥ नहि नीले
नीलतया प्रतीयमाने कश्चिद्विप्रतिपद्यते॥ किंचेन्द्रियार्थसंनिकर्षजं प्रत्यक्षं भवन्मते न चार्थदेशे विद्यमाने स्वरश्मेरिन्द्रियस्य संनिकर्षोऽस्ति
यतस्तत्र तत्प्रत्यक्षं स्यात् अनवस्थाप्रसंगात्॥ अनुमानतोऽप्यत एवात्यन्ततो वा तत्सिद्धिः स्यात् यद्यनस्तवान्येऽन्याश्रयः प्रसिद्धेः तदनुमानोत्था
नेन तत्सिद्धिः स्यात् अनुमानोत्थानमिति। अनुमानान्तरात्तत्सिद्धौ न वस्थाः धर्मिणोऽसत्त्वात्प्यनुमानान्तरात्तत्सिद्धिप्रसंगात्॥ एतेन यदु ३०
क्तं रश्मिप्रसाधकमनुमानं रश्मिवच्चक्षुस्तैजसत्वादितिनिरस्तम्। व्याख्यानं यदुक्तं पक्षस्य हेतोः गणामव्याप्यविशेषणात्॥ किंच रश्मिवतो गोल
करूपस्य चक्षुषः प्रसाध्यत्वे प्रत्यक्षनिराकृतस्वपक्षता तद्व्यतिरिक्तस्य तस्यासिद्धरूपत्वाद्पसिद्धान्तप्रसंगात्। गोलकरूपस्य तु तत्साधने प्रत्य

सत्यप्रत्यक्षबाधात् भासुररूपभास्वरितस्य गोलकस्य प्रत्यक्षतः प्रतीतेः स्यादेतत् यथा स्त्रलदुष्यमयो ऽनुद्भूतरूपस्पर्शो वत्वादेर्नानाप्रत
त्यक्षबाधा कथमेवं रूपप्रकाशकत्वं न स्यात् तथा हि चक्षुरूपप्रकाशकं न भवत्यनुद्भूतरूपत्वात् जलसंयुक्तानलवत् न चानुद्भूतरू
पत्वं तेजोद्रव्ये क्वचिद् दृष्टमिति जलहेम्नोर्भासुररूपस्पर्शयोरनुद्भूतिप्रतीतेः स्वीकृतत्वात् यथानुद्भूते त्वत्राप्यप्रतिपत्तेः
दृष्टानुसारेण चादृष्टार्थकल्पनान्यथा पृथिव्यादेरपि तद्रूपा प्रसंगः तथा हि रश्मिवत् पृथिव्यादयो ऽप्यनुद्भूतरूपाः पवनवदेव हि तेजस
त्वं रश्मिवत्तया चक्षुः प्रदीपवत् प्रतिपन्नं न त्वनुद्भूतत्वमपि प्रत्यक्षत्वं तस्य साधने ऽप्रत्यक्षत्वविरोधः सोऽन्यत्रापि समानः ... आलोकादि
चक्षुषोऽत्र ततः प्रतीयते ऽन्वयमयस्तत्कथं नहि विरोधो ऽपरिणामत्वं न प्रतीयते ऽन्यच्चक्षिमापान सत्यथा लेलिपी नन्वस्पृष्टवर्णात्वेन लि
चाक्षिप्रतिपत्तेः प्रदीपतत्त्वोपलंभात् तद्वर्णत्वसिद्धिः स्यात् तस्य च बाधनमन्यत्रापि रश्मिवत्त्वे चास्याः अर्थप्रकाशने ऽप्यालोकाप-
क्षानस्यानपाहि यदुरश्मिवत्त्वं नरथप्रकाशने ऽप्यालोकापेक्षं यथा प्रदीपः रश्मिवच्च समवद्धिरभिधत्तं चक्षुरिति तथा न दृष्टत्वात् संबद्धसा ले
जनादेः प्रकाशकत्वप्रसंगो न खलु प्रदीपस्तद्दान् संबद्धं ज्वालाकारिकं न प्रकाशयति तानि प्रातीतिकं॥ प्रयोगो यद्रश्मिवत्तत्सं
बद्धमर्थं प्रकाशयत्येव यथा प्रदीपो रश्मिवच्च चक्षुस्तस्मात्संबद्धं कामलादिकं प्रकाशयेदेव न चाव चक्षुषः संबंधो ऽपि नालोक्य
हु, भिधानत्वं यतो गोलकरूपं चक्षुस्तत्वासंबद्धं रश्मिरूपं चाक्षिस्वभावं बालत्वाद्यपदेशप्रत्यक्षविरोधो गोलकस्वरूपस्य चक्षुषः काचा
दौ संबंधप्रतीतेः द्वितीयपक्षे ऽपि तत्राप्यसंबंधो ऽस्त्येव न हि स्फटिकादि कूपिकामध्यगतप्रदीपादिरश्मयस्ततो निर्गत्य तत्संयो
गिनानं संबद्धास्तत्प्रकाशकास्तत्प्रकाशनं भवन्तीति प्रतीतं रश्मिरूपमपि चक्षुर्व्यक्तिरूपचक्षुषो भिन्नदेशमभिन्नदेशं वास्यात् नाच
भिन्नदेशं न ह्यक्षिप्याघातानुषंगात् निराधारत्वप्रसंगाच्च नतस्तत्र कारणान्यथानुपकाने हेत्वाहारेणेव वार्थोपलब्धिप्रसंगश्च ॥
अथ ततो भिन्नदेशं न तत्र संबद्धमसंबद्धं बहिरर्थं व स्वात्मसंबद्धं चांजनादिकं प्रकाशयेन् अथासंबद्धं कथमाधेयं नामानि

देशा नहि संबद्धं

न्या·कु·चे· प्रसंगात्॥ यद्यपि तैजसत्वादिति साधनमुक्तं तदप्यप्रयुक्तमसिद्धत्वात्॥ न हि सिद्धं चक्षुषस्तैजसत्वमप्रमाणानवगतस्याप्रतीतेः। न हि गोलकस्वरूपस्य
३२ चक्षुषोऽभ्युपगम्यते तैजसत्वं रश्मिवद्रूपस्पर्शवद्गोलकस्वरूपस्य तत्र सबाधाभासुररूपोष्णस्पर्शरहितस्याख्या। अध्यक्षतः प्रतीतेः अनुमानबाधश्च
तथाहि॥ चक्षुर्न तैजसं भवति भासुररूपोष्णस्पर्शरहितत्वात् यत्तथाविधं न तत्तैजसं भवति यथा गोपिंडादि भासुररूपोष्णस्पर्शरहितं च च
क्षुस्तस्मान्न तैजसं भवतीति॥ तथा न तैजसं चक्षुस्तमःप्रकाशकत्वात् यत्पुनस्तैजसं तन्न तमःप्रकाशकं॥ यथालोकस्तमःप्रकाशकं च चक्षु
स्तस्मात्तैजसमिति निरतिशयरूपस्य नु चक्षुषोऽसिद्धस्वरूपत्वात्तैजसत्वमुपपद्यते न खलु स्वरूपमपि प्रत्यक्षादिभिः प्रसिद्धं नोन्मुक्तं। ननु मार्जा
रादिनेत्रे नेत्रत्वं रश्मिवत्तया व्याप्तं प्रतिपन्नमतो मनुष्यादिनेत्रे नेत्रत्वाद्रश्मिवत्त्वं ततस्तैजसत्वं च प्रसाध्यते नहि मार्जारादिनेत्रे
नेत्रत्वं रश्मिवत्त्वेन नरनारीनेत्रे प्रधानत्वेन व्याप्तं प्रतिपन्नमतो विशेषणाकार्त्स्न्याधावल्यं वा पार्थिवत्वमाप्यत्वं वा साध्यतामविशेषा
त्। प्रदीपरूपादीनां मध्ये रूपस्यैव प्रकाशकत्वादिति तैजसत्वसाधनमपि हितं न रूपि जलाञ्जनचंद्रमणिशाल्यादिभिस्तैः कांतस्य
तद्रूपकत्वं जलादीन् प्रतिगत्वा व्यावृत्तानां च चक्षुरश्मीनां नैव तस्य प्रकाशकत्वं न जलादीनामिति सर्वत्र दृष्टे तु वैकल्यायतेः॥ तथा च दृ
ष्टान्तासिद्धिः प्रदीपादावप्यन्यस्यैव रूपस्य प्रकाशकत्वप्रसंगात्, अन्यच्च साधनमुभयथा रूपप्रकाशकत्वं रूपस्यानुभवस्तत्र ज्ञानज-
नकत्वं वा प्रथमविकल्पे रूपज्ञाने नैकांतस्तस्यातैजसत्वेऽपि रूपानुभवसंभवात्॥ द्वितीयविकल्पे तु घटादिरूपेणानैकांतस्तस्यातैजस
स्यापि रूपज्ञानजनकत्वाभ्युपगमात्॥ करणत्वे सतीति विशेषणेऽप्यालोकार्थसंनिकर्षेण च रूपरूपयोः संयुक्तसमवायेन चानैकांतः॥
द्रव्यत्वे सतीति विशेषणेऽपि चंद्रादिनानैकांतः॥ अतश्चक्षुषः कुतस्तैजसत्वासिद्धेः कथं रश्मिवत्त्वं सिध्येद्यतः प्राप्यकारित्वं स्यात्। ३२
किं च प्राप्यकारित्वे विषयश्चक्षुर्देशमागच्छेच्चक्षुर्वा विषयदेशं तत्राद्यविकल्पे प्रत्यक्षबाधात् चक्षुःप्रदेशं विषयस्यागमनाप्रतीते
र्नहि चक्षुःप्रदेशे पर्वतादेर्विषयस्यागमनं केनचिद्दृष्टमिष्टं वानुभूयते येन सा। द्वितीयविकल्पेऽप्यध्यक्षविरोधो विषयं प्रति चक्षुषो ग

मनापत्तीतिः। चक्षुर्गोलकार्थेनाभिसंबध्यमानेंद्रियत्वात्त्वगादिवदित्यनुमानविरोधश्च॥ नच विशेषेपि दृष्टानिकर्षेणाकस्यचित्तत्वगत्या
संबंधाभ्युपगमे यथा चक्षुषोर्तिसंबंध एव किं नाभ्युपगम्यते लंबनोत्पत्त्यापेनत्। किंच चक्षुर्गोलकासंयुक्तार्थेचेयोतनत्वात्॥ नहींद्रियाविषक्त
वृत्त्यादित्यादेः संयुक्तसमवायादुपयोतत्पत्तिरेव कस्मीपिद्योतयत्संयुक्तेसमवायाविशेषात्। कथंचेवंवादिनः काचाद्यन्तरितस्य स्व
च्छोदकस्फटिकाद्यन्तरितार्थानामुपलंभः स्यात्। चक्षुषस्तत्र गच्छतः काचाद्यवयवेनाप्रतिबंधात्॥ अथ काचादिकं भित्त्वा चक्षूरश्मयो
र्देशं गच्छंति। भूतद्दिन श्वेतहितार्थोपलंभसमये काचादेरनुपलंभप्रसंगाभावस्यापान विस्थान॥ तदाधारस्यावपदिनोनावान्।
नचैवं युगपन्नयोर्निरंतरमुपलंभात्। सूर्यरश्मिव्यूहनिहता नुनरोनरनद्रूपव्यूहांतरस्याभूत्सेनेः पदीपादिज्वालावन्निरंतरलाभ्रमे
सोपगमनसिद्धिः॥ सर्वार्थानां त्रितिसर्गणिकत्वेपीत्यंनिरंतरलाभ्रमप्रसंगात्॥ एतेन ताराचंद्रमसोः क्रमेणानुभवेप्याशुत्वे
त्सलपन्चरानव्यतिभेदसुगपत्स्रतिपत्यभिमानोभ्यांनिनिं [illegible] रख्यातं। यथाप्युक्तं उणिरापेक्षया चक्षुर्विषयस्य संनिकृ
ष्टविप्रकृष्टनोपपत्तेर्दूरनिकटादिव्यवहारः सुपदर्शनं॥ नहपिश्यदायाचमिंद्रियसंनिकर्षेणास्यमतिपन्नौ नयानद्यवहारानुपपत्तेः॥
तथाहि यदिंद्रियसन्निकर्षेणावसीयतेनभ्वनतव्र दूरनिकटादिव्यवहारोयथारसादयिंद्रियसंनिकर्षेणात्स्वनिषेतनभानमवस्था
नुपपत्तेः॥ तथाहि यदिंद्रियसंनिकर्षेणावलोपपते॥ नतद्दूरनिकटादिव्यवहारोपधारसादायिंद्रियसनिकर्षेणावसीयतेतच॥ चक्षुर्विषय
इति प्राप्यकारित्वे च चक्षुषः संशयविपर्ययाद्यनुपपत्तिः साभान्यविशेषयोर्द्वयोरपि संनिकृष्टानामुपलंभसंभवात्॥ विशेषानुपलब्धिनि
मित्तौ हि संशयविपर्ययौ। नचचक्षुषा संनिकृष्टस्यावशेषविशेषस्य सामान्यविशेषस्यतिनविशेषस्याभिधानव्यं विशेषाभावात्॥ नन्व
प्राप्यकारित्वं चक्षुषो घटते। नचाप्राप्यकारित्वे सकलार्थप्रकाशकत्वप्रसंगो योग्यदेशापेक्षणादयस्कांतवत्॥ नत्वयस्कांतोयथा
ग्रामस्याकर्षणावर्तमानः सर्वस्यायसस्तथाविषस्याकर्षणे समर्थोपितु योग्यदेशस्थस्यैव॥ अंजनतिलकमंत्रादिर्वोग्रामस्यापि

न्या॰कु॰चं॰ स्मारेणाकर्षकः सन्न सर्वस्याकर्षको दृष्टो नियतस्यैव तस्मादेशेनाकर्षणोपलंभात्। भवतोऽपि च स्वरक्रमयोर्लोकानां चानादित्वेऽपि नि
३२ रूपेण प्रकाशयति॥ चक्षुर्वा संयुक्तसमवायाद्यथारूपं प्रकाशयति॥ तथा गंधादिकमपि त्वक् काशे यच्च ज्ञापितस्याविशेषादिति चोदये
त्येतेषु ज्ञापकत्वेऽपि कारकत्वादित्युक्तं तदपि मनसा व्यस्तानां अनन्तनिलकमंत्रादिनाचानैकांतिकं तस्य कारकत्वेऽप्यप्राप्यकारित्वात्। य
द्यप्यत्यासन्नार्थप्रकाशकत्वादित्यस्य साध्याविशिष्टत्वमुक्तं तदप्ययुक्तं प्रसंगसाधनत्वात् एतस्य श्रोत्रादौ हि प्राप्यकारित्वात्सा सन्ना
र्थप्रकाशकत्वयोर्व्याप्यव्यापकभावसिद्धौ सत्यां परस्य व्यापकाभावे व्याप्याभावः प्रसंगात्। त्वयासन्नार्थप्रकाशकत्वलक्षणस्य व्यापकस्य निवृत्त्या प्राप्यका
रित्वलक्षणव्याप्याभावस्यापादानमात्रमेवानेन विधीयत इति॥ ननु श्रोत्रादीनां प्राप्यकारित्वे च सूक्ष्मप्राप्यकारित्वेनाप्यश्रो
नन्तु त्रस्य विपक्षतानुपपत्तेस्तद्दृष्टान्तस्याप्यप्राप्यकारित्वात्॥ चक्षुःश्रोत्रमनसामप्राप्तार्थप्रकाशकत्वमित्यभिधानात्। प्राप्यकारित्वे
चास्य तद्विषये दूरादिव्यवहारो न स्यात्। अस्ति चायं दूरे शब्दो निकटे शब्द इति व्यवहारोपलंभात् ततोऽप्राप्यकारित्वमेवास्योपपन्नं।
तथा च प्रयोगः शब्दः स्वग्राहकेणासंनिकृष्ट एव गृह्यते दूरादिप्रत्ययग्राह्यत्वात् रूपादिवत्। न चासंनिकृष्टस्य शब्दस्य ग्रहणे कथं
ततः श्रोत्राभिघातः स्यादिति वाच्यं भासुररूपस्यासंनिकृष्टस्य ग्रहणेऽपि नेत्रस्य तेनाभिघातोपलंभात्॥ तस्मात्तु विशेषोऽत्र तत्स्विता
भिघातहेतुर्ज्ञातव्य इति॥ अत्र प्रतिविधीयते यत्तावदुक्तं शब्दः स्वग्राहकेणासन्निकृष्ट एव गृह्यते इत्यादि तत्र पक्षस्याध्यक्षबाधा कृतापा
कृत्यत्वं तथा विषयस्य मस्तकादिदेशस्य प्रकाशकत्वेन श्रोत्रस्याध्यक्षतः प्रतीतेः॥ अतो यावत्तु स्वस्य ग्राहकेणासन्निकृष्टत्वं शब्द
स्याध्यक्षबाधितं हेतुश्च गंधेनानैकांतिकः॥ तस्य स्वग्राहकेण संनिकृष्टस्य ग्रहणेऽपि दूरादिप्रत्ययग्राह्यत्वप्रतीतेः॥ न च तत्रापि प्रतीयमा ३२
नगंधे दूरनिकटादिव्यवहारोऽसिद्धो दूरे पद्मगंधो निकटे मालतीगंध इत्यादिव्यवहारस्य लोके प्रसिद्धत्वात्। किं च दूरादिप्रत्ययग्राह्य
त्वं साकारज्ञानपक्षेऽभ्युपगम्योच्यते निराकारज्ञानपक्षे वा न तावदाद्यः पक्षोऽनुपपन्नः स्वज्ञानगतस्य शब्दाकारस्य यतो दूरनिकट

व्यवहारानुपपत्तेः। यस्य हि निकृष्टाकारं ज्ञानं भिन्नदेशमर्थं वेत्ति तस्येदं दूरमिदं निकटमिति वक्तुं युक्तं साकारज्ञानवादिनः पुन
र्दूरादिनिर्भासज्ञानवेद्यमेवेति चेन्न दूरादिव्यवहारो युक्तो न त्वस्य किंचिद्दूरं निकटं वेति व्यवहारस्तात्विकोऽस्ति॥ एवं चैवं ज्ञानस्य स्वा
कारमात्रालंबनत्वे दूरादिज्ञानस्वरूपादभिन्नत्वात्॥ नहि ज्ञानस्य स्वरूपं सुखादयो वा ज्ञानाभिन्ना प्रतीयमाना दूरादिव्यवहारभा
जः प्रतीयन्ते सर्वत्रास्य व्यवहारोच्छेदप्रसंगात्। अथ चाप्याकारधापकस्य दूरादित्वाद्दूरादिव्यवहारः॥ अर्थस्तर्हि नत्वाप्यर्क
रितत्र कावासना विपत्तिः किं न स्याद्विशेषाणामेव प्रयासः करणाकुलीप्रविष्टता व्यवहारोऽपि दूरादिव्यवहारस्य तन्मूलकारणाद्दूरादित्वे
नोपपद्यमानत्वात्॥ दृश्यते हि गंधस्याशोऽपि सन्निकृष्टस्य ग्रहणेऽपि तन्मूलकारणदूरादित्वेन दूरे पद्मगंध इत्यादिव्यवहारः॥ किंच
स्वरूपतः शब्दो दूरादिस्वभावो दूरादिकारणप्रभवत्वात्। दूरादिदेशादागतत्वात्॥ दूरादिदेशोऽस्थितत्वात्॥ एतावत्स्वरूपतः नि
कटस्यापि तथा व्यवहारप्रसंगात्॥ दूरादिकारणप्रभवत्वेन चास्य दूरादिव्यवहारादित्वे नातः स्वग्राहकेण संनिकृष्टस्य न दूरत्व
सिद्धिर्गंधेनानैकांतिकत्वप्रतिपादनात्। अथ दूरादिदेशादागतत्वाच्छब्दस्य दूरादित्वं युक्तमिदं न तथैवास्य न दूषणोपपत्तेः। गंधादिव
त्तु दूरादिप्रदेशादागतोऽपि गंधः शब्दो वा संइंद्रियसन्निकर्षेण गृह्यमाणोऽपि पोष्पना विशेषवशात्संनिकृष्टविप्रकृष्टत्वप्रतीय
ते॥ दूरादिदेशोऽस्थितत्वात्तु तस्य दूरादित्वे स्थितोत्पत्तिदेशस्थाः शब्दाः श्रोत्रे गच्छन्ते न त्वागतास्त्वभ्युपगंतव्यास्तथा च योनिर्बा
तदूरस्थेन मनागपि न श्रूयते शब्दः सोऽनुकूलवातेन कथं श्रूयेत, प्रत्यासन्नेन न श्रूयते स स एव प्रतिवातेन कस्मान्न श्रूयते॥ न ह्यनेन श्रो
त्राभिघाताच्छब्दस्य नाशितत्वात् प्रतिदिशोत्राभिघाता न हि निर्वातप्रदेशस्थेन श्रूयते। न च तत्स्थदेशोऽसता शब्दप्रदेश एव सत्ता
नेन तदभिघातो युक्तः पर्वतेषु ज्वलितानामग्नीनामलानसंभवनाकप्रसंगात्। शब्दस्य नाशितत्वे तु यस्याप्यसौ वातेनानुकूलस्तेनापि
न श्रूयेतैवाविशेषात्। तत्प्रतिहतेनास्य प्रेरणेन च श्रोत्रेण यातोऽसौ गृह्यत इति सिद्धमस्याप्राप्यकारित्वं। यदि च स्वोत्पत्तिदेशस्थ एव सर्वे

न्या·कु·च·
३२

शब्दाः विलक्षणाः कथं तर्हि नलिकादिशब्दस्य भेर्यादिशब्दस्य च कर्णशष्कुलीगतस्य ग्रहणे मन्दतरो मन्दश्चेति प्रतीतिः स्यात् ॥ कथं वा धवलगृहादेरप
निशब्दवन्नतिशोत्तरत्वः ॥ कंसपात्र्याः संस्पृष्टाः शब्दमुपजनयन्तः प्रतीयन्ते ॥ यदि च स्रोतोत्पत्तिदेशस्य स्वशब्देनागतत्वेन तदानन्तरभेर्या
दिशब्दैर्यत्र दूरस्थो यस्तोऽपि न सकारादिशब्दस्यानभिभवादनाकुलमेव ग्रहणं स्यात् ॥ यतोत्पत्तिदेशस्य स्वैर्वा द्विषेणासंनिकृष्टा गृह्यं
ते भ्रान्तेनाकर्णान्तमहद्दूरस्थोऽपि ततान्यभिभवो यथा दूर्वीतप्रतीतीनां स्रोतोत्पत्तिदेशस्याखैर्वा द्विषेणासंनिकृष्टा गृह्यन्ते न च शब्दा इति । ननु दूरदेश
वर्तिनां पर्वतः पादपादीनभिभूयात्मानमेवोपदर्शयन्ति अतः साम्यविकल्पो हस्तान्तरत्यप्यसम्भावितं यतस्तेषां देशविप्रकृष्टतया नदृश्य ह
णापेक्षत्वाद्दूरप्रतिभासो नाभिभवात् स्रैकादिशब्दानां त्वविप्रकृष्टानामपि भेर्यादिशब्दैरभिभवोऽस्त्येव नोनतेषां स्रोतोत्पत्तिदेशस्यानामे
व ग्रहणं यदप्युक्तं न कुड्यैः श्रोत्राभिघातात्तथानाने ग्रामग्रहणं यथा भास्वरतेजसा च सुधेऽभिघातात्तत्समाग्रहणमिति तदप्ययुक्तं ह
स्तान्तरादूरीतिकयोर्वैषम्यात् दिवाकरचक्रकरादिभासुररूपात्वनिनि वर्त्यं च चक्षुषाभिसंबध्यमानात्तस्याभिघातेन तेन चोरस्थाः अतोऽयुक्तो
केनरभिघातात्तेषामग्रहणं यस्या च किंचिदलिपकद्व्याख्यानलिनि वर्त्यं तेन तदभिघातकारणं स्यात् वायुः स्यादिति चेत् निर्वाते तर्हि न स्या
त् न तरश्रवणं श्रोत्राभिघातकारणाभावात् इतरपेऽपि वात्राभिभेर्यादिकोलाहलेऽन्योपसोः ग्रहणं, अतोऽन्योन्यदेशोपसर्पणेन शब्दानामेवेत्य
शब्दानामभिभवोऽभ्युपगन्तव्यः ॥ तथा च दूरदेशागमनविशिष्टत्वादेवास्य गन्धादिवद्दूरत्वं सिद्धं न पुनः स्रोतोत्पत्तिदेशस्यानामपि देशागत
दूरत्वोपचारात् अन्यथा स्वलनितानन्तनिपत्तिः स्यात् ग्राणवच्छ्रुतिप्रतीतिवत् । कथं वा तत्र कोऽनन्यथा प्राप्यकारित्वं प्रसाधयेदुपचारेण स्या
प्रसाधकत्वात् तर्हि माणवकेऽग्नित्वमुपचारेण दाहादिकार्यं प्रसाधयति । किं च श्रोत्रापेक्षया यद्दूरत्वं शब्दस्य तत्किं देशग्रहणेन सति स्यात्
सतिवा ॥ न तावद्दर्शनविशेषणत्वात् शुद्धिदेशग्रहणं न दूरत्वेन मेव विशेष्यविशिष्टप्रतिपत्तिनिमित्तं ॥ यथा देशादिविशेषणं च शब्दस्य दूरादि
प्रतिपत्तौ देश इति । तथा च शब्दे दूरादिप्रत्ययोऽदूरदेशादिग्रहणे सत्येव भवति तत्सापेक्षत्वाद्दूरादिप्रत्ययस्य यत्तत्सापेक्षं दूरादिप्रत्ययः सत

ग्रहणोऽसत्येव भवतीति, सुषिरदेशादिदूरासन्नपार्श्वयोरेव चक्षुषा दूरासन्नदेशग्रहणोऽसत्येव दूरासन्नव्यवहारोऽनः अन्यथा ह्यसौ न ग्रह
णोऽसत्येवेष्यतां/ तथैवेह चक्षुरन्तरग्रहणं किं श्रोत्रादेस्तथा परिश्रोत्रादेशस्यापि शब्दस्य प्रसंगः नत्वत्राणत्वात्स्पर्शेन्द्रियं नैरात्म्य
निषन्नोऽसंगत्याभावाभेदेशापेक्षया दूरत्वाद्व्यवहरतीति प्रतीतिः स्यात् नहि देवदत्तगतोऽनन्तरदेशापेक्षयायतनस्य दूरत्वान्वयतीति स्या
न्नन्निदेशान्तरगतीवदूरदेशापेक्षया यत्र वदनस्य दूरः शब्द इति प्रतीतिरिष्टा॥ अथैवं द्वियदेशानुभवानन्तरभाविनिर्विकल्पज्ञानेन तथा प्रतीतेरय
मेदोषः नहि श्रोत्रेंद्रियदूरादिरहितस्य प्रतीतिः पुनस्तत्सहितस्यैव निकषेण तत्प्रतीतिः स्यात्, नैवं प्रथममेव दूरत्वादिविशिष्टस्यास्य प्रती
तेः ततो गतिपरिणामस्य स्वयं दूरादिप्रत्यययोग्यता विशिष्टस्य गंधस्येव शब्दस्यापि दूरादिप्रत्ययगोचरत्वं प्रतिपत्तव्यमिति सिद्धं शब्द
कारित्वं श्रोत्रस्य कथमन्यथा न द्वियदेशादिसंदेहः स्यादुपपन्नः॥ यथैव हि रूपं प्रतीयमानं किमस्मिन् देशे रूपमेतत्स्थाने भातं वा न्यस्मिन्वा
स्यादिरूपस्य न स्याद्वेति न संदेहोऽपि च यत्र विद्वज्ज्ञानेनैवास्याप्राप्यकारिणो द्वियराप्रतिपत्तिसंभवात्, तथा शब्दस्यासौ न स्यात् अस्ति चात्र
संदेहः किमन्तः शब्दोपं ज्ञातो बहिर्वा प्राप्यकारिरूपस्य स्याद्वेति न च यदेशादिसंदेहानतैवप्रसंदेहस्तर्हि गंधोऽप्यप्राप्त एव गत्युपेतो॥ देशादिसंदेह
देवात्रापि संदेहसंभवात्॥ अथातो घ्राणाभिकारश्च्यौ नात्माश्रैवसो प्रतीयते॥ तत्स्तरस्वेदपि समं, श्रोत्राभिकारस्य वा भिन्नदेशः शब्दः स्वनेतेः
तस्मादिन्द्रियानिंद्रियाभ्यामन्यस्यगौणमन्यस्त्वं प्रत्यक्षं धारणाकारणत्वात् पुनः सकलं सांव्यवहारिकमिन्द्रियानिन्द्रियप्रत्यक्षमिति।छ॥
मुख्यमिदानीं प्ररूपयति अतीन्द्रियज्ञानेनेत्यादिसुनिश्चितासंभवद्बाधकप्रमाणत्वात्सुखादिवत् मुख्यं प्रधानं प्रत्यक्षमित्यनुवर
र्त्यते॥ किं तदित्याह अतीन्द्रियज्ञानमवधिमनःपर्ययकेवलाख्यं। ननु चातीन्द्रियज्ञानस्य नहतो वा सदुपलंभकप्रमाणपंचकगोचरत्वेनै
कान्ततया भावप्रमाणकवलीकृतविग्रहत्वतो सत्त्वाल्कस्यसुख्यप्रत्यक्षतायसाध्येन, न च नन्दतीतिकान्तनास्यासिद्धात्सुखमैन्द्रियार्थवेदि
विषयसाध्यसारीणां मध्येकस्यचिदपि प्रमाणस्याऽसंभवात्॥ तथाहि॥ नतावत्प्रत्यक्षं तद्विषयं प्रतीतिनियतरूपादिगोचरत्वादिना तस्य

किंच संवेदनवर्त्तमाने चार्थे प्रत्यक्षं प्रवर्त्तते न चाशेषार्थवेदी चक्षुरादीन्द्रियैः संबद्धो वर्त्तमानश्चेतनत्वात्कथं तत्र भवत्प्रत्यक्षं प्रवर्त्तेत मा
न। नाप्यनुमानं तद्ग्राहकं तद्धि लिंगिनाऽविनाभाविलिंगबलेनोत्पद्यते। न च सर्वज्ञेनाविनाभूतं किंचिल्लिंगमुपलभ्यते। न हि कार्यं
स्वभावो वा, न तावत्कार्यं तत्कार्यकारणभावस्य सर्वज्ञे न सह कस्यचित्कार्यकारणभावासिद्धेः अत्यन्तानुपलम्भसाधनत्वात् तस्य नापि
स्वभावः अशेषवेदिनोऽप्रत्यक्षत्वेन तत्स्वभावत्वनियतलिंगस्य निश्चयानुपपत्तेः। आगमोऽपि नित्योऽनित्यो वा सर्वज्ञसद्भावबोधकः स्यात्, न ताव
न्नित्यः तत्प्रतिपादकस्य नित्यस्यागमस्यैवासंभवात्। हिरण्यगर्भः प्रकृत्य सर्ववित् सलोकवित् इत्यादेरप्यागमस्य कर्म्मार्थवाद
विधायकत्वेनाशेषज्ञविधायकत्वानुपपत्तेः। अनादेश्चागमस्यादिमत्सर्वज्ञप्रतिपादनविरोधात्। अनित्योऽप्यागमः सर्वज्ञप्रणीतो
ऽसर्वज्ञप्रणीतो वा तत्प्रतिपादकः स्यात्। प्रथमपक्षेऽन्योन्याश्रयः सर्वज्ञसिद्धौ हि तत्प्रणीतत्वेनागमस्य प्रामाण्यसिद्धिस्तत्सिद्धौ वा तः
सर्वज्ञसिद्धिरिति। असर्वज्ञप्रणीतस्य चागमस्याप्रमाणभूतत्वात्कथं ततस्तत्प्रतिपत्तिर्युक्ता, अभूतार्थस्यालस्तत्प्रतिपत्तौ स्ववचनादेव
तत्प्रतिपत्तिः किं न स्यादविशेषात्। न च नासाद्दृष्टप्रमाणभावस्यान्यवाक्यस्य स्ववचनात्कश्चिद्विशेषोऽस्ति। तन्नागमतोऽपि तत्प्रति
पत्तिः। नाप्युपमानात्तस्य सदृशपदार्थग्रहणानान्तरीयकत्वात् गोसदृशगवयग्रहणानान्तरीयकगवयोपमानवत्। न चाशेषज्ञसदृशः
कश्चिज्जगति वर्त्तते तस्य वर्त्तमानत्वात् तत्र वर्त्तमानस्यानुपपत्तेः। प्रपंचेऽपि तस्य सदृशग्रहणं नास्ति तेनोपमानविषयो यथा वन्ध्यासुतं प्रत्येको
नास्ति च सदृशग्रहणं सर्वज्ञस्येति। नाप्यर्थापत्तितस्तत्सिद्धिः सर्वज्ञसद्भावमन्तरेणानुपपद्यमानस्य प्रत्यक्षादिप्रमाणप्रमितस्य कस्यचिद
र्थस्यासंभवात्। न च धर्म्माद्युपदेशकरणान्यथानुपपत्तेर्बुद्धादीनां सर्वज्ञतासिद्धिर्भविष्यतीत्यभिधातव्यं तेषां तदुपदेशकरणा ३७
स्य व्यामोहादेवोपपत्तेः। द्विविधो ह्युपदेशो व्यामोहपूर्वकः सम्यग्ज्ञानपूर्वकश्च तत्र व्यामोहपूर्वको यथा स्वप्नोपलब्धार्थोपदेशः। स
म्यग्ज्ञानपूर्वको यथा मन्वादीनां सकलार्थज्ञानेऽस्यैव स्मृतो धर्म्माद्युपदेशाः, न हि निखिलपदार्थज्ञानां सिद्धे तोऽविशेषवि

र्तविप्रकृष्टार्थो धर्म्मादयो ये पदार्थास्तानुपदिशन्ति, न पुनस्तदावेदकान्यथानुपपत्त्या पुनरेवानुपदेशोपि तयोर्निर्णीतोपि
म्। न चासौ निराकृतोऽन्यो व्यामोहादेवासौ तद्विषयैर्लैः ऋतेऽन्यवसीयते। ततः सिद्धं सर्वज्ञस्य सद्रूपलंभकप्रमाणपंचकगोच
रातिक्रान्तत्वं। न च सिद्धसाधनं प्रमाणपंचकवैलक्षण्याविषयत्वं साधयति। तस्य सत्त्वमतः सर्वज्ञस्याकाशकुसुमवत्प्रमाणाभाव
त्वात्कस्यचिदपि प्रमाणाभावेन। अत्र सत्त्वासत्त्वलक्षणस्याप्यसौ समस्तं सनातनकालादिपरिमाणं वस्तु तेन तस्य न तत्स्वरूपावगतिप्रयोगे; किं वा
वर्त्तमानार्थग्राहकप्रत्यक्षेण तज्ज्ञानस्य मनस्यस्तत्त्वानुपपत्तिः सर्वज्ञस्य। न च सकलविषयत्वात् वर्त्तमानवस्तुविषयं ज्ञानं तस्य सर्वत्वम्। यथास्म
दादीनां वर्त्तमानवस्तुविषयं चातीतानागतार्थविषयं तथा सर्वज्ञज्ञानमिति। द्वितीयपक्षे तु तज्ज्ञानस्य भ्रान्तत्वप्रसंगः अन्यथा
स्थितस्यार्थस्यान्यथात्वेन ग्राहकत्वात्, यदन्यथास्थितस्यार्थस्यान्यथात्वेन ग्राहकं तद्भ्रान्तं यथा द्विचन्द्रादिज्ञानम्। अन्यथास्थितस्यातीता
नागतकालस्यार्थस्य वर्त्तमानतया ग्राहकं च सर्वज्ञज्ञानमिति। किं चैतस्मिन्नतीतादिस्वरूपेण प्रतिभासे विवक्षितवस्तुसत्तावस्था प्र
ध्वंसाभावयोः प्रतिभासेन, तदा युगपत्क्रमेण वा। युगपच्चेत् अर्हतो वस्तुनः उत्पत्तिध्वंसयोर्परस्परासंगात् युगपज्जन्ममरणादिप्र
देशप्रसंगः येन तस्य रूपेण प्रतिभासनं तेनैव अपरिच्छेदेन यथा नीलत्वादास्तत्तथा ध्वंसाभावरूपतया प्रतिभासेन वा अप
सम्पादकं वस्त्विति, तथा च प्रतिनियतार्थस्वरूपप्रतीतेरभावात् अव्यवस्थितस्य सर्वज्ञत्वं तन्न युगपत्। क्रमेणेति क्रमेणातीतानागता
नागतार्थानां परिसमाप्त्यभावात् तत्कालस्य परिसमाप्तेः सर्वज्ञत्वायोगात्। अथ वस्तुसत्तावन्तोऽनवप्रतिभासेन तदाकारमसौ सर्वज्ञः
स्यादिति॥८॥ अत्र प्रतिविधीयते। यत्तावदुक्तं सद्रूपलंभकप्रमाणपंचकगोचरातिक्रान्तत्वात्सत्त्वमतीन्द्रियज्ञानस्य तद्बाधितं तत्र
तिक्रान्तत्वात्तस्यासिद्धेः। तत्सद्भावावेदकस्यानुमानप्रमाणस्य सद्भावात्। इत्यनादिस्वर्गादिना दर्शयति। तदतीन्द्रियज्ञानमर्थसन्नि
कृष्टासंभवद्बाधकप्रमाणत्वात् सुखादिवदिति। न तावदाश्रयासिद्धो हेतुः धर्म्मिणो हेतुप्रयोगात्पूर्वं केनचित्प्रमाणादप्रसिद्धेरि

न्या·कु·च·

१५

स्वभिधानव्यं विकल्पप्रसादादानस्य प्रसिद्धेरिति कश्चित्तस्यायोगव्यवच्छेदेन क्रमेण सर्वज्ञावगतिरुपपद्यते तावानस्यानवस्तुवस्त्वात्पक्षमा
नेपिपर्यवसानाद्दुर्विकल्पत्वाद्विकल्पस्यानन्यतः सिद्धिरित्यप्रयत्नेन। नापि स्वरूपासिद्धम् न ह्यबाधकस्य कस्यचिदपि प्रमाणस्यासंभवात्, अत्र
नींद्रियार्थदर्शनेऽलिबाधकं प्रमाणं तत्रयदा प्रत्यक्षमनुमानाद्यभावो वा स्यात् यदि प्रत्यक्षं न किं क्वचित्करोति न तदभावं प्रमापयेत सर्वत्र सर्वदा वा
प्रथमपक्षे सिद्धसाधनं नहि सर्वेन सर्वदा तत्सद्भावोस्माभिः प्रतिज्ञातः॥ द्वितीयपक्षे तु अतींद्रियप्रत्यक्षमंतरेण सर्वत्र सर्वदातींद्रियज्ञाना
भावासिद्धिरित्यावेदयति सर्वज्ञस्यापि ज्ञानं विहितं सकलपुरुषपरिज्ञानस्यानंतरेणानुपपत्तेः तदभावेन तत्कोन कश्चिदनुपलंभः
सर्वज्ञत्व। यावदित्यादिना यावद्वेद्यं सकलज्ञेयं मात्रेति विषयीकरोतीत्येवं शीलं यज्ज्ञानं तेन रहितत्वं स्यात्सकलपुरुषपरिज्ञ
स्यात् परिज्ञानस्यानंतरेणातींद्रियज्ञानमंतरेणानुपपत्तेः तदर्थोत्यभिसंबंधः। न चानुमानादिनाविंद्रियजज्ञानेन सर्वत्र सर्वदा सर्वदर्शिनो
भावः वर्त्तुं बाधकत्वं स्यान्तदिविषयत्वात्। यद्यद्विषयं न भवति न तत्तद्विपरीतधर्मस्य बाधकं यथा शब्दाविषयं चाक्षुषविज्ञानं तत्कथा
यथा तस्य सकलदेशकालवर्त्ति पुरुषपरिषद्विषयं चक्षोरविज्ञानमिंद्रियप्रभवं ज्ञानमिति॥ ननु तत्प्रवर्त्तमानं प्रत्यक्षं सर्वदर्शिनो बाधकं
राब्दश्रावणत्वप्रत्यक्षमिथ्याश्रावणत्वस्य॥ किंतु निवर्त्तमानं यत्र हि प्रत्यक्षस्य निवृत्तिस्तस्याभावो वसीयते तस्यानुपपत्तं। यतो प
रिवस्तुनः प्रत्यक्षं कारणं व्यापकं वास्यात्तदा तन्निवृत्तौ वस्तुनोपि निवृत्तिः स्यात् नान्यथातिप्रसंगात् कारणस्य हि वन्त्यादेर्निवृत्तौ का
र्यस्य धूमादेर्निवृत्तिर्दृष्टा, व्यापकस्य च वृक्षत्वादेर्निवृत्तौ व्याप्यस्य शिंशपात्वादेर्निवृत्तिः, न चार्थस्य प्रत्यक्षं कारणं तदभावेपि तद्
भावात् तदभावेपि भवति॥ न तत्तस्य कारणं यथा गौरभावेपि भवन्न गौः कारणं कोविदारो दिव्यवधानः सत्यपि व्यवधाने संभवति चार्थ १५
इति। नापि व्यापकं तन्निवृत्तावप्यनिवर्त्तमानत्वात् यन्निवृत्तावपि यन्न निवर्त्तते न तत्तस्य व्यापकं यथा निवर्तमानेपि कुंभे निवर्त्तमानपट
भस्य तत्कुंभो व्यापकेन निवर्त्तमानेपि प्रत्यक्षेन निवर्त्तते च देशादिविप्रकृष्टेर्थ इति॥ न चाकारणाव्यापकभूतस्य निवृत्तौ कार्याव्याप्य

भूतस्यार्थस्य निवृत्तिर्मुक्तातिप्रसंगात्। योपि कार्याभावात्कचित्कारणस्याभावनिश्चयः सोप्यप्रतिबद्धसामर्थ्यस्यैव न पुनः कारणमात्रस्य न
चार्थांकस्यचित्संप्रत्यक्षोधार्याणां सामर्थ्यमस्ति॥ येनतन्निवर्त्तमानं तेषामभावं साधयेत्॥ किंबाध्यत्वानिवृत्त्यर्थाभावयेत्परिस्थाप्यव्यापक
भावः सिद्धेतरानन्निवृत्तेनेरर्थाभावो निश्चीयेत, नचास्मिन्सिद्धस्ति विप्रकृष्टेर्थे सत्यपि व्यापकनिवृत्तेः प्रतीयमानत्वात्॥ किंच भवत्पक्षनिवृ-
त्तिः सर्वविदः सत्वं प्रसाधयेत्सर्वप्रत्यक्षनिवृत्तिर्वा। नचाद्यपक्षो नुपपन्नो भवत्सत्तात्पक्षनिवृत्तेर्देशादिव्यवधानेसत्यप्यपेक्षप्रतीयमानत्वात्॥
द्वितीयपक्षोप्यनुपपन्नः सर्वज्ञनिषेधे सर्वप्रत्यक्षनिवृत्तेः सर्वज्ञमंतरेणानुपपत्तेः, नत्वर्वाग्दृशां सर्वप्रमातृणामसत्वात्करणेन तन्मतस्वरूपं
नप्रवर्त्तनेन इति प्रतिपत्तुं शक्यं। नन्वेवं सर्वज्ञाभावेप्यव्यवहारोच्छेदः स्यात्, कथंचित्घटाद्यभावसाधनेप्युक्तदोषानुषंगादित्यप्यचोद्यं तदभिधानं
तदैकज्ञानसंसर्गिपदार्थांतरोपलंभेनाभावव्यवहारोपपत्तेः। एकस्य हि कैवल्यमितरस्य वैकल्यं॥ नचात्रोपलंभस्य केनचित्सार्द्धमेकज्ञा
नसंसर्गित्वमस्ति यस्योपलंभात् तदभावः सिद्धेत् न स्यात्तत्र परोक्षत्वात्॥ नन्वत्र धर्मसर्वविदोबाधकमनुमानं, धर्मिसाध्यसाध-
नानां स्वरूपाप्रसिद्धेस्तद्बाधकेप्यनुमाने धर्मित्वेन सर्वज्ञोभिधीयतेः सुगतः सर्वपुरुषा वा, परिसर्वज्ञत्वस्य किंतत्र साध्यमसत्वमसर्वज्ञ-
त्वंवापथसत्वं किं न च साधनमनुपलंभो विरुद्धविधिर्व्वक्तृत्वादिकं वा यद्यनुपलंभः सकिं सर्वज्ञस्य तत्कारणस्य तत्कार्यस्य व्यापकस्य तत्स्व-
भावादिः सर्वज्ञस्य सोपि किं स्वसंबंधी सर्वसंबंधी वा, स्वसंबंधी चेत्सोपि किं निर्विशेषण उपलब्धिलक्षणप्राप्तत्वविशेषणो वानुपलब्धि-
र्विशेषणो सौ न तदभावसाधनाय प्रभवति परचित्तादिविशेषादिभिरनैकांतिकत्वात्॥ नाप्युपलब्धिलक्षणप्राप्तत्वविशेषणः सर्वत्र सर्वदास
र्वज्ञाभावसाधनाभावानुषंगात्॥ नहि सर्वदाप्यसत उपलब्धिलक्षणप्राप्तत्वं घटते॥ कचित्कदाचित्सतोपलंभाविनाभावित्वात्तस्यात
घादि॥ यद्युपलब्धिलक्षणप्राप्तेनेनत्वसर्वदाप्यसत्यथा घटादिरुपलब्धिलक्षणप्राप्तश्च सर्वज्ञ इति। एतेन सर्वसंबंधपक्षोपि प्रत्याख्यातः।
प्रसिद्धस्य सर्वसंबंध्यनुपलंभो सर्वविदामप्रतिपत्तुमशक्यत्वात्॥ नखलु सर्वात्मनां तज्ज्ञानानां वा प्रतिपत्तिर्नोसत्संबंधिसर्वज्ञानुपलंभः प्रति

यत्तुं ज्ञापकः॥ नापि क्वचित्प्रदेशविशेषे रूपाद्यनुपलंभाच्छायाद्यभाववत् सर्वज्ञस्य कारणानुपलंभादभावो ग्राह्यः; न कारणस्य ज्ञानाव-
रणादिकर्म्मप्रक्षयस्यानुमानादिनोपलंभसंभवात्॥ समर्थयिष्यते च मोक्षप्ररूपणावसरेऽशेषविरोधत्वं तपःप्रभवज्ञानावरणकर्म्मप्रलया-
दाविर्भावइति। कार्यानुपलंभोप्यसिद्धस्तद्धर्म्मादेशोपदेशनिपादकस्यागमस्यैव तत्कार्यस्योपलभ्यमानत्वात्॥ न चैवं निपादकागम-
स्यापौरुषेयत्वात्कथं तत्कार्यत्वेनास्य साधकत्वमपौरुषेयत्वस्यागमे प्रतिषेत्स्यमानत्वात्॥ गुणवद्वक्तृकत्वेन चाशेषवचसां प्रामाण्यस्य
समर्थयिष्यमाणत्वात्। व्यापकानुपलंभोप्यसिद्धस्तद्व्यापकस्यानुमानेनोपलंभप्रतीतेः सर्वज्ञत्वस्य हि व्यापकं सर्वार्थसाक्षात्कारित्वं
न पुनः सर्वार्थपरिज्ञानमात्रं तस्यासर्वज्ञेष्वप्यागमद्वारेणोपलभ्यमानत्वात्॥ तच्चानुमानतः प्रसिद्धं तथाहि कश्चिदात्मा सकलार्थ-
साक्षात्कारी तद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबंधप्रत्ययत्वात् यद्यद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबंधप्रत्ययं तत्तत्साक्षात्कारि य-
थापगततिमिरादिप्रतिबंधं लोचनविज्ञानं रूपसाक्षात्कारि सकलार्थग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबंधप्रत्ययश्च कश्चिदात्मेति। न
तावदयं विशेषणासिद्धो हेतुः आगमद्वारेणाशेषार्थग्रहणस्वभावत्वस्यात्मनि प्रसिद्धत्वात्। नापि विशेष्यासिद्धः प्रक्षीणप्रतिबंधप्रत्य-
यत्वस्याग्रे प्रसाधयिष्यमाणत्वात्॥ नन्वनुपलंभस्तदभावे हेतुः नापि विरुद्धविधिः यतः साक्षात्परंपरया वा विरुद्धस्य विधिः सर्वज्ञाभावं प्र-
साधयेत् प्रथमपक्षे सर्वज्ञत्वेन साक्षाद्विरुद्धस्यासर्वज्ञत्वस्य क्वचित्कदाचिद्विधानात्तस्याभावः साध्येत सर्वत्र सर्वदा वा प्रथमविकल्पेन
सकल्येन साकल्येनाशेषज्ञाभावः प्रसिद्ध्येत् यत्रैव हि तद्विधानं तत्रैव तदभावः सिद्ध्येन्नान्यत्र; न हि क्वचित्कदाचिद्दहने विधाने सर्वत्र सर्वदा
शीताभावो दृष्टः। द्वितीयविकल्पोप्यसंभाव्योऽर्वाग्दृशः सर्वत्र सर्वदा सर्वज्ञत्वविधेरसंभवात्॥ तत्संभवे वास्यैवाशेषज्ञत्वप्रसंगः स्यात्। परं-
परयापि तद्व्यापकविरुद्धस्य तत्कारणविरुद्धस्य तद्विरुद्धकार्यस्य वा विधिस्तदभावं साधयेत्। न तावत्तस्य सर्वज्ञत्वस्य व्यापकेनाखिलार्थसा-
क्षात्कारित्वेन विरुद्धस्य तदसाक्षात्कारित्वस्य नियतार्थसाक्षात्कारित्वस्य वा विधिस्तदभावसाधनाय प्रभवति सहि क्वचित्कदाचित्तदभावं

प्रसाधयेत्। अनुपारस्य सर्वत्र व्यापकशीतविरुद्धवह्निविधानात्। क्वचित्कदाचित्तु पारस्य शीतनिषेधवत्। न पुनः सर्वत्र सर्वदा तत्र तदा न व्यापकवि
रुद्धविधिसंभवात्। क्वचिदात्मविशेषेण व्यापकविधिः प्रसाधितत्वात्तत्कारणविरुद्धविधिरपि क्वचित्कदाचिदेवाशेषज्ञाभावं प्रसाधयेत् य
थारोमहर्षादिकारणशीतविरुद्धवह्निविशेषविधानात्। क्वचित्कदाचिच्छीतकार्यरोमहर्षादिनिषेधः॥ न पुनः साकल्येन तत्कारणवि
रुद्धविधिः साकल्येन संभवाभावात् सर्वज्ञत्वस्य हि कारणं ज्ञानावरणादिकर्मप्रक्षयस्तद्विरुद्धस्य तु रवपक्षस्य त्वविधिः क्वचिदेवात्मनि न स
र्वत्र तत्त्वं न प्रकृतस्य क्वचित्तु विशेषप्रसाधयिष्यमाणत्वात्। एतेन तद्विरुद्धकार्यविधिरपि प्रतिव्यूढः नेन हि सर्वज्ञत्वेन विरुद्धं किंचिद्
ज्ञानं तत्कार्यं निपातादिविषयं वस्तु यस्य विधिः सोपि न सामस्त्येनाशेषज्ञाभावं साधयितुं समर्थः यथैव न हि पिस्त्वभेनतत्तद्भावप्रसा
धनसामर्थ्यापत्तेः यथा यथैव प्रदेशविशेषे शीतादिविरुद्धदहनादिकार्यस्य धूमादेर्विधिस्तत्रैव शीतस्पर्शनिषेधो न सर्वत्र॥ नन्वि
रुद्धविधिरप्यशेषविदोभावप्रसाधकः नापि वक्तृत्वादिकं तद्वत्त्वाभ्युपगमे वक्तृत्वादिधर्मोपेतत्वानुपपत्तेः॥ अन्यथा स्ववचनविरोधा
नुषंगात्॥ न खलु नास्ति सर्वज्ञो वक्तृत्वादिधर्मोपेतत्वादित्यभिदधतां स्ववचनविरोधः परिहर्तुं शक्यः नन्वाशेषज्ञस्यासत्ता कुतश्चिदपि सा
धनान्न साधयितुं शक्या। नाप्यसर्वज्ञतास्ववचनविरोधस्यानाप्यविशिष्टत्वात्। न हि सर्वज्ञोस्ति सर्वज्ञरहितं तु वचः स्ववचनविरोधासंभवः किं
च सर्वविदः प्रमाणाविरुद्धार्थवक्तृत्वे हेतुत्वेन विवक्षितं तद्विपरीतं वक्तृत्वमात्रं वा प्रथमपक्षे सिद्धो हेतुः भगवतस्तथाभूतार्थवक्तृत्वासंभ
वात्। द्वितीयपक्षे तु विरुद्धो हेतुः दृष्टेष्टाविरुद्धार्थवक्तृत्वस्यानन्तज्ञानेन सह संभवात्। तृतीयपक्षेप्यनैकान्तिकत्वं वक्तृत्वमात्रस्य सर्वज्ञत्वे
न विरोधासंभवात्। एतेन पुरुषत्वधर्मिप्रतोपि प्रत्याख्यातोसत्त्वादि साध्यापेक्षयानुपलंभादि साधनापेक्षया चोक्तदोषानुषंगाविशेषा
त्। किंच सुगतस्य सर्वज्ञत्वप्रतिषेधे अन्येषां तद्विधिरवश्यंभावी विशेषप्रतिषेधस्य शेषाभ्यनुज्ञानान्तरीयकत्वादयमब्राह्मण इत्यादिवत्।
अथ सर्वपुरुषाणामसर्वज्ञत्वं वक्तृत्वादेरसर्वज्ञत्वेन प्रसाध्यते। न च विपक्षात्तस्य व्यतिरेकासिद्धौ संदिग्धविपक्षव्यावृत्तिकत्वान्न सर्वज्ञताप्र

न्या·कु·चं· साधकत्वानुपपत्तेः। रथ्यापुरुषादावसर्वज्ञत्वे सत्येव वक्तृत्वोपलंभात्सर्वज्ञे च वक्तृत्वादेरनुपलंभात्ततो व्यतिरेकासिद्धिरित्यपि मनोरथमा
३१ त्रं सर्वज्ञात्मन्यसंबंधिनोऽनुपलंभस्यासिद्धत्वानैकांतिकत्वनिपातनात्॥ ननु सर्वज्ञस्य कस्यचिदप्यभावात्सिद्धात् ततो वक्तृत्वादेर्व्यतिरेकसिद्धिर
ति चेत्॥ कुतः पुनस्तदभावसिद्धिस्तस्यानुपलंभादेव चेच्चक्रकप्रसंगः॥ तथाहि॥ वक्तृत्वादेः सर्वज्ञाभावसिद्धौ तस्य व्यतिरेकसिद्धिस्तत्सिद्धौ
चास्यासर्वज्ञत्वेनैव व्याप्तिस्तत्सिद्धौ चातः सर्वज्ञाभावसिद्धिरिति। यथा व्यतिरेकपर्यन्तं चान्यतरद्वापि यत्र किं कोऽपि प्रमाणमस्ति॥ अ
नुपलंभोऽस्तीति चेत् नास्य सर्वज्ञात्मसंबंधिनोऽसिद्धानैकांतिकत्वेन तदभावसाधकत्वानुपपत्तेः। यदि चानुपलंभमात्रेणातींद्रियार्थदर्शिनो
ऽभावः साध्यते॥ तदा तदभावज्ञस्याप्यतो भावः किं न साध्यते विशेषाभावादिति परदर्शी प्रत्याह॥ न तदभावतत्त्वज्ञो न कश्चिदनुपलब्धेः स्वतत्त्व
वत्॥ न तदभावेत्यादि॥ तस्यातींद्रियज्ञानस्याभावः स एव तत्त्वं तज्ज्ञो न कश्चिदनुपलब्धेः स्वपुष्पवदिति॥ अथ यदा यस्मादादिस्तथा भूतोऽनुपल
भ्येन प्रत्याख्यस्तथाभूतो भविष्यतीत्याशंक्याह। नैवं जैमिनिरन्यो वा न तदभावतत्त्वज्ञः सत्त्वपुरुषादेः रथ्यापुरुषवदिति उपलक्षणं चैतत् तेनैवं
दार्थज्ञोऽपि न भवति न तत्त्व एवं तर्हीदं त्वयापि दुष्टं यं तथा च तलाभमिच्छतो मूलोच्छेदः स्यात् सत्त्वपुरुषत्वाद्यविशेषेऽपि जैमिन्यादेः रथ्यापुरुषादि
विलक्षणत्वात् महर्षिज्ञानातिशयो न विरुध्यत इत्यत आह। पुरुषत्वेऽतीन्द्रियार्थसंभवेनातींद्रियदर्शी किं न स्यात्॥ पुरुषेत्यादि पुरुषस्य जैमिन्यादेरिति
शेषो वेदार्थसर्वज्ञत्वभावत्वज्ञनतादिलक्षणस्तस्य संभवे अन्यातींद्रियार्थदर्शी किं न स्यात्॥ ननु तदभावतत्त्वज्ञो न कश्चिदनुपलब्धेरित्यसिद्ध
नत्पुनः स्वपानुपलंभस्यैव प्रमाणत्वोपपत्तेः न चापरस्यानुपलंभोऽयोग्यः परत्वेन सोऽप्रयत्नत्वादित्याह। अथेत्यादि अथ न तदभावतत्त्व· २७
ज्ञाभावसाधनेऽनुपलंभप्रमाणमन्मीमांसकसर्वज्ञादिविशेषाभावे कुतः प्रमाणाद्यद्भेदात् साधकव्यापकप्रमाणाभावात्। सर्वज्ञत्वा
दिर्यस्यैव वक्त्रादेः स एव विशेषस्तस्याभावः साध्यः कुतः प्रमाणादन्यकृतस्थिरित्यर्थः॥ कुतस्तत्रेत्यत आह। अभेदादविशेषात् तत्राऽनुमा
नमप्यशेषविदो बाधकं नाप्यर्थापत्तिस्तदभावमंतरेणानुपपद्यमानस्य प्रमाणषट्कविज्ञातस्य कस्यचिदप्यर्थस्यासंभवात्॥ वेदप्रामा

गोपेस्य च सर्वज्ञे सत्येवोपपत्तेर्न हि शृगालेनैव कुरंगे भेवचसः प्रामाण्यमिति तद्वैपौरुषेयत्वप्रतिषेधात् संप्रतिपादयिष्यते॥ नाप्यु
पमानं तद्बाधकं तत्खलूपमानोपमेययोरध्यक्षत्वे सति गोगवयवत्सादृश्यालंबनमुदयमासादयति॥ नान्यथातिप्रसंगात्॥ न चाशे
षपुरुषाः सर्वज्ञश्च केनचिद्दृष्टो येनाशेषपुरुषवत्सर्वज्ञः सर्वज्ञवदाशेषपुरुषा इत्युपमानं स्यात् तद्दृष्टौ वा तस्यैवाशेषज्ञत्वप्रसं
गात्कथमुपमानात्सर्वज्ञाभावः स्यात् तदुक्तं ज्ञो मेन॥ श्लोकः॥ नरान्दृष्ट्वा त्वसर्वज्ञान् सर्वानेवाधुनातनान्॥ तत्सादृश्योपमानेन शे-
षासार्वज्ञसाधनं॥ इति॥ किं चाशेषज्ञस्याशेषप्रमातृसंस्थानवदखिलक्षणशरीरसंस्थानतयोपमेयता स्यात् इंद्रियप्रभवप्र
त्यक्षेणार्थपरिच्छेदकतया वा इत्थं विधारणवत्तीरूपतया वा न तावदाद्यविकल्पोऽनुपपन्नः सर्वज्ञबाधकत्वाभावतः सर्वज्ञवादिनामभि
प्रायं संपादकत्वात् न हि शरीरसंस्थानस्याशेषज्ञानादृशादिभिरिष्यते येनाशेषज्ञशरीरसंस्थानस्येतरजनसंस्थानोपलक्षणेन त
स्यासर्वज्ञत्वमपि स्यात्॥ किं चात्मनः सत्त्वानित्यत्वं तु विलक्षणसाकल्यं न द्वैलक्षण्येन स्यासर्वज्ञानोपमानं स्यात् [illegible] न
न सादृश्येन हि लक्षणेनान्यत्राप्यदृष्टेर्न कुकमतिप्रसंगात्॥ अथेंद्रियप्रभवप्रत्यक्षेणार्थपरिच्छेदकतया सर्वज्ञस्य सर्वपुरुषैः
साम्यादुपमेयता॥ ननु स्वरूपेमाणामेव वस्तुभूतार्थपरिच्छेदपदार्थे सार्थ्यतारज्ञेयाधिसादृश्यं तन विशेषिनमुपमानस्य प्रमेयं स्वर
णं चानुभूतत्वविषयेप्रवर्त्तेनान्यत्रातिप्रसंगात्॥ न चाशेषपुरुषास्तद्वर्तीनि चित्तानि चैकेन चिदसर्वविदानुभूतानि यतः स्मर्येर
र्वज्ञ न्॥ नाप्यननुभूतानां तेषां सर्वज्ञत्वसाधारणः कश्चिद्धर्मो निश्चेतुं शक्यः यद्वशादहमिव सर्वे देशासर्वे पुरुषाः प्रतिनियतगर्थसिद्धि
येऽपर्शप्रतिसर्वपुरुषवदाहमित्यसर्वज्ञतयोपमीयेरन्॥ यदपि सत्त्वादिकं कैश्चिदसर्वज्ञे दृष्टं तदपि नासर्वज्ञत्वस्य स्वसाधारणं सर्व
ज्ञेऽपि सत्त्वाद्यविरोधात्॥ अन्यथा सर्वपुरुषाणामवेदार्थज्ञत्वं मूर्खत्वादिवान दृष्टुपमीयेतावि शेषात्॥ यथा च न कश्चिद्वालिशो गव
ण येसत्वादिकर्म्मदर्शनात् घटादीनामपि गवयसादृश्यमुपमिमीयते तथा सर्वपुरुषाणां सत्त्वादिधर्म्मदर्शनान्नासर्वज्ञत्वमिति ए ता

न्या.कु.चं.
३८

तेन सर्वविषयाणामवसर्वज्ञः सर्वज्ञवद्दाखरविषयाणामिति निरूपनयासर्वज्ञस्योपमेयवाक्यपुरुषः।। तत्रोपमानमपि तद्बाधकं नाप्यागमः सहिष्पौरुषेयपौरु
षेयो वा तद्बाधकः स्यात्।। न तावदपौरुषेयस्तस्यागमविचारावसरे प्रपंचतः प्रतिषेत्स्यमानत्वात् कार्येऽर्थे भवद्भिः प्रामाण्याभ्युपगमाच्च स्वरू
पेपि प्रामाण्येतिप्रसंगात्। न चातोषज्ञाभावप्रतिपादकं किंचिद्देवाक्यमस्ति हिरण्यगर्भः सर्वज्ञ इत्यादिवचसां कालांतरसद्भावावेदकानामे
वानेकशः श्रवणात्।। स्वचकर्म्मार्थवादपरत्वात्तेषां न सद्भावावेदकत्वं कुतः पुनस्तत्परत्वं तेषां न पुनस्तत्सद्भावावेदकत्वं।। तस्यासत्वा
त्तदपि कुतः प्रमाणांतरात्तस्य कर्म्मार्थवादपरतयातत्सद्भावावेदकत्वाद्वा।। तत्राद्यपक्षोयुक्तः सर्वज्ञासत्वग्राहिणः प्रमाणांतरस्य प्रागेव प्र
तिक्षिप्तत्वात् द्वितीयपक्षे त्वन्योन्याश्रयः।। तथाहि।। सर्वज्ञासत्वसिद्धावागमस्य कर्म्मार्थवादपरत्वात्तत्सद्भावावेदकत्वसिद्धिस्तत्सिद्धौ
च सर्वज्ञासत्वसिद्धिरिति।। नापौरुषेयोप्यागमः।। किं सर्वज्ञप्रणीतस्तदभाववादिप्रणीतः पुरुषप्रणीतोन्यप्रणीतो वा तद्बाधकः स्यात्। यदि सर्व
ज्ञप्रणीतः कथं तद्बाधको विरोधात्।। द्वितीयपक्षे प्यतोषज्ञभावप्रतिपादकागमप्रणीतः सकलं सकलतद्विकलं वा यथा वाचां घनदास
स्मृतिप्रणेतेन तदा बुद्धस्तत्प्रणीतागमः प्रमाणं। न तु नरचेष्टतत्स्वबाधकस्तथा प्रतिपद्यमानस्य तस्य रेणानुरेवातोषज्ञत्वप्रसिद्धेः।। अथ त
त्प्रतिपद्यते कथं तर्हि प्रमाणमज्ञानमहामहीधरभरक्रांतपुरुषप्रणीतत्वात् तथाविधरथ्यापुरुषप्रणीतागमवत्। अन्यप्रणीतपक्षेप्ये
तेष्वदूषणाद्दूषणं द्रष्टव्यं।। तन्नागमोपि सर्वज्ञबाधकः नाप्यभावप्रमाणं तस्याग्रे विस्तरतो निराकरिष्यमाणत्वात् सत्त्वान् तथापि प्रत्यक्षा
दिप्रमाणपंचकविनिवृत्तिरूपं तद्बाधकमित्यं।। तन्निरनिश्चय सत्प्रतिषेधरूपापर्युदासरूपा वा प्रसज्यप्रतिषेधपक्षे तस्यार्थपरिच्छित्तिहेतुत्वात् १८
प्रत्यनिरूपत्वात् घटाद्युपलंभरूपं तत्त्वार्थपरिच्छित्तिहेतुर्यथागमेंद्रीवरंनीरूतं च प्रसज्यप्रतिषेधरूपमभावप्रमाणमिति।। परिच्छित्तिहेतुत्वं हि भावधर्म्मः
स कथं सर्वथा तुच्छस्वभावस्य स्याद्विरोधात्।। तदभावाच्च कथं प्रमाणता परिच्छित्तिसाधकतमस्य प्रमाणव्यपदेशात्। प्रमाणाभावस्य तत्त्वाभा
वस्य स्याद्विरोधात् तदभावाच्च कथं प्रमाणता परिच्छित्तिसाधकतमस्य प्रमाणव्यपदेशात्।। प्रमाणाभावस्य तत्त्वाभावस्य स्याद्विरोधात् तदभा

सत्त्वकथं प्रमाणतापरिच्छित्तेः साधकत्वमस्य प्रमाणव्यपदेशमन् ॥ प्रमाणाभावरूपत्वाच्चाभावस्य तद्व्यपदेशानुपपत्तिर्यदभावः सतद्व
व्यपदेशं नार्हति ॥ यथा ब्राह्मणाभावो न ब्राह्मणव्यपदेशं प्रत्यक्षादिप्रमाणाभावश्चाभावप्रमाणमिति। पर्युदासपक्षेपि प्रमाणपंचकाभाव
शब्दाभिधेयं भावांतरं वाच्यं, तच्च प्रमाणपंचकविनिर्मुक्तात्मा तदन्यज्ञानं वा स्यात्। प्रथमपक्षे किं सर्वथा प्रमाणपंचकेन विनिर्मुक्तत्वा
त्मा निषेध्यविषयप्रमाणपंचकेन वा, यदि सर्वथा कथं सर्वज्ञाभावपरिच्छेदकत्वं प्रमाणांतरेणाप्रमेयपरिच्छेदकत्वानुपपत्तेरन्यथा प्रमाणप
रिकल्पनानर्थक्यप्रसंगः। द्वितीयपक्षेपि किं भवदीयस्यात्मनः सर्वज्ञविषये प्रमाणपंचकविनिर्मुक्तत्वात्तदभावं प्रसाधयेत् सर्वस्य वात्मनो वा प-
क्षोनुपपन्नः परचेतोवृत्तिविशेषैरनैकांतात् द्वितीयपक्षोप्ययुक्तः सर्वस्यात्मनस्तद्विषयेन हि निर्मुक्तत्वस्य सर्वदा प्रतिपत्तुमशक्यत्वा
त् ॥ तस्य प्रमाणपंचकविनिर्मुक्तात्मपक्षः क्षेमंकरः ॥ नापि तदन्यज्ञानपक्षो, यतो निषेध्यात्सर्वज्ञत्वादन्यत्किंचिज्ज्ञत्वं तद्विषयं ज्ञानं तदन्यज्ञा
नेन च किंचित्कदाचित् सर्वज्ञत्वाभावं प्रसाधयेत्सर्वत्र सर्वदा सर्वस्य वा, प्रथमपक्षे सिद्धसाध्यता यत्र यदा यस्य किंचिज्ज्ञत्वसिद्धिस्तत्र तदा त
स्यासर्वज्ञत्वसिद्धेरभ्युपगमात्। द्वितीयपक्षस्तु श्रद्धामात्रगम्यः कालत्रयत्रिलोकस्थप्राणिनामसाक्षात्करणे न च किंचिज्ज्ञत्वप्रतिपत्तेरनुप
पत्तेः सर्वत्र सर्वदा सर्वस्यासर्वज्ञत्वसिद्धेरप्यनुपपत्तेः तन्नाभावप्रमाणमप्यशेषविदो बाधकमिति सिद्धं सुनिश्चितासंभवद्बाधकप्रमाणत्वं
निखिलातीतानागतवर्तमानार्थसाक्षात्कारिणोतींद्रियप्रत्यक्षस्य सत्त्वं ननु कालादिव्यवहितवस्तुत्वेनास्पष्टरूपेण प्रतिभासमान
स्यास्पष्टप्रत्यक्षतानुपपत्तिरिति चेत्॥ परिस्फुटस्यार्थस्य ग्राहकत्वात्॥ नहि संनिहितदेशकालतयार्थप्रतिभासः प्रत्यक्षलक्षणं स्वोत्संगस्य बालकरा
दीन्याहारादिलिंगतो जीवत्सद्भावावभासस्यापि प्रत्यक्षताप्रसंगात्। किंतर्हि परिस्फुटतयार्थप्रतिभासः स च देशतोनादरस्यार्थस्यापि प्रत्यक्षत
स्य प्रत्यक्षता। यथा चेंद्रियप्रभवप्रत्यक्षस्य देशादिविप्रकृष्टार्थग्रहणेपि परिस्फुटप्रतिभासत्वं न विरुध्यते॥ तथातींद्रियप्रत्यक्षस्य कालविप्रकृष्टा
र्थग्रहणेपि, ननु चातीतादेर्वर्तमानतया निर्वर्तमानार्थग्रहणात्तत्त्वात् तन्मानार्थवदित्यभिधातव्यं दूरदेशार्थस्यादूरदेशार्थग्रहणात्।

न्या॰ कु॰ चं॰ त्वादृष्टेवाधिवददूरदेशानामाप्रतेः॥ एतेनेदमिदानीमिह सन्निधत्स्यां संविदि वस्तुतनाव तत्स्यायुगपत्साभावो प्रतिभासेत॥ नेवत्यार्थपिवत्वा

२८५ त्वात् यथैव हीन्द्रियप्रभवप्रत्यक्षेण देशाविविद्यारं वस्तुनीलरूपस्वाभावरूपमभावरूपं वानेदं शाविशिष्टं तथैव प्रतिभासते तद्वत्सर्वज्ञज्ञानेपिय

देशकालाकारविशिष्टं वस्तुभावरूपमभावरूपं वा तद्देशकालाकारं तथैव प्रतिभासते॥ अतः कथं युगपज्जन्ममरणादिव्यपदेशप्रसंगः प्रति-

नियतार्थ स्वरूपावभासिनी निर्विकल्पा सर्वज्ञ तस्य बुद्धिर्व्यवस्थितानन्यात्॥ भविष्यत्कालस्य हि वस्तुस्वभावस्य वर्तमानवस्तुस्वभावतया प्रतीतो युग

पज्जन्ममरणादिव्यपदेशप्रसंगः स्यात् नियतार्थ स्वरूपावभासिनी ति प्रसंगात्॥ न पुनर्यथाकालं तत्प्रतीतौ तत्वेदमप्यशेषार्थविदो बाधकमतः सि

द्धं सुनिश्चितासंभवद्बाधकप्रमाणात्वमतो यज्ज्ञसद्भावप्रसाधकं रूपम्॥ ननु न सुनिश्चितासंभवद्बाधकप्रमाणत्वात्सर्वज्ञसद्भावसिद्धाविति। किं

तु क्षित्यादिकार्य्यकर्तृत्वात् न चास्यानन्तर्भावत्वमसिद्धं तत्प्रसाधकस्यानुमानस्य सद्भावात् तथाहि क्षित्यादिकं बुद्धिमत्कर्तृपूर्वकं कार्य्यत्वाद्घटादि

वत् नचायमसिद्धो हेतुः सावयवत्वेन क्षित्यादेः कार्यत्वप्रसिद्धेः तथाहि कार्मसुर्वी पर्वततर्वादि सावयवत्वात्तद्वत्। नचापि विरुद्धो निश्चितक

र्तृके घटादौ प्रसिद्धत्वात्॥ नाप्यनैकान्तिको निश्चिताकर्तृकेभ्यो व्योमादिभ्यो व्यावर्तमानत्वात्॥ नापि कालात्ययापदिष्टः प्रत्यक्षागमाभ्यामबा-

धितविषयत्वात्॥ नापि प्रकरणसमः प्रकरणचिन्ताप्रवर्तकस्य हेत्वन्तरस्यासंभवात्॥ न दर्शनिरवद्योहेतुर्बुद्धिमन्तं कर्त्तारं साधयन् प्रसाधर्म्मता

बलात्तज्जगन्निर्म्माणसमर्थं सर्वज्ञत्वादिविशेषविशिष्टं साधयति। स्यान्मतमिष्टविघातकृदयं हेतुस्तथाहि सर्वज्ञः सर्वकर्ता नित्यज्ञानेच्छाप्रय

त्नवानशरीरश्च बुद्धिमानभ्युपगम्यते दृष्टान्तेन च घटादौ तद्विलक्षणः कर्त्तोपलभ्यते, दृष्टान्तदृष्टधर्म्मानुसारेण चाऽदृष्टेर्थे प्रतिपत्तिर्भवतीति नि ३८६

साध्यापि धर्म्मविपर्ययसाधनाद्विरुद्धो हेतुः॥ दृष्टान्तश्च साध्यविकलो घटादौ तथाभूतस्य बुद्धिमतोऽभावादिति तदसमीचीनं यतो न साध्यसाध

नयोर्विशेषेण व्याप्तिः सकलानुमानोच्छेदप्रसंगात्। किंतु सामान्येन अन्वयव्यतिरेकाभ्यां हि व्याप्तिरवधार्यते नैवानाल्याद्व्यभिचारश्च विशेषे

पुनरहीतुं न शक्यो॥ अतो बुद्धिमत्कर्तृपूर्वकत्वमात्रेणैव कार्य्यत्वस्य व्याप्तिः प्रतीयते तथा॥ न शरीरित्वादिना न खलु कर्तृत्वसामर्थ्यं शरीरं वि-

त्वात्॥ तद्व्यतिरेकेणापि ज्ञानचिकीर्षाप्रयत्नाश्रयत्वेन स्वशरीरप्रेरणे कर्तृत्वोपलंभात्॥ अथ किंचित्करस्यापि शरीरस्य सहचरमात्रेण कार
णत्वे वह्निं प्रति धूमस्यापि धूमं प्रति कारणत्वप्रसंगः स्यात्॥ विद्यमानेपि हि शरीरे ज्ञानादीनां समस्तानां व्यस्तानां वाभावे कुंभकारादावपि क
र्तृत्वं नोपलभ्यते, प्रथमं हि कार्यौत्सुक्यकारककलापज्ञानं प्रादुर्भवति, ततस्तत्करणेच्छा ततः प्रयत्नस्ततः फलनिष्पत्तिरित्यमीषां ज्ञाना
मेव कार्यकर्तृत्वेन संबंधाद्व्यभिचारः॥ सर्वज्ञता चास्याखिलकार्यज्ञानस्य कर्तृत्वात्सिद्धा यो हि यस्य कर्ता स तदुपादानाद्यभिज्ञो यथा घटस्य
कुंभकारो मृद्दंडाद्यभिज्ञो जगतश्च कर्ता चायं भगवानीश्वर इति॥ उपादानं चेह जगतश्चतुर्विधाः परमाणवो निमित्तकारणमदृष्टादिकालात्मा
भोग्यं तनुकरणादि चैतन्यभिज्ञस्य सिद्धमादौ कर्तृत्वं संभवतीति॥ न चैतदीश्वरज्ञानादयोऽनित्याः कुंभकारादिज्ञानादिभ्यो विलक्षणत्वात्॥ न
च दृष्टांतधर्मिणः सर्वथा साम्यं संभवति सकलानुमानोच्छेदप्रसंगात्॥ न हि यादृशो धूमो महानसे तादृश एव पर्वतेस्ति॥ एकत्वं च
स्यास्तिकर्तृत्वेनैककर्तृणामप्येकाधिष्ठातृनियमितानां प्रवृत्त्युपपत्तेः सिद्धं॥ प्रसिद्धा हि स्थपत्यादीनामेकसूत्रधारनियमितानां मठाद्या-
सादिकार्यकरणे प्रवृत्तिः॥ न चेश्वरस्य कादाचित्कत्वे चैकरूपत्वे नित्यत्वे च सति कार्याणां कादाचित्कत्वं वैचित्र्यं च विरोधमध्यास्ते॥ कादाचित्क
विचित्रसहकारिलाभेन सामग्रीवैचित्र्यसिद्धौ तेषां तथा संभवात्॥ ननु क्षित्यादेर्बुद्धिमद्धेतुकत्वे ॰ दर्शिनोपि जीर्णकूपप्रासादादिवत्
ननु बुद्धिमत्कर्तृकत्वानुपलब्धेर्नेदृशं न दृष्टत्वे हेतोर्धर्म्यप्रसिद्धेराश्रयासिद्धिः॥ तदप्ययुक्तं। यतः प्रामाणिकमितरद्वापि दृश्यत्वमुच्यते॥ यदीतरत्तदा कथं
च सकलानुमानोच्छेदो धूमादावप्यसिद्धत्वानुषंगात्॥ प्रामाणिकस्य तु नासिद्धत्वं कार्यत्वस्य बुद्धिमत्कारणपूर्वकत्वेन प्रतिपन्नाविनाभाव
स्यासिद्धत्वाप्रसिद्धेः अपर्वतनादेरप्यादिवत्त्वान्यथा यावंतः पदार्थाः कृतकास्तावंतः कृतबुद्धिमात्मन्याविर्भावयंतीति नियमोस्ति॥ स्थावरप्रतिप्र
तिनापां भुवः क्रियादर्शिनः कृतबुद्धेरुत्पादाभावात्॥ न चादृष्टप्रभवैः स्थावरादिभिर्व्यभिचारो बुद्धिमत्कारणाभावेपि स्वसामग्रीतस्तेषामुत्प
त्तिप्रतीतेरित्यभिधातव्यं॥ तेषां पक्षीकृतत्वात् पक्षस्य च साधनव्यभिचारे च कश्चिद्धेतुर्गमकः स्यादित्यनुमानवार्त्तोच्छेदः॥ बुद्धिमत्कारणाभाव

न्या·कु·चं· श्चानानुपलब्धिर्न भवता प्रसाध्यत्वेन॥ एतनद्यायुक्तं, इत्यनुपलब्धेरेवाभावसाधकत्वोपपत्तेः॥ नैवं यत्र व्यक्तसंभवस्तत्र क्षित्यादिकर्तृत्वस्यल।
६० त्॥ अनुपलब्धिमात्रस्य वाभावसाधकत्वे निप्रसंगः॥ ननु भगवतः परमकारुणिकस्य परार्थप्रवृत्तेर्जगन्निर्मितत्वे दुःखोत्पादकशरीरधारं
भकत्वविरोधस्तदविरोधे वा परमात्मकारुणिकत्वानुपपत्तिरित्यपि मन्दो यत्र सा वं धर्म्माधर्म्मसहकारिणः कर्तृत्वात्करणधारं भ धर्म्मा
धर्म्मौ वा सहकारिणस्य सुखासुखरूपफलोपभोगाः ... विधत्रीरिकमारभते। भगवतो हि संसारान्मोचयितो ... विद्यमानित्यनेरूप
कारणैर्भवतिः॥ मुक्तिश्च धर्म्माधर्म्मप्रक्षयात्स्यादस्य च फलोपभोगं विना न तस्मिन्करुणावतोऽपि तद्विधाने प्रवृत्तिरविरुद्धा॥ आदिधर्म्माधर्म्मव
ज्ञानस्य प्रवृत्तिस्तर्हितावश्यमेवाखिलकार्य्योत्पत्तिरस्तु॥ किं ईश्वरकल्पनेनेत्यत्र साधीयस्त्वमोरेवं न स्यो तनचाधिष्ठितयोरेव स्वकार्येषु प्रवृ
त्त्युपपत्तेः॥ तथाहि॥ धर्म्माधर्म्मौ चेतनाधिष्ठितौ स्वकार्योपधर्वतेते अचेतनत्वाद्वा स्यादिवत्॥ न चास्मदाद्यात्मैवाधिष्ठापको युक्तः तस्यादृष्टपर
माणादिविषयविज्ञानाभावात्॥ नाप्येवं तस्याकस्मात्संभावितः अन्यथा निष्पन्नेऽपि कार्य्ये तत्स्वभावेनानिवृत्त्यनुपपत्तेरिति॥ ८॥ सावयवत्वेनेत्यौपने
पत्रावस्त्वित्यादेर्व्युत्पत्तिहेतुकत्वमिदं पक्षार्य्येत्वं साधनमुक्तं॥ ननु किं सावयवत्वं प्रागसतः स्वकारणसत्तासमवायः कृतमिति प्रत्ययविषयत्वं किंवा
स्त्वं वा स्यात्॥ यदि सावयवत्वं न विदमपि किमवयवेषु वर्त्तमानत्वं वयवैरारभ्यमाणत्वं प्रदेशवत्त्वं सावयवमितिबुद्धिविषयत्वं वा॥ नतावदाद्य
स्तु व्यन सामान्यवत्ता ने कांतस्तत्र कार्यमन्यपक्षे तु वृत्तिनिराहितैः॥ यप देतु साध्याविशिष्टत्वं - पक्षे वर्त्तिसिद्धस्यादेः कार्यत्वं साध्यमेव परमाणुवत्
यवारभ्यत्वमपि॥ तृतीयपक्षेप्याकाशादिनानेकांतस्तस्य प्रदेशवत्त्वेप्यकार्य्यत्वात्प्रसाधयिष्यते चास्य प्रदेशवत्त्वं घटपटादिपरिच्छेदकः। ६०
सावयवमिति॥ बुद्धिविषयत्वमप्यनेनैवानेकांतिकं, न च निरवयवत्वेप्यस्य सावयवघटादिसंयोगाद्घटाकाशं पटाकाशमिति प्रसादयवपनी।
प्र·ल·पु· तिगौणस्वसंभवादौपचारिकं तन्न त्र्यभिधातव्यं॥ निरवयवत्वे व्यापित्वविरोधात्परमाणुवत्॥ तथा च॥ व्यापित्वमप्यस्यौपचारिकमेव स्यात्॥
नापि प्रागसतः स्वकारणसत्तासंबंधः कार्य्यत्वं तत्संबंधस्य समवायाख्यस्य विनित्यत्वेन कार्य्यलक्षणत्वायोगात्॥ नह्यलक्षणत्वाकार्य्यस्यापि

क्षित्यादेस्तद्वन्नित्यत्वानुषंगात्कस्य बुद्धिमद्धेतुकत्वं साध्येत॥ निराकरिष्यते चैतल्लक्षणं कार्यत्वं विस्तरतः पृथग्दार्थपरिसमाप्तिनिह्नुतिर्निरस्यप
रिवर्तितमपि न तल्लक्षणं रचनोत्सेचनादिना कलशाकाराणामित्यकार्येष्याकाशेन स्पर्शनत्वात्॥ विकारित्वस्य च कार्यत्वे महेश्वरस्यापि कार्यत्वप्रसंगः
तेजावस्तुनोन्यथाभावो हि विकारित्वं। तद्धीश्वरस्याप्यस्तीत्यस्याप्यपरबुद्धिमद्धेतुकत्वप्रसंगादनवस्था स्यात्॥ अविकारित्वे चास्य कार्यकारित्व
मतिदुर्घटा अतः कार्यस्वरूपस्याविचार्यमाणस्यानुपपत्तेरसिद्धो हेतुः॥ किंच कादाचित्कं वस्तु लोके कार्यत्वेन प्रसिद्धं॥ जगतस्तु महेश्वरवत्सदा
सत्त्वात्॥ कथं कार्यत्वं तदंतर्गतानां तरुतृणादीनां कार्यत्वात्तस्यापि कार्यत्वे महेश्वरांतर्गतानां बुद्ध्यादीनां परमाणवादीनां पाकजरूपादीनां
च कार्यत्वान्महेश्वरादेरपि कार्यत्वानुषंगः॥ तथा चास्याप्यपरबुद्धिमद्धेतुकत्वप्रसंगादनवस्थाप्रसिद्धांतव्याघातश्चानुषज्यते॥ वस्तुवाचयथा कथंचि
ज्जगतः कार्यत्वं तथापि किं कार्यमात्रं पक्षीकृत्य हेतुत्वेनाभिप्रेतं तद्विशेषो वा॥ यदि कार्यमात्रं कथं बुद्धिमतः कारणविशेषस्यानुमानं कारणमा
त्रेणैवास्याविनाभावप्रसिद्धेस्तन्मात्रस्यैवातोनुमानं स्यात् न चाविशेषविनिर्दिष्टेनार्थे किंचित्करत्वं व्यावृत्त्य बुद्धिमत्कर्तृत्वं सकले साध्ये कारणमात्रस्यैव
प्रसाधनात्॥ ननु यथा नारीणां पर्णादिविशेषापेक्षीयत्वाद्धूममात्रस्य धूममात्रादनुमानमेवं कार्यमात्राद्बुद्धिमत्कारणमात्रस्यानुमानात्कथं
विरुद्धत्वमेवेत्यप्यसमीचीनमनुमानस्य प्रतिबंधावसंभवात् बहूनेः॥ प्रतिबंधस्तु कार्यमात्रस्य कारणमात्रेणैव प्रतिपन्नो धूममात्रस्याग्निमा
त्रेणैव न तु बुद्धिमता॥ न च धूममात्रमप्यग्निमात्रस्य गमकमपनीतपावकापवरकधूमेनानेकांतात्॥ अपि तु कलशकुलालपानाकारसंबंधं तद्वत्
कार्यत्वमपि कलशकुलालादिकं बुद्धिमतो गमकं न सर्वं॥ सारूप्यमात्रेण गमकत्वे च वाष्पादेरप्यग्निं प्रति गमकत्वप्रसंगः॥ महेश्वरं प्रसाध्यत्वाद्
संसारित्वं किंचिद्ज्ञत्वादिकं जगत्कर्तृत्वानुमापकत्वानुषंगः वस्तुत्वादेः परमाणुकं जगत्कर्तुः बुद्धिमद्धेतुकत्वप्रयोजकत्वप्रसंगात्स्य साधुल्यासे
पसमाधानत्वात्॥ तेनोवाच्याधूमसंस्थानयोः केनचिद्विशेषेण स्वाभ्युपगमानपि यथाकश्चिद्विशेषोभ्युपगम्यते॥ यत्तु ज्ञानादूर्ध्वं प्रति गमयति न बाष्पादिः
तथा क्षित्यादीतरकार्यत्वसंस्थानयोरपि॥ अथ कार्यत्वविशेषो हेतुर्यो बुद्धिमत्कर्त्रन्वयव्यतिरेकानुविधायित्वेन निश्चितः॥ सोऽसिद्धत्वादस्मद्

न्या·कु·वं· तस्यास्यक्षित्यादावभावात्। अक्षेपाज्जीर्णकूपप्रासादादिवदक्रियादर्शिनोपि कृतबुद्ध्युत्पादप्रसंगः॥ समारोपान्नेति चेत्सोप्युभयव्याप्तिविरोधतः
७१ किन्न स्यात्। अकर्तृत्वप्रयोजकाभावात्। दृश्यत्वविशेषानुपलम्भात् यथा प्रामाणिकत्वात्स्वपक्षस्य कृतबुद्धिः॥ ननु केन प्रमाणेन प्रमातुः प्रामाणिकत्वमनेनानुमानान्तरेण अनुमानेन वा
गमेन लोकप्रतीत्या। नान्त्यः पक्षेन्योन्याश्रयप्रसक्तेः। सिद्धविशेषणादेकदेशान्यत्वानन्तरोत्थानेनैतेनोर्विशेषणासिद्धिरिति॥ अनुमानान्तरेण
त्वेवमनवस्था। तस्यापि प्रमाणान्तरेणानुमानान्तरेण वा। नाप्यनुमानान्तरादिविशेषणासिद्धेर्न तस्याप्रामाण्यमनुमानान्तरसिद्धावित्यन्यतरदोषः॥ आग-
5, मोपि प्रमाणत्वेन गृहीतोनगृहीतो वा प्रमातुः प्रामाणिकत्वं प्रसाधयेत्। तत्राद्यस्तु गृहीतापेक्षत्वे प्रसंगात्। नाप्यनुगृहीतस्य तत्प्रामाणिकतायुक्ते प्रामा-
भवादृश्यकत्वेनवाविनैव चक्रकप्रसंगः॥ अक्रियादर्शिनोपि कृतबुद्ध्युत्पादकत्वेन तत्कार्यत्वानुमानस्यापि सिद्धेः तेनागमस्यानुग्रहसिद्धिः तदनु
गृहीतादागमात्प्रमातुः प्रामाणिकत्वासिद्धिरिति दोषाक्रियादर्शिनोपि कृतबुद्ध्युत्पादकत्वस्य तत्कार्यत्वानुमानेपि सिद्धेरिति। नापि केन चित्कश्चि
जगत्स्रष्टेति। लोकप्रतीत्या प्रामाणिकत्वसिद्धिः तस्या निर्मूलत्वात्। न कश्चिदीदृशं जगदिति प्रतीतेरनवस्थानात्॥ वेदमीमांसकस्याकृत्रिमत्वप्रतीतेरनिवृत्तेः॥ तत
तीर्थ, स्यामूलमिदमनुमानं लिंगसंबंधप्रतिपत्तेः प्रागभावकत्वतुल्यात्। तस्यैवासंभवात्। अन्योन्याश्रयस्याबाधानुमानेनास्याः समूलत्वसिद्धौ सिद्धे बाधपरा
देतोरस्यानुमानस्योत्थानसिद्धिरिति दोषस्याः समूलत्वसिद्धिरिति। नाप्यागमतश्चापि तेनैतदपत्वानन्तिप्रमाणाभावागमसमूलत्वसिद्धौ तस्या सानिप्राप
पुरुषसिद्धिरसिद्धोपनतत्वेन प्रमाणभूतागममूलत्वसिद्धिरिति॥ ननु क्षित्यादेः कृत्रिमत्वप्रतीतिर्लौकिकप्रवादपरंपरायाना प्रमाणाबलप्रभवा
न तु कृतकेन कृतबुद्ध्युत्पादकेनेव भाव्यमिति नास्त्ययं नियमः। अत एव तथानिर्दशितापीभ्रमैर्नाकृत्रिममणिमुक्ताफलादिरत्नक्रियादर्शिनः कृतबुद्धेरसाध्य ७१
भा त्वेनादिस्यपपक्षमीमांसिताभिधानं॥ तथा कृत्रिमभूभागादिसंस्थानसारूप्यस्य कृतबुद्ध्युत्पादकस्य प्रसङ्गाद्वनस्पत्यादेर्नुत्पादस्यापपत्तेः। न च क्षित्या-
दावप्यकृत्रिमसंस्थानसारूप्यं संभवत्यकृत्रिमसंस्थानस्यैवाभावतोऽभ्युपगमात्। अभ्युपगमे वास्मत्सिद्धान्तप्रसंगः। स्यात्तत्तेऽक्रियादर्शिनोपि कृतबु सत्र न यु
द्ध्युत्पादकः क्षित्यादिसंभवी जीर्णकूपादिरिष्टकृत्त्रिकूपादिसजातीयस्वलक्षणविशेषाभ्युपगमेनाकृतेनिकर्षेनासिद्धो हेतुः सिद्धस्तु वा तथा

प्यसौ विरुद्धो घटादिवच्छरीरादिविशिष्टस्यैव बुद्धिमतो न प्रसाधनात्॥ नचैवं सकलानुमानोच्छेदः॥ सर्वत्रैवं विरुद्धत्वापत्तेरित्यभिधातव्यं॥
धूमाद्यनुमाने महानसेतरसाधारणाग्न्यादेः प्रतिपत्तिसंभवात्॥ अत्राप्येवं बुद्धिमत्सामान्यप्रसिद्धेर्न विरुद्धत्वमित्यप्ययुक्तं। दृष्टविशेषाधा
रस्यैव तत्सामान्यस्यातः प्रसिद्धेः॥ तादृशविशेषाधारस्य तस्य स्वप्नेप्यप्रतीतेः। खरविषाणाधारतत्सामान्यवत्॥ हेतुव्यापकत्वे नावतिपन्नस्याग
म्यत्वे चाभासुररूपोष्णस्पर्शवतोप्यग्नेर्धूमात्प्रतीतिः स्यात्॥ ननु कार्यकारणभावविवेकं कुर्वाणा पादपादेः कारणमाद्यं कार्यमुपलब्धं तादृशा
देवतादृशमनुमानयं॥ यथा यावद्धर्मात्मकाद्वह्नेर्यावद्धर्मात्मकस्य धूमस्योत्पत्तिः सुदृढप्रमाणान्निश्चिता तादृशादेव धूमात्तादृशस्यैव
अग्नेरनुमानं। न च घासादादिकार्यवत् क्षित्यादिकार्येप्यतिशयवतार्थप्रतीतेन तत्कर्तुरतिशयवत्वसिद्धिः तदृशस्यादृशस्यैव कर्तुरतिशयव
तः सिद्धिप्रसंगात्॥ क्षित्यादिनिर्माणे तस्या सामर्थ्यादृशोत्रोतिभिन्नतोत्पत्त्यप्युपकमनुनकर्तृभावस्यैवं प्रसंगात्॥ अन्यादृशस्य क
र्तुर्हेतुव्यापकत्वे न कदाचिदप्यप्रतीतेः। अव्यापकस्य च गम्यत्वे व्यापकमगम्यमव्यापकं तु गम्यमिति महत्युपकौशलं॥ यथ परिशेषाद्धेतु (अर्थं तत्)
व्यापकत्वेनाखिलकारकपरिज्ञानावत्तित्वं यथा पकर्तृविशेषः प्रसाध्यते॥ नतु न तन्कारकसामर्थ्यात्॥ कार्यस्य कर्तात्वं सर्वस्य सर्वकर्तृत्वप्र
संगात्॥ नचास्मदादेः क्षित्याद्यशेषकारकसामर्थ्यावगमोस्ति। परमाण्वादेरतीन्द्रियत्वात्॥ तन्नाशेषकारकप्रयोक्तृत्वलक्षणं कर्तृत्वमस
(सिद्धत्वात्) सिद्धं॥ तत्कुलिकपरिज्ञानादपि तदशेषकर्मसिद्धिरनैकान्तिकं अविचारितरमणीयं॥ यपोकुलस्य ज्ञाविपरिज्ञानाविनाभावासिद्धेः॥ कुम्भकत्व (सुख)
(अर्थं प्राप्त तत् कुम्भी) मतापरस्यायं वा मा रिहेतृकांतानात्वादीनां शक्तिपरिज्ञानाभावेपि घटोत्पत्त्युपलम्भात्॥ अस्तु वा तदविनाभावस्तथापि न समस्तकारकपरि
ज्ञानपरिज्ञानं सिध्यति॥ तद्धर्माधारशरीरां धर्म्माद्यपरिज्ञानेपि ग्रासादादेः कारकप्रयोक्तृत्वोपलम्भात्॥ यथा च प्रारब्धकार्यानिष्पत्तेः तत्तद्धारशरीरां
9 धर्म्माद्यशेषकारकापरिज्ञानं तथेश्वरस्यापि तदस्तु प्रारब्धांकुरादिकार्यानिष्पत्तेस्तत्राप्यविशेषात्॥ तत्परिज्ञानेप्युपायाभावात् दृष्टव्याघात (पञ्चकुर)
यानद्दीपानं इतरापाराद्व्यवस्तु॥ प्रतीतिविरोधोप्युभयत्राविशेषः भवतु वास्यैव तत्परिज्ञानं तथाप्येकत्वादिकं कारकपरिज्ञानुपपत्तिरनेक (बाला)

न्या·कु·चं·
६२

स्याप्यनेककारकाधिष्ठातृत्वं न हि निखिलं कार्यमेकेनैव कर्त्रा एकेन नियमेन नैके वेति नियमोऽस्ति ॥ अनेकधा कार्यकर्तृत्वोपलंभात् ॥ एकेनापि क-
चिदेकं कार्यं क्रियते यथा पटः कुविंदेन क्वचित्त्वनेकं यथा घटघटीशरावादिकुंभकारेण ॥ अनेकेनानेकं यथा घटपटमुकुटशकटादि कुलाला-
दिना क्वचिदनेकेनाप्येकं यथा देहिकाभिर्वल्मीकं न खलु तासां कश्चिदेकोऽधिष्ठातास्ति ॥ न च प्रासादादिकार्येऽनेकस्थपत्यादीनामेकसूत्र-
धाराधिष्ठितानामेव प्रवृत्तिः प्रतिनियताभिप्रायाणामेकसूत्रधारानधिष्ठितानामपि प्रवृत्त्यविरोधात् ॥ एकसूत्रधाराधिष्ठितानेकस्थपत्या-
दीनां प्रवृत्त्युपलंभाच्च जगतो महेश्वरैकाधिष्ठातृकल्पने चैकदेहिकानामेकेनानधिष्ठितानां प्रवृत्त्युपलंभात् स्वतन्त्रानधिष्ठितत्वमपि प्रवृत्तिः
किं न स्यादुभयप्रतीत्योः प्रामाण्याविशेषात् ॥ अकृष्टप्रभवैस्तृणादिभिर्व्यभिचारी चायं हेतुः ॥ न हि तानि कार्याण्युपलभ्यंते ॥ कानिचिद्बु-
द्धिमत्कर्तृकाणि घटादीनि कानिचित्तु तद्विपरीतानि तथाऽकृष्टप्रभवतृणादीनि तु उभयप्रतीत्योः प्रामाण्येनोभयोः सिद्धिसंभवात् ॥ ते-
षां पक्षीकरणाद्व्यभिचारपरिहारसंभवत्वादिति तत्तु अवदित्यादेरुपगमकत्वप्रसंगान्न कश्चिद्धेतुर्व्यभिचारी स्यात् ॥ व्यभिचारविषयस्य सर्व-
त्रापि पक्षीकर्तुं शक्यत्वात् ॥ ईश्वरबुद्ध्यादिभिश्च व्यभिचारस्तेषां कार्यत्वे सत्यपि समवायिकारणादीश्वराद्भिन्नबुद्धिमत्कर्तृपूर्वकत्वाभावा-
त् ॥ दृष्टांते हि घटादौ बुद्धिमत्कर्तृपूर्वकत्वं तत्समवायिकारणादतिरिक्तबुद्धिमत्पूर्वकत्वेनापि व्याप्तिः कार्यत्वस्य प्रतिपन्ना व्यतिरिक्तबुद्धिमत्कर्तृ-
सद्भावाभ्युपगमे वानवस्था ॥ नैव कस्येव समवायिनिमित्तकारणत्वं युक्तं घटादौ तथानुपलंभात् तत्रानुपलब्धस्यापि कल्पने सिद्ध्यादेरबुद्धिमद्धे- ६२
तुकत्वं किं न कल्प्यते ॥ विशेषाद्विनिकालात्ययापदिष्टश्चायमकृष्टप्रभवांकुरादौ कर्त्रभावस्याध्यक्षेणैव बाध्यमानत्वात् ॥ अयोरनुमानेन साध्येऽतुमा-
नत्वम् ॥ ननु यदुक्तं सत्त्वप्रत्यक्षेणानुपलभ्यते नत्याभोऽभावो नान्यथा कालाकाशादेरप्यभावः स्यात् न वा पदं दृश्यत्वे तत्कथमनोऽस्याभावः स्यादित्य-
प्यसुंदरं ॥ यतोऽस्य सिद्धे कुतश्चित्प्रमाणात्सद्भावे दृश्यत्वेनानुपलंभः स्यात् तत्सद्भावश्चास्मादेवानुमानाद्वा प्रमाणान्तरसिद्धेन ॥ अथ सपक्षे चक्रकम
तोऽस्तित्वसद्भावसिद्धेः स्यात् दृश्यत्वेनानुपलंभः सिद्धे तत्सिद्धौ चकालात्ययापदिष्टत्वाभावस्तत्त्वं ॥ तस्मात्तत्सद्भावसिद्धिरिति ॥ द्वितीयोपि पक्षो

नुपपन्नत्वात्तत्सद्भावावेदकस्य प्रमाणान्तरस्यैवाभावात्॥ न च लुब्धानतत्सद्भावस्य व्याप्यस्यादृष्टत्वे शरीरान्वयव्यतिरेकः कारणं विघातिरभावोऽत्रा
तिविशेषो बाधानतावच्छरीराभावोऽशरीरस्य कार्यकर्तृत्वानुपपत्तेः॥ तथाहि॥ नेश्वरः क्षित्यादेः कर्ता अशरीरत्वान्मुक्तात्मवत्॥ ननु शरीरं क
र्तृत्वसामग्र्यां न प्रविशति॥ तदभावेऽपि ज्ञानेच्छाप्रयत्नाश्रयत्वमात्रेणास्वशरीरस्य स्वोक्तर्तृत्वोपलंभात् तदसत्त्वशरीरसंबंधेऽपि चेतनस्य रणोपलं
भात्तत्त्वं चेष्टोत्थात्मनः सशरीरत्वं तस्मिन् सत्येव स्वशरीरेऽन्यत्र वा कार्यकर्तृत्वमुपपद्यते॥ शरीराभावे मुक्तात्मवत् ज्ञानाद्याश्रयत्वमप्यसंभा
व्यं॥ तदुक्तम्॥ नायमनिमित्तकारणत्वात् तत्कारणाभावेऽपि तदुत्पत्तौ मुक्तात्मनोऽपि तदुत्पत्तिप्रसंगात् बुद्धिमनिमित्ताभावेऽपि वा सिद्धानुत्पत्ति
प्रसंगः स्यात्॥ नित्यत्वान्नैषामदोषोऽयमित्यप्यसुंदरं॥ ज्ञानादीनां नित्यत्वे न क्वचिद्दृष्टत्वात् प्रतीतेर्नश्वरज्ञानादयो नित्या ज्ञानादित्वादस्मदादि
ज्ञानादिवदित्यनुमानविरोधाच्च॥ तेषां दृष्टस्वभावातिक्रमेणाभ्युपगमे नामपि स स्याद्विशेषात्॥ नो ज्ञानादीनां शरीरसंपाद्यत्वमेवाभ्युपगं
तव्यं॥ न तत्कथमकिंचित्करं शरीरं यतः सहचरमात्रेणाकारणत्वे वा हि धूमस्यापि धूमध्वनिकारणता न स्यात्॥ न हि धूमस्य मात्रे धूमकारणत्वं
दर्शनादृष्टेन तत्सद्भावेऽपि प्रमाणान्तरेऽन्॥ वह्निविशेषितं न तत्र हेतुत्वे तु न किंचिद्धि कुर्वन्त्येव वह्नौ तत्र संबंधो वह्निर्धूमोत्पादको नान्यत्तथा वह्नि
विशेषितं धूमत्वं न च निर्वाहकं नाज्ञ्यत्॥ विशालादिप्रभावस्य वादृष्टत्वे हेतुत्वे कदाचिद्दृष्टोऽदृश्यते न तत्र खलु विषयाभ्युपगमे तेन शरीरमनोरं च वशात्मनिकमद
स्यत्वं दृष्टमिति न चैतद्वा प्रसिद्धा एव स्वर्णपाहृदे स्वभावानिक्रमे वीजगतेऽपि न रक्तार्थ वेलस्य पानदति क्रमेऽपि किं न स्यात्॥ पिशाचादिवज्ञा
निर्विशेषोऽस्यादृष्टत्वे हेतुरित्यप्यसुंदरमेकस्य जातिविशेषासंभवात् वेनकल्पितनिष्टत्वान्तस्य च तु वादृष्टो कासोन यापि सत्ता मात्रेणात्ता
वत्वेन ज्ञानेच्छाप्रयत्नवत्वेन न तस्य च कुव्यापारेण स्वर्येणवाक्षित्यादेः कारणं स्यात्॥ अथ न पक्षे कुंभकारादेरपि तत्कारणत्वप्रसंगः सत्तामात्रस्य च
२४ चाविशेषात्॥ द्वितीयपक्षे तु योगिनामपि तत्कर्तृत्वानुषंगः योगिनां तथा भूतमशेषार्थविषयविज्ञानं नास्ति॥ तेनायमदोषः॥ स्वकु
नस्तत्सिद्धं सर्वकर्तृत्वाचेदन्योन्याश्रयः॥ सर्वज्ञत्वसिद्धौ हि सर्वकर्तृत्वसिद्धिः तत्सिद्धौ च सर्वज्ञत्वसिद्धिरिति तत्रापि प्रसिद्धसंपन्नोऽशरीरस्य

न्या·कु·वं· ज्ञानेच्छाप्रयत्नवत्त्वप्रतिषेधात्॥ व्यापारस्त्वमस्य शरीरस्यासंभाव्यः॥ व्यापारो हि कायकृतो वा वाक्कृतो वा स्याद् भयमप्यशरीरस्यासंभवत्येव॥ न च क
५२ स्यचिदप्येवंविधप्रवृत्तिर्दृष्टा॥ यद्वचनतः कायेन चाहं मौक्षेनाबोधितर्दृति॥ व्यापारश्च क्रियात्मा वा स्यादुपेतनयात्मा॥ निर्व्यापारो ईश्वरः सर्वगत
त्वादाकाशवत्। सक्रियत्वे चास्यानादित्वस्यानुपपत्तिरनित्यत्वं स्यात्। स्वाबस्यानो गविवचनदृष्टत्वेवार्थम्यनित्यैकरूपतापत्तेः न च परमाणुमिवाभि
चारस्तेषामपि परिणामानित्यत्वस्येष्टेः॥ ईश्वरस्यापि तद्वदनित्यत्वप्रसङ्गः महेतुकत्वानुषंगादनवस्थानुषंगाच्चेत्वकार्यत्वादेर्व्यभिचारः।
प्रतिकार्यमेकस्यैककरैवाने सर्वात्मनावान्यापारः स्यादेकदेशेन वेति दृष्टार्वेतिकार्यारेणावाडिवेश्वरस्यैवार्भावात्मिनि मिमिवं ज्ञात्वेश्वर एवानिकाहि
यत॥ सर्वात्मना व्यापारो यावंतिकार्याणि तावंतीश्वरस्य भेदप्रसंगात्रेकेश्वरस्य निज्ञासिनिः॥ किंचालोऽयमेकेनस्वभावेनैकं कार्यं करोति तेनैव तदन्य
त्यादिकं कार्यान्तरं च स्वभावांतरेण तु वा॥ यदि तेनैव स्वस्वैकस्वभावेन विपन्नानां कार्याणामक्रमोत्पत्तिर्वचनस्यात्॥ स्वभावभेदे वा नित्यत्वमस्य
र्व्यवपिज्ञातत्वं कर्तृत्वमप्यहास्यात्॥ ज्ञातृत्वं चेतन्तिं ज्ञातृत्वमात्रं सर्वज्ञत्वं स्यात्वं सर्वज्ञातृत्वं वान तावपत्तज्ञानेनाऽसौ स्यान्नेश्वरो नाडप्याय
ज्ञातानि सर्वाणीश्वरस्य चेनेच्छन्य ज्ञातव्यत्॥ हितोपदेशस्य सर्वज्ञत्वमेव स्यान्नेश्वर्यगुणता दिवत्॥ अथ कर्तृत्वं न तद्धि कुंभकारादीनां बहुप्रकार
कार्यकर्तृत्वाणामीश्वर्यप्रसंगः। नाप्यस्य नश्वरस्थापयत्नव्यतिरेकेणान्यस्यैश्वर्यनिबंधनस्यापरस्याभावात्॥ अथ तयोरेव तत्र वचनमिबंधनत्वमिष्यते
तत्त्वापिताभ्यां कोटीकृतं संबंधं कृत्विद्या सर्वस्य कोटीकोरपुगपत्स्याद्युत्पद्यत॥ किंचिद्वेन्दीच्छाप्रयत्नविषयस्य क्रमिकत्वे कथमेककालत्वं तयोः॥
स्यात्॥ किंचेच्छमाणार्थाद्विच्छेदे नैच्छोत्पद्येत॥ नचोत्तरकालभाव्यात्मनः संयोगजज्ञानविषयौ कार्यं विज्ञानजनितयनविषयमात्मानमप्यसौ
कर्तुं समर्थः॥ किंचास्यसिसृक्षासंजिहीर्षे किं युगपद्भवतः क्रमेण वा॥ युगपत्सृष्टावेव सृष्टिसंहारयोर्यौगपद्यप्रसंगः॥ क्रमेणोत्पन्नो कार्याणां वा व्यंकार
णापेक्षायां चानित्यत्वप्रसक्तिः॥ यद्यनित्यमपीच्छाप्रयत्नादिकं विचित्रसहकारिसंनिधानात्कार्यवैचित्र्यं विदधाति॥ न कुतेन सहकारिणा तदायत्तत्व
दापत्ताचाऽनवायत्तत्वे॥ नैव कार्यत्वादेर्व्यभिचारः॥ तदायत्तत्वे नैरंतर्यकृतो न भवंति॥ यदेतु नाममाबाधिति वेत्तोपत्तदायत्तताऽसंयतत्वे॥ नैवका

त्वादैश्वर्यमिच्छायाः॥ कदाप्यवत्वेन तदैव तेन कुतो न भवंति॥ न हेतूनामभावादिति चेत् न पिनद्वायन नित्ये वादि दूषणांतरवस्थमित्यनवस्था॥ किं चैते सहकारिणः कस्यो
पकारका न वा प्रथमे उपकारकाः कथं सहकारिणो ऽनियमसंगात्। उपकारकत्वे स्य पीराणामित्वं न जनकत्वो पकारस्याने नवर्थांतरत्वेन स्वेनित्यपदेशो न स्यात् तेन
ध्युपकारांतरकरणे ऽनवस्था॥ किं चेश्वरस्य जगन्निर्माणे यथा रुचि प्रवृत्तिः कर्मपारतंत्र्येण करुणया धर्मादिप्रयोजनोद्देशेन क्रीडार्थं वानियमावत्ययवि
धानार्थं॥ स्वभावतो वा यथा रुचि प्रवृत्तौ कदाचिदन्यादृश्यपि सृष्टिः स्यात्॥ कर्मपारतंत्र्ये चास्य स्वातंत्र्यहानिः तत्र देवहि स्वातंत्र्यमीश्वरत्वं वा परतन्त्रमु
खप्रेक्षित्वं॥ अथ करुणया तर्हि कारुणिकत्वात् युगपत्सर्वानप्यभ्युदयेन युञ्ज्यात्॥ ततो न कश्चित् दुःखितः स्यात् यथा नाभ्युदयः स्यादित्य नैवं कर्मा
तानि तानि कर्माण्यनुभावयति॥ सोऽयं प्रसादितनाम्ना शुचिमो दत्त्या गम्यमानः कारुणिकस्य तेन देव कारुणिकत्वं यदन्येषां दुःखेनेशो ऽपि माभूदित्य
नुसंधानं अथेश्वरः किं करोति सर्वाण्जित्वैः कर्मभिरेवायं तथा वशीकृतो येन दुःखमनुभवंति॥ तर्हि तस्य कः पुरुषाकारः कर्मणामुपभोगेनैव प्रक्ष
योपपत्तेः॥ अदृष्टापेक्षस्य च कर्तृत्वे किं तत्कल्पनया अकल्पितेनाप्यसावदृष्टाधीनत्वेन जगदेव न तदधीनमस्तु किमनेनांतर्गडुना॥ अथ धर्मादिप्रयोजन
मुद्दिश्यायं प्रवर्तते॥ तर्हि कथमसौ कृतकृत्यः स्यात्॥ तस्य तत्प्रयोजनविरोधात्॥ क्रीडासंगात् वा कथं वीतरागता स्यात्पुरुषवत्॥ परमपुरुषस्ये
ग्र त्वरोवाल्य यदि लवक्रीडनीति महति विचं॥ नियमानुयत्प्रवर्तेपि कथं वीतरागद्वेषता॥ तथाहि॥ रागवान् ईश्वरो ऽनुग्रहप्रवृत्तत्वात् राजवत्॥ तथा द्वेषवा
नसौ निग्रहप्रवृत्तत्वात् तद्वत्॥ अथ स्वभावतो ऽसौ प्रवर्तते॥ यथादित्यः प्रकाशस्वभावत्वात् प्रकाशयतीति॥ तर्हि चेतनत्वस्य सततोऽप्यर्थकिंचित्करत्वात् जगतो ऽ
चेतनस्यापि स्वभावतः प्रवृत्तिरस्तु॥ किमधिष्ठातृपरिकल्पनया तस्यानादौ काले स्वभावेनैव स्थितत्वात्॥ कथमचेतनस्य देशादिनियमो नियम्येऽपि
वा कार्ये प्रवृत्तिर्न स्यादित्यन्यत्रापि समानं॥ नित्यादिस्वभावस्येश्वरस्यापि न दोषप्रतिपादनात्॥ बुद्धिमत्त्वं चास्य नित्यया बुद्ध्या नित्यया वास्यात् न
तावन्नित्यया नित्यस्य प्रतीत्यानुमानेन च बाधितत्वप्रतिपादनात्॥ अथानित्यया कुतोऽसौ जायेत॥ इन्द्रियार्थसन्निकर्षात्समाधिविशेषात्तत्तुल्य
धर्ममाहात्म्यादनुध्यानमात्राद्वा॥ न तावदाद्यः पक्षो युक्तो शरीरस्यास्यांतःकरणस्याप्यस्य चेन्द्रियस्यानुपपत्तेः मुक्तात्मवत्॥ उपपत्तौ वानर्थकृतान

ज्जनितज्ञानस्यानियतविषयत्वात्॥ किंवाचेतनाश्चक्षुरादयः केनचिदधिष्ठितास्तज्ज्ञानं जनयंत्यनधिष्ठिता वा॥ यद्यधिष्ठितास्तदा जगत्यचे
तनाः केनचिदनधिष्ठिता जनयंत्वनभ्युपगमात् कृत्यनपाश्चाधिष्ठिताः किमधिष्ठातृत्वं नरेणाचेतनवत्स्या॥ तेनैव च चक्षुरादीनामधिष्ठिता ज्ञाताः संतत्प्रेर्य
तेषु प्रेरिता ज्ञानं जनयंति जनितज्ञानाज्ञाताः भवंतीति॥ समाधिविशेषोत्थानं च ज्ञानविशेषस्य तस्य चाद्याप्यसिद्धेः कथं तस्यापरस्योत्पत्तिः
समाधिविशेषासंभवे च कथं तदुत्थो धर्मस्तत्र संभाव्येत तस्मादात्म्यान्तज्ञानोत्पत्तिः स्यादशरीरस्य च समाधिविशेषादिकं शुकाल्पवदृष्टदेव॥
अतः कारणासंभवादीश्वरस्यानवस्थाज्ञानानुपपत्तेः कथं न च बुद्धिमत्तासिद्धेन॥ अथानित्यानित्यबुद्धिविशेषानपेक्ष्य बुद्धिसामान्येन तत्र तदुनाश
साध्यते॥ तदप्यसारं द्वितीयविशेषस्यासंभवान्नरवनु नित्याबुद्धिविशेषः॥ कदाचिदप्यनुभूयते नित्यस्यैवास्य सर्वदानुभवात्॥ अतः सिद्धत
त्सामान्यमनित्यबुद्धिविशेषाधारमेव सिद्ध्येत्॥ न हि विशेषस्याभावे कारणासंभवेतोः संभवात् कथं नराधारमपि तत्तत्सामान्यं सिध्येत्॥ अस्तु वा य
था कथंचिद्बुद्धिमत्त्वमस्य तथापि शास्त्राणां प्रमाणतेनरव्यवस्थाविलोपप्रसंगः सर्वदायामीश्वरदेशविधापित्वात्॥ अदेशविधायित्वे च तल्लोमा वर
ण्यविरोधात्॥ संसारविलोपश्चेश्वरव्यापारस्य सर्वं अननुकरणात् तदभावे सकलात्मगुणानां बुद्ध्यादीनामप्यभावात्॥ न हि तन्नुकरणाद्यभावे बुद्ध्यादिवि
शेषगुणाभावे चात्मनि कीं बुद्ध्या स्कंदत्त्वात्मना सत्त्वं पुनकर्मिणा॥ संतानविधानेश्वरतो लोकनिवासबंधिविधानेतिमन्तोनैवासार्थत्वं कारिता॥
ततो योगोपकल्पितस्येश्वरस्याखिलजगज्जनकत्वासंभवान्नानः सर्वज्ञतासिद्धिः॥ क॥ एतेन सांख्यपरिकल्पितस्यापीश्वरस्याशेषजगतामनुका
जगन्निमित्तकारणत्वेनाव्यवस्था पुनिज्ञायमानापि दोषालंकारश्च दोषानुषंगाविशेषात्॥ ननु सांख्येश्वरेश्वरस्वरूपस्यापाव्यावर्णनात्कथं योगोपक
ल्पितेश्वरपक्षोक्तदोषानुषंगः॥ तथाहि॥ क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः॥ तत्र अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशाः ३३
कर्माणि शुभाशुभानि तद्विपाकाः कर्मफलोपभोगरूपाः आशयाः नानाविधतदनुगुणसंस्काराः तैरपरामृष्टोयः पुरुषविशेषः स ईश्वर इति॥
न चैवं सर्वप्रकारात्मना योगीश्वरतत्प्रसंगस्तस्य परामृष्टत्वाविशेषादित्यभिधानयं॥ तेषां सर्वदापरामृष्टत्वासंभवात्॥ योगिनस्तु सर्वदा बंधविनिर्मु

ष्टः क्लेशादिभिरपरामृष्टः सर्वेश्वरोनचतदन्येमुक्तात्मानस्तथाविधास्तेषांप्राकृतवैकारिकदक्षिणालक्षणबंधत्रयसद्भावात्॥प्राकृतोहिबंध
स्यात्मानात्मविवेकाभावस्वभावः॥विषयासंगस्वरूपस्तुवैकारिकः॥भोगाधिरूढधर्माधर्मलक्षणस्तुदक्षिणाबंधः॥एतेनचबंधत्रयेणाम
लादीश्वरएवास्पृष्टःमुक्तात्मानस्त्वनादिनीएषापिबंधनानिविवेकख्यातेनप्राप्यस्येनकर्मफलोपभोगेनचनिर्मूलितैकैकस्वंप्राप्ताः॥अ
यंतुभगवानीश्वरःसदैवमुक्तःसदैवेश्वरोनतस्यपूर्वाकोटिरस्ति॥यथासंसारिमुक्तात्मनांमुक्त्यपरायथाप्रकृतिलीनतत्त्वज्ञानानांपति
नांतरैर्मुक्तिंप्राप्यापिपुनर्बंधभाजोभवंति॥ऐश्वर्यंचास्यनिरतिशयोत्कर्षसत्वापादुर्वेदोगानिसहरूय॥निरतिशयसत्वोत्कर्षस्त्वास्याः ज्ञाप
नज्ञाणलक्षणज्ञानस्योपादानात्॥नन्वेवमितरेतराश्रयः सिद्धेहिनिरतिशयसत्वोत्कर्षेणतल्लक्षणज्ञानस्योपादानंसिद्ध्यतिसिद्धेचनिरतिशय
सत्वोत्कर्षसिद्धिरिति॥तदसमीक्षिताभिधानमीश्वरज्ञानस्यनिरतिशयसत्वोत्कर्षयोरनादिसंबंधसंभवात्॥तेनैश्वर्यमष्टविधं॥अणिमालघि
मामहिमाप्राप्तिः प्राकाम्यमीशित्वंवशित्वंयत्रकामावसायितेति॥तत्राणिमायस्माच्छरीरंभूत्वासर्वभूतैरदृश्यःसर्वलोकेसंचरति॥ल
घिमायल्लघुत्वाद्वायुवद्विचरति॥महिमायत्सर्वलोकपूजितोमहतोपिमहत्तमोभवति॥प्राप्तिर्यन्मनसाचिंतयतितत्प्राप्नोति॥प्राकाम्यं
यस्मात्प्रकामोभवतिप्रविषयान्भोक्तुंशक्नोतीत्यर्थः॥ईशित्वंयत्त्रैलोक्यस्यप्रभुर्भवति॥वशित्वंयद्भूतानिस्थावरजंगमानिवशंनयति॥यत्रैपं
द्रियश्चभवतियत्रकामावसायितायद्यस्यप्रजापत्यैर्वर्णांधर्वयत्तरात्तस्येच्छावशवर्त्यैश्वर्यंमेतच्चस्यानांतरेणयत्रयत्रकामयतेतत्रतत्रा-
वसेतीति॥एतेषांचज्ञानैश्वर्यादीनांप्रकृष्टप्रकृष्टतमतारतम्यदर्शनाद्यत्रविश्रांतःप्रकर्षःसईश्वरइतिसंभावनानुमानेनास्यैतावदवस्था
प्यते॥तथाहि॥यत्सातिशयंतत्सकृचिदवस्थितम्॥यथापरिमाणप्रकर्षोव्योम्नितारतम्यप्रकर्षश्चज्ञानैश्वर्यादिधर्म्माणामिति॥तस्येश्व-
स्येश्वरसिद्धस्वरूपस्येश्वरस्यनिःशेषसंसार्यनुग्रहार्थमेवप्रवृत्तिः॥सहिकल्पप्रलयमहाप्रलयेषुसमस्तंजगदुद्धरिष्यामीतिप्रतिज्ञावानवतिष्ठ-
ते॥एवंध्यायिभिश्चिंत्यमानोवाचकेनप्रणवादिनाजप्यमानस्तेभ्योभिमतंफलंप्रयच्छति॥कालेनानवच्छेदात्सोपूर्वेषामपिकपिलमहर्षि

न्या·कु·वं· प्रभृतीनां गुरुस्त्वैहिकल्पमहाकल्पादिना कालेनानवच्छिद्यन्ते॥ नन्वीश्वर इति॥ ८॥ ईश्वरपत्ति विधीयते॥ यतो नवद्गुर्तकेणेत्यादिनादिवचनेन रमणीयं यतः
४५ क्लेशादिभिरपरामृष्टत्वमात्रं तस्य स्वरूपं नास्मिन्सत्यपि ज्ञातत्वं वा॥ प्रथमपक्षे मुक्तस्यात्मनोऽपरामृष्टत्वान्न दन्यमुक्तवत॥ न पुनरीश्वरस्तदन्यमुक्त
त्वनागमपि तत्प्रसंगात॥ सर्वदा वेधेनास्पृष्टत्वाभावान्नेतरोल्लसंगश्च त्वपि प्रसिद्धा मा च नेश्वरस्यापि सर्वदा वेधनास्पृष्टत्वासंभवात् तदसंभवस्य मा
सप्ररूपणावसरे प्रतिपादयिष्यते॥ अथ तदस्पृष्टत्वे सत्यशेषज्ञातत्वं तस्य स्वरूपं तत्कुतः सिद्धम् ज्ञातत्वकर्तृत्वादेरैश्वर्यादुपपत्तेर्वा॥ न बाद्यपक्षोऽनुपपन्नो
याभिमतेश्वरपक्षनिक्षिप्तहेत्वागमादसंगात॥ कर्तृत्वाभ्युपगमे चास्य स्वकर्तृनिर्गुणः सुहृदस्यादेरप्यलक्षणस्यानुपपत्तेः॥ अपि चान्यान्यतामेवेन स-
दसाचेश्वरस्याख्यातोविशिष्टत्वाभावमप्रदोषः॥ नन्वेवं श्रुत्वावरपीश्वरस्वरूपत्वाभावप्रसंगात् नीरवनत्वैन श्रेयो विशिष्टत्वं स्यात॥ अस्तु वा स्वकर्तृत्वं
तथाप्यसौ स्वतंत्रः कार्यं कुर्यात् प्रकृतितन्त्रो वा॥ यदि स्वतंत्रं तदा योगोपकल्पितेश्वरान्नविशिष्यत इति॥ नेदोषेणेव दूषणास्य प्रतिपत्तव्या॥ अथ प्रकृति
तंत्रस्तत्प्रकृतेः स्वरूपतरया सिद्धेस्तदसिद्धिश्चार्थानिराकरिष्यमाणत्वासिद्ध॥ ननं च ना चास्यानवयानित्यपाध्यानात्मिनित्यैककार्यकारित्वाद्वा-
स्यात न वाद्यकल्पनाः युक्ता सर्वदा नित्यत्वेनाविकारिणोऽस्यानित्यप्रधानासंभवात्॥ द्वितीयकल्पनाप्यनुपपन्ना कार्याणां यौगपद्यप्रसंगादुपनि
हतसामर्थ्यस्येश्वरप्रधानाख्यकारणद्वयस्य सर्वत्र सर्वदा संनिहितत्वेनाविकलकारणत्वान्नेषां यदा विकलकारणानन्तराभवत्वेन यद्यन्यत्वन्नुता-
प्राप्तसामग्रीनां कुरे विकलकारणं च नित्यव्यापीश्वरप्रधानाख्यकारणद्वयाधीनमशेषं कार्यमिति॥ ननु कारणद्वयस्यास्य सर्वत्र सर्वदा सन्निहित-
त्वेपि तत्र सर्वत्र सर्वदा कार्योत्पत्तिस्तत्स्थित्युत्पत्तिविनाशविधाने सत्त्वरजस्तमसामुद्भूतवृत्तीनां यथाक्रमं सहकारित्वात्तेषां च यथाविधानं क्रमभा
वित्वादित्ति न दस्यपचारं॥ यतः प्रकृतीश्वरयोः स्थित्युत्पत्तिप्रलयानां मध्ये न्यतमोत्पादनसमयेन रपरोत्पादने सामर्थ्यमस्ति न वा यद्यस्ति तर्हि सर्व ४५
समये पि स्थितिप्रलयप्रसंगो विकलकारणत्वादुत्पादवत॥ एवं स्थितिकाले प्युत्पादविनाशयोः विनाशकाले चास्य सुत्पादयोः प्रसंग॥ नैतत्युक्तं न
हि परस्परपरिहारेणावस्थितानामुत्पादादिधर्माणामेकत्र धर्मिण्येकदा सद्भावो युक्तः प्रतीतिविरोधात॥ अथ नास्ति सामर्थ्यं तदेवक्रमेणावस्थितत्वादीनां

मध्येकार्यसरास्याघज्ञत्वेनेतयोः सामर्थ्यमस्तिनापरंमनज्ञत्वेनेनयोः सामर्थ्यासंभवात्॥ अविकारिणोश्चानयोः पुनः सामर्थ्यासंनिविरोधात्
अन्यथानित्यैकस्वभावताव्याघातः॥ ननु चानयोस्तत्सामर्थ्यसंभवेपि पदोद्भूतत्वनिरजः सतकारिभवतिनतेनानित्यविधायकत्वं॥ यदासत्वंनदा
स्थितिकारित्वं॥ यदानुत्वमस्तदापुनः पोत्पादकत्वमित्यप्यसांप्रतं॥ यतस्तेषामुद्भूतत्वानित्यमनित्यं वास्यात्॥ नतावन्नित्यं कादाचित्कत्वात्
स्थित्यादीनांयौगपद्यप्रसंगाच्च॥ अथानित्यं कुतो जायते प्रकृतीश्वराभ्यामात्मनो वा कुतश्चित्तावत् ज्ञेयशावाप्रथमपक्षेसदाऽप्यसद्भावप्रसंगः प्र
कृतीश्वरयोस्तद्धेतोर्नित्यरूपतया सदासन्निहितत्वात्॥ अथान्यतस्तत्प्रकृतीश्वरव्यतिरेकेणापरकारणस्याभ्युपगमात्॥ तृतीय
पक्षेतुदेशकालनियमेनास्याविर्भावविरोधः स्यात्तं श्रेणाभवतस्त्वन्विष्यमानुपपत्तेः॥ स्वभावतोनरायात्मवतोदिभावाः कादाचित्काः स्युस्त
द्धाराभावप्रतिबद्धत्वात्तत्स्वास्वपोनन्ध्येतयामेपदार्थ्या यस्यकस्यचिदप्यभावात्॥ श्रेयसोपि सद्भावेवास्वात्तं श्रेयोत्पादविरोधात्॥ अ
तःकर्तृत्वस्येश्वरे विचार्यमाणस्यकथंचिदप्यनुपपत्तेर्नानत्वस्यात्तोपत्तत्वासिद्धेनाप्यैश्वर्यस्याश्रयत्वात्॥ तत्रैश्वर्यस्यापिविचार्यमाणस्यानु
पपत्तेस्तद्धिनत्स्वाभाविकं प्रकृतिकृतं वास्यात्॥ नतावत्स्वाभाविकं बुद्धिधर्मतया सांख्यैस्तस्याभ्युपगमात्॥ चैतन्यमेवहिनेरात्मनिस्वाभा
विकंस्वरूपमभ्युपगतं॥ अथप्रकृतिकृतं तथाहि॥ यदाप्रकृतिर्बुद्धित्वत्तरेणविकारेणपरिणमतेतदातदवस्थाविशेषाधर्मज्ञानवैराग्यैश्व
र्याद्यः प्रादुर्भवंतीति॥ तदसमीक्षिताभिधानमेव मीश्वरस्यभवतैश्वर्याभावप्रतिपादनात्॥ नहिबुद्धिपरिणामस्यैश्वर्यस्यसंभवेतता
धीतरस्याप्यनपुनकस्यात्मनोपितत्प्रसंगात्॥ अथबुद्ध्यासहसंबंधसद्भावात्तस्यैवनत्वान्यस्येत्युच्यते॥ ननु कोयंतेनास्याःसंबंधः समवायःसं
योगादिस्तद्देशेनपर्वतनिमावबाततास्सुमवायोन्यधर्मस्याप्यत्र समवायानुपपत्तेः॥ योपद्धर्मैः सततोन्यत्रनसमवैतीतिसयथाविद्रूपताप्र
कृतिधर्मश्चबुद्धित्वस्मात्ततोर्थान्तरेस्मिन्नसमवैतीति॥ नचस्फटिकावित्समवेतेनरक्तादिधर्मेणानेकांतोजपापुष्पसन्निधानेस्फटिकारे
वतयापरिणमनात्॥ एतच्चप्रतिविंबोदयसिद्धौसप्रपंचंचोपिष्यते॥ आत्मनोपिबुद्धिरूपतयापरिणामप्रकृतिसंनिधानेनतयापरिणामाभ्युप

न्या·कु·चं· रिणामस्यानुपगमेऽपि च कार्यकारिणामित्वप्रसक्तेर्नित्यादिग्रंथविरोधः ॥ ननु नेश्वरे ज्ञानसद्भावे समवायः संबंधो घटते नापि संयोगो द्र
६६ व्यत्वाभावात् अनित्यप्रसंगाच्च सर्वेश्वरस्य नित्यात्मभिन्नत्वमव्यापि मितत्वस्यात् संयोगो विघटन एव ॥ एतेन संयुक्तसमवायादिरपि प्रत्याख्यातः संभव
स्यातिप्रसंगस्य चाचार्यविशेषात् ॥ अथ न दुष्टे ज्ञानसद्भावे नित्यमात्रमेवास्यात्मेन संबंधस्तस्य सा ॥ नमीश्वरे ज्ञानास्याः प्रवर्तने च संभवा
त् ॥ पुरुषार्थकर्तव्यता वशेनापि प्रकृतेः प्रवर्तमानायाः बुद्ध्यादयो विकारा व्यक्तिमासादयंति ॥ न चेश्वरस्य कश्चित् पुरुषार्थः कर्तव्योऽस्ति नित्यनि
र्मुक्तत्वेन कृतकृत्यत्वात् ॥ तत्कथं तद्बुद्धिरूपप्रकृतिः प्रवर्तेत ॥ अप्रवर्तमानायां चास्यां कथमैश्वर्यसंभवः ॥ किं चैश्वर्यं स्वामित्वं न कार्यसंपादने द्र
व्यसद्भावादिसंपन्नत्वं मुख्यते ॥ कार्यं चेत् स्वामित्वं न किंचित् संपादयति केवलं वस्तु यथावज्जानाति कथं तर्हि नाम तस्यैश्वर्यम् ॥ न
हि यथावज्ज्ञानाति सत्त्वे चेश्वरत्वं सर्वत्र प्रसंगात् ॥ अथ कालेनानवच्छिन्नं ज्ञानं तेनासावीश्वरो नान्यः ॥ न तु कालेनानवच्छिन्नत्वं नित्य
ए, त्वेन गमकं नैश्वर्ये सति न संभावनानुमानं वस्तु केवलं नोऽस्ति बुद्ध्यादिगुणानां प्रसवकर्मसिद्धेन नैश्वर्यम् ॥ किं च पुरुषार्थकर्तव्यतानुरोधेन प्रकृ
तिनः प्रवर्तमानायाश्च नरकोपभोगापवर्गकं विवेकख्यातिपर्यंतं पुरुषार्थं संपाद्य विनिवर्तनं कर्तृत्वभोक्तृत्वाद्यभिमानायाः बुद्धेः स्वकारणे लय
ः संभवेत् ॥ न तत्वेश्वरं प्रत्यस्याः कृतार्थताख्यान्न वा कृतार्थत्वे बुद्धेः स्वकारणे लीनत्वात् तमैश्वर्यं कृतार्थत्वे वा पि तद्भावे तस्य सद्भाव
योगितुल्यत्वमस्य स्यान्नेश्वरत्वमिति ॥ ततो जगत्कर्तृत्वादिप्रकारेणापि तत्सद्भावासिद्धेः सुनिश्चितासंभवद्बाधकप्रमाणत्वोऽरवनतः स-
द्भावसिद्धिरभ्युपगंतव्या ॥ स्यान्मतं ननु बाधकाभाववत् साधकस्यापि प्रमाणस्याभावात् संदेहोऽस्तित्वादेकांतनिश्चयाद् ॥ साधकबाधकप्रमाणाभा
वात् तत्संशीतिरित्यनेन प्रत्युक्ता बाधकस्यैवासंभवात् ॥ साधकस्यापि विस्तापकबाधकप्रमाणाभावात्कारणात्तत्रानींद्रियप्रत्यक्षे संशीतिः अनेन यद ६६
वद्वैयत्यादिनाग्रंथेन प्रत्युक्तं निरस्तं कुत एतदित्याह साधकस्यैव बाधकस्यैवासंभवात् क्षीणतावतानींद्रियप्रत्यक्षसद्भावो भविष्यतीत्यत्राह ॥ स
र्वज्ञबाधकत्वाभावेन प्रत्यक्षादिप्रमाणप्रवृत्तिरसिद्धस्तत्संशयादेवसंदेहस्तत्र प्रमाणान्तरस्थापनादित्यत्र मनि प्रसंगेन सर्वज्ञत्वादिदर्श

(न बाधकात्, यदि नाम प्रमाणतो बाधसंभवः

तदन्येनान्यत्र चाविषये बाधकाभावेन तथ्यां भावाभावव्यवहारसिद्धिः॥ बाधकस्याभावेन हि वस्तुनि भावव्यवहारसिद्धिः भावेन चाभावव्य
वहारसिद्धिरिति। कुत एतदिति संदेह इत्याह॥ नहीत्यादिना योग्यबाधकेन तयोः संदेहो न संदेहः सर्वत्रेति। न तु न बाधकाभावाद्भावव्यवहारसिद्धि
रितु प्रतीतिरित्याशंक्याह न तत्संवेद्यान्तरं एव बाधकाभावानुभावव्यवहारसिद्धिसंवेदनं एव प्रमाणमेव तथाचारादि स्वेदमतमतिप्रसंगेन॥ न
नु चेंद्रियानिंद्रियमनःसंस्थाय वर्तमानमात्रप्रतिपत्तिमत्वेन तत्तदुपायात्वविषयत्वात्कथं संव्यवहारनिपुणत्वमित्यत आह॥ तद्॥ अर्थसान्नि
योगे सति तदालोको यः प्रकारविकल्पधीः॥ अवग्रहेऽपि विशेषाकांक्षेहावायो विनिश्चयः॥ अर्थसान्निचक्षुरादींद्रियाणामर्थानां घटादीनां संयोगे संबं
धे योग्यतालक्षणे सति न तु संयोगादिलक्षणे तस्य प्रागेव प्रतिषिद्धत्वात्॥ सतालोकः सकलहेयोपादेयसाधारणमत्वमात्रस्यालोको दर्शन
मात्मनः प्रथमतः प्रादुर्भवति॥ तदनु स एवालोको यः प्रकारविकल्पधीर्भवति॥ अर्थोऽवग्रहो हेयत्वेनोपादेयत्वेन वा प्राप्यमानो भावः त
स्याकारः सत्वसामान्यादवान्तरो जातिविशेषो मनुष्यत्वादिः॥ तस्य विकल्पधीः निर्णयरूपा बुद्धिरवग्रहो भवति॥ तदुपतयाद दर्शनं परिणामतर
त्वर्थः॥ तथाः किंभेदं न्यायाह॥ अवग्रहदर्शने॥ अयमपि विशेषाकांक्षा भवति॥ अन्यस्मात्प्रकृत्वादयं प्रमाणत्वात्॥ अर्थाकारस्वैविशेषो
त्वलादिभेदो गलते॥ तस्याकांक्षा भवति व्यत्यात्प्रत्ययरूपत्वपायदक्षिणोपुरुषं॥ तस्मात्रामकयपनीहेतिताप्यवायो भवति॥ अकांक्षितविशेष
विनिश्चयो भवति॥ तत्स्वज्ञानत्वे ययोः कथंचित्कालांतरेण तु इति मत्वप्रसिद्धेः सिद्धिमिंद्रियानिंद्रियप्रभवत्वस्य तस्य संव्यवहारनिपुणत्वं हेयो
पादेयविषयत्वसंभवात्॥ सर्वथा तत्तु इतिमनः एव तदसंभवं तन्निपुणत्वानुपपत्तेः कारिकां विवृणोति॥ विषयविषयिसन्निपातानं
तरमाद्यं ग्रहणमवग्रहः विषयेत्यादि॥ ननु कारिकायां दर्शनं पूर्वमुक्तं प्रत्याख्यायते नानुविपर्ययः किमर्थमितिचेत्॥ अवग्रहादर्शनस्य का
रिकायां पूर्व प्रतिज्ञानस्यानुमेयत्वस्यापनार्थं॥ यथैवत्सवांतरजाति ग्रहणात्पूर्वकमुत्तरं विशेषज्ञानं तत्तान्नयाम्नस्यावांतरजातिग्रहणंप
तार्दर्शनपूर्वकं तत्त्वस्तापः परं सामान्यमस्तियतो नवस्थास्यात्॥ विषयोपवर्त्तसिद्धिविषयी चक्षुरादिस्तयोः समीचीनो यथार्थज्ञानजनकोनि

न्या०कु०चं० पातोयोग्यदेशाद्यवस्थाकेनस्यात्तंनस्माद्यंसर्वेषांज्ञानमवश्यमस्तसर्वत्र ॥ अर्थान्तरमनुष्यत्वादिमानिपर्यक्तेदः विषयत्वानुस्यपर्य्यायात्मार्थे ॥
६० तत्त्वविषयत्वाद्विनाविषयस्वरूपंनिरूपयति ॥ तावद्रूपःक्रमवाचीविषयोगोचरोर्थः किंविशिष्टोद्रव्यपर्य्यायात्मा ॥ तत्रद्रव्यंशब्दोनरनिवर्तन
स्यैन्वयप्रत्ययग्रहणमधिगम्यमूर्द्धताख्यसामान्यं ॥ तत्रक्रमभुवोविवर्त्ताःपर्यायाः तेषामात्माभावोयस्यतत्तथोक्तः ॥ ननुज्ञानस्वरूपानिरूपणस्यार्थ-
स्यतद्भावेप्रमाणाभावात्कस्यद्रव्यपर्य्यायात्मकत्वविशिष्टस्यविषयत्वंप्ररूप्यते ॥ प्रतिभासमानस्याप्यस्यवस्तुनोज्ञानस्वरूपानःप्रसिद्धत्व-
प्रसिद्धेःसंवेदनमेवपारमार्थिकंनत्वंतथाहियदवभासतेतज्ज्ञानमेवयथासुखादिसवभासतेचभावादीनि ॥ नचैषांपरत्वोवभासोघटते ॥ स
हिपरतःसंवेदनात्तद्वाद्वाभवेत्तत्ततावदसंवद्वात्रतिप्रसंगात् ॥ अथसंवद्वात्किंतादात्म्येनतदुत्पत्त्यावा ॥ यदितादात्म्येनतदाज्ञानरूपतार्थानांज
डस्वभावत्वादाज्ञानस्यस्यात्तादात्म्यस्यान्योन्यस्वरूपस्वीकारेभासंभवनात् ॥ ज्ञानरूपत्वेचार्थानांसिद्धंज्ञानेहैतं जडस्वभावत्वेतुज्ञानस्यार्थ
व्यवस्थापार्तीकृत्वाजगतोविवेकविकलनयाव्यवप्रसक्तेः ॥ अथतदुत्पत्त्याकुतः किमुत्पद्यतत्ताज्ञानादर्थोर्थाद्वाज्ञानं ॥ प्रथमपक्षेर्थस्यज्ञानरूपताप्र
संगोज्ञानादुत्पद्यमानत्वादुत्तरज्ञानक्षणवत् ॥ अथार्थात्ज्ञानमुत्पद्यते ॥ किंसमकालाद्भिन्नकालाद्वा ॥ नतावत्समकालात्समप्राप्तिकेसमयप्रभा
विनाःसव्येतरगोविषाणवन्नकार्यकारणभावाभावात् ॥ अन्यथार्थस्यापिज्ञानस्यापिकारणत्वप्रसंगोविशेषात् ॥ भिन्नकालात्तुनतदुत्पत्तौज्ञानं
स्यादेतुकत्वप्रसक्तिस्तत्कोसौस्यास्तत्वाद्युदस्यपननःकिंचिदुत्पत्तुमर्हतिनिमयाप्नत्वांद्धिरिवनःकेवलायितमर्थस्यज्ञानकालेर्थदर्शनं ॥ किंचार्थोज्ञान
स्यजनकोनित्यःसंभवेदनित्योवानित्यत्वेसकृत्ज्ञानमकार्दैवासायेनित्यैकरूपत्वनयानेकक्रमकदेवतज्ज्ञानजननसामर्थ्यसंभवात् ॥ अन्यथानित्यैकरूप
तानुपपातःस्यात् अनित्यस्यचसमकालस्यभिन्नकालस्यवात्तज्जनकत्वंप्रतिषिद्धं ॥ नैवैकरूपोनेकरूपोवार्थोस्यादेकरूपत्वेहिपरमाणुमात्रार्थस्य
स्थूलप्रतिभासभेदोनस्यादनेकरूपत्वेपरमाणुशोभेदानकस्यचित्कुटस्वपावास्थूलैकप्रतिभासःस्यात् ॥ किंचासौनिराकारेणज्ञानेनसाकारज्ञानेनवासौवाप्रति
तकारज्ञानग्राह्यत्वेप्रतिकर्मव्यवस्थाविलोपः तथाचेदंनीलस्यग्राहकमिदंपीतस्येतिप्रतिनियतकर्मव्यवस्थापकाभावात्प्रतिनियतविषयप्रतिनियत

प्रवृत्तिरपि दुर्लभा॥ साकारत्वे च ज्ञानस्यार्थकल्पनावैयर्थ्यं न चैव यात्प्र्याहकभावस्य परिसमाप्तत्वात्॥ ननु ज्ञानगताकारस्य कादाचित्कत्वपरिदृश्य
मानकारणेभ्योत्पद्यमानत्वात् कारणाभावे च कार्यस्य सद्भावानुपपत्तेस्तदुपदर्शितेतराकारोर्थः कल्प्यते यस्ताज्ज्ञानं जनयतीति॥ तदप्यसंगतं
वासनासामर्थ्यात्तथाभूतज्ञानोत्पत्तेर्नानोर्थसद्भावसिद्धिः॥ अर्थाच्चेत्तथाभूतज्ञानसंभवे स्वप्नेंद्रजालगंधर्वनगरादीनामभावः स्यात्॥ नहि स्व
प्नादौ प्रतिभासमानोर्थोस्ति। यः स्वगतमाकारं विज्ञाने निदध्यात्॥ ततो ज्ञानाभावे गंधर्वनगराद्याकारानुपलंभात् तत्सद्भावे चोपलंभादन्वयव्यति
रेकाभ्यां ज्ञानस्यैवायमाकारोवसीयते॥ किं चार्थो ज्ञानाधिरूढस्वार्थनाम्नामादधाति ज्ञानं पुनरर्थनिरपेक्षं स्वप्नादौ स्वसामर्थ्येनैवासतोप्य
र्थानवभासयद् दृश्यते। यानि वर्तमानस्य ततो ज्ञानादभिन्नोर्थः॥ किं च देशभेदेनोपलंभस्य दृष्टः इति ... नियुक्तत्वं च ज्ञानव्यतिरिक्तोर्थः॥ कदाचिद्
द्देशेनार्थस्यावभासनात्कारेण ज्ञानस्यैव तथावसायः स्यात् ततो नीलादेः प्रकाशानुपपत्तेः सिद्धं स्वयंप्रकाशानियतत्वं तस्माज्ज्ञानादभिन्नत्वं॥
तथाहि। यत्स्वयंप्रकाशनेन तज्ज्ञानादनन्यद्यथा सुखादि स्वयं प्रकाशंते च नीलादय इति॥ सहोपलंभनियमाच्च यद्धि येन नियमेन सहोपलभ्यते
तत्ततो न भिद्यते यथानैकमिति कोपलभ्यमानादेकस्माच्चंद्राद्द्वितीयश्चंद्रो नियतसहोपलंभश्च ज्ञानेनार्था इति॥ भेदे हि नियमेन सहोपलंभो न
दृष्टो यथा घटपटयोः। तथा चाभेदः सहोपलंभनियमेन व्याप्तस्तद्विरुद्धश्च सहोपलंभनियमोदृश्यमानः स्वविरुद्धमनियमं निवर्तयति॥ यत्तन्नि
वर्तमानः स्वव्याप्यं भेदं निवर्तयति॥ ततो यत्रेतुर्विपक्षाद्व्यावृत्तविरुद्धव्याप्तान्निवर्तमानो साध्यमेन ... प्रतिबंधसिद्धिः ...
वसिद्धिः तथा यद्येन ... ज्ञानादभिन्नं यथा विज्ञानस्वरूपं वेद्यंते च नीलादयस्तस्मात् विज्ञानादेवत्त्व सिद्धिरिति॥ अथ प्रतिविधीयते यत्तावदुक्तं
यत्र भासते तत् ज्ञानमित्यादि॥ तत्रार्थानामवभासमानत्वं स्वतः परतो वा स्यात्। स्वतश्चेदसिद्धं न हि परनिरपेक्षप्रतिभासा घटादयः॥ कस्य
चित्स्वतोपि प्रसिद्धाः अन्यत्र महामोहाक्रांतचेतसो योगाचारात्॥ परतश्चेत् सिद्धं तथावभासमानत्वस्य जडत्वे सत्येव संभवात्॥ स्वसिद्धोपरसु
खवेद्यैसिनत्वत्वाज्जडरूप्य यथैवोपलब्धिलक्षणप्राप्तस्य कारणानामप्रतिभासे ... तदात्मकं यथा घटाकारेणापरेण प्रतिभासते च ज्ञानाका

न्या॰कु॰चं॰ ५८

रेणाघटाद्यर्थस्यानुमानाद्बहिर्घटादेर्ज्ञेयत्वप्रसिद्धेरनुमानबाधितपक्षनिर्देशानन्तरं प्रयुक्तत्वेन कालात्ययापदिष्टत्वं॥ ननु ज्ञानाद्भिन्नस्यार्थ
स्याकारकारेणाप्रसिद्धेः॥ कथं परस्परं प्रतिभासो यतो विरुद्धत्वं हेतोः स्यात्तस्यैकं ज्ञानार्थयोः भेदसाध्यस्यासत्त्वप्रसिद्धेः प्रसिद्धेर्वाभिपुरोवर्त्ती
स्फुटविकटाकारो नीलधवलादिरूपो रिक्तव्येवाविज्ञेयनिषेधो नान्यविशेषोर्थः प्रतीयते॥ प्रतीयमानस्य चापह्नवेऽन्तःसंवेदनेकः समाश्वासः
नि सर्वापह्नवप्रसंगः स्यात्॥ नहि विज्ञानस्य सुखादेर्वा प्रतीतेरन्यतः सत्त्वं निश्चितं सत्त्वाभावान्योपलभ्यते॥ ननु नालिययाकारवत्त्वेनाविज्ञे
येघटेनोपलभ्यते॥ सोपलभ्यमाने घटादौ तथाभूतं ज्ञानस्वरूपमिति॥ नचैतत्सिद्धं न स्वरूपस्यानाहंकारास्पदाहृत्यार्थस्य स्फुटितस्य
रास्यान्तरहंकारास्पदस्यानुभवात् तत्तस्यैवविरुद्धरूपार्थविषये यथा सुखदुःखानुभवोस्ति चार्थज्ञानयोः परस्परपरिहारस्थितस्वरू
पत्वेन विरुद्धयोः स्वरूपानुभव इति॥ यथाह कस्यचिन्नहि विज्ञानमन्तर्यास्य स्वरूपं नु नीलादिकं बहिः परिस्फुटं प्रतिभासते॥ तथाप्यनयोरभेदे
न किंचित्कुतश्चिद्विद्येत॥ प्रतिभासभेदं विरुद्धधर्माध्यासं च विहायान्यस्य भेदकस्यासंभवात्॥ यच्चार्थस्याकारतया प्रतिभासते तदन्यतो
भिन्नं यथा सुखदुःखेदाकारतया प्रतिभासते तस्य विषयज्ञानाकारविम्यतमानाबानयोर्भेदः सभेदे वा ज्ञानरूपावदन्तो नीलादेर्व्यवस्थाप्रसं
गः॥ साधकबाधकप्रमाणाभावात्संवादाभावात्सर्वक्रियाकारित्वाभावाद्बाधकप्रमाणसद्भावाद्वा घटादिकमाभेवसमानेष्व॥ नरस्तत्रापि पारंपर्येणावा
त्वार्थोपयोगात्॥ नत्यननुभूतेर्थे स्वप्नः कदाचित्क्वचित्प्रादुरिति॥ अननुभूतार्थस्यापि तज्जन्मता तत्प्रत्यक्षसर्वाभावे संभवः॥ नन्वननु
भूतेपि स्वशिरश्छेदादौ ज्ञानमुत्पद्यते तन्न तत्रापि परशिरश्छेदो दृष्टः स्वशरीरं चानुभूतं तत्र मनोदोषवशाद्विवेकमपश्यतान्वात्मशरी
रे शिरश्छेदमभिमन्यमानेस्तत्राप्यनुभूतोर्थ एव कारणं॥ न तदननुभूतपरशिरश्छेदस्य तदपि ज्ञानमुत्पद्यते॥ गगर्हनगरवत्स्वेपि पर
र्यसेनेवास्याथीजलधराः कुतश्चिदन्याकारतया वभासेते॥ कथं वासाधर्म्यवेजातिनयत्वसिद्धिः॥ ज्ञानमात्रे हि जगति नियामकाभा
वान्मनुष्योन्योन्योपि मनुष्यो हस्त्यपि पिपीलिकापि पीलिकापि हस्ती स्यात्॥ बाह्यार्थाभ्युपगमे तु तन्नियत्वं सुघटमेव येन हि मनुष्यत्वा

५८

सुखभोग्यसुखदुःखादिनिमित्तंकर्म्म समाचरितं तत्परिपाकवशात्तामेव जातिं प्रतिपद्यते॥ एवमन्येष्वपि प्राणिनः स्वोपार्ज्जितप्र
धारणकर्म्मवलात्तास्ताजातीः प्रतिपद्यते॥ किंचार्थस्यासत्त्वमिच्छामात्रेण साधकप्रमाणाभावात्संवादासत्त्वादर्थक्रियाकारित्वा-
भावाद्बाधकप्रमाणसद्भावाद्वा॥ यदीच्छामात्रेण संवेदनाद्वयालम्बिनं तदानिष्टसंगतत्पदैर्नादेरप्यसत्त्वानुषंगात्॥ नापि साधक
प्रमाणाभावात्तस्यस्यैवानात्मभूतायां पितार्थक्रियायां साधकोदकाद्यर्थसंसाधकस्य सद्भावात्॥ संवादासत्त्वमप्यसिद्धं तस्य तत्र
निपन्नोत्पलादावनुमानादेः संवादकस्य संभवात् अर्थक्रियाकारित्वाभावोप्यनुपपन्नो बाह्याध्यात्मिकार्थक्रियायास्तन्निबंधनत्वात्।
बाधकं चार्थस्य न किंचित्प्रमाणमुपलभ्यते यच्चात्र बाधकमुक्तं परैः सर्वदा रसंवको हेत्वादि तत्र सर्वदा रेवज्ञानार्थस्य प्रतिभासः
संबंधश्चयोग्यतालक्षणो न तदात्म्यतदुत्पत्तिलक्षणस्तस्य रूपादिना चक्षुरादिना चानेकान्तात्॥ योग्यस्य चार्थस्य समकाल
क्रियाकालत्वम् स्वग्राहकग्रहणमविरुद्धं॥ न तु तथाभूतस्यार्थस्य यावद्ज्ञानं ग्राहकं॥ तावदर्थोपि ज्ञानस्य ग्राहकः कुतो न स्यादिति चेत्स्वभावभेदान्न
खलु यदेकस्य स्वभावः स एवान्यस्यापि अन्यथा प्रदीपवद्घटस्यापि प्रकाशकत्वप्रसंगः तथा प्रतीतिरन्यत्रापि समाना॥ नत्वर्थस्य ज्ञान
वद्ग्राहकत्वेन प्रतीतिरस्ति॥ नीलतद्धियोः कारणांवा यादृशं हि द्व्यापिकार्थवन्नीलादयः॥ किं नास्य व्यापकानियतानां येषां यावदसौ व्यापिका
तावत्तद्वेद्यां किं व्यापिके तिरोधो येभवतोपि नातः स्वभावभेदवतो निरन्तरं तरं। यदप्यभिहितं॥ अर्थो नित्योऽनित्यो वा एकरूपोऽनेकरू-
पो वेत्यादि॥ तदप्यखिलार्थानामनेकान्ताभ्युपगमान्निरस्तं नाद्वितीयः नित्योऽनित्यो वा एकरूपोऽनेकरूपो वा बहिरंतर्वार्थोऽस्तीत्य
नेकान्तसिद्धेः प्ररूपयिष्यते॥ यदप्युक्तमर्थो ज्ञानाधिरूढ एवार्थतामासादयतीत्यादि॥ तत्र कोधिरूढार्थो व्यवस्थितिरेवसा यत्ताव्यव
स्थितिस्तस्य ज्ञानानात्मभूतस्य स्वपरप्रकाशकस्यात्मप्रकाशेपरत्वरूपेसकस्तजपत्रहादं स्यापि प्रसिद्धिनो न हि व्यवस्थित
त्वप्रतीतेः॥ अन्यथा ज्ञानव्यवहारेण बहिःस्थितैरर्थक्रियान स्यात्॥ द्वितीयपक्षे तु ज्ञानार्थयोर्भेद एव स्यात्॥ अपेक्षायाः स्वामिभूत्यव
द्भेदे सत्येव संभवात्॥ ज्ञानापेक्षार्थस्य सिद्धिरित्येतावता र्थस्य ज्ञानात्मकत्वे कार्यस्यापि कारणात्मकत्वप्रसंगात्कारणादेतमप्यनुप

न्या.कु.चं. १०५

ज्ञेयेन् नहि कारणनिरपेक्षा कार्यस्य सिद्धिरिति॥ यच्चान्यदुक्तं यस्त्वयं प्रकाशेनेन ज्ञानेनैत्यादि॥ तदपि प्रलापमात्रं स्वयंप्रकाशमानत्व
स्यार्थप्रागेव प्रतिषेधात्॥ यच्चोक्तं सहोपलंभनियमादित्यादि तदप्युक्तिमात्रमनैकांतिकत्वात्॥ भिन्नास्वपि हि कृत्तिकासु सहोपलंभनि
यमोपवर्णने। विरुद्धत्वं च भेदेनैव सहोपलंभस्य व्याप्तत्वात्॥ सहशब्दो हि भेदाधिष्ठानो भेदे सहशब्दार्थानुपपत्तेः॥ नहि स एवैनैव सहे
तिव्यपदेशमर्हति॥ व्याप्तिशून्यत्वं चास्य न बहिरेनो विपक्षे बाधकप्रमाणासद्भावाद् व्याप्तिरवसेया भेदस्य च भेदो विपक्षस्तत्र नियतसहो
पलंभस्य व्याप्तेर्नोदर्शिता यतः परस्परं भावाभावभेदेनैव व्याप्तिः सिध्येत्। न चार्थभेदाभावाद्वा नो भिन्नास्वपि कृत्तिकासु नियतसहोपलंभस्य
दृष्टत्वात्। कालात्ययापदिष्टश्चायं संवित्संवेद्यसंवेदकानां परस्परं विविक्तस्वरूपाणां सर्वावपि तत्प्रत्यक्षेण प्रतीयमानत्वात्॥ न चैतेनैव बा
धमानत्वादबाधितत्वमसिद्धं॥ तत्रस्य विरोधे स्वतस्त्वानुमानस्यात्मलाभस्यैवासंभवात्॥ लब्धात्मलाभं च साधकं बाधकं वा न स्यात्॥ सहो
पलंभश्चायं च किमेकत्वाभिप्रेतं किमर्थद्वये उपलंभद्वयस्य सहभाव एकस्मिन्नेवोपलंभे अर्थद्वयस्य युगपत्प्रतिभासत्वं वा प्रथमपक्षे सिद्धो
हेतुः प्रतिविषयं विज्ञानभेदासंभवात्॥ साधनविकलश्च दृष्टान्तो न हि चंद्रप्रतिभासे यमनिभासरूपसाहित्यमस्ति॥ एकस्यैव ज्ञानस्योभ
याकारोल्लेखितयाध्यक्षेणाध्यवसायात्॥ द्वितीयपक्षे तु विरुद्धत्वं एकत्रोपलंभे सहार्थद्वयप्रतिभासस्य भेदे सत्येव संभवात्॥ अथ य
देकस्मिन्नेव संवेदने स्फुरति तत्संवेदनादभिन्नं यथा संवेदनस्वरूपं स्फुरंति च तत्रैव संवेदने नीलादयो भावास्ततोनुमानाद्द्विचंद्रप्रति
भासत्वासंभवाच्चास्य विरुद्धत्वं॥ तत्र संवित्संवेद्ययोर्भेदस्य वास्तवस्याध्यक्षसिद्धत्वेन प्रतिपादितत्वात्॥ किंच संवेदनस्य स्वपरैकभास-
स्वभावत्वात्परस्य चाभावे तत्स्वभावसंवेदनस्वरूपस्यासंभवेन संवेदनस्याप्यसंभवात्कस्य केनाभेदः॥ यच्चोक्तं
येदं येनेन हि ज्ञानादभिन्नमित्यादि तत्र किमिदं वेद्यत्वं वेदनकर्मत्वं तत्संबंधित्वमात्रं तत्स्वभावत्वं वा॥ यदि वेदनकर्मत्वं तदा विरुद्धो
हेतुः कर्मत्वस्य भेदेनैव व्याप्तत्वात्॥ न हि च्छिदिक्रियायाः कर्मभूतानि काष्ठान्यभिन्नान्युपलभ्यन्ते। न च क्रियाकारकयोर्भेदे सत्येवो
पलब्धे भेदेनैव कर्मक्रियाभावस्य व्याप्तत्वादभेदविपरीतार्थसाधनत्वाद्भेदसाध्यविरुद्धो हेतुः॥ अभेदे चानयोः किं संवेदनादर्थस्या

भेदः अर्थाद्वासंवेदनस्याद्यपक्षविकल्पे संवेदनमेव स्यान्नार्थः तस्य तत्रैवानुप्रविष्टत्वात्॥ तथा च संवेदनमात्रस्यासिद्धो हेतुः। द्वितीयविकल्पेन
वेदनसंवेदनमिति कुतः स्याद्भेदः साध्येन॥ भेदस्यानयोः प्रत्यक्षप्रतिपन्नत्वात्कालात्ययापदिष्टत्वं च॥ संवित्स्वरूपस्याभिन्नत्वेनाकर्म्मत्वे
साधनविकलो दृष्टांतः॥ अनुसंवित्संबंधित्वमात्रं चेद्धेतुस्तथापि विरुद्धत्वं संबंधित्वस्य भेदे सत्येव संभवात्॥ भेदाभावे हि संबंधस्तदभावेन स्यात्
भावात्संवित्संबंधित्वस्यासिद्धिरित्यसिद्धत्वं च॥ अथ वेद्यत्वं संवित्स्वभावत्वं विवक्षितं न तदसिद्धमर्थस्य संवित्स्वभावत्वसमर्थनात्॥ नैतन्नि
र्बाधबोधाद्धेतुत्वं वस्याभ्युपगन्तव्यम्॥ न संवेदनमिदं संवेदनस्वभावो वा स्यादर्थो नीलसितादिनेकाकारप्रतिपन्नत्वात्॥ ननु ज्ञानमेव
दृष्टं नीलसुखाद्यनेकाकाररूपं चित्रमाभासेन॥ न पुनर्बाह्योर्थस्तस्य ग्राहकप्रमाणाभावात्॥ यस्य ग्राहकप्रमाणं नास्ति तन्नास्ति यथा खरवि
षाणं नास्ति च बाह्यार्थग्राहकं किंचित्प्रमाणमिति॥ न चेदमसिद्धं॥ तथाहि॥ तद्ग्राहकं एकं निराकारं साकारं वा प्रमाणं स्यात्॥ न तावन्निराका
रं तस्य सर्वत्राविशेषतः प्रतिकर्म्मव्यवस्थानिबंधनत्वानुपपत्तेः साकारत्वे तु सिद्धं ज्ञानमेव नीलाद्यनेकाकारं कांतं चित्रमेकं तत्र बाह्यार्थानि
ष्टौ तद्ग्राहकस्य हेतोः कस्यचिदप्यभावात्॥ न चाकारविशिष्टं ज्ञानमेव तद्ग्राहकस्य हेतुस्तस्य स्वाकारानुभवमात्रेणैव चरितार्थत्वात्॥ तदु
क्तं श्लोकः॥ धियो नीलादिरूपत्वे बाह्योर्थः किंनिबंधनः॥ धियोऽनीलादिरूपत्वे बाह्योर्थः किंनिबंधनः॥ एतेन किंच प्रमेयात्पूर्वकालभावि ज्ञा
नं ग्राहकं स्यादुत्तरकालभावि वा॥ प्रथमपक्षे कथमसतीन्द्रियार्थसंनिकर्षप्रभवत्वं प्रमेयमंतरेणैवोत्पद्यमानत्वात्तत्प्रमेयमंतरेणैवोत्प
त्तेन तदिन्द्रियार्थसंनिकर्षजं यथा खपुष्पविज्ञानं प्रमेयमंतरेणैवोत्पत्तेन च प्रमेयात्पूर्वकालभाविनो ग्राहकत्वेनाभिमतं ज्ञानमिति। द्वि
तीयपक्षे तु प्रमाणात्पूर्वकालवर्तित्वं प्रमेयस्य कुतश्चित्प्रतिपन्नं न वा॥ यदि न प्रतिपन्नं सद्व्यवहारविषयो यत्कुतश्चिन्न प्रतिपन्नं न तत्सद्व्यवहारवि
षयो यथा गगनेंदीवरं॥ कुतश्चिदप्रतिपन्नं च प्रमाणात्पूर्वकालवर्तित्वं प्रमेयस्येति॥ अथ प्रतिपन्नं किं स्वतः परतो वा यदि स्वतः कथमस्य ज्ञाना
द्भेदस्तस्यैव स्वतोऽवभासनलक्षणत्वात् स्वतः प्रसिद्धं न तद्ज्ञानाद्भिद्यते॥ यथा ज्ञानस्वरूपं स्वतः प्रसिद्धं च ज्ञानात्पूर्वकालवर्त्तमानं प्रमेयत्वेनाभिमतं
वस्त्विति॥ अथ परतस्तत्प्रमाणाद्व्यतिरिक्तस्य प्रमेयग्राहकस्याहेतोः परस्यासंभवात्॥ अथ प्रमाणमेव तस्य तद्वर्तित्वं प्रकाशयतीति तत्तस्य

न्या·कु·चं· स्वयं तत्काले चासतस्तत्प्रकाशकत्वायोगात्॥ यत्काले नास्ति न तत्तस्य प्रकाशकं यथास्वोत्पत्तेः प्रागूर्ध्वं च कालवर्त्ति पदार्थकाले। सन्न प्रदीपोऽ
न्यप्रकाशको नास्ति च शब्दकालविशिष्टस्य घटस्य तस्य काले ज्ञानमिति॥ समकालत्वे तु ज्ञानज्ञेययोः सव्येतरगोविषाणवत्स्यात्प्राप्यकभावा
५० भावः॥ न च ज्ञाने नीलाद्याकारानुरागः यतो नीलानुपपत्त्या तस्य रंजको बहिरर्थो प्यस्तीत्यभिधानं युक्तं॥ स्वज्ञानस्यापि तत्र स्वाने हि नरनुराग
मलीनः॥ नीहारदृशाभाविनिर्विकारतुषारादिस्वस्य रंजको बहिरर्थोस्ति॥ स्वप्रज्ञेन रजन्यनानाभविशेषात्॥ अतो बहिरर्थाभिप्रेषणास्तत्वा प्रसंगात्
प्रेतो विचित्राकारस्तुगणानुरोतो यथा नोत्पद्यते॥ तथान्यत्रापि नन्वेकत्वस्य कस्याद्वैकं विचित्राकारस्य तद्याज्ञानिभासमानाकाराः कथमेकत्वं
युक्तमित्यप्यचोद्यं मन्त्राविवेचनत्वं तस्यास्तद्विरोधात्। उक्तं च लोके॥ नीलादिश्चित्रविज्ञाने ज्ञानोपाधिरनन्यभाक्॥ अशक्यदर्शनं तं
हि पतत्यर्थे विवेचनं॥१॥ चित्रप्रतिभासाप्येकैव बुद्धिर्बाह्यचित्रविलक्षणत्वात्। शक्यविवेचनं हि बाह्यं चित्रमशक्यविवेचनास्तु बुद्धेर्नीला
द्याकारा इति॥ ननु विचित्रप्राप्तेश्चित्ररूपताप्रतीयते तस्याः कुतो ज्ञानधर्मतेति चेत्॥ अर्थधर्मत्वानुपपत्तेस्तथा हि चित्रपटादिकमेक
मनयविरूपं निरंशं वस्तुस्यात्तद्विपरीतं वा॥ प्रथमपक्षे नीलभागे गृह्यमाणे पीतादिभागानामग्रहणं स्यान्नेवांनते भेदप्रसंगात्॥ यस्मि
न् गृह्यमाणे यन्न गृह्यते न तत्ततो भिन्नं यथा तस्य गृह्यमाणेविधाय गृह्यमाणे नीलभागे न गृह्यते च पीतभागादिकमिति॥ तथा चावयविनो
प्येकरूपतानुपपत्तिर्विरुद्धधर्माध्यासात्। यस्य विरुद्धधर्माध्यासो न तस्यैकरूपता॥ यथा जलानलादेः ग्रहणाग्रहणलक्षणविरुद्धधर्माध्या
सश्चावयविन्यशिते नीलभागस्य पीतादिभागात्मकत्वाद्धा॥ पीताद्यग्रहे तस्याप्यग्रहणप्रसंगात्॥ पीताद्यात्मकं तस्याग्रहेऽपि न गृह्यते॥ य
थापीतादिरूपे हेन न तत्स्वरूपं तत्स्वरूपं पीताद्यात्मकं च नीलमिति॥ तद्विपरीतत्वे तु चित्रपट्यादेः सिद्धः स्वयमेव चित्रतापायो विभिन्नावयव ५०
नि नीलपीतादिवत्॥ तन्नार्थधर्मश्चित्रता किं तु ज्ञानधर्मः॥ स्वकारणकलापाद्धि ज्ञानमुपजायमानमनेकाकारखचितमेवोपजायते नु
भूयते चातस्तथाभूतं ज्ञानमेवैकं तत्त्वमिति चित्राद्वैतसिद्धिः॥ अथाचेतनस्य सुखादिर्ज्ञानस्वरूपतानिरहात्कथं चित्रप्रतिभासं ज्ञानमेवैकं
तत्त्वं स्यादन्यश्च चित्राद्वैतं सिद्धेदित्युच्यते॥ तदप्युक्तिमात्रं यतः स्वरूपेणापि ज्ञानाभिन्नहेतुजन्यत्वात् ज्ञानात्मकत्वोपपत्तेस्तथा हि॥ ज्ञानात्म

जाः सुखादयो ज्ञानाभिन्नहेतुजत्वाद्ज्ञानवत् ॥ तदुक्तं ॥ श्लोकः ॥ तदतद्रूपिणो भावास्तदतद्रूपहेतुजाः ॥ तत्सुखादि किमज्ञानं विज्ञाना-
भिन्नहेतुजं ॥ इति ॥ अत्र नैतिविशेषो वक्तव्यः ॥ तथा चोक्तं ॥ साकारं निराकारं वा ज्ञानं बाह्यार्थसद्भावे प्रमाणं स्यादित्यादि ॥ न तावन्निराकारमेव
ज्ञानं तत्सद्भावे प्रमाणं साकारपक्षस्य निराकरिष्यमाणत्वात् ॥ नच निराकारस्येव स्वरूपसर्वत्राविशेषान्नियतकर्मव्यवस्थाहेतुत्वाभावात्प्रत्या
सत्तौ निराकारत्वेपि तद्धेतुत्वस्य समर्थयिष्यमाणत्वात् ॥ यदप्युक्तं ॥ प्रमेयान्तर्बहिःकालभाविषु मानानामित्यादि तदप्यसमीक्षिताभिधानं प्रका
शकस्य प्रकाश्यपरतन्त्रस्वभावत्वनियमाभावात् ॥ तथाहि ॥ कश्चित्पदार्थो विद्यमानः पश्चाद्भाविनो प्रकाशको भवति ॥ यथादित्यः समुत्पद्यमानानां क
श्चित्पूर्वकस्तां प्रकाश्यमानानां पश्चाद्भाविनः प्रकाशको यथा दीपो पवरकान्तर्गतघटादीनां कश्चित्तु सहभाविनां प्रकाशको यथा कृतकत्वादिर
नित्यत्वादीनां ॥ अतः प्रमाणं सर्वोपरसहभावित्वनियमनिरपेक्षं वस्तु प्रकाशयति ॥ प्रकाशकत्वात्प्रदीपादिवत् ॥ यच्चान्यदुक्तं ॥ स्वप्रकाशस्य
र्थोपलब्धिरर्थाभावेपि नीलाद्यनुरणनः ग्रहीतमदस्यादि ॥ तदपि किमाकारस्य ज्ञानेऽन्तरमेव प्राधान्यमनिच्छानव सेवा स्यार्थे नियमस्य प्रतापपि प्र
माणत्वात् ॥ यदप्युक्तं ॥ चित्राकारतया प्रतिभासमानस्यापि ज्ञानस्याकारविवेचनत्वादेकत्वमिति ॥ तच्च किमिदं प्रत्यक्षविवेचनत्वं नाम ज्ञानाद्भिन्नत्वं
सहोपलम्भात् नीलादीनां ज्ञानान्तरपरिहारेणग्रहणे नैवानुभवो भेदेनापि विवेचनात्मत्वमात्रं वा ॥ प्रथमपक्षे साध्यसमो हेतुः यदुक्तं भवति ॥ ज्ञानाद
भिन्ना नीलादयस्तेभ्यो भिन्नत्वान्तरेवोक्तं ॥ अथ न्यत्राकारविवेचनत्वादि सिद्धिर्नैव पक्षेऽन्त्ये नैकान्तिकत्वं संचरणचारस्य जगतः सुगतज्ञानेन सहोपलम्भ
सद्भावान्तरपरिहारेणानङ्गेनैव ग्राह्यत्वेन न सहैकत्वाभावादेकत्वाभावादेकत्वे वा सुगतस्य संसारित्वं संसारिणां वा सुगतत्वं स्यात् ॥
संसारान्तररूपतानेकस्य ग्राह्यत्वादं समर्थयति ॥ ज्ञानान्तरपरिहारेणानङ्गेनैवानुभवश्चासिद्धो नीलादीनां ज्ञानान्तरेणाप्यनुभवात् ॥ ज्ञानरूपत्वा-
त्तेषां तत्सिद्धो चान्योन्याश्रयः ज्ञानरूपत्वसिद्धौ हि तेषां ज्ञानान्तरपरिहारेणानङ्गेनैवानुभवसिद्धिस्तत्सिद्धौ च ज्ञानरूपत्वसिद्धिरिति ॥ भेदेन
विवेचनाभावमात्रमप्यसिद्धं ॥ बहिरन्तर्देशसंबंधित्वेन नीलतद्ज्ञानयोर्विवेचनप्रसिद्धेः ॥ नेत्रर्यं विवेच्यमानयोरप्यनयोर्विवेचनापन्होयुक्तः

द्रीपस्य च प्रसंगतः सकलशून्यतानुषंगात्॥ किंचानन्तत्वस्यानेकाकारज्ञानस्याप्यत्राकारविवेचनं प्रत्येकमनुपलभ्यमानत्वादेकत्वाविरोधे बहिर्लक्षण
स्याप्यवयव्यादेरत एवैकत्वाविरोधोऽनुविशेषाभावात्। तद्ज्ञानस्वरूपविवेचनमन्यत्राप्यविशिष्टम्॥ चित्रज्ञानेऽपि नीलाद्याकाराणामन्योन्यदेश
परिहारेणावस्थितत्वाविशेषात्॥ सकृदेवावलोकनेनैकाकारस्य वा दोषाकाराणामनुप्रवेशो ज्ञानस्य संगतमित्यपि तदुत्तरभावाभावाच्चित्रज्ञानविरुद्धत्वयस्यैकेरज्ञानत
स्याकारवैलक्षण्यं चैकनीलाद्याकारस्य स्वकदेशाच्चित्रज्ञाने नीलाद्याकाराः इति॥ तथा यत्नाकारवैलक्षण्ये तत्तच्चित्ररूपतायां चैकनीलाद्यनेका
कारवैलक्षण्येऽप्येकदेशज्ञानपाभिमतानां नीलाद्याकाराणामिति॥ किंचैतेऽप्याकाराश्चित्रज्ञानेन संबद्धाः संबंधं न स्युः तदपदेशाहेतुतो संबद्धाश्चेत् ज्ञानाव
बद्धाश्चेति प्रसंगात्। अथ संबद्धाः किं तादात्म्येन तदुत्पत्त्या वा न तावत्तदुत्पत्त्या समसमयवर्तिनां नाविनपनसुषमववनेदसंभवात्॥ नापि तादात्म्येन
ज्ञानस्यानेकाकारव्यतिरिच्यमानत्वेनैकरूपत्वाभावप्रसंगात्॥ यदनेकाकारादव्यतिरिच्यमानस्वरूपं तदनेकं यथानेकाकारस्वरूपमानेकाका
राव्यतिरिच्यमानस्वरूपं च चित्रज्ञानस्वरूपमिति॥ अनेकाकाराणां चैकस्माद्ज्ञानस्वरूपादव्यतिरेकेणैकत्वानुपपत्तिः॥ यदेकस्मादव्यतिरिक्तं तत
देकं यथा तत्स्वज्ञानस्वरूपमेकस्माद्ज्ञानस्वरूपादव्यतिरिक्ताश्चानेकत्वाभिमता नीलादयश्चाकारा इति॥ यदप्युक्तं॥ ग्रहणाग्रहणलक्षणविरुद्धध
र्माध्यासान्नापि धर्म्मिभिद्यतेऽनेनेति। तदप्यनुदरं भ स्वच्च विरोधेऽनुमानाप्रवृत्तेः॥ बाह्यार्थेऽपि धर्म्मितयास्त्वयाभिनाध्यरूपप्रत्यये चित्राकारः प्रतिभासते॥ न
तस्य ज्ञानधर्म्मतायुक्तातिप्रसंगात्॥ यो यद्धर्म्मितया प्रतीयते॥ न सन्ततोऽन्यधर्म्मो यथाग्निधर्म्मतया प्रतीयमानाभास्वरोष्णतानन्तलधर्म्मो बाह्या
र्थधर्म्मतया प्रतीयते च विज्ञानेनेति॥ कथं तद्धर्म्मत्वे ग्रहणाग्रहणयोरुपपत्तिरिति चेत्॥ चित्रप्रतिपत्तौरेकैकवर्णोपनिर्वर्णनेऽनिबंधनत्वात्प्रतिपत्तेर्विनी
लभागे पीतादिभागाप्रतिपत्तेः। चित्रताप्रतिपत्तिरुपपन्नैवाविरोधश्च ज्ञानधर्म्मत्वेऽपि चित्रतायास्तुल्यपर्यनुयोगत्वात्॥ ज्ञानमेकमनंशमनेकाकारं हि प ५९
रीतं च॥ तत्रावयवाद्यविकल्पोऽप्युक्तः परस्परव्यावृत्तत्वेनाकाराणामेकत्वानंशोज्ञानेऽनुपपत्तेः॥ येषां परस्परव्यावृत्तित्वं तेषामेकत्वानंशत्वं यथा ग
वाश्वादीनां परस्परव्यावृत्तिश्च नीलाद्याकाराणामिति॥ नैवैकस्यानंशस्यास्य परस्परविरुद्धाकारतादात्म्यं युक्तं॥ तावद्ज्ञानस्यापि भेदप्रसंगात् प्रत्ये

गोऽप्येकमनंतं ज्ञानं न स्वपरस्परविरुद्धाकारैः सह तादात्म्यं ॥ यदैव तस्यैव तस्यासौ सोऽन्यत्वमुपपत्तिमाप्नोति स्थाने विनाशाभ्यां वा एकमनंतं ज्ञानं तदनंतं ज्ञानं भवद्भि
र्भिन्नमिति ॥ तत्तादात्म्ये चाकाराणां भेदवानीपि दुर्लभेति कथं न विद्वत्ता ॥ अथ नीलाद्याकारवत् ज्ञानमप्येकमिष्यते ॥ तदापि किं कथंचित्सर्वथा वा
दि सर्वथा ॥ तदा तद्वज्ज्ञानानां परस्परमत्यंतं भेदाच्च न प्रतिपत्तिः स्वप्रेऽपि न प्राप्नोति ॥ येषां परस्परमत्यंतं न भेदस्तेषां चित्रप्रतिपत्तिर्यथा संतानांतरज्ञाना
नां परस्परमत्यंतं भेदश्चाकारवत् ज्ञानानामिति ॥ कथंचिद्भेदेऽपि ज्ञानवद्बहिरर्थस्यापि साकारैर्विचित्रैः कथंचित्तादात्म्यमनुभवतः प्रसक्तो विभ्रमा
रोपवती पताकेव सिद्धस्व भावत्वेऽप्यत्र ॥ किंतु एवमेव प्रभाभिनिवेशे नाक्षेपसमाधानयोर्बहिरंतश्चोभयत्राविचलतयां समानत्वात् ॥ परमार्थहितं ज्ञानात्म
काः सुखादयो ज्ञानात्मकाः सुखादयो ज्ञानाभिन्नहेतुजत्वादित्यादि ॥ तत्र किं सर्वथा ज्ञानाभिन्नहेतुजत्वं हेतुरभिप्रेतं कथंचिद्वा ॥ प्रथमपक्षे सि
द्धो हेतुः सुखादीनां सद्वेद्योदयः स्वनिमित्तमनिमित्तं प्रत्ययत्वात् ॥ ज्ञानस्य च ज्ञानावरणक्षयोपशमेंद्रियादिकारणकलापप्रभवत्वाद्विभिन्न
स्वरूपत्वाच्चामीषां सर्वथाभिन्नहेतुजत्वमनुपपन्नं ॥ येषां विभिन्नस्वरूपत्वं न तेषां सर्वथाभिन्नहेतुजत्वं ॥ यथा जलानलादीनां विभिन्नस्वरूप
त्वं च ज्ञानसुखादीनामिति ॥ न चेदमसिद्धं सुखादेराह्लादनाद्याकारत्वात् ॥ ज्ञानस्य च प्रमेयानुभवस्वभावत्वात् ॥ उक्तं च ॥ श्लोक ॥ सुखमाह्लादनाका
रं विज्ञानं मेयबोधनं ॥ शक्तिः क्रियानुमेया स्याद्यूनः कांतासमागमे ॥ १ ॥ इति विभिन्नस्वरूपाणामप्यभिन्नोपादानत्वे सर्वं सर्वस्योपादानं स्यात् ॥ अ
थ कथंचिदिह ज्ञानाभिन्नहेतुजत्वं विवक्षितं तद्रूपालोकादिना नैकांतिकं ॥ यथैव हि नेत्रविज्ञानस्योत्पत्तिस्तथा रूपालोकादिकारणं न तस्यापि ॥ किंचोपा
यथैव हि यथार्थरूपसंनिकृष्टः प्रामाण्यरूपा चक्षुरादिकारणं विद्यमाना ज्ञाने भवंती स्वतोभिधीयते ॥ न यथा यथार्थप्रकाशन शक्तिरप्य-
प्रामाण्यरूपाद्विधीयतामविशेषात् ॥ न हि सापि न इतत्र विद्यते ॥ तथा च चक्षुरादिविधस्यात्र संभवो दुष्टकारणादित्यस्य विशेषः किंचि
सनैतत्रो स्वकार्यपेक्षस्तु तः प्रमाणानां प्रामाण्यं स्यात् । न चान्ततः वस्तुस्तेनैतथा हि प्रामाण्यं प्रमाणोत्पादककारणकलापातिरिक्तकारकोत्प
द्यत इति तथात्वनिश्चयेन तथात्वात् इति यदित्थं तत्तथा यथा बाधकानुवृत्तावपि तद्धर्मानन्तर्भावस्तदतिरिक्तः संयोगादिरूपा तदेव तत्स्यात
येति ॥ न चायमसिद्धो हेतुर्मिथ्याज्ञाने प्रामाण्यप्रयत्नबोधसद्भावेपि प्रामाण्यानुत्पत्तेः नापि विरुद्धो विपक्षाद्व्यावृत्तेः ॥ नाप्यनैकान्तिको विपक्ष
व्यावृत्तेः ॥ नाप्यनैकान्तिको विपक्षाद्व्यावृत्तत्वादेव नापि कालात्ययापदिष्टो विपरीतार्थोपस्थापकस्याध्यक्षादेरभावात् किंचायं स्वत्रासा-
त्मीयज्ञातिपरेषु मध्ये चकस्मिन्नर्थे च वर्तन्ते नान्यत्र वाह ॥ तत्र जाति भवनयोरत्रासंभवादात्मा परस्मै परित्यागशक्तिर्न । तत्राप्यसिद्धः कारणमंत
रेणात्मैव प्रामाण्यस्य त्पद्यते इत्यर्थः ॥ प्रागात्मलाभासत्कार्यवादात्मैवाप्ययाः सामर्थ्यरोवादयप्रमेयनिर्हेतुकत्वात् स्वदेशकालनियमायोगात्
प्रकाशविशेषाभावप्रकाशविशेष संवैत्र सर्वदा तत्प्रसंगः ॥ द्वितीयविकल्पेपि स्वतस्तत्र प्रामाण्यविशेषणात्वेन प्रामाण्यं प्रामाण्यादात्मलाभमनुभवतीत्यायातं तत्र चापुक्त्वेन ॥ ६५
कस्यचनस्तुनः स्वात्मापेक्षयोः साध्यसाधकत्वधर्मप्रतीतिरनुपपत्तेश्च ॥ तथा हि ॥ प्रामाण्यं स्वात्मनन्यत एव तोत्पद्यते का पिनाश्च प्रामाण्यपदव-
दासिद्धः ॥ एतेन द्वितीयोत्र विकल्पोपि प्रत्याख्यातः ॥ आत्मीयाव सामग्री विज्ञानमात्रोत्पादिका विशेषाविशेषावेत्ति साधनं ॥ स्वत-
मर्थाविशेषान्निखिलार्थानामुत्पत्यभ्युपगमानयावाच्याप्रामाण्यस्याखिलार्थानां च स्वतः एव सिद्धिः स्यात् तत्प्रविशिष्टं च तत्सामग्र्याः प्रामा

यथार्थत्वादिकं विज्ञानमात्रोऽसाविकल्पीभूतश्च ह्यमानं च गम्यं प्रमाणाप्रमाणसाधारणव्यक्तिव्यतिरिक्तस्य ज्ञानमात्रस्य व्यक्तिं विकल्पात् कदाचिदप्यनुपलंभात् ह्युपरि
अतिरिक्तस्य ह्यसमानत्वात्॥ ज्ञानमात्रस्य च द्रष्टुमात्रत्वात् सामान्यरूपत्वात्तस्य च भवन्मतेऽकुतश्चिदनुत्पत्तेः कथं तदुत्पादिका काचित्सामग्री
स्यात्॥ विज्ञानमात्रोत्पादसामग्रीतः प्रामाण्योत्पत्त्यभ्युपगमे च संशयादावपि तदुत्पत्तिप्रसंगस्तस्यापि तत्राविशेषात्। अथ संशयादे
र्दुष्टविज्ञानसामग्रीजातत्वात् कथं तदुत्पत्तिः एवं विज्ञानत्वात् प्रत्युत्पत्तिर्नस्यात् तत्सामग्र्याम् अदुष्टत्वेनापरिदृष्टत्वात्॥ ननु परिदृष्टसाम
ग्रीपरमधिककारकमस्तादिदोषानुप्रवेशस्तर्ह्यधिककारणानुप्रवेशात् अन्यसमप्रामाण्यमप्युपजायतां॥ प्रामाण्यं तु विज्ञानसामग्री
प्रभवं विज्ञानवत्प्रादुर्भवद्दुर्निवारं। अथ दोषाभावविशिष्टायाः सामग्र्याः प्रामाण्यमुत्पद्यते॥ नान्यस्याः सिद्धं तर्हि परतः प्रामाण्यं विज्ञा
नकारणातिरिक्तदोषाभावाख्यकारणानिरिक्तं न तुल्यसिद्धेः॥ न हि दोषाभावो विज्ञानकारणान्तर्गतं येन तेनापि मिथ्याज्ञाने विज्ञानोत्पत्तिप्रती
तेः॥ प्रामाण्योत्पत्तावनुभवस्तेषां तत्कारणम् अन्वयव्यतिरेकोपपत्तेः॥ अन्वयव्यतिरेकाभ्यामवधृतसामर्थ्यस्याप्यप्रामाण्यजनकत्वे दोषाणा
मप्यप्रामाण्यजनकत्वाभावः स्यात्। किं च दोषैश्चक्षुरादीनां किंचिदपनीतं येन तत्संनिधाने प्रामाण्यं नोत्पादयति, तदुत्पादिका शक्तिश्चेदपनीय
ते॥ ननु पूर्वविज्ञानमात्रोत्पादनेन या शक्तिः सैव प्रामाण्योत्पादनेऽप्यस्मावतौ सेव चेत्त दोषैर्न हि तदपगमे कथं तेषां तन्मात्रोत्पादनेऽपि व्यापारः स्यादित्य
प्रयोगात् कथं न परतः प्रामाण्यं तन्नोत्पत्तौ स्वतः प्रामाण्यं घटते॥ नापि ज्ञप्तौ प्रामाण्यनिश्चयस्य कदाचित्कत्वान्निर्निमित्तत्वानुपपत्तेः॥ न
ह्यहि॥ यत्कादाचित्कं तन्न निर्निमित्तं यथा घटादिः कादाचित्कश्च प्रामाण्यनिश्चय इति॥ निमित्तं च स्वेच्छाक्षरूपमन्यद्वा स्यात्। न तावत्स्वरूपम
स्वसंविदितत्वोपगमात्॥ नाप्यन्यत् स्वतः प्रामाण्यव्याघातप्रसंगात्॥ यत्पुनरन्यन्निमित्तं तत्किं प्रत्यक्षमनुमानमन्यद्वा स्यात्॥ तत्रोधिकारणत्वस्य सं
वेद्यत्वेऽपींद्रियसंवेदविषये व्यापारानैवेंद्रियाणामपि संवेदनेऽसहसंबंधोऽस्ति॥ येनाक्ष यथार्थपरिच्छेदस्वभावप्रामाण्यं प्रत्यक्षतः प्रतीयते॥
प्रतिनियतरूपादेनर्दानवोधेनेयासंबंधात्॥ नापि मनो व्यापारप्रभवप्रमेयत्वादिगम्यं तथाविधानुभवाभावात्॥ नाप्यनुमानगम्यं लिंगाभाव

न्या·कु·चं यादृशं शाक्यं लिंगमिति चेत्किं यथार्थविशेषणं निर्विशेषणं वा न तावद्यथार्थविशेषणं प्रामाण्यनिश्चयात्प्राग्यथार्थस्य तस्य यथार्थत्वविशेषणा-
६५ सिद्धेः॥ तन्निश्चयात्तत्सिद्धौ चेतरेतराश्रयः॥ निर्विशेषणस्य चास्य प्रामाण्यनिश्चायकत्वे मिथ्याज्ञानेऽपि तन्निश्चायकत्वप्रसंगो विशेषात्॥ नन्वन-
भ्यासदशायामपि स्वतः प्रामाण्यं प्रयुक्तं॥ नापि स्वकार्यपर्यालोचनया कार्यं पुरुषप्रवृत्तिरर्थपरिच्छेदो वा॥ न च पुरुषप्रवृत्तिहेतुत्वं प्रामाण्यस्य निश्चितत्वेनैव प्रयुक्तं
निवृत्तिहेतुत्ववदप्रामाण्यस्य न त्वर्थित्वमात्रेण प्रेक्षापूर्वकारिणः प्रवर्तन्ते रसायनादावपि योगिभ्यो यथेजरामृत्युहरणादिसामर्थ्यापेतेन तथा-
त्वेनानिश्चितेपि कदाचिदसमर्थितायां तेषां प्रवृत्त्यभावात्॥ निश्चयाभावे च हि सर्वे धर्म्माः प्रवृत्तिहेतवः॥ नाप्यर्थपरिच्छेदात्मके स्वव्यापारे प्रामा-
ण्यं स्वग्रहणानपेक्षं॥ यतो स्वार्थपरिच्छेदमात्रं कार्यं यथार्थपरिच्छेदो वा॥ न तावदर्थपरिच्छेदमात्रं तथा प्रामाण्येऽपि संभवात् यथार्थपरिच्छेद-
स्य तु नागृहीतप्रामाण्यात्प्रमाणात्संभवति॥ ननु प्रमाणसाधारणार्थपरिच्छेदमात्रस्यैवोत्पत्तेः॥ न च तद्ग्रहणेन तस्यापि दोषानु-
षंगोऽभ्यासावस्थायां स्वतः प्रामाण्यनिश्चयतः संवादाद्यपेक्षाभावतो नवस्था यत उक्तमन्यत्॥ न ह्यभ्यासकोटीकृते जले जलज्ञानमात्मनोऽर्थत-
थाभावपरिच्छेदस्य समर्थस्वभावतया भावितं ततो संवादादिकमपेक्षते॥ निर्णीतश्च स्वेदमित्यस्मेयप्रत्यवसायात्मनो स्वयं प्रतिप्राणिप्रसिद्धत्वात्॥ अप्रा-
माण्यवत्तु न तत्स्वभ्यस्ते विषये मरीचिकादौ जलादिप्रतिभासः स्वात्मनोऽर्थान्यथात्वपरिच्छेदसमर्थस्वभावतया निपन्नो विसंवादादिकमपेक्ष-
ते॥ तत्स्वभावत्वाच्चास्य स्वतः सर्वेषां सुप्रसिद्धत्वादित्युभयं तत्र स्वतः सिद्धमभ्युपगंतव्यं॥ अनभ्यासावस्थायां तु परतो न चैवमनवस्था न
साभ्यस्तविषयत्वेन स्वतःप्रामाण्यप्रसिद्धप्रमाणान्तरानपेक्षणात्॥ अनभ्यस्तविषये हि जलप्रतिभासे अर्थक्रियाज्ञानात् भेकदर्दुरारवोदका- ६५
हरणादिलिंगोत्थानुमानाद्वा जलाविनाभावित्वेनासकृन्निश्चयतः स्वतःसिद्धप्रामाण्यात्प्रामाण्यं निर्णीयते॥ ननु चार्थक्रियाज्ञानम-
प्यर्थाभावेपि स्वप्नावस्थायां दृश्यते अतो स्पष्टविज्ञानाद्विशेषरत्यस्य सुंदरं ज्ञानदशायामर्थज्ञानमर्थमंतरेणाप्युपलभ्यते तथार्थक्रि-
याज्ञानमपि येनास्यापि न व्यभिचारशंकया अर्थक्रियाज्ञानान्तरात्प्रामाण्यं निश्चीयेत तद्दशां चाभिन्नप्रमाणादिनाममयमसाक्षिनाप्रतन्यते॥

श्चतो न स्वप्नदर्शनोपलब्धेन जाग्रद्दशोपलब्धस्य साम्यात्तां कापि श्रेयसी॥ बहिर्विषयार्थक्रियाकारित्वस्य दशासमानां जाग्रद्दशां मन्यते॥ त
द्दृष्टांतेनैवांशेषप्रत्ययानां निरालंबनत्वानुषंगतो बहिरर्थाभावप्रसंगात् ज्ञकस्य प्रामाण्यमप्रामाण्यं वा स्यात्॥ ननु चार्थक्रियाज्ञाना
त्पूर्वं ज्ञानस्य प्रामाण्ये मणिप्रभायां मणिबुद्धेः कूटेऽपि द्रुमेन द्रुमस्य प्रामाण्यप्रसंगः॥ तन्नैवं भूतार्थक्रियाज्ञानात्पूर्वं ज्ञाने प्रामाण्य
स्यैव प्रसिद्धत्वेन संवादासंभवात्॥ कुंचिकाविवरस्थायां हि मणिप्रभायां मणिज्ञानमपवरकांतर्देशासंबद्धेतुमणार्थक्रियाज्ञानमि
निभिन्नदेशार्थग्राहकत्वेन भिन्नविषययोः कथमिवाविसंवादस्तिमिराद्याहितविभ्रमज्ञानवत्॥ कूटे च द्रुमे किं कूटज्ञानं द्रुमज्ञानं प
एकज्ञानं वा प्रमाणमापद्येत॥ न चाद्यपक्षद्वयेऽसिद्धसाधनं तृतीयपक्षस्तु युक्तस्तत्राद्यार्थक्रियासंवादसंभवात्॥ संपूर्णोऽचेतनालाभो
हितरकद्रुमस्यार्थक्रियानकर्तिपर्ये चेतनालाभस्य चोक्तं प्रामाण्यं हि बोधकत्वमित्यात्र तत्रापि किं बोधकत्वमात्रं प्रामाण्यमुतार्थबोध
कत्वं॥ न चाद्यः पक्षोऽसंभाव्यो बोधकत्वमात्रस्य क्वचिद्भ्रानेऽप्रतीतिभावात्॥ सकलज्ञानानां बहिरर्थं स्वार्थबोधकत्वे चैवाप्यवसायात्
द्वितीयपक्षेऽप्यर्थमात्रबोधकत्वं तत्स्यादवितथार्थबोधकत्वं वा तत्तावदवितथार्थबोधकत्वमस्य विशिष्टकारणकलाधीनत्वनिश्चयाद-
नात् नाप्यर्थमात्रबोधकत्वं हि चंद्रादिवेदनस्यापि प्रामाण्यप्रसंगात्तथा च न द्विचंद्रस्य द्विचंद्रादिनीरूपत्वं॥ यत्स्वतु प्रमाणभूतवेदनवेद्यं
तन्नास्त्येव॥ यथा सुखादिप्रमाणभूतवेदनवेद्यं बहिश्चंद्रादीनि प्रमाणभूतत्वं च द्विचंद्रादिवेदनस्य बोधरूपत्वेनैव प्रामाण्यमित्यभिरूप
तानां सिद्धं प्रयोगोपपत्तेर्न व्यतिरिच्यते तत्स्वरूपमात्रानुबंधि यथा सुखादिगतत्वाद्व्यतिरिच्यमानं रूपत्वं॥ तन्मात्रानुबंधेन व्य
तिरिच्येत च बोधरूपतातः प्रामाण्यमिति न युक्तानुत्पन्नबाधकस्य बोधस्य प्रमाणभूतत्वं स्वरूपमनवबाधकमुत्पद्यते॥ अत एव स्यादभि
रप्रामाण्यं परतोऽभ्युपगम्यते॥ तदप्यसुंदरं बोधकस्य किल स्वरूपसमकालभाविप्रामाण्यं तस्मिन्नपि स्थिते कुतः परतोऽप्रामाण्यस्यावकाशः॥ किं
चेदमप्रामाण्यं किं प्रामाण्यस्याभावः॥ वस्तुभूतो वा धर्मः॥ प्रथमपक्षे प्रामाण्याभावो ज्ञानत्वाभावस्यैवोक्तः स्यात्॥ ज्ञानत्वे बहिः प्रामाण्यमि

न्या·कु·च·

तिभवतांपक्षस्तथाचपरतोज्ञानस्यज्ञानत्वाभावात्तिनकिंचित्संगतं॥यद्विपादगत्वनियतंतरत्नाद्यग्रहेणान्यतोभवतीतियथापरःस्वयंप्रो

६६ ऽप्रकारःप्रमाणरूपस्थितंचज्ञानमित्तिबाधकत्वोपनादप्रमाणंयुक्तं॥किंचकारणदोषज्ञानंबाधकज्ञानंचावर्तमानंकथमतीतस्यज्ञानस्यप्रामाण्याभावमापा

दयितुंशक्नोति॥नहिस्वज्ञानकालेतदसिन्नकालेवास्वरूपेणवर्तते॥स्वस्मिन्नेवचकालेतस्यप्रामाण्यंनाशंपादनेनिष्प्रसंगेऽपरज्ञानस्यापिपरतोने

प्रमाणप्रसंगात्॥नत्वन्यदन्यकालप्रमाणत्वेबाधकेनविशिष्टंवस्तुभूतोधर्म्मीवाप्रामाण्यंस्वतःकोसाविति संशयविपर्ययावितिचेन्ननुतयोः

ज्ञानात्मकत्वात्प्रमाणत्वानुपपत्तेः नचाहि॥संशयविपर्ययोरप्रमाणंज्ञानत्वान्प्रमाणत्वाभिमतज्ञानवदिति॥किंचसर्वत्रज्ञानेऽस्मिन्केवा

माण्येसतिकुतःसंशयविपर्ययलक्षणाधर्म्मसंभवः॥सहितज्ञानस्यस्वतःसमानतोविषयात्स्वकारिभ्यःसमानंजातंतरप्रभावादिंद्रियादेरणारसं

वदाद्वा॥प्रथमपक्षेसर्वदाज्ञानस्यनथात्वप्रसंगः॥द्वितीयोयद्युरूपेणस्वाभवतितदातस्यनकदाचिदपिनिवर्तेत॥यथानीलज्ञानंतथाचज्ञानस्यसंश

यादिरूपत्वेति॥द्वितीयपक्षेपिविषयमात्रस्यसंशयादिरूपेणान्योन्यापारेविशिष्टस्यवा॥विषयमात्रस्यचेत्सर्वज्ञानंसंशयादिरूपंस्यात्॥विशि

ष्टस्यचेत्॥ननुकिमिदंविषयस्यविशिष्टत्वमिदंवाच्यंतत्वं॥साधर्म्योपहनन्त्वंवा॥विवेचितत्वेविषयमात्रमेवाणीकृतंस्यात्नचैषोक्तोदोषः॥अथ

साधर्म्योपहतोविषयोविरुद्धविशेषस्मरणद्वारेणविपर्ययज्ञानंजनयत्युभयविशेषस्मरणद्वारेणाहोस्वित्संशयज्ञानंतदस्यचाकस्मिकत्वेन

विषयस्यावयंकेनचितसादृश्यसंभवात्स्वतःसर्वदैवतयाविपरीतज्ञानोत्पत्तिःस्यात्॥गृहीतंसादृश्यंनचाकरोतीतिचेन्नसंनिहितेपिकुर्यादृशेषाग्रह

णमपितत्कारणसंनिहितेचतदभावान्नकरोतीतिचेत्॥ननुसतोविशेषस्याग्रहणमपि कुतोऽदृष्टेनमनन्यादृशस्याविकल्पसामर्थ्यंतर — ६६

ज्ञापकस्वरूपंति॥अथचेद्रियादिसामर्थ्येनान्यथाभूतानाप्यसंयुक्तेन्द्रियविशेषाग्रहणं॥किंचविशेषाग्रहणत्वप्रामाण्योत्पादकेष्यदृष्ट

स्यव्यापारःकिंनस्यान्ततोप्रामाण्यवत्प्रामाण्यमपिपरतोनस्यात्॥एतेनतृतीयपक्षोपिप्रत्याख्यातः॥सहकारिभिरधर्म्मादिभिरप्रामाण्यंसं

शयादिरूपमापाद्यतेधर्म्मादिभिस्तुप्रामाण्यमपितथाथनिश्चयस्वरूपमिति॥नापिप्रमाज्ञानत्वतद्रूपमापद्यतेचनीतिविशेषात्॥नहिकस्यचित्स्व

१ [illegible] एव न संयुज्यते [illegible] [illegible] युज्यते तेन

मानुरीत्यशीषनीतिः संवादपवादैर्नभूयासस्मिनित्थं धूपगमे चानास्यज्ञानस्याप्रामाण्यहेतुत्वं नचाहि संवादो मेऽस्यादिति ज्ञानं नाप्रामाण्य
कारणंज्ञानत्वाद्दूरज्ञानीयमित्यादिज्ञानवत्॥ अथ यज्ञानानंतरभाविवादविभेदं तोविशेषः तत्रापि किं स्वकीयानंतरकी परायानंतरं तत्र भावार
साधाविभेदे यदि स्वकीयानंतरास्वकाले सतोज्ञानस्यार्थिनोऽसौ विशेषो विधीयते। सतो वार्तमानस्य तो ज्ञानांतरकालेऽनाकलनात् स्वासंभवात्
न्यथा युगपद्ज्ञानद्वयाभ्युपगमविरोधः स्वकाले सतस्त्वकथं तेनासौ विधातुं शक्योऽभिन्नकालत्वाद्युक्तो भिन्नकालं अनेनत्वस्यावेवादि
धातुं शक्यो यथा भूतभविष्यत्कालभाविजयापुष्ये न वर्तमानकालीनः स्फटिकोभिन्नकालेऽत्वं ज्ञानांतरमिति। नापि परकीयानंतरः संवादाभ्यु
त्वनिरूपापरीत्यभावात्॥ ननुचैतस्य संवादमनुत्पाद्य भावीति। प्रमाणत्वं नरसांप्रतीनीतिरक्तं॥ ननु सार्वत्रिकसंवादप्रमाणत्वं नरस्तानस्यापि
यत्नसद्भावात्फलनुपलंभकारणं ननु चनियतसद्भावं यथान्यबीजस्थानंबीजमंकुरस्यनच प्रमाणत्वं नरज्ञानं नियतसद्भावं संवादादिकोयैनिवं
द्विपादेश्च नहेतुत्वेन दृष्टं च ज्ञानेन संवादादेरूपान्यत्तिः प्रसंगः॥ अथाधारस्य संबंधात्तत्र न तु त्वन्निर्वंधसंबंधः प्रमाणतः प्रतिपन्नो न वा प्रतिपन्न
श्चेत्कथं संवादविपर्यासकारणमाधारः॥ नोचेत्कथमितिरेव सामान्यकल्पसंगतम्॥ अप्रतिपन्नश्चेत्कथं न तेनानाप्ते संवादादिरूपेण निर्णीतप
त्तिः॥ किंच संवादादिरूपतया प्रामाण्यबोधस्वरूपादीनामिक मन्नतिरिक्तं वा॥ नातिरिक्तंश्चेत् मनतिरिक्तकारणापेक्षातिरेकेनयथार्थनिश्चय
स्वरूपप्रामाण्यस्याप्यनतिरेकप्रसिद्धेः सिद्धमुभयस्यापि ज्ञानकारणानतिरिक्तं कारणजन्यत्वमिति प्रसंगेन ननु परतोलब्धप्रमाणभाव
स्याबाधकत्वे रोहादिकं फलमिति पुनः प्रयुक्तं॥ छ॥ सनदसहमाणस्पैशोगतस्य मतं नानावन्निरणकुर्वन्नाह॥ पारमार्थिकसंवित्तेर्वेद्यवेदकाकारयोः प्र
माणफलात्वस्थापांसरणाभंगादेरपि प्रत्यक्षतत्त्वं प्रमाणं जैनैः॥ नैपरमार्थेत्यादि परमार्थेनाकल्पितरूपेण पारमार्थिकी निरंशा पाषाणसंवित्तिः॥ तस्या अपि वेद्या लि
कारेण ग्राह्यनीलादेराकारस्तत्र ग्राह्यकारो ग्राहकाकारस्तयोर्यथा संख्यं फलव्यवस्थायां तदाकारस्य प्रमाणत्व व्यवस्थापना प्रत्यक्ष प्रमाणमिति
त्यभिधानात्॥ वेद्यकाकारस्य च फलव्यवस्थापितमानं च फलमिति प्रमाणं॥ तस्या अपि विकल्पसमारोपाद्यासरणभंगादेरपि लक्षणाभंगादिर्व्यसिद्धिरादे

न्या॰ कु॰ चं॰ पंचप्रकारवाचीतेन तत्राभंगप्रकारः सर्वोनिरंशत्वादिग्रासभावोलिंगाद्भिन्नो रूपेन ॥ तस्यापि न केवलं सत्वादिहेतोः अस्तत्वं प्रसक्तावपर्यवस

६३ सज्येत ॥ ननु किंचरलीनग्रहणात्रोच्चनिर्णीतानुमानं प्रमाणं न स्यान्न रूपोः समारोपव्यवच्छेदविशेषात् ॥ ननु तस्मान्नतत्वसत्वालिंगदूषणं स्यादि

निवेदयाह ॥ गृहीतेत्यादि ॥ गृहीतस्यदर्शनविपर्ययीकृतस्य ग्रहणात् न तु अनुमानं प्रमाणं न स्यात् ॥ संवलेरपि प्रमाणान्तरत्वं स्यात् तर्हि सविकल्पनिर्वि

कल्पकत्वात्तस्य समारोपव्यवच्छेदाकांक्षिणः प्रामाण्यं न स्यात् ॥ सं तर्हि व स्यस तत्प्रभावविकल्पवत् ॥ ननु गृहीतेपि क्षणभंगादौ विपरीतारोप

व्यवच्छेदकत्वात् अनुमानप्रमाणमिति चेत्तत्राह नहीत्यादि तुषोः प्रमाणाप्रमाणतयांगीकृतयोरनयोः संवल्यनुमानयोर्मध्ये एक

त्वंस्यत्वादनुमानस्यापि नु संवलेरपि तात्पर्यो प्रमाणान्तरत्वं स्यात् कुत इत्यादि निचेत्तत्राह ॥ समारोपव्यवच्छेदापेक्षापात् ॥ पर्यवस्यनुमानात् ॥

प्रमाणविकल्पेनिश्चयेनिश्चयोरोपमनसोर्बाध्यबाधकभावादृष्टौ समारोपो न जायते न तदननुव्यवच्छेदकं न तु संवल्यां नीलादिरूपे सोनज्ञा, नीलादेर्निश्चयो

पतः इति तस्यापि तद्व्यवच्छेदिकत्वेनुभवस्य केनेत्याशंकाप्रतिनिषेधयन्नाह ॥ सर्वस्येवेत्यादि सर्वस्य चतुर्विधस्यापि प्रत्यक्षस्य प्रामाण्यं न स्यात् ॥ नहि किंचिन्नी

लादेरारोपस्य स्वादेः प्रामाण्यं स्यादिति चकारार्थः कस्यनिर्विकल्पज्ञानस्य कथं भूतस्य समारोपव्यवच्छेदकांक्षिणः समारोपव्यवच्छेदे तु

त्वात्तस्य पादानुमानं नीलादेश्च संवृत्तिलक्षणवच्छेदरूपमाकांक्षन्नरत्येव क्षीणस्य पक्षे यथाप्रत्यासत्तिं भंगादेरनरोपस्य निर्विकल्पकप्र

मत्वस्य न प्रामाण्यं न तु पत्ने सवितन प्रामाण्याप्त्यन्यथानीलादावपि संवृतेः सप्रामाण्यापाता ॥ सर्वकत्वानिकयाप्रमाणांतरत्वं न पात्तुनरिष्ट

प्रत्यक्षं, स्यापि प्रसत्तप्रमाणास्याभावं दर्शयति ॥ ननु प्रसर्वतकं त्वर्न नान्यदति प्रसंगात् ॥ प्रवर्तकं चाभ्यासदशायां निर्विकल्पकं ज्ञानमनभ्यासदशायां त

६३ नुमानं ॥ न चाभ्यासदशायामस्ति यः सविकल्पज्ञानं प्रवर्तकत्वात्प्रमाणं स्यादित्याह ॥ ननु संध्याववतराभावादर्थक्रियार्थिं द्विप्रमाणमप्रमाणं वा

नेषत ॥ नेतेनिर्विकल्पकत्वानादभ्यासे संस्थ पदास्य प्रवृत्तिलक्षणस्याभावात् ॥ एतत्त्वसविकल्पकसिद्धवस्तेरप्रपंचतः प्रतिपादितं स्यान्नतं ॥

सकलप्रमयानां भ्रांतत्वाभ्युपगमनः प्रसक्तस्यापि प्रामाण्यानभ्युपगमात् कथं संवृतेरपि प्रमाणान्तरत्वं स्यादित्युक्तं सोमेनेत्यत्राह ॥ अर्थक्रियार्थिनीस्था

मिश्रत्वेन प्रमाणमस्याभाव उक्तः इति भावः —

(सकल प्रमाणाभाव आदिना ... इत्यर्थः

द्विसकलप्रमाणाभावस्तस्य च कियोपादानं न तर्थो हि प्रमाणमन्वेषयते ॥ किमिन्द्रियादिवत् प्रमाणं प्रमाणमिव प्रमाणाभाव इत्यर्थः ॥ न हि प्रमाणानं

रणानुभावः सिद्ध इत्युक्तं ॥ माध्यमिकं प्रति निर्विकल्पसिद्धिं प्रदर्श्य परिहारार्थं विकल्पेन योग्यतया प्रमाणत्वं प्रतिपादयन्नाह ॥ हि प्रमाणान्तरं न

त्वयोः प्रतिपरिहारोक्तः ॥ प्रत्यक्षप्रमाणं वा यत्नस्ततो न भवति तस्यान्येषां ॥ न च निर्विकल्पकात् व्यवहारोऽपि प्रत्यक्षत्वेऽपि हि प्रमाण-

मिति चेदाह । रूपादिलक्षणस्य यादि स्फुटप्रतिभासविशेषात् स्वलक्षणः प्रमाणत्वं प्रत्येयं स्वलक्षणप्रत्यक्षं युक्तं ॥ रूपादीत्यादि रूपमादिर्यस्य रसादेः मन

योग्यतायाश्चादिर्यस्य निरंशत्वादेः सोऽपि न चोक्तः तयोः स्फुटस्य प्रतिभासस्याविशेषात् स्वलक्षणः प्रमाणत्वं प्रत्यक्षेण तयोरेव प्रत्यक्षं

प्रति निश्चय नेपक्षेत ॥ यस्मिन्नालम्बने सत्यस्य तत्र प्रत्येकं तदेव प्रमाणाधिगतिमात्रफलं युक्तमुपपन्नं प्रत्येयं न पुनरेव निश्चयः फलं ॥ तत्रैव न च प्रत्येकं न प्रत्य-

क्षप्रमाणेनान्यस्याभिधानात् तस्तु निर्विकल्पकादिति चेदत्राह ॥ न च तत्स्वलक्षणेन न भवति भावानां निर्विकल्पतः स्वलक्षणः कुतो न भवेत् ॥ तत्कृतं तदादि

नेन निर्विकल्पकेन कृतं तत्स्वलक्षणेनानिश्चयस्तस्य परमार्थतो न भवति कल्पना पाकत्वं भवतीत्यर्थः ॥ न च तत्स्वलक्षणेन न भवतीति चेत् निश्चयानां

निश्चयफलं तेनानिर्विकल्पान्न भवतीति ॥ यथा च न तेन न भवति ॥ न यावत्सविकल्पकसिद्धेः प्रतिपादितमेव ॥ अभ्युपगम्याप्येतन्निर्णयं दूषणमुपदर्शय

न्नाह ॥ भावेत्यादि भावेभ्यो वा तत्तेनानिर्णीतिः स्वार्थस्य च परोपरंधः ॥ रूपादीनि च स्वलक्षणानि रूपादयः क्रिया न भवन्ति स्फुटतया प्रतिभासस्याभ्यन्तरा

विशेषात् ॥ दर्शनपाटवादिकमप्यनंशस्य दर्शनस्याभ्यन्तरविशेषमित्युक्तं ॥ सविकल्पकसिद्धेनानुपपायास्तु तेनार्थकत्वं विदेव यदेव कारणे

प्रमाणफलव्यवस्था विरुध्यते ॥ न यावदन्यादेरपि सामान्यवदित्थं यस्याप्यनवस्थेरणा ग्रहणात् ॥ अन्यथा यदि तेन तद्रूपेण वस्तुनी सामान्यं प्रत्येकं

विकल्पकप्रसक्तस्यानुपलभ्यमानत्वात्प्रामाण्यं न यावद्यदादेरपि तस्याप्यनुपलक्षणात् विशेषादित्याशंक्याह ॥ बहुबहुविधक्षिप्रानिःसृ

तानुक्तध्रुवेतरविकल्पानामवग्रहादेरपि तस्याप्यनुपलक्षणाद्विशेषादित्याशंक्याह ॥ बहुबहुविधक्षिप्रानिःसृतानुक्तध्रुवेतरविकल्पानामव

ग्रहादेः स्वभावभेदान्न विरुध्यते ॥ बहुबहुविधेत्यादि ॥ बहुबहुविधक्षिप्रानिःसृतानुक्तध्रुवाः ॥ इतरे चाविप्रादयो येषां विकल्पास्ते दासेषां

न्या·कु·चं· दर्पापोव्यवहारादिलक्षणविरुद्धेन प्रमाणफलव्यवस्थितिसंबंधः कुतएतदित्येवत्राह स्वभावभेदादित्ति स्वान्यास्मयोरभेदेपिस्वभावभेदा
९० भावकल्पनायांक्रमप्रवृत्तिधर्म्माणामपि तथाभावात्कुतः क्रमः सुखदुःखादिभेदोवा परमार्थतः प्रतिष्ठा व्यवहारादेर्भावोवायात्योर्थतत्स्यक
यंचिद्गुरुत्वात्॥ अथवास्वभावभेदाद्व्यवहारादेः स्वरूपभेदादित्यर्थः | यदप्युक्तं तस्यानुपलक्षणादिति तत्राह॥ प्रतिभासभेदेपिस्वभावभेदाभा
वकल्पनायांक्रमप्रवृत्तिधर्म्माणामपि तथाभावात्कुतः क्रमः सुखदुःखादिभेदोवापरमार्थतः प्रतिष्ठाप्येत प्रतिभासभेदपीत्यादिप्रतिभासस्यस्व
रूपसंवित्तेर्भेदेपिनानात्वेपि व्यवहारादेः स्वभावभेदाभावकल्पनायां स्वभावस्य स्वरूपस्य योभेदस्तस्याभावकल्पनायामद्वयज्ञानकल्पनायां
किमित्यत्राह क्रमेणेत्यादि॥ क्रमेणाप्रवृत्तिर्वर्त्तनं येषामुपादानोपादेयरूपाणां दर्शनस्मरणादीनां तेषामपि न केवलमव्यवहारादीनां तथाभावा
त् तेन स्वभावभेदभावकल्पनाप्रकारेणाभावात्कारणात्कुतः प्रमाणाच्च कुतश्चित् क्रमः॥ कार्यकारणभावः सुखदुःखादिभेदोवा आदि
शब्देन हर्षनीलादिपरिग्रहः॥ परमार्थतः प्रतिष्ठाप्येत व्यवस्थाप्येत॥ गुरुत्वादेतं स्यादितिभावः॥ ननु यद्यव्यवहारादेः प्रतिभासभेदः कथमेकत्व
मित्यत्राह सहप्रतिभासवदिति सह प्रतिभासात् हर्षनीलादयः आकारास्तेषामिव तद्वदिति तद्वदनेकमनेकाकारं क्षणिकज्ञानं कुतश्चिदन्य
स्तेनः प्रतिभासभेदानामुपपत्तिः क्रमवर्त्तिनामपि तथैकत्वं प्रतिपत्तुमर्हति नित्यत्वादिति त्वार्थोपसंहारमाह॥ यत एवं ततस्मात्सर्वं सौगतः सकल
भिन्नमनेकाकारं चित्रज्ञानं चित्राकारं क्षणिकज्ञानं हर्षशोकादि विविक्तमध्यक्षगणेर्हर्षां॥ कुतश्चित्तस्याश्चिदभिन्नयोगक्षेमलक्षणायाः
स्वज्ञाकारविवेचनतालक्षणायावाप्रत्यासत्तेर्नैकरूपात्॥ केषां संबंधिन्याः तस्या इत्याह॥ प्रतिभासभेदानामिति॥ प्रतिभासभेदानां हर्षनीला ९०
दयस्त्वाकारविशेषास्तेषामुपगमनभ्युपगच्छन् क्रमवर्त्तिनामपि क्रमेणवर्त्तितुंशीलानामपि तथाशक्यविवेचनप्रत्यासत्तिप्रकारेणाके
वलस्याभिन्नयोगक्षेमप्रत्यासत्तिप्रकारस्य संतानान्तरज्ञानेष्वभिचारादेकत्वं प्रतिपत्तुमर्हति॥ केषामित्यत्राह॥ हर्षविषादादीनामिति अतो लालनेक
१ त्वादनेकांतसिद्धिः कस्येयात्यथेयमित्यनेनव्यवस्थापनेन ज्ञानलिंगपरिणामेनासंबंधात्॥ ननु प्रमाणफलयोः क्रमभाविनोर्भेदात्संतानान्तरवत्तद्वा

बोनप्राप्नोतीतिवेदसूत्रमाह॥ प्रमाणफलयोः क्रमभेदेऽपि तादात्म्यमभिन्नविषयत्वं च प्रत्येयं॥ प्रमाणस्यादिश्चतरस्यानुवर्ततेऽन्योन्यायात्प्रमाणफल
योरवग्रहेहयोरवायधारणयोः क्रमभावेऽपि तादात्म्यं कथंचिदेकत्वं। रू॥ ननु प्रमाणफलयोस्तादात्म्यमनुपपन्नं प्रमाणविरोधात्तथाहि॥ प्र
माणमात्मव्यतिरिक्तक्रियाकारिकारकत्वात्प्रकारकं। तदात्मव्यतिरिक्तक्रियाकारि जनिपन्नं॥ यथा कुठारादिकारकं प्रमाणं तस्मादात्मव्यतिरिक्तक्रि
याकारीति॥ तथा प्रमाणं स्वतो विभिन्नफलविधायि करणत्वात्कारणं॥ तत्स्वतो विभिन्नफलविधायि प्रसिद्धं॥ यथा वास्यादिकरणं च प्रमाणं त
स्मात्स्वतो विभिन्नफलविधायि प्रसिद्धं॥ यथा वास्यादिकरणं च प्रमाणं तस्मात्स्वतो विभिन्नफलविधायीति तन्न चायं साध्यविकलो दृष्टान्तो नहि
करणं वास्यादि स्वात्मनि क्रियां कुर्वद्दृष्टं॥ न चाकुर्वतेः करणत्वं युक्तमतिप्रसंगात्॥ तस्मात्स्वतो विभिन्नं फलं कर्तरि कर्मणि वा कुर्वत्करणं
निपतत्वं॥ विरुद्धा च प्रमाणस्यैव फलरूपता न ह्येकस्यैककदा साध्यापेक्षया करणरूपता फलरूपता चोपपन्ना विरुद्धयोर्धर्मयोः सकृदेकत्र
समावेशासंभवात्॥ अतः प्रमाणफलयोर्भेद एव ज्यायान्॥ विशेषणज्ञानं हि प्रमाणं विशेष्यज्ञानं फलं तयोश्च कथमभेदो विभिन्नसाम
ग्रीप्रभवतया विभिन्नविषयतया च भेदस्यैवोपपत्तेः॥ ययोर्विभिन्नसामग्रीप्रभवत्वं विषयत्वं च न तयोर्भेदो यथा घटपटज्ञानयोर्भिन्नसाम
ग्रीप्रभवत्वं विभिन्नविषयत्वं च विशेषणविशेष्यज्ञानयोरिति न चायमसिद्धो हेतुः॥ विभिन्ना हि विशेषणज्ञानोत्पत्तौ विशेषणसंनिकर्ष
लक्षणा सामग्री विभिन्ना च विशेष्यस्यादिज्ञानेन्द्रियसन्निकर्षलक्षणा सामग्री विषयभेदस्तु तज्ज्ञानयोर्भेदं साधयेत्कारकत्वादिनि साधनमु
क्तं॥ तदसमीचीनं यतो नः किमनयोः कथंचिद्भेदः साध्येन सर्वथा वा॥ यदि कथंचित्सिद्धसाध्यता अज्ञाननिवृत्तेः प्रमाणधर्मतया हानोपादा
नादेश्चतत्कार्यतया प्रमाणात्कथंचिद्भेदाभ्युपगमात्॥ द्विविधं हि प्रमाणस्य फलं ततो भिन्नमभिन्नं चेति॥ तत्राभिन्नमज्ञाननिवृत्तिलक्ष
णत्वात्प्रायधर्मः स ततोऽभिन्नो यथा प्रदीपात्स्वपरप्रकाशः॥ प्रमाणधर्मश्चाज्ञाननिवृत्तिः स्वपररूपव्यामोहविच्छेदलक्षणा तन्निहि सर्व
थाभेदे भेदे वा धर्मधर्मिभावो घटते विरोधात्॥ तथाहि॥ ययोः सर्वथाभेदो न तयोर्धर्मधर्मिभावो यथा सह्यविन्ध्ययोः सर्वथाभेदश्च धर्मि

धर्म्मिणोर्भवद्भिरभिधीयत इति॥ तथाप्यत्र सर्व्वथाभेदो न तत्र धर्म्मधर्म्मिभावो यथा धर्म्मधर्म्मिणोरन्यतरस्वरूपे सर्व्वथाभेदे ऽत्र धर्म्मधर्म्मि
णोर्भवद्भिरिष्यत इति॥ अथातः सर्व्वथाभेदाभेदपक्षे तयोरसद्भावानुपपत्तेः कथंचिद्भेदस्य वक्ष्यमाणत्वात् साधकतमस्वभावता हि ज्ञानस्य प्रमा
णतास्य ज्ञाननिवृत्त्यात्मनश्च फलरूपतेति॥ साधकतमस्वभावता चास्य स्वपरग्रहणव्यापार एवातद्ग्रहणाभिमुख्यलक्षणः ज्ञानं
हि स्वकारणकलापाल्लब्धोपयोगरूपं तत्स्वार्थव्यवसायरूपतया परिणमति॥ इतीत्थं कथंचिद्भेदेप्यनयोः कार्य्यकारणभा
वो न विरुध्यते॥ तथा चैकस्यैकदा स्वात्मापेक्षया करणता फलरूपता चानुपपत्तेरित्याद्ययुक्तं॥ एकस्याप्यपेक्षाभेदादनेककारकरू
पतोपपत्तेः यथा वृक्षस्तिष्ठति. वृक्षेणाकृतं वृक्षादपेतं वृक्षस्य वृक्षे इत्येवंप्रमाणस्यैकस्यापि साधकतमस्वपररूपव्यामोहविच्छे
दलक्षणाज्ञाननिवृत्तिस्वभावापेक्षया प्रमाणफलता फलरूपता च न विरोधमध्यास्ते॥ ननु चाज्ञाननिवृत्तिर्ज्ञानमेव न च तदेव तस्यैव का
र्यं युक्तं विरोधात् अतः कथमस्याः प्रमाणफलत्वं स्यादित्यप्यविचारितरमणीयं यतो ज्ञाननिवृत्तेः स्वार्थव्यवसायापत्तेरिति लक्षणायाः।
स्वार्थग्रहणव्यापारलक्षणोपयोगरूपप्रमाणेन कार्यत्वाविरोधात्साधकतमात् कथंचिद्भेदप्रतिपादनात्॥ किंच धर्म्मरूपतां
वाभ्युपगम्याज्ञाननिवृत्तिर्ज्ञानमेवेत्यभ्युपगम्येत॥ यदि धर्म्मरूपतां तत्रापि किमपेक्षयाज्ञाननिवृत्तेर्द्धर्म्मित्वं परिकल्प्येत॥ ज्ञानापे
क्षया धर्म्मान्तरापेक्षया वा प्रथमपक्षे तन्निवृत्तेर्द्धर्म्मित्वं ज्ञानस्य तु धर्म्मत्वमिति विपर्ययः समायातं नचैतद्युक्तं॥ तस्यास्तदाश्रितत्वात् यद्य
दाश्रितं तत्तस्य स्वाश्रयापेक्षया धर्म्मित्वं दृष्टं। यथा सुखरूपादेर्ज्ञानाश्रिता चाज्ञाननिवृत्तिरिति॥ अतः कथमस्या धर्म्मित्वं यतोस्याः
पराश्रितायाः धर्म्मस्वभावतस्यैवोपपत्तेस्तल्लक्षणत्वात् तस्य॥ अथ धर्म्मान्तरापेक्षया तदाज्ञानापेक्षया किमस्याः स्याद्धर्म्मित्वं नाचेत्क
थमेवं ज्ञानमेवाज्ञाननिवृत्तिरित्यभेदाभिधानं युज्यते अज्ञानस्याज्ञाननिवृत्तिर्धर्म्म इति भेदाभिधानस्यैवोपपन्नत्वात्॥ न खलु पचार
स्त्यत्र धर्म्मधर्म्मिणोरभेदाभिधानं युक्तमिति प्रसंगात्॥ किंचासौ कार्य्योऽकार्य्यो वास्याद्यद्यकार्या सर्व्वत्र सत्वप्रसंगात्सर्व्वः सर्व्वदर्शी स्यात् ९९

देशादिनियतकारणाधीनतयाहिभावानांदेशादिनियमोनान्यथा॥अथकार्यासौकुतोन्यायेनप्रमाणाभिन्नज्ञानादन्यतो
वा॥यद्यन्यतःप्रमाणाभिन्नज्ञानोत्पत्तेःप्रागुत्तरकालेचतदुत्पत्तिप्रसक्तिः॥नहितत्कार्यस्यतत्सत्ताकालएवात्मलाभोयुक्तःप्र
योगोयदुत्तरकार्यंनतत्तदात्मलाभेनतत्सत्तामपेक्षते॥यथापटाकार्यःपटोनात्मलाभेघटसत्तांप्रमाणकार्यतावाज्ञाननिवृत्तिरन्यतउत्पत्तिमत्वे
ति॥अथप्रमाणादेवासावुत्पद्यतेसिद्धं॥नहिप्रमाणफलत्वमस्यास्तथाचज्ञानेमेवाज्ञाननिवृत्तिर्दुर्घटं॥सुघटत्वेपिवाकिंज्ञानमात्रमे
वाज्ञाननिवृत्तिर्विशिष्टंवाज्ञानंप्रथमपक्षेनाध्यवसायादेर्दत्तोजलांजलिः॥ज्ञानमात्रधर्म्मतयाज्ञाननिवृत्तेःस्वपररूपव्यामोहविच्छेद-
लक्षणायास्तत्रापिसत्त्वप्रसंगात्॥व्यामोहोह्यनध्यवसायादिस्वभावःसकथंतद्विपक्षभूतयाज्ञाननिवृत्त्याक्रोडीकृतेज्ञानमात्रेवकाशंल
भेत॥यत्सत्तामात्रनिबंधनोयद्विपरीतधर्म्मसद्भावोनतत्रतत्संभवोयथात्मसत्तामात्रनिबंधनेनामूर्त्तचेतनत्वादिधर्म्मेणक्रोडीकृतेत्मा
ननिमूर्त्ताचेतनत्वादिधर्म्मसंभवःज्ञानसत्तामात्रनिबंधनेनाज्ञाननिवृत्तिधर्म्मेणानध्यवसायादिविरोधिनाक्रोडीकृतंज्ञानमात्रमि
ति॥अथविशिष्टज्ञानधर्म्मताज्ञाननिवृत्तेरिष्यते॥ननुकिमिदंज्ञानस्यविशिष्टत्वंनाम,स्वपररूपयोर्व्यामोहविच्छेदहेतुत्वं,अबाधितत्वं,
संस्कारजननेयोग्यता,विशिष्टकारणकलापादात्मलाभोवा॥प्रथमविकल्पेस्वन्मनसिद्धिःस्याद्दृष्टिभिरनध्यवसायादिलक्षणव्यामोहविच्छे
दहेतोर्ज्ञानविशेषस्याज्ञाननिवृत्तिधर्म्माश्रयत्वाभ्युपगमात्॥उत्तरविकल्पत्रयमप्यसम्यक्तमेवागादेतस्वपररूपयोर्व्यामोहविच्छेदं
कुर्वतोज्ञानविशेषस्याबाधितस्यसंस्कारजननयोग्यस्यविशिष्टकारणकलापादाविर्भावमाबिभ्रतोज्ञाननिवृत्तिधर्म्माधारत्वोपपत्तेः
ततःस्थितं॥प्रमाणधर्म्मत्वादज्ञाननिवृत्तिलक्षणंफलंप्रमाणादभिन्नंहानोपादानादिकंतुभिन्नं॥ननुयथास्वार्थग्रहणाभिमुख्यलक्षणो
पयोगरूपंज्ञानंस्वपरप्रमितिरूपाज्ञाननिवृत्तिरूपतयापरिणमते॥तथाहानादिरूपतयापितत्कथमस्यभिन्नफलमितिचेत्॥नह्यवहि
तत्वात्तस्यचेत्यज्ञाननिवृत्तिलक्षणफलेहानोपादानादिकंलक्षणंफलमुत्पद्यते॥स्वज्ञाननिवृत्तिलक्षणफलेनास्यव्यवधानाद्भिन्नत्वं

न्या॰कु॰चं॰ तत्प्रकारकत्वलक्षणाद्धेतोः प्रमाणफलयोः सर्वथाभेदः सिद्ध्यति। नापि करणत्वादेः तत्राशेषदोषानुषंगात्।। यच्चाभिहितं विशेषणज्ञानं प्रमाणं वि

७० शेष्यज्ञानं फलमित्यादि।। तदप्यपेशलं विशेषणविशेष्ययोर्विभिन्नज्ञानालंबनत्वाभावात्। एकमेव हि ज्ञानं तदालंबनं नहि शुक्लपटादौ पुरुषप

त्वादौ विशेषणविशेष्ययोर्ज्ञानभेदोनुभूयते। प्रतीतिविरोधात्। न च विषयभेदाद् ज्ञानभेदः। पंचांगुल्यादेर्विषयस्यानेकज्ञानालंबनत्वानुषंगात्। अन्यथा

सदसद्वर्गः कस्यचिद् ज्ञानालंबनमनेकत्वात् पंचांगुलवदित्यत्रापि दृष्टांतता।। कथं चैवं पर्वतनितंबादिसिद्धिः ऊर्ध्वाधोमध्यभागानामप्येकज्ञानालंबनत्वाभा

वप्रसंगात्। तत्रापि तेनास्य सिद्धेरनुपपत्तेः।। नापि विशेषणस्य सन्निकर्षादिलक्षणाद् विभिन्नात् सामग्री संपादिता साप्यनुपपन्ना सन्निकर्षस्य प्रागेव प्र

तिषिद्धत्वात्।। सन्निकार्यभेदे कारणभेदः कल्पयितुं युक्तो न चात्र तद्भेदोस्तीत्युक्तं।। ततः सूक्तं प्रमाणफलयोः क्रमभावेपि तादात्म्यमभिन्नविष

यत्वं च व्यवस्थितमिति।। वसंततिलकाछन्दः।। निर्मूल्यलक्षणमथान्यमतप्ररूढं।। प्रत्यक्षलक्षणमिदं गदितं प्रमायाः।। तत्प्रभाप्रकटितं खलु व

स्तुजातं।। किं दुःप्रकाशयति न त्रिकमस्ति चित्रं।।१।। इति श्रीमत्प्रभाचंद्राचार्यविरचिते न्यायकुमुदचंद्रे लघीयस्त्रयालंकारे प्रत्यक्षपरिच्छेदः प्र

थमः समाप्तः।।१।। शार्दूलविक्रीडितछंदः।। प्रत्यक्षप्रमितेः प्रवृत्तिरखिलव्यामोहविच्छेदतस्तद्रूपप्रतिपादनार्थममलः प्रारभ्यते प्रक्रमः।। मिथ्यैकांत

महांधकारनिचयप्रच्छादितार्थस्फुटं। स्याद्वादाधीत्प्रचंडतरणेर्नीत्या समुद्योतितुं।।१।। सम्यग्विषयव्यवस्थापनादेव प्रमाणेतरभावव्यवस्था।। समीचीनश्च

विषयः प्रमाणस्य यादृशो भवति।। तं तद्व्याख्यातं सम्यगवोपसंहरन्नाह।। ८।। तद्द्रव्यपर्यायात्मार्थो बहिरंतश्च तत्वतः।। पत्तो व्यवहारादीनां प्रमाण

फलभूतानां क्रमभावेपि तादात्म्यमभिन्नविषयत्वं च ततस्तस्मादर्थक्रियासमर्थः प्रमाणगोचरो भावो द्रव्यपर्यायात्मको बहिर्घटादिरंतश्च किं

मित्यत्राह।। अंतश्चेति चशब्दः समुच्चयार्थः निपातानामनेकार्थत्वात् अखिलकल्पनानां तत्र यथाविधः स्यादित्यत्राह।। तत्वतः परमार्थतः न वादाभेदैकां ७०

तयोरनुपलब्धेः सर्वथा असिद्धेरनेकांतात्।। तं न बहिरंतः स्वलक्षणं सामान्यलक्षणं वा परस्परानात्मकं प्रमेयं यथा मन्यते तथा परैर्द्रव्यपर्यायात्मनो

प्रतिभासनात् । र्थस्य बहिरप्रतिभासनात् नित्यस्य क्षणिकस्य वा स्वस्थानक्रमेण साक्षात्करणे क्रमाक्रमाभ्यां अर्थक्रियानुपपत्तेः।। न चैतत्क्रमाक्रमाभ्यां भावान्तीनते।

सत्तानपानतनाभेदइत्यादिनैतद्व्याचष्टे॥ भेदाभेदैकांतयोरनुपलब्धेः कारणादर्थस्य सिद्धिर्निर्णयान्निर्न्निर्न्नी निर्वानैकांतात्येनैकांतेनेह तु नानवद्यि
त्यनर्हिभेदैकांते वैशेषिकाभ्युपगते षट्पदार्थलक्षणे नैयायिकाभ्युपगते वा षोडशपदार्थलक्षणे र्थसिद्धिः अघटनेप्रमाणेनोपसिद्धस्वरूप
णानेयामर्थसिद्धिनिबंधनत्वानुपपत्तेः प्रमाणेनोप्रसिद्धस्वरूपं न तदर्थसिद्धिनिबंधनं॥ यथा गगनेंदीवरं प्रमाणेनोपसिद्धस्वरूपाश्चयोगा
भ्युपगताः पदार्थाइति॥ ननु वैशेषिकैरभ्युपगताः द्रव्यगुणकर्मसामान्यविशेषसमवायाख्याः षट्पदार्थाः॥ अभावाख्यश्च सप्तमः नैयायि
न्यायोऽसंभवित्लक्षणात्तत्त्वेनान्योन्यमेकांततोभिन्नाः प्रमाणतः सुप्रसिद्धा एव॥ तथाहि द्रव्यलक्षणं द्रव्यत्वाभिसंबंधः क्रियावद्गुणव
त्समवायिकारणमिति च॥ तथाचसूत्रं॥ क्रियावद्गुणवत्समवायिकारणं द्रव्यमिति नवलक्षितानि॥ पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनां
सि नैव द्रव्याणि॥ तत्र पृथिव्यप्तेजोवायवो द्विविधा नित्यानित्यभेदात्॥ तत्र परमाणुरूपा नित्याः सत्कारणवत्त्वात्॥ द्व्यणुकाद्यवयविरूपास्त्वनि
त्याउत्पत्तिमत्त्वात् आकाशकालदिगात्ममनांसि तु नित्यान्येव॥ नद्विदं द्रव्यलक्षणं केवलव्यतिरेक्यनुमानं॥ तथाहि द्रव्यमितरेभ्यो भिद्यते द्रव्य
त्वात् क्रियावद्गुणवत्समवायिकारणत्वाद्वा॥ यत्तु नेतरेभ्यो न भिद्यते न तथा यथा गुणादि न चायं न तस्मादितरेभ्यो भिद्यते॥ व्यवहारो वा साध्यो
विवादास्पदीभूतं वस्तु द्रव्यमिति व्यवहर्तव्यं॥ प्राक्तनादेव हेतोः यत्तु नैवं न तद्द्रव्यमिति व्यवह्रियते॥ न तत्तथा यथा गुणादि न चायं तस्माद्द्रव्यमिति व्यवहर्तव्यं॥ एवं शेष
लक्षणान्यपि पृथिवीत्वाभिसंबंधात् पृथिवी॥ अप्त्वाभिसंबंधादापः॥ तेजस्त्वाभिसंबंधात्तेजः॥ वायुत्वाभिसंबंधाद्वायुरित्येतानि चत्वारि द्रव्याणि। आका
शकालदिशां त्वेकैकत्वात्सत्तलक्षणभूतापरसामान्याभावेपि पारिभाषिक्यस्तिस्रः संज्ञा लक्षणं आकाशं कालो दिगिति॥ तथा आकाशमितरे
भ्यो भिद्यते॥ विवादास्पदीभूतं वा द्रव्यमाकाशमिति व्यवहर्तव्यमनादिकालप्रवाहायातात्काशशब्दवाच्यत्वात्॥ यत्तु नेतरेभ्यो भिद्यते न चाका
शमिति व्यवह्रियते॥ न तदनादिकालप्रवाहायाताकाशशब्दवाच्यं॥ यथा रूपादि न च तद्वाच्यं तत्वं चेदं तस्मात्तत्साध्यमिति॥ एवं दिक्का
लयोरपि लक्षणं द्रष्टव्यं॥ आत्मत्वाभिसंबंधादात्मा मनस्त्वाभिसंबंधान्मनः॥ इत्यत्रापि पृथिव्यादिवत्केवलव्यतिरेक्यनुमानं द्रष्टव्यं॥ संख्यादयश्चतु

न्या.कु.वं. विंशतिगुणाः॥उत्क्षेपणादीनि पंचकर्म्माणि॥ परापरभेदभिन्नं द्विविधं सामान्यमनुगतैकज्ञानकारणं॥ नित्यद्रव्यवृत्तयोंत्याविशेषाः व्यावृत्त
७१ व्यावृत्तबुद्धिहेतवः॥अयुतसिद्धानामाधार्याधारभूतानामिहेतिप्रत्ययहेतुर्यः संबंधः स समवायइति॥ छ॥ अत्र वदंति विधीयते॥ यत्तावदुक्तं पृथिव्यप्तेजो
वायवो द्विविधाइति तन्न समीचीनं॥ परमाणुरूपाणां तेषां सद्भावे प्रमाणाभावात्॥ नहि तत्सद्भावे प्रत्यक्षादि प्रमाणं वर्त्तते तेषामतींद्रियत्वात् तेषां ना
नुमानं॥ तत्सद्भावावेदिलिंगस्यासंभवात्॥ नन्विदमस्ति द्व्यणुकादिकार्यं स्वपरिमाणादल्पपरिमाणकारणारब्धं कार्य्यत्वाद्घटादिवदित्यप्रमा
मीत्तिताभिधानं॥ कार्य्यस्य स्वपरिमाणादल्पपरिमाणकारणारब्धनियमासंभवात्॥ तथाहि किं कार्यमात्रं तदारब्धं प्रसाध्यते॥ द्रव्यत्वविशिष्टं
वा कार्यं प्रथमपक्षे तंतुव्याद्यादिभिर्व्यभिचारस्तेषां कार्यत्वे सत्यपि स्वपरिमाणादल्पपरिमाणकारणारब्धत्वासंभवात्॥ द्वितीयपक्षेतु भस्मादि
नानैकांतः तस्य द्रव्यत्वे सति कार्यत्वे सत्यपि ततोल्पपरिमाणकारणारब्धत्वाभावात्ततेः॥ नखलु कार्यपरिमाणादल्पपरिमाणमेव द्रव्यं का
रणमिति सर्वत्र व्याप्तिः॥ किंतु कार्य्यं कारणं विना न भवतीति व्याप्तिः कार्यपरिमाणादधिकस्य न्यूनस्य समस्य वा द्रव्यस्य कारणत्वदर्शनात्॥
तत्र महतः पटात्कूटास्मशिथिलावयवकार्प्पासपिंडाद्वा॥ न्यूनपरिमाणस्य भस्मनो निरवयवकर्प्पासपिंडस्य च प्रादुर्भावः प्रतीयते॥ न्यूनाल्पप
रिमाणस्याल्पपरिमाणकारणारब्धत्वमुपलभ्य सर्वं कार्यद्रव्यं तथा साधयितुं युक्तं॥ शब्दविद्युत्प्रदीपादीनां क्षणिकत्वमुपलभ्य सकलार्थानां
सत्त्वादेः क्षणिकत्वसाधनप्रसंगात्॥ दृष्टांतमात्रसद्भावेप्यत्र साकल्येन व्याप्तेरभावात्तत्साधकत्वमित्यत्रापि समानं॥ अतः परमाणूनां स
द्भावस्य कुतश्चित्प्रमाणादप्रसिद्धेः परमाणुरूपाः पृथिव्यादयो नित्याः सदकारणवत्त्वादित्यत्र हेतोर्विशेषणासिद्धत्वं विशेष्यासिद्धत्वं च स्कंधभे
दपूर्वकत्वात्तेषां तथाहि॥ परमाणवः स्कंधावयविद्रव्यविनाशकारणकास्तद्भावभावित्वात् घटविनाशपूर्वककपालवत्॥ नन्विदमसिद्धं द्व्यणुका ७१
द्यवयविद्रव्यविनाशे परमाणुसद्भावप्रसिद्धेः॥ विभागएव तद्विनाशज्ञापनेनाणवश्रुत्पयुक्तं स्कंधस्यानवच्छेदहेतुकत्वप्रसंगात्॥ शक्यते
हिवक्तुं संयोगएवाणुसंघातज्ञापनेन स्कंध इति॥ सर्वदा स्वतंत्रपरमाणूनां तद्विनाशमंतरेणापि सद्भावसंभवाद्भागासिद्धो हेतुरित्यपि मनोर

[illegible]

एवं तस्मात् [illegible] पूर्वकाले [illegible]

यमात्रंते यामसिद्धेः॥ विवादापन्नाः परमाणवः स्कंधभेदपूर्वकाः कालभावित्वान्नेयायिकमनस्पूर्वकत्वात्॥ परमाणूनामपि स्कंधभेदपूर्वकत्वे केषांचित्स्या
दित्यप्यसुंदरं तेषामपि प्रवेशिता भेदपूर्वकत्वेन स्कंधभेदपूर्वकत्वप्रसिद्धेः॥ ननु परमाणूनां ग्राहकप्रमाणाभावतो भवद्भिरेवाभावप्रतिपादनात्त
तेषां स्कंधभेदपूर्वकत्वप्रतिज्ञाश्रयासिद्धत्वमनुपपन्नं॥ अवयवमेवानवद्यतत्साधकप्रमाणाभावनतदभावप्रतिपादनात्॥ अस्माकं तु निरवद्यतत्साधका
नुमानस्य सद्भावतस्तेषां सद्भावोपपत्तेरेवं स्कंधभेदपूर्वकत्वप्रतिज्ञानिर्मात्तनुपपन्नैव॥ तथाहि॥ अणुपरिमाणतरतमादिभेदः क्वचिद्विश्रांतः परिमाणतरतमा
दिभेदत्वान्महापरिमाणतरतमादिभेदवत्॥ यत्र चास्य विश्रांतिस्ते परमाणवः॥ इति न तेषां सद्भावासंभवो नित्यैकरूपतापाएवासंभवात्॥ तद्रूप
तायां तेषां क्रमयौगपद्याभ्यामर्थक्रियाकारित्वानुपपत्तेः॥ न खल्वेकांतनित्यस्वभावाः परमाणवः सर्वदा कार्यजननस्वभावा आहोस्वित्त
द्विपरीता वा॥ प्रथमविकल्पे द्व्यणुकादिकार्यस्य सर्वदा सत्त्वप्रसंगः॥ सर्वदा तज्जननस्वभावेभ्यस्तेभ्यस्तदनुत्पत्त्यनुपपत्तेः॥ यद्यदजननस
भावं न तत्तत्कुर्वत्परिं यथा शालिबीजाद्यवांकुरस्य द्व्यणुकादिकार्याजननस्वभावाश्च सर्वदा भवद्भिः परिकल्पिता परमाणव इति॥ तथा च पर
माणवः कृतिसत्वमेव स्यात्॥ कार्याकारित्वात्॥ यदकार्यकारि न तत्सत् यथा गगनेंदीवरं कार्याकारिणश्च सर्वदा तज्जननैकस्वभावतया भवन्मते प
रमाणव इति॥ अथ सर्वदा कार्यजननैकस्वभावास्तेभ्युपगम्यंते अत्रापि किमेकाकिनस्ते तज्जननैकस्वभावा उत सहकारिसमन्विता वा॥ यद्येका
किनस्तदा नवमवकार्याणां सकृदेवोत्पत्तिः स्यात्॥ अथ सहकारिकारणनापेक्षाविकलकारणत्वेस्त सकृदेवोत्पत्तेः॥ यथा समयोमारावरदेवांकुरः॥ अ समान
विकलकारणाश्च जननैकस्वभावा अणुकार्यत्वेनाभिमताः सर्वदैवभावा इति॥ तथाभूतानामप्येषामनेनानुमानेन सर्वदानुत्पत्तिप्रसंगो विशेषात्॥ ननु स
मवाय्यसमवायिनिमित्तभेदात्त्रिविधं कारणं कार्यजन्मनि॥ ब्याप्रियते अपरत्र दिकार्यस्य समवायिनिमित्तमसमवायिकारणं॥ यथा द्व्यणुकस्याणुद्व
यं॥ यत्र कार्यैकार्थसमवेतं कार्यकारणैकार्थसमवेतं वा कार्यमुत्पादयति तदसमवायिकारणं॥ यथा परारंभेतंतुसंयोगः पटसमवेतरू
वा पारंभे पटोत्पादकतंतुरूपादिकं शेषं तूत्पादकं निमित्तकारणमदृष्टकालादि॥ तत्र संयोगादेरपेक्षणीयस्याभावादविकलकारणत्वं तेषाम

न्या.कु.चं. सिद्धमित्यपि प्रद्वेषमात्रं संयोगादिज्ञानाधेयातिशयत्वेप्यनित्यत्वेनागन्तरोरेव स्यात्तदनुपपत्तेः॥ अथ संयोग एवामीषामतिशयः स किं नित्यो
७२ नित्यो वा नित्यश्चेत्सर्वदा कार्योत्पत्तिः स्यात्॥ तदतिशयभूतस्य संयोगस्य सदा सत्त्वात्॥ अथानित्यस्तदा तदुत्पत्तौ कोतिशयः स्यात्संयोगस्य कि
यावासंयोगश्चेत्किं स एव संयोगान्तरं वा न तावत्स एवासिद्धाप्यसिद्धेः स्वोत्पत्तौ स्वस्यैव व्यापारविरोधात्॥ नापि संयोगान्तरं तस्यानभ्युपगमात्
भ्युपगमे वा तदुत्पत्तावप्यपरसंयोगातिशयकल्पनाप्रसंगादनवस्था स्यात्॥ नापि क्रियातिशयस्तदुत्पत्तावपि पूर्वोक्तदोषानुषंगात्। किं चा
दृष्टापेक्षादात्माणुसंयोगात्परमाणौ क्रियोत्पद्यत इति भवताभ्युपगमादात्मपरमाणुसंयोगोत्पत्तावप्यपरोतिशयः कल्पनीयः पूर्ववचनेद
वदूषणमित्यपरानवस्था॥ किं चासौ संयोगो द्व्यणुकादिनिर्वर्तकः किं परमाणुनाश्रितस्तदन्याश्रितो नाश्रितो वा॥ तत्राद्यपक्षे तदुत्पत्तावा
श्रयतत्पर्येनं॥ यत्तु तत्पर्येन तदारम्भत्वमपि कार्येणानुषंगो संयोगस्य तन्नापरित्यागेन संयोगरूपतया परिणमनात्॥ अथ तेनान्यत्वेन कथं तस्ये
सौ तदाश्रितः स्यात्॥ विरुद्धधर्माध्यासतस्तत्तस्यात्यन्तभेदप्रसंगात्। न याभ्वतोप्यसौ नतत्त्वं बद्धत्वान्तदाश्रित इति चेन्॥ केन पुनः संबंधेना
सौ तत्संबद्धः समवायेन संयोगेन कार्यकारणभावेन वा न तावत्समवायेनास्यासत्त्वात्तदसत्त्वं चाग्रे निराकरिष्यमाणत्वात्सिद्धं॥ नापि संयो
गेन संयोगस्यासंभवात्। गुणत्वेनास्य द्रव्याश्रितत्वात्॥ नापि कार्यकारणभावेन संयोगवत्परमाणूनां कारणत्वाभावप्रख्यानतिशयत्वादनतिशया
नामपि जनकत्वप्रसंगाद्विशेषात्॥ अतिशयान्तरकल्पने वानवस्था तदुत्पत्तावप्यपरातिशयपरिकल्पनप्रसंगात्॥ अन्याश्रितत्वे तु संयोगस्य
परमाणवतिशयत्वानुपपत्तिस्तत्संबंधाभावात्॥ यत्रैव हि यत्समवायाश्रितस्तस्यैवातिशयो नान्यस्यातिप्रसंगात्। अनाश्रितत्वं तु तस्यानुपपन्नं गुणत्वा ७२
द्यो गुणो नासावनाश्रितो यथा रूपादिर्गुणश्चायमथ यद्भिरभिधेत संयोग इति॥ अनाश्रितत्वे वा गुणत्वानुपपत्तिः यदनाश्रितं तन्न गुणो यथाका
लादिनाश्चनाश्रितश्च परमाणवतिशयरूपतया भवत्कल्पितः संयोगः। किं चासौ संयोगस्तेषां सर्वात्मनैकदेशेन वा स्यात्। यदि सर्वात्मना पिंडो
णुमात्रः स्यादथैकदेशेन तदा णूनां सांशत्वप्रसंगः तत्रैकाकिनीनेयांजनने कस्वभावसमाधस्ते। नापि सहकारिसमन्वितानां यतस्तेषां

सहकारिणः स्वगतातिशयविशेषाधायकत्वं न परिणामापद्यमपुंसेयागुणसंयोगसंयोगानुषंगः॥ द्वितीयपक्षेपि वस्तुत्वं तत्र परमाणूनामुपकारं
कुर्वंति न वा॥ कुर्वंति चेत् किं भिन्नमभिन्नं वा यद्यभिन्नं तदा तेषां कार्यत्वं॥ अथ भिन्नं तदा तेन न एव कार्यनिष्पत्तेः परमाणूनामनुपकारकत्वं स्या
त्॥ अथ तत्कृतोपकारः सहकारिणस्ते कारकाननुपकारकस्य न तत्सहकारित्वमुपकारांतरेण स्वनाममात्रेण वा तत्राद्यविकल्पेनवस्था उपकारांतरस्या
प्युपकारांतरकारित्वेनैव सहकारित्वप्रसंगात्॥ द्वितीयविकल्पेत्वतिप्रसंगः॥ तन्नाममात्रेण सर्वस्य सर्वं प्रति सहकारित्वप्रसक्तेः किंचैते सहकारिणः प
रस्परोपकार्योपकारकभावेनाद्युत्पकुर्वंत्यन्यथा वा आद्ये ह्युपकार्योपकारकभावेन तदुत्तरस्युपकारस्यानेन्योन्याभेदाभेदपक्षयोरुभयाद्युक्तदोषदो
षोपनिपातप्रसंगः॥ अथ सहकारिणः परस्परं वा न किंचित्कुर्वंति॥ कार्यस्यैव विमिलित्वा नैर्निर्वर्तनादेतदप्ययुक्तं॥ यतः प्रत्येकं समर्थाः सं
तोणवः सहकारिभिः सह मिलित्वा कार्यं कुर्वंत्यसमर्था वा परिसमर्थास्तदा प्रत्येकमेषां कार्यजनकत्वप्रसंगानावद्यकार्यस्याभेदप्रसंगः॥ सहकार्यपे
क्षावैयर्थ्यं स्यात्॥ अथ प्रत्येकं असमर्थास्ते न हि तत्संनिधाने कुतस्तेषां सामर्थ्यं स्यात्॥ सहकारिस्वरूपेणेति चेत्॥ ननु तेभ्यो भिन्नमभिन्नं वा साम
र्थ्यं विधीयते॥ यद्यभिन्नं तदा तेषां कार्यत्वप्रसंगः॥ अथ भिन्नं तदा तेषां तेन न संबंधानुपपत्तिः समवायादेरसंभवात्॥ तत एव कार्योत्पत्तिनिप्रसक्ति
तोणूनामकारकत्वं न स्यात्॥ अस्तु वा यथा कथंचित्तेषां सामर्थ्यं तथापि येन रूपेणैकं कार्यं परमाणवो जनयंति॥ तेनैव कार्यांतरं रूपांतरेण
वा यदि तेनैव तदा सकलकार्याणामेकत्वप्रसंगः॥ एकस्वभावकारणकार्यत्वाद्घटैकस्वभावात्कारणात्कार्यं नदेकं यथा विवक्षितं कार्यं॥ न
चाभूतानि च परमाणुकार्यं तथाभिन्नान्यखिलकार्याणीति। अथ रूपांतरेण तदा तत्काले प्राक्तनं रूपं निवर्तते न वा॥ यदि निवर्तते त
दाणूनामनित्यत्वप्रसंगः॥ स्वरूपप्रच्युतिलक्षणत्वानस्याः स्वरूपप्रच्युतिलक्षणमनित्यं यथा घटादि प्राक्तनस्वरूपप्रच्युतिश्च रूपांतरोत्पत्ति
समये अणूनामिति॥ अथ न निवर्तते तदा कथं तेषां रूपांतरसंभवः॥ यत्र प्राक्तनं रूपं न निवर्तते तत्र रूपांतरस्यासंभवो यथा निवर्तमानसं
कोचितरूपायामंगुल्यां प्रसारितरूपस्यानिवर्तने॥ योत्तरकार्यजननस्वरूपसमये प्राक्तनकार्यजननस्वरूपं परमाणूनामिति॥ तत्स

स्या·कु·चं· मयेतेषांतत्संभवेवायुगपत्सकलकार्यजननसामर्थ्यसंभवाद्युगपदेवाखिलकार्योत्पादःस्यात्॥नैवमेकांततोनित्यैकस्वभाव
७३ तायांपरमाणूनांकार्यकारित्वानुपपत्तेः॥यतोजनकस्वभावपरित्यागेनविशिष्टसंयोगपरिणामपरिणतानांजनकस्वभावसंभ
वात्सिद्धं॥कथंचिदनित्यत्वंप्रयोगोयेक्रमवत्कार्यहेतवस्तेऽनित्यायथाक्रमवदंकुरादिनिर्वर्तकाबीजादयस्तथाचनाद्यपरमाण
तं वइति॥तत्रभवत्परिकल्पितपार्थिवादिपरमाणुलक्षणंनित्यद्रव्यंव्यवतिष्ठते॥नापितदारब्धंद्व्यणुकाद्यवयविद्रव्यंसिद्धेहिकार्यकारण
भावेतदारब्धत्वंद्व्यणुकादेर्वक्तुंशक्येत॥नचभवन्मतेऽसौसिद्धोविचार्यमाणस्यास्याघटमानत्वात्॥तथाहियोगमतेनावत्किमि
दंद्व्यणुकाद्यवयविद्रव्यस्यकार्यत्वंनाम,स्वकारणसत्तासमवायोभूत्वाभावित्वंवाअपेक्षेकिंकार्यस्यस्वकारणैःसत्तयाचसमवायःकिं
वास्वकारणेषुसत्तासमवायः॥आद्येऽपिसत्तायाउत्पन्नस्यसमवायइति तावत्तेकिंकार्यस्योत्पन्नस्योत्पत्त्याचसमवायोऽनुत्पन्नस्यो उत्पन्नता
भयरूपस्यानुभयस्यवाद्युगुत्पन्नस्यान्योन्याश्रयप्रसिद्धेर्हि स्वकारणसत्तासमवायेकार्यस्योत्पत्तिसिद्धिस्तत्सिद्धौचतत्समवायसिद्धिरिति॥तत्सम
वायनिरपेक्षस्वरूपस्यात्मलाभेऽसौसतत्समवायकल्पनानर्थिका॥स्वातंत्र्येणाप्रसिद्धंनतत्कचिदन्यत्रसमवैतीतियथाघटःपटेस्वातंत्र्येणाप्रसिद्धंच
भवन्मतेकार्यमितिकारणवानीचानुगानिरुद्धेमासमर्थ्यात्मलाभेहिव्याप्रियमाणस्यवस्तुनःकारणत्वंव्यवतिष्ठते॥नान्यथातिप्रसंगात्॥नि
ष्पन्नेनिष्पत्त्यर्थंचास्यव्यापारेऽनवस्थेतरानुपरतिप्रसंगात्कदाचित्कार्यस्यस्वरूपासिद्धिःस्यात्॥अनुत्पन्नस्यचास्याकाशकुशेशयस्य
त्वात्कथंस्वकारणैःसत्तयाचसमवायःस्यात्॥उत्पन्नानुत्पन्नत्वेचैकस्यैकदानिर्दुर्घटं॥नह्येकत्रैकदापरस्परविरुद्धौधर्मावेकांतवादि ७३
नोघटेते॥अनुभयरूपत्वमप्यस्यानुपपन्नंविधिप्रतिषेधधर्मयोरेकधर्मनिषेधेऽन्यतरविधेरवश्यंभावित्वात्॥कारणानांतुसत्तायास
मवायेकार्यस्यकिमायातं॥नहिपटस्यतन्तुसमवायेपरस्यकिंचिद्भवति॥किंचकार्यस्वरूपमपेक्ष्यकारणस्यव्यपदेशोभवति॥नचास्यविद्या
णपरस्यकिंचिद्रूपंपश्यामोयदपेक्षस्यास्यकारणत्वंस्यात्॥अकारणत्वेचास्यकथंकार्यनिष्पादकत्वं॥अथसत्तयाऽऽक्षिप्तस्तत्समवायस्सा

सिद्धरूपत्वात्तल्लक्षणत्वायोगात्॥ न द्वसिद्धरूपता चास्यार्थानिरूकत्विप्रमाणात्वात् कुतः सिद्धा॥ अस्तु वा सा तथाप्यस्यानित्यत्वनयात्मा
दिवत्कार्यत्वायोगः॥ न तेषामनित्यत्वानुपपत्तिर्यत्कार्यं तदनित्यं यथा घटादि कार्यश्च भवद्भिः परिकल्पितः समवाय इति॥ सत्तायुक्तत्व
वा यत्स्य च कार्यत्वलक्षणत्वेन यावद्धर्मस्यास्य सत्त्वं च सर्वदा सर्वान्वयत्वविरोधात् आकाशादीनामपि कार्यत्वप्रसंगः॥ किं वायं समवायः संबंधः सं
बंधश्च संबंधिकार्यः संबंध्याश्रितश्च भवति यथा संयोगः कार्यभूतस्य तु संबंधिनो निष्पन्नत्वात् अनन्तकार्यत्वं तदाश्रितत्वं वा समवाये घटते॥ न
निष्पन्नैवायुतसिद्धत्वेन तत्र संयोगस्येव स्यान्न समवायस्य अयुतसिद्धसंबंध्याश्रितत्वेन योगैरभ्युपगमात्॥ अथ विलक्षणोयं संबंधोय
दसिद्धेपि संबंधिनि स्यात्तदसद्धनः संबध्यातिसंबंधिनाविशेनि संबंधः॥ स चासति संबंधिनि कथं स्यात् अन्यथा वंध्यायाः सुतेन संबंधः स्यात्॥
प्रध्वंसस्य च सत्तासमवायाभावतो कार्यत्वप्रसंगात्तदुक्तं नयेमुकुरादिकारणवैयर्थ्यं॥ अथ अभूत्वाभावित्वं कार्यत्वं तदपि कस्य यो भूत्वा
भवति तस्येति चेत्॥ ननु चात्राभवने भवने च कस्य कर्तृत्वं कार्यस्य तावच्छृंगविषाणप्रख्यत्वान्न कर्तृत्वं भवने हि स्वरूपस्वीकारः स चास्तितो
दुर्घटः॥ तन्न कार्यत्वं परस्य किंचिद्घटते॥ नापि कारणत्वं न हि कार्यमेवा च निष्पादकत्वं नियतकार्यनिष्पादकत्वं वा स्यात्॥ प्रथमपक्षे सर्वस
र्वस्य कारणं स्यात् तन्मात्रनिष्पादकत्वं सर्वत्र संभवात् इति न नियतकार्यार्थैकश्चिन्नियतकारणोपादानं कुर्यात्॥ द्वितीयपक्षे तु कार्यस्य
स्वविषाणप्रख्यत्वात्कथं कारणस्वरूपं तेनावच्छिद्येत॥ असत्तानवच्छेदे च कारणस्यापि न प्रसंगः सत्ताघट इति यथा धीविकल्पानामकल्पिते
नेतेन तस्यावच्छेदे तु कारणत्वमपि नाद्रगेव स्यात्॥ न हि कल्पितेनावच्छेदे वस्तुनो वास्तवं रूपं सिध्यति॥ यथाग्निर्होमाणवक इतिवत्॥ किं च कार
णानां कार्याणां वनाद्यवनिरवालंबनात्तदास्य सत्तांगीकृता स्यादिति॥ कारणव्यापारत्वेन कारणत्वं॥ किंतु यद्भावाभावयोस्तद्भावाभावौ तत्तस्य
कार्यमितरत्कारणमिति निश्चयपदिश्यते॥ तदसत्यमेवं सति यथा तद्भावेन भवतीत्यत्र न कश्चिद्व्यापारः कारणगतस्तथा तद्भावे भवतीति कारण
सद्भावमात्रं प्रतिपादितं॥ स्यान्न कार्यविषये किंचित्करत्वं॥ अयं चैव भावि नित्याभावादेः कश्चित्कारणमनन्तत्वमानद्भावे भवतीति कारणसद्भाव

न्या॰कु॰चं॰ मात्रं प्रतिपादितं॥ यस्मात्कार्यविशेषे किंचित्करत्वं कथं चैव वा नित्ये गगनादेः क्वचित्कारणत्वसिद्धिस्तस्य नित्यत्वव्यापित्वाभ्यां देशकालकृतव्यति
७५ रेकासंभवात्॥ किंच तस्मिन्सति भवतीति वचनेन यो निर्दिष्टो भवतीत्यनेन च नष्टो योऽपकार्योपकारकभावाभावे संभवति॥ सभवतीति
र्दर्शमात्र प्रतिपादनमेव कृतं स्यात्तत्र यस्य रूपेण प्राप्तिलब्धकर्मादभिधानप्रवृत्तिः॥ द्वितीयादिविभक्तिवाच्यतानक्वचित्स्वादिनि स्वरूपस
त्तामात्रेऽर्थोपायाः प्रतिपादिताः स्युर्न सामर्थ्यभ ॥ अथ पूर्वकालभावित्वमात्रं कारणत्वं न तु व्यापारः कथ्यते तर्हि सर्वेषां पूर्वकालभाविनां
गहृदरवनिर्नाकारणत्वं संसारहर्मिप्रसंगोऽस्यात्॥ अथ नियमेन पूर्वकालभावित्वं तर्हि मेघ्रीदेरपि परं प्रतिकारणत्वं स्यान्नदविशेषात्॥ न नु
नैव मर्वादिः पूर्वमेव भवत्युत्तरकालमप्यनुवृत्तेरित्यन्यत्रापि समानं नहि तं नवः परोऽपि निजुत्तरकालं नानुवर्त्तते प्रतीति विरोधात्॥ न नु निय
तकाल एव कार्यकारणभावोऽत्यन्तेर्लतु संयोगोपलक्षिताया सामग्र्याएव परं प्रतिकारणत्वात्॥ परस्यापि स्वसत्ताभव्यता एव कार्योत्पत्तमप्य
था विकलकारकसामग्रीसन्निधाने पुनः परीतरोत्पत्तिः स्यात्॥ नन्वेवं पूर्वतराभाविनि कारणेऽनंतरतराभाविनि च कार्ये स्वकालनियते
सहभावाभावात्॥ इतरेतरस्य व्यपेक्षं यत्कार्यत्वं कारणत्वं च सन्न दुर्घटम्॥ किंवा सनिव्यापारे नियमेन पूर्वकालभावित्वमात्रेण कारणत्वक
ल्पने बीज प्ररकादिरूपोत्पत्तितरव पवगनानां रसादीनामपि कारणत्वं स्यात्॥ न पारस्याद्युत्पत्तौ न द्वय पवनतरूपस्याप्युत्प रूपादीनां
नियमेन सजात्यारंभकत्वं न स्यात्॥ न देवं परमने कार्यकारणभावस्य विचार्यमाणस्यानुपपद्यमानत्वात्॥ द्व्यणुकार्यविशिष्टपान्तश्च
व्याख्येऽनित्या उत्पत्तिमत्त्वादित्याद्ययुक्तं हेतोः स्वरूपासिद्धत्वादुत्पत्तिमत्त्वं हि कार्यत्वमुच्यते न च तोकप्रकारेण भवन्मते सर्वथासिद्धं॥ आत्म
पासिद्धंचस्वावयवेभ्योऽत्यंतविभिन्नस्य स्वसिद्धिर्वयवावयविनावत्यंतं भिन्नो भिन्नप्रतिभासत्वाद्धटपटवत्॥ घटपटादेर्हि भिन्नप्रतिभास ७८
त्वमत्यंतभेदे सत्येवोपलब्धमिस्यवयवावयविनो सद्गुपलभ्यमानं कथं नात्यंतभेदं प्रसाधयेदन्यजात्यपसनदप्रसाधकत्वप्रसंगात्॥ न च्या
नयोर्भिन्नप्रतिभासत्वमसिद्धं॥ पटाद्यवयविप्रतिभासस्यान्त्यादयवयवप्रतिभासवेलक्षण्येन नाशेषप्राणिनां सुप्रसिद्धत्वात्॥ व्याविरुद्ध
(सन्तति भिन्नतया प्रतिभासत्वादित्यस्य कुतश्चित्प्रमाणादप्रतीतेः। ननु पटो ऽनुमानान्नतेभ्यः तन्तुभिः भिन्नोऽनवद्यो प्रतिपद्यते,

धर्माध्यासतोप्यनयोर्जलानलवद्देशेन च विरुद्धधर्माध्यासेनयोरसिद्धः॥ पटो हि पटत्वजातिसंबंधी विलक्षणार्थक्रियासंपादको निद्य
येन महत्त्वयुक्तः संतंतवस्तंतुत्वजातिसंबंधिनोल्पपरिमाणादिधर्मोपेताश्चेति॥ कथं नानयोर्मिथो नैर्विभिन्नकर्तृकत्वाद्घटपटवत्॥ तंतवो
हि वात्यप्रवेणीवंशकरव्यापारादात्मलाभं प्रतिपद्यंते तु रितं तु वेमशलाकादितंतुवायव्यापारादुपरूढ इति॥ भिन्नविभिन्नज्ञानिकत्वाच्च विभाग
वदवयवावयविनोर्भेद एव॥ पूर्वोत्तरकालभावित्वात्पितापुत्रवत्॥ विभिन्नपरिमाणत्वाच्च बदरामलकवत्॥ प्रतिभासभेदे विरुद्धधर्माध्यास
दौ च सत्यप्यनयोरभेदे पदार्थसंकरः स्यात्सर्वत्र चाभेदे व्यवच्छेदप्रसंगेन॥ नहि प्रतिभासभेदादिकं विहायान्यद्व्यवहारनिबंधनमुत्प्रेक्षामहे॥
तादात्म्याभ्युपगमे चावयवावयविनोः प्रतिभासभेदादिकमनितुर्लभं॥ तादात्म्ये हि तंतुकलसुष्मनेनस्मिन्सति कथं प्रतिभासभेदो विरुद्ध
र्माध्यासादिकं। वास्यादि हि भिन्नविषयत्वान्नयोः॥ यदि चातंत्वाद्यवयवेभ्योर्थान्तरं पटाद्यवयवी तर्हि तंतुदेशोपि स्यात्तद्देशो नार्थान्तरं॥ नैषिस्त्वावय
वेभ्यस्तत्वेऽनवयवान्निरंशाः परमाणवस्तेभ्यश्चाभेदे सर्वस्य कार्यस्याग्रामस्यानुपलंभः स्यात्‌ तस्मादर्थान्तरमेवावयवेभ्योवयवी प्रतिपत्तव्य
इति॥ यदप्युच्यते वयवेभ्यो नास्त्यर्थान्तरभूतोवयवी वृत्तिविकल्पाद्यनुपपत्तेः। एकत्रविषाणवन्न चेयमस्ति ज्ञानपात्यर्थान्तरस्थूलः पटाद्यवयवी
तंत्वाद्यवयवेष्वेकदेशेन वर्त्तते॥ सर्वात्मना वा न तावदेकदेशेनावयवव्यतिरेकेणावयविनोपरदेशाभावाद्देशा॥ नैषप्यनेनत्वं वर्त्तितव्य
मित्यनवस्थास्यात्‌ सर्वात्मना वृत्तावेकत्वेवावयवेषु सर्वात्मनास्य वृत्तत्वादन्येषामवयवानामवयविशून्यताप्रसंगः॥ यावंतोवावयवास्तावंतोव
यविनः स्युः अवयवस्त्ववयवं तस्य सर्वात्मना परिसमाप्तत्वात्‌ तस्यासमीचीनं॥ यतोवयविनो निरासस्तन्त्रमिदं साधनं प्रसंगसाधनं वा यदि स्वतंत्रं
धर्मिसाध्यपदयोर्व्याघातोऽप्रथयेदं न चास्ति वैन्नि॥ हेतोश्चाश्रयासिद्धत्वावयविनोसिद्धत्वात्‌॥ न च परस्यासत्त्वं व्याप्तं समवायवृत्तेरनभ्युपगमे
पि भवनारूपादेः सत्त्वाभ्युपगमात्‌। एकदेशेन सर्वात्मना वावयविनो वृत्तिप्रतिषेधे विशेषप्रतिषेधस्य शेषाभ्यनुज्ञाविषयत्वात्प्रकारांत
रेणावृत्तिरभ्युपगतास्यादन्यथा न वर्त्तत इत्येवाभिधातव्यं॥ वृत्तिश्च समवायलक्षणा सर्वत्रैकत्वान्निरवयवत्वाच्चाकाशस्यैकदेशावान्यविषय

न्या॰कु॰चं॰
७५

त्वंकार्त्स्न्यैकदेशाद्यां विवेर्भेदविषयत्वाच्चाभिन्नैव यवि निमग्नं निरस्ता॥ कार्त्स्न्यमभिनिवेशेनैकत्वे सत्यशेषस्याभिधानं॥ एकदेशशब्देनानेकत्वे सति
कस्यचिदभिधानं॥ नावनौ कार्त्स्न्यैकदेशशब्दौ भेदे सत्येव प्रतिपन्नत्वादेकस्मिन्नवयविन्यनुपपन्नौ नन्वेवं स्वतन्त्रसाधनं प्रसंगसाधनं वा
स्यैकानिराकरणात्॥ ननु परैरिष्टः प्रमाणाप्रमाणात्वा यदि प्रमाणान्नहिनयैव बाध्यमानत्वादनुत्थानं विपरीतानुमानस्य न चानेनैवास्याबाधा
नन्तामन्तरेण साध्यधर्मिनया धर्मा एव सैवासंभवात्॥ अप्रमाणं चेन्नहि प्रमाणं विना प्रमेयस्यासिद्धिरित्येतावदेवाभिधानमर्थं किं
मनुमानोपन्यासायासेनेति॥ एवं प्रतिविधीयते॥ यत्तावदुक्तं भिन्नप्रतिभासत्वादिति साधनमतो घटावयविनोः किं कथंचिद्भेदः सा
ध्यते॥ सर्वथा वा यदि कथंचित्तदा सिद्धसाधनं तयोः कथंचिद्भेदस्यास्माभिरपीष्टत्वात्॥ अथ सर्वथा तदा प्रत्यक्षबाधा कथंचित्तादा
त्म्यापन्नयोरेवानयोरबाधाध्यक्षेण प्रतिभासनात्॥ यद्यपाबाधाध्यक्षे प्रतिभासते तथैवाभ्युपगन्तव्यं॥ यथा नीलं नीलतया बाधाध्यक्षे प्रति
भासते न च कथंचित्तादात्म्येनावयवावयविनाविति॥ न चैतत्प्रतिभासिनोऽध्यक्षस्याबाधत्वविशेषणमसिद्धं॥ तद्बाधकस्य कस्यचिदपि प्रमाण-
स्यासंभवात्॥ न खलु प्रत्यक्षं तद्बाधकमतत्त्वं तन्नेदं स्यात्तत्प्रतिभासि विभासमानत्वात्॥ अनुमानमपि भिन्नप्रतिभासत्वादेर्हेतोरविशेषं तन्नद्बाध
कं स्यात्॥ भिन्नार्थक्रियाकारित्वाद्भिन्नकारणप्रभवत्वाद्भिन्नकालत्वाद्विरुद्धधर्माध्यासात्तद्भिन्नशक्तिकत्वाद्भिन्नपरिमाणत्वाद्वा॥ नना
तद्भिन्नप्रतिभासत्वादाविर्भूतादनुमानादवयवावयविनोरात्यन्तिको भेदः सिध्यति॥ प्रत्यक्षबाधितकर्मनिर्देशानन्तरं प्रयुक्तत्वेनास्यानु
ष्णोऽग्निर्द्रव्यत्वादित्यादिवत्। कालात्ययापदिष्टत्वात्॥ दूरासन्नपुरुषाप्रतिभासिना यावद्याद्यर्थेनानैकान्तिकश्च॥ नापि भिन्नार्थक्रियाकारित्वा ७५
जनकत्वादिना व्यभिचारादेकापि हि नर्त्तकी करणाङ्गहारभ्रूविक्षेपाक्षिविक्षेपाद्यनेकार्थक्रियां प्रेक्षकजनानां हर्षविषादाद्यनेकार्थक्रियां च परस्पर
विलक्षणां विदधातीति भिन्नकारणप्रभवत्वमप्यङ्कुरादिनानैकान्तिकमेकस्याप्यङ्कुरस्य क्षित्याद्यनेककारणकलापादुत्पत्तिप्रतीतेः॥ भि
न्नकालत्वादपि रंजकरंजनवस्त्रतन्तुभ्यः पटस्य भेदः प्रसाध्यते॥ पटावस्थानं तन्तुभ्यो वा प्रसाध्यते॥ पटावस्थानं तन्तुभ्यो वावयवमपदेश सिद्धसाधनं

नेभ्यः न तद्देशस्यास्माभिरभ्युपगमात्॥ द्वितीयपक्षे त्वसिद्धो हेतुः पटावस्थानं तन्तूनां पटाद्भिन्नकालतयासंभवात्॥ विरुद्धधर्माध्या
सेपि धूपदहनादिनानैकान्तिकत्वात् न तदत्यन्तभेदप्रसाधको न खलु हस्तलग्नेन रूपदेशे शीतोष्णस्पर्शलक्षणविरुद्धधर्माध्यासेपि धू
पदहनादेर्भेदोस्ति॥ न च हस्तलग्नेन रूपदेशयोरवयविनोरन्यस्पर्शाभावात् न धूपदहनावयवविनस्त्वभिधानव्यं॥ प्रत्यक्षविरोधात् विभि
न्नदेशकालादिभिन्नपरिमाणत्वाच्च तन्तुपटादीनां कथंचिदवस्थाभेदस्य च सिद्धेरन्यपुनरात्यन्तिकोभेदस्तत्र चासिद्धसाधनं॥ अभिन्न
प्रतिभासत्वादेरप्यवयवावयविनोः कथंचिद्भेदस्यैव प्रसिद्धेः सिद्धं कथंचिदनर्थभेदग्राहिणाध्यक्षस्याबाधत्वविशेषणं॥ यद्यद्रूपतया
प्रमाणेनोपलभ्यते तेन तद्रूपं न भवति॥ यथा घटः पटरूपतया न प्रतीयते। तथात्यन्तभेदरूपतया वयवावयविनाविति नैत्वा तद्व्यवयवानामव
स्थाविशेषः स्वात्मभूतः शीतापनोदाद्यर्थक्रियाकारिपटादिवयवीप्रतिभासते॥ न पुनः तेभ्योत्यन्तमर्थान्तरभूतस्तथाविधस्यासत्व
मेप्यप्रतिभासमानात् यत्र प्रतिभासते द्रव्यस्वभावत्वात्समवायात्कार्यकारणभावादिविशेषणविशेष्यभावाद्वा॥ न तावद्द्रव्यस्व
भावत्वात् भूयोवयवद्रव्येणसत्वावयविनो द्रव्यत्वमित्यभ्युपगमाद्व्याघातप्रसंगात्॥ नापि समवायात्कथंचित्तादात्म्यव्यतिरेकेणावयवसमवा
यस्य समवायविशेषणविशेष्यभावत्वात्॥ नापि कार्यकारणभावात्॥ कुंकुमकाश्मीरादिष्वभेदप्रतिभासप्रसंगात्॥ तन्त्वाद्यवयवानां पटाद्यवय
विनं प्रति समवायिकारणत्वात् तेनैवाभेदप्रतिभासस्तस्याप्यसुंदरं॥ समवायासिद्धेः समवायिकारणत्वस्याप्यसिद्धेः॥ नहि कथंचित्तादात्म्यं
तेरेणान्यः समवायः॥ न चापरिणामित्वव्यतिरेकेण वान्यस्य समवायिकारणत्वं कापि विशेषणविशेष्यभावात्॥ दंडपुरुषयोरप्यभेदप्र
तिभासप्रसंगात्॥ यच्च बहिः स्फुटविशिष्टास्तंतवः इति तंतुपटयोर्विशेषणविशेष्यभावोस्ति॥ अन्यथा दंडपुरुषयोरपि प्रसंगो न चैतेभ्यो व्यवयविनो
त्यन्तभेदसत्यनुपलंभकारणाभावात् सर्वथा सा वुपलभ्येत न चोपलभ्यते तेनोनासौ ततोत्यंतभिन्न इति॥ यच्च तेभ्योत्यंतभेदेन भिन्नं नोपलभ्यते तत्त
तोत्यंतभिन्नं यथावयविनः स्वरूपं अवयवेभ्योत्यंतभेदेन भिन्नो नोपलभ्यते चावयवीति॥ यदप्युक्तं स्यन्तत्र साधनं प्रसंगसाधनं वेत्यादि॥ न

स्या॰कु॰चं॰ ७६

तस्य सारंभलोभवृत्तसंगसाधनं स्वतंत्रसाधनं वा किमेतावदपि स्वतंत्रसाधने धर्मिसाध्यधर्मयोर्व्याघातस्यायुक्तं ॥ तदप्ययुक्तं ॥ यतो नावय
विनः सद्भावनिरासार्थमिदमुच्यते ॥ किं तर्हि निरस्तं न भेदस्य तस्यावयवेभ्योऽत्यन्तभिन्नोऽप्यवयवी कुतश्चिदपि प्रतीयते तदुक्तं ॥ यस्तु प्रतीतिसि
द्धस्तत्त्वावयवावयवानामानाननिश्चितानीभावादिविचारेण नानात्मभूतो वस्यापि विशेषः ॥ यदवयवावयवीनामसौ निरस्यते न तत्र चैतन्निविकल्पादिदूष
णानवतारणम् ॥ अर्थान्तरभूतं हि वस्तु वर्तमानमेकदेशेन सर्वात्मना वा वर्तेतेत्यादिदोषमास्कंदति ॥ न पुनः स्वात्मभूतं तदेतत्प्रापरिणा
मात् ॥ यतस्वात्मनोऽर्थान्तरेव स्वेषु वर्तने ॥ न तत्सर्वात्मनैकदेशेन वा यथा कुंडे बिल्वादिष्वनेकासु देवतादिवत्स्वात्मनोऽर्थान्तरेव यवेषु व
र्तने ॥ चावयवेनीतिप्रसिद्धान्यदुक्तं इति समवाय इत्यादि ॥ तदप्ययुक्तं किंमात्रं समवायस्य निर्मूलमुन्मूलितत्वेनाकाशकुशेशयवत्कस्यचित्क
चिद्वृत्तिलानुपपत्तेः ॥ यदप्यभिहितं कार्त्स्न्यैकदेशशब्दयोर्भेदविषयत्वादभिन्ने तयोर्वृत्तिरयुक्तेत्यादि तदप्यभिधानमात्रमनेकाव
यवेष्वेकस्यानंशस्यार्थान्तरभूतस्यावयविनो वर्तमानस्याप्रतीतेः कार्त्स्न्यैकदेशं च परित्यज्य प्रकारान्तरेणापि वृत्तेरप्यप्रतीतेः ॥ यत्खलु
यत्र वर्तते तन्नैकदेशेन यथा स्थूणासु वंशः ॥ सर्वात्मना वा यथा कुंडे दधीति ॥ अतः प्रकारद्वयानभ्युपगमेऽवयविनोऽवयवेषु वृत्त्यनुपपत्ति
स्तद्व्यापकयोरेकदेशसाकल्ययोरभावात् ॥ तदनुपपत्तौ चास्यानः सर्वथा भेदाभाव इत्यादि ॥ तन्त्वाद्यवयवेभ्योऽसर्वथाभिन्नः पटाद्यवयव
वेभ्यो सर्वथाभिन्नः पटाद्यवयवी कार्त्स्न्यैकदेशाभ्यां वृत्तिता पुनः सर्वथाभिन्नं न तत्रस्य कार्त्स्न्यैकदेशाद्वृत्तिः ॥ यथा कुंडादेर्दध्यादेः
कार्त्स्न्यैकदेशाद्वृत्तिस्त्वावयवेष्ववयविन इति ॥ निरंशैकस्वभावत्वे चावयविनः सकृदनेकावयवव्यापित्वानुपपत्तिस्तथाहि ॥ यन्निरंशै ७६
कस्वभावं द्रव्यं तन्न सकृदनेकावयवव्यापित्वानुपपत्तिस्तथाहि ॥ यन्निरंशैकस्वभावं द्रव्यं तन्न सकृदनेकद्रव्यव्यापि यथा परमाणुर्नि
रंशैकस्वभावं चावयविद्रव्यमिति ॥ न चाकाशादिनानेकान्तस्तस्यानंतानादिप्रदेशात्मनो निरंशत्वासिद्धेः ॥ यदि वा परदेनेकं द्रव्यं तन्न सकृन्निरं
शैकद्रव्यव्याप्तं यथा कटकुड्यादि परमाणुनानेकद्रव्यं चावयवी चावयवा इति ॥ निरंशत्वे चावयविनः कौपीनादिनाशरीरस्यैकदेशावरणे

सकलशरीरस्याव्रियत्वेनावयव्याव्रियते॥ न हि विवसितवयवसकलस्यास्यानुपलब्धिप्रसंगः॥ अथोच्यते नैतदावरणेपि न शरीरस्या
वरणमवयवावारकद्रव्यसंयोगस्य तदावरणे सामर्थ्याभावात्॥ न खलु यावानवयवद्रव्यसंयोगोवयवमावृणोति॥ तावानेवावयवि
नं तस्य महत्वात्॥ यद्येवं प्रदेशावरणमलिनवासिचेन्नानंतस्य प्रदेशाभावात्तयानदावरणानुपपत्तेः रूपपत्रेनो वानंशेनाव्यापा
नो विरुद्धधर्म्मसंसर्गी यो विरुद्धधर्म्मसंसर्गिनं न तदेकं यथा जलानलादि विरुद्धधर्म्मसंसर्गि चायं तन्नानैकस्वभावस्तथावयवि
स्वरूपमिति। विरुद्धधर्म्मसंसर्गोप्यस्याभेदे सर्वस्य भेदवार्त्तोच्छेदः [illegible] एकद्रव्यसंयोगेनावयविनः प्रदेशेनापि
नास्यावरणं॥ न हि तत्प्रदेशेप्यस्योपलब्धिप्रसंगात्तस्य मध्येप्यवयवस्योपलम्भेनाविशेषात्॥ न ह्यवयवावरणेनावरणेनावयविनः कश्चि
द्विशेषोस्त्युभयत्रास्यानावृतत्वाभ्युपगमात्॥ ननु समस्तासमस्तयोरावृतयोर्भेदविषयत्वाद भिन्नेवयविनि मत्वनिरस्तु केन्यापि प्रयोगे वक्तव्यो
न्तरसमवायिनः कथंचिद्भेदनिवारणात्॥ अवयवावरणेप्यवयविनोनावरणे च तस्य तत्र वर्त्तनविरोधः॥ यत् खलु यत्र वर्त्तते तस्यावरणे
तस्याव्रियमाणत्वं। यथा कुंडावरणे बदरेषु वर्त्तते तेषु चावयवेष्ववयवी न तथा पटदुपलब्धिपूर्विका यस्योपलब्धिर्न तस्यानुपलब्धौ तदुपल
ब्धिर्यथा स्फटिकादिसंस्पर्शनानुपलब्धौ शृंगारकारेतरवयवोपलब्धिरिति॥ अथावृतानावयवप्रदेशात् तस्यानुपलभ्यत्वमिष्यते॥ कथमेवम
स्यैकत्वं स्यादनुपलभ्यानुपलभ्यत्वलक्षणविरुद्धधर्म्माध्यासतः कथंचिद्भेदप्रसिद्धिः॥ रक्तारक्तत्वलक्षणविरुद्धधर्म्माध्यासाद्भूतया
त्येकस्मिंस्तन्त्वावयवे कुंकुमाभिषयादावयवीरज्यते न वापरिरज्यते॥ कृत्स्नेप्यवयविनि रक्तप्रत्ययप्रसंगः॥ ननु चावयविनो रक्तत्वं
कुंकुमादिद्रव्येणासंयोगः स चाव्याप्यवृत्तिर्न हि रूपादिवत्स्वाश्रयमसौ व्याप्नोत्यवयवान्तरेतदुपलम्भावप्यनुपलभ्यमानत्वात्कथ
मेकत्र रंगे सर्वत्र रंगप्रसंगः॥ इत्यप्यसांप्रतं निरंशावयविनि संयोगस्याव्याप्यवृत्तित्वानुपपत्तेः तस्याव्याप्यवृत्तित्वं हि सर्वद्रव्यापकत्वं, या
नियतप्रदेशावर्त्तमानत्वमवयवान्तरेवयविन्युपलभ्यमानेप्यनुपलभ्यमानत्वं॥ व्याप्तत्वापि विकल्पोनुपपन्नो द्रव्यस्यैकस्य सर्वत्राद्विषय

न्या·कु·चं· यत्वानभ्युपगमात्॥ निरंशत्वे चास्य कथं न तत्संयोगेन साकल्येन तद्व्याप्तिस्तथा च व्याप्तौ वा निरंशत्वविरोधः। द्वितीयविकल्पस्त्वनुपपन्नो
७७ यद्यवयविनो निष्प्रदेशत्वमभ्युपगम्येत॥ तदभ्युपगमे चापसिद्धान्तप्रसंगो योगैस्तस्य सप्रदेशत्वप्रतिज्ञानात्॥ तृतीयविकल्पोऽप्यनेन
न प्रत्याख्यातस्तस्य निष्प्रदेशत्वानभ्युपगमे चावयवान्तरेष्ववयविन्युपलभ्यमानेन तत्संयोगस्यानुपलभ्यमानत्वानुपपत्तेः तन्नास्याव्या
[illegible] प्यवृत्तित्वमुपपन्नो वा सिद्धो विरुद्धधर्माध्यासस्तत्कथमस्य सर्वथैकत्वं स्यात्॥ अथ तस्मिन् रज्यमानेऽप्यसौ न रज्यते॥ तदप्ययुक्तं दृष्टे
ष्टविरोधात्॥ नहि तंत्वाद्यवयवे रज्यमाने पटो न रज्यत इति केनचिद्दृष्टमिष्टं वा। निरंशत्वे वावयविनश्चित्ररूपत्वं निपत्यानुपपन्नं नीला
दिचित्राकारता॥ विभिन्नप्रतिभासविरुद्धधर्माक्रान्तानामेकत्वायोगात्॥ नहि नीलं पीतमिति शाकं च कुन्तपाभूतानामप्येवामेकेनानेकं जगत्स्यात्॥ न
तु च नीलादीनि भिन्नरूपाणि चित्रमिति व्यपदिश्यन्ते॥ तेषां विभिन्नप्रतिभासादिनत्वा चित्रज्ञानागोचरत्वात्॥ किं त्वेकमेव तच्चित्रसंज्ञकं रूपं तच्चो गादवयवैश्चि
त्रैः यथा शुक्लयोगाच्छुक्लः। तत्रापि किं शुक्लादिविशेषशून्यं रूपमात्रं चित्रं स्यात् शुक्लाद्यवयवा वा समुदिताः शुक्लादिरूपविलक्षणं वा न दूष्यं तन्नतावद्रूपमा
त्रं विशेषशून्यस्य सामान्यस्य क्वचिदप्यनुपलब्धेः॥ नापि नीलाद्यवयवा एव समुदिताः प्रत्येकं तेषां चित्रताभावात्॥ नहि नीलं चित्रं पीतं चित्रमित्येकैकशस्ते
षां चित्ररूपत्वमस्ति॥ समुदितानां तु विशेषनीलत्वस्य संभाव्यः। समुदिता हि बहवस्ते उच्यन्ते॥ चित्रमित्येकं न च बहूनामप्यामावयवानां विशेषाणामेकरूपं भवि
तुमर्हति॥ किं चैते नीलादयः किमाश्रयव्यापिन एकदेशवृत्तयो वा। यद्याश्रयव्यापिनस्तर्हि एकेनैव नीलेनाश्रयस्य व्याप्तत्वादन्येषां निरवकाशता॥ एकदेश
वृत्तित्वे तु पूर्वोक्तन्यायादाश्रयस्य सप्रदेशाः सन्ति॥ निरंशत्वादवयविनः। अथावयवानामेव ते तानि रूपाणि॥ न हि स्वावयवी नीरूपत्वात्। तथा चास्याप्रत्यक्षत्वं नीरू ७७
पस्यापि प्रत्यक्षत्वे गगनादेरपि प्रत्यक्षताप्रसंगः॥ अथ शुक्लादिरूपविलक्षणं तच्चित्रं रूपं तर्हि परिदृश्यमाननीलादिविशेषव्यतिरेकेणाविलक्षणे
वर्धनीतिः स्यात्॥ न पुनः स्वावयवाभिन्ना ज्ञायमाना नीलादयः प्रतिभासन्ते॥ नहि शुक्लादिविलक्षणोऽपि नीलादिप्रतिभासमानेषु क्वचन भिन्नानभ
ति॥ किं चैते नीलादयः स्वाश्रयावयविनोपकारका अपकारका वा। तत्राद्यः पक्षोऽयुक्तो पकारकाणामुपाधित्वायोगात्॥ द्वितीयपक्षे तु तस्योपकारकोपा

ध्यग्रहणे तदुपकार्यत्वेनोपाधिमतोऽप्यग्रहणात्सर्वाग्रहणप्रसंगः। निपतेनोपाध्युपकार्यत्वेनास्यप्रतीतेर्नैतत्प्रसंगस्येति न हि तदुपकार्यत्वेनास्यप्र
तीतौ समस्तोपाध्युपकार्यरूपता। तदुपकार्यत्वेनास्यप्रतीतेर्नैतत्प्रसंगस्येति न हि तदुपकार्यत्वेनाप्यस्याग्रहणात्सर्वाग्रहणानुषंगः। चैकोपको
पाध्युपकार्यत्वेनास्य प्रतीतौ तदुपाधिविशिष्टत्वेनैव ग्रहणात्तदुपाध्यंतरविशिष्टत्वेनाग्रहणान्न सर्वाग्रहणप्रसंग इति चेत्तर्हि एकस्याप्यवयविनो गृहीता
गृहीतरूपद्वयप्रसंगान्निरंशत्वव्याघातः। न हि तस्यैकोपाध्युपकार्यत्वमेव रूपमपितु समस्तोपाध्युपकार्यत्वं। तदा विलोपाध्यधीनप्रतीत्यभावेऽपि तु न
शक्यते॥ ननु सत्युपाध्युपकार्यानंतस्यशक्तयो भिन्नास्तित्वेकोपाध्युपकार्य्यशक्तिविशिष्टस्योपाधिमतो ग्रहणे तदुपाध्यंतरोपकार्यशक्तिविशिष्ट
स्याग्रहणान्न सर्वग्रहणमिति चेन्नाप्युपाधिमतोऽशेषशक्त्यात्मकत्वादेकशक्तियुक्तस्य ग्रहणेऽशेषशक्तियुक्तस्य ग्रहणप्रसंगादुपाधिवर्णस्याप्यशे
तैरत्ने त.पु. षस्य ग्रहणानुषंगतः सर्वग्रहणमनिवार्यं। येन वहिरूपेण सोऽवकोशात्किं विभागिन्यतेनैव परान्नपि रूपांतरपरिकल्पनेन वस्या निरंशत्वप्रविघा-
तिप्रसक्तिः॥ किंच हस्तादेराकाशविभागाद्यदेव शरीराकाशविभागस्तदेव पादाकाशसंयोगजः। शरीराकाशसंयोगजः स्पंदेकस्यैवायवयवेनैवाकाशे
नैकदेव संयुक्तो वियुक्तश्चेत्यन्योन्यविरुद्धरूपद्वयाक्रांतः कथमेकोऽनेकत्वमाप्नुयात्। यद्यन्योन्यविरुद्धरूपद्वयाक्रांतेनैकेनानेकं यथा वस्त्रान्तरे
तरांगुलिस्वरूपमन्योन्यविरुद्धरूपद्वयाक्रांतमाकाशादिना संयुक्तेतररूपः शरीराद्यवयवीति। एवं चलाचलादिलक्षणविरुद्धधर्मद्वयेप्येकाने
प्रतीतयो त.पु. नैकत्वनिषेधो द्रष्टव्यः। पाणिपादाद्यवयवेषु हि चलनित तत्स्थदेशे शरीरावयविन स्थलत्वमन्यत्र चालत्वापत्ति। ततो नावयवेभ्योऽत्यंतभिन्नो निरंशोऽवयवी
प्रतिपत्तव्यः। किं तर्हि तंत्वादयश्चयानामेवानां विशेषविशिष्टानां कथंचिदेकत्वपरिणतिलक्षणोऽवयवी स्याद्विशेषश्चायमवयवी
प्रतिपत्तव्यः। तस्यैव च महत्त्वादयः सर्वे नरलिंगमेव संस्पृशन्तीति प्रतीतेरिति॥ ॥ ननु रूपादिव्यतिरिक्तस्यावयविनः प्रत्यक्षप्रमाणादप्रतीतेः क
थं तदभ्युपगमः। ते तावत्तत्प्रत्यक्षतस्तावद्धि न तद्व्यतिरिक्तोऽवयवी प्रत्यक्षतः प्रतीयते नानुमानतो वा तन्नानवस्थात्प्रत्यक्षतस्तु रूपादीन् द्विधा भवतस्तदेव हि रूपा
दिकमेवावभासते नापरोऽवयवी न स्पैसावयविलक्षणपरैर्योनकिंचिदनिर्दिष्टसंज्ञामात्रभेदात्॥ नाप्यनुमानतः प्रत्यक्षाविषयेतस्याऽतेः यदि दिक्रा॰

न्या·कु·चं· विलक्षणस्य तनोवयवी निष्पन्नः स्यात्तेन चावयविना स्थूलं किंचिल्लिंगं न तदा किंचिद्वस्तु सादृश्यं न दर्शनादस्यावस्तुतोपत्र ॥ न च रूपादिव्यतिरेकेणास्यैव व्यसोप
१८ लब्धप्रतिभासेन ॥ अतो व्यथाहुकमाणाभावादभाव एव व्याप्यान्तस्थूलकंप्रमाणां नास्ति ॥ न च सत्यथारूपविपाणं नास्ति ॥ अवयविनो स्थूलं किं
चित्रमात्रमिति ॥ तदुत्पत्तौ कारणानुपपत्तेः अथ तदुत्पत्तौ कारणं नोपपद्यते अन्यान्नास्ति यथा एवं ध्यारूपं धर्मेणोपपद्यते ॥ अवयवाश्च संस्तौ किंचित्का
रणमिति तत्र प्रसिद्धे ॥ अणुकारणस्य व्यणुकस्य तोरिकारणं परमाणुसंयोगः स चैकदेशेन सर्वात्मनैकदेशेन वा नोपपद्यते ॥ सर्वात्मना हि परमाणूनां सं
योगे पिंडः स्यादणुमात्रत्वप्रसंगात् तद्वयवयविनेव जलानां जलं ; नाप्येकदेशेन, तेषां तदेकदेशासंभवात् तत्संभवे तेषां परमाणुत्वानुपपत्तेः दिग्भागभेदतः
परमाणुषट्केन युगपत्संयुज्यमानानां तेषां षडंशतापत्तेः ॥ तस्मादम्भोलालौकाकारस्यापरमाणवः स्वपरमार्थेनाभ्युपगंतव्याः ॥ न चावय
विद्व्यानभ्युपगमेन्योन्यासंबद्धपरमाणवः सलाकाकल्पेषु वयवः सलाकाकल्पेष्वणुषु स्थूलैकाकारप्रतिपत्तिर्न स्यादित्यभिधातव्यं ॥ केशोडुकेतिमिर
कोपलब्धिवत्तत्रानियतत्वोपपत्तेः ॥ यथैव हि तैमिरिकस्य स्थूलैकाकारप्रतिभासे पिकेशेषु न दाकारप्रतीतिर्भवत्येवमस्मदादेः परमाणुष्वपि तत्प्र
कैकत्वालेतैमिरिके यथा केशाः कदाचिदपि प्रतीयंते ॥ अतः स्थूलादिप्रतीतिर्भ्रान्तानेकस्मिन् स्थूलत्वाद्रूपत्वात् स्वाणी प्रत्यक्षप्रतीतिवत् ॥ किंचान
कावयवव्यापित्वं रूपरसाद्यात्मकत्वं चावयविनोभ्युपगम्यते ॥ न चास्याखिलावयवग्रहणे सत्येव ग्रहीतुं शक्यं नान्यथा तत्कृतग्रहणं चार्वाग्भागभाव्य
वयवग्राहिणाक्षमनेत्रेण स्यात् परभागभाव्यवयवग्राहिणोभयज्ञस्य देशावान्तरावदर्वाग्भागभाव्यवयवग्राहिणा न स्यात्परभागभाव्यवयव
वार्तीनभिन्नत्वात् ॥ न चव्याप्यायतरोत्र व्यापितं ग्रहीतुं शक्यमिति प्रसंगात् ॥ यथैव च देशे नाप्रतिभासेतेन तथैव तस्य व्यवहारविषयोपगम्यमानं नील
रूपतया व भासमानं अत एव च स द्व्यवहारविषयो ॥ अर्वाग्भागभाव्यवयवसंबंधितया प्रतिभासते अथ चावयवी नितयाचार्वाग्भागभाव्यवयवसंबंध्य १८
वयविस्वरूपात्परभागभाव्यवयवसंबंधित्वस्वरूपस्य विरुद्धधर्माध्यासतो भेदसंभवात् कथं नित्यैकत्वावयवानामेकेनावयविना व्याप्तिरसिद्धेन ।
७८ नत्संबंधित्वलक्षणाविरुद्धधर्माध्यासस्य स्याद्भेदवार्तानुच्छेदः स्यात् यथायस्मिन् प्रतिभासमाने यन्न प्रतिभासते तत्ततो भिन्नं यथा घटे प्रतिभासमा

नैवप्रतिभासमानः परो न प्रतिभासते॥ नापि भागाभागावयवावयविसंबंधप्रतिभासः स्वरूपे प्रतिभासमाने परभागाभागावयवावयविसंबंधप्रतिस्वरूपमिति
प्रतिभासभेदादस्य स्वभेदः॥ एतेन परभागभावस्य पक्षग्राहिणः प्रत्यक्षेणान व्यापित्वग्रहणं प्रत्याख्यातं॥ नाप्युभयप्रत्यक्षेणानस्यासंभवा
न स्थूलरूपस्य मध्यभागभावावयवग्राहे कथं स्वतः करचित प्रतीयते रूपस्य साधारणात्मकत्वमध्यस्थैनैव प्रतीतिविहीनं नहि रूपग्राहिणोभ
यग्राहिणा प्रत्यक्षेणानरूढनामग्रयते॥ रूपग्राहिणा स्यासु पप्रत्यक्षस्य रसे प्रवृत्तेस्तद्ग्राहिणा पररसन प्रत्यक्षस्य रूपे प्रवृत्तेरुभयग्राहि
चप्रत्यक्षं न स्वप्नेपि प्रतिभासतरंगिनि॥ छ॥ अवयवनिविषेधानं॥ यत्तावदुक्तं॥ चक्षुरादींद्रियप्रभवप्रत्यये रत्याशिनश्च कैनत्वेपराटि
न्यपरेत्राहिरूपमेकत्वपरिणाति विशिष्टस्थूलधी मध्यभागात्मकं विचित्राकारेयेनं प्रतिभासते स्योन्याविलक्षणानेशप्रमाणप्रचयप
पंचा पयमपसे कथमवयविद्रव्यस्य न स्वभवस्य स्यैव प्रतिभासस्तु स्वस्त ज्ञागात्मिका यदि विशिष्टाकारान्विता या तत्परिणाने वानव
विलातं॥ रूपादिभिन्निकस्यावयविनः प्रतिभासाभावादस्ताभ्युपगमे रूपादेरप्यसत्त्वप्रसंगस्तद्व्यतिरेकेणास्याप्यप्रतिभासनात॥
न खलु बिल्वामलकाद्यवयविद्रव्यरहिताः रूपादयः स्वप्नेप्युपलभ्यंते॥ यदहूपतया निर्बाधबोधे प्रतिभासते तत्तद्रूपमेव यतिपतव्यं॥ य
पानीलं नीलरूपतया प्रतिभासते चैकत्वपरिणामादिलक्षणावयविरूपतया च बिल्वामलकादिरूपमिति॥ न च तत्प्रतिभासिनो बोध
स्य निर्बाधत्वविशेषणमसिद्धं॥ न द्वाधकस्य कस्यचिदपि प्रमाणस्यासंभवात॥ न हि प्रत्यक्षादि प्रमाणं तद्बाधकं स्वतत्रो विचार्यते एकत्वा
त्मनैवार्थानामवभासनात॥ ननु चावयवसंयोगवृत्तिः कैकाद्यादिपरिणाम निर्भर्त्सिनि च नयवानां संयोगः सर्वात्मनैकदेशेन वा परतत्र
तुकं न रपुकं यस्मादेवं बदतोभवतः किं न तु संबंधाभावो भीष्टः कात्स्न्यैकदेशाभ्यामन्यप्रकारांतरेण वा संबंधाभिधानदर्शनात्॥ तत्राद्यविक
ल्पे प्रत्यक्षविरोधो भावावयवसंबंधस्य प्रत्यक्षेण प्रतिभासनात॥ तदसंबंधे रज्जुवंशादंडादेरेकदेशाकर्षणेन तस्याकर्षणं न स्यात॥ अन्येना
संबंधिनस्तस्याकर्षणेन तस्याकर्षणं स्यात्पदेनासंबंधिनस्तस्याकर्षणेन तस्य स्यामिति तत्र — — — कात्स्न्यैकदेशाभ्यां परित्यज्यप्रकारं

कर्त्ते ॥ एवं, यथा कुंभकवले कुंभस्य ... रज्जुवंशदंडादेः ... परमाणोर्नोति। अत्र

न्या·कु·चं·

नैरंतर्येणान्योन्यमवयवानां संबंधोभिप्रेतस्तत्पुनः स्निग्धरूक्षत्वलक्षणप्रकारांतरेणैवार्थानां संबंधोपलंभेन्निरस्तकुतो यदेवान्तरित्यज्यान्यत्प्रकारं
नरं संबंधहेतुः प्रतीयते॥ यच्चान्यन्नापरंजनापनिरुक्तं साकिमारंभकद्रव्यापेक्षया संयोगहेतुः स्वभावोपक्षायावान्तत्प्रपञ्चपरस्परमिति
परमाणवः षडंशाः स्युरिति। षड्भागरूपत्वे हि तेषां सावयवत्वे स्याधिकपरिमाणत्वसंभवात्कथं परमाणुत्वं स्यात् हि निरतिशयमल्प
परिमाणं स परमाणुः॥ द्वितीयपक्षस्तु न दोषाय दिग्भागभेदेनाणुसंयोगहेतुभूतस्वभावलक्षणानां सतां परमाणुष्वभिधानात्॥ कथमन्यथा
जलधारणाहरणाद्यर्थक्रियाघटादेर्निष्पत्तिः न खलु परमाणवोमी मृत्पिण्डकाकल्पास्तत्कारिणः परस्परमसंबद्धत्वात्। ये परस्परमसंबद्धा नैते
जलधारणाद्यर्थक्रियाकारिणो यथा भिन्नदेशाः परमाणवः परस्परमसंबद्धाश्च घटादिरूपेणावभासमानेन परमाणवरिति॥ अथ देशव्यवधाना
न्निर्विशिष्टसंनिकर्षिणामेषामन्यापवित्वेन नाभ्युपगमे देशव्यवधाने स्यात्प्रयत्नेन देशव्याप्यवयवित्वात्॥ एतेनान्योन्यविलक्षणानेकपरमा
णुप्रचयरूपं घटादिस्वरूपमत्यक्षभवमस्त्येवाप्रतिभासनः प्रतिपन्नः परमाणवो निर्व्यापारिणस्त्वभावाः परमाणावो हि प्रभवप्रभवमेकस्य
चित्रप्रतिभासने॥ स्थिरस्थूलसाधारणस्वरूपस्यैवार्थस्याखिलप्राणिनां प्रतिभासनात्॥ तैमिरिकोपलब्धिवत्तज्ज्ञानं नतिभासस्य
समीचीनं न हि तैमिरिकस्यापि प्रत्योन्यमसंबद्धाः केशाः कदाचिदुपलब्धिविषयाः संयोगविशेषलक्षणसंबद्धावस्थापन्नानामेवैषां
हि पयन्त्रप्रतिपत्तेः केशादृष्टांतादवयविप्रतिषेधोनुपपन्नः। केशानामेवावयवित्वात्॥ किं चावयवविनाभ्युपगमे घटादिमत्प्रत्ययो निर्विषयः स
विषयो वा स्यात्॥ न तावन्निर्विषयो घटमहंजानामीत्याद्युल्लेखेनास्य विषयसंवेदकत्वात्॥ तन्निर्विषयत्वे प्रमाणाभावात्सर्वप्रत्ययानि
रालंबनाः प्रत्ययत्वात्स्वप्नादिप्रत्ययवदित्यादि वस्तुन्निर्विषयत्वप्रसाधकं प्रमाणं वाच्यायामिति दोषो विस्तरतः प्रतिव्यूढः॥ अथ सविषयः कोस्य
विषयः परमाणुः समूहो वा॥ कः पुनरयं परमाणुसमूहो नाम किं परमाणवः स्वतंत्रा एवावान्तराणां विकल्पोनुपपन्नः परमाणूनामतीत
मणुत्वेनातींद्रियत्वात्तःप्रत्यक्षविषयत्वानुपपत्तेः तथा च सर्वाग्रहणप्रसंगाच्च चित्रत्वात्प्रत्ययव्यवहारः स्यात्॥ गुणकर्मसामान्योरेष्वप

आत्मकस्यैवप्रत्यक्षविषयत्वप्रतीतेः॥ गौःशुक्लश्चलतीत्यादिवत्॥ अथनद्यम्भःसंयोगस्यतत्त्वस्यगृहीत्वाद्रव्याश्रयत्वान्नाःतानांसंयोग
स्युपगमेचयविप्रत्यक्षत्वाद्यानानुपपत्तेः॥ न्यायस्यसमानत्वाद्द्वेषद्विष्यायेनायमेकोऽनेकवृत्तिर्नेतोऽनेनैवावयवापेक्षंचायंसंयोगोवास्त
वोवास्तवोवायद्यवास्तवःकथंप्रत्यक्षविषयोयद्वावास्तवेनेनत्वत्यक्षविषयो॥ यथागगनेन्दीवरमवास्तवश्चभवद्भिः अभिधेनोगुणसं ^ना
योगइति॥ वास्तवत्वेप्यस्यास्मदादिप्रत्यक्षविषयत्वंनयुक्तं॥ निरतिशयपरिमाणद्रव्यसंयोगत्वाद्यानिरतिशयपरिमाणद्रव्यसंयोगः
सनास्मदादिप्रत्यक्षविषयोयथाकाशपरमाणुसंयोगोनिरतिशयपरिमाणद्रव्यसंयोगइति। ननुनत्वसंयोगोस्मदादिप्रत्यक्षविषयः ^परमाणूनामन्योन्यसंयोग
किंतर्हिसंचितोऽपरमाणवःश्वित्यप्युक्तमपरमाणुत्रसरेणुपत्वस्यकृतोनत्वात्। संनिरत्वंचामीषांदेशप्रत्यासत्तिःसंयोगविशेष
त्वंवास्याद्भयथाप्यवयवसिद्धिरेवास्यसुपगतत्वावित्वात्॥ संयोगेचसमानन्यायात् यदिचपरमाणवस्तादृशाप्तदाम्हदानेकाघ
टरत्यादिप्रत्ययोनस्यात्॥ नेत्यामहत्त्वाभावाद्धेतुत्वाद्वाथसेनावनप्रत्ययवत्ताचासोपरते॥ यथैवहिसेनांगेषुतुप्रत्येकमगृह्यमाणेष्वप्येके ^वनांगेषु
एक, वनगुल्मादौ घैकत्वनेमकासेनेत्येकप्रत्ययःप्रादुर्भवत्येवंपरमाणुष्वन्ननपत्वासत्यासन्नेकत्वकस्याग्रहणाम्महानेकोघटइत्यादिप्रत्ययःप्रादुर्भ
वतीतिनदृष्टांतःपरमाणवोमयमतींद्रियत्वेनानुपलब्धोनत्वत्यक्षविषयत्वानुपपत्तेः॥ उपलभ्यमानानांहिवृक्षाणांसेनांगानांधवादि
वनांगानांचैकासेनेत्याद्यभेदप्रत्ययविषयत्वंदृष्टंनानुपलभ्यमानानांनचावयव्यनभ्युपगमेसेनावनप्रत्ययस्याप्यस्त्यनुपपत्तेःयथ ^अ
दिवैकावयव्यनपेक्षत्वत्वदृदयपेवधैकप्रत्ययःस्यात्तदादेशभेदेग्रहणभेदोपलंभःस्यात्। यत्रैकावयव्यनपेक्षोभेदःस्वरूपमात्रनिबंधनोऽभे
दप्रत्ययस्तत्रदेशभेदेग्रहणभेदोदृष्टोयथासेनावनांगेष्वेकावयव्यनपेक्षस्त्ववयवेष्वभेदप्रत्ययोभवतेष्टइति। सुप्रसिद्धोहिसेनावनांगेषुदेशभे
दाद्ग्रहणभेदोदूरादेकत्वग्रहणस्यासन्नेनेकत्वग्रहणस्यचावभासनात्॥ नैवंदेशाविकल्पेग्रहणविकल्पोऽवयविनिघटादावस्ति॥ किंचतदंगेष
षे^ कावयव्यभावेपिदेशप्रत्यासत्तेःसंयुक्तसंयोगस्यवायकस्यनिमित्तस्यसद्भावेकासेनेत्याद्यभेदप्रत्ययोयुक्तःपरमाणुष्वनुकस्यचिदप्येकस्यनिमि

* सेनावनप्रत्ययवद्धीति व्याख्यानो घटते, सेनावनांगानाम् ...वेलेन -
गुणिघते —

तस्यासंभवात्कथमसौ युक्तः। यच्चान्यदुक्तं। स्थूलादिधर्मा निर्भासते तस्मिंस्तद्रूपलक्षणत्वादित्यादि तदप्यसमीचीनमभिधानमनस्मिंस्तस्य प्र
त्यक्षसुखोपलंभमंतरेणानुपपत्तेः। न च प्रसिद्धमुख्यदुःखस्य स्थायिनो वपुरुषस्य दुःखयोर्दर्शनेन च स्थौल्यादिकं मुख्यतो भवतः क्वचित्प्र
सिद्धमव्यभिचारिसिद्धिप्रसंगात्। यदप्यभिहितं सर्वथाभागभाग्व्यपदेश्या हि एकोत्पादितं तदप्यभिधानमात्रं प्रत्यक्षस्मरणादिसहायेनात्म
नार्वाक्परभागद्वयव्यापकत्वस्यावयविनो ग्रहणोपपत्तेः। न त्वस्माभिः प्रत्यक्षादिना तत्पर्यायद्वयं ग्रहणकोभिविनेयेनायं दोषः
स्यात्। किं तर्हि तत्परिणतात्मनस्तद्भावस्य संतानविचार एव सर्वथा साधितः। अर्वाक्परभागभागावयवसंबंधिनयावयविरुद्धधर्माध्या
सात्मनिभासभेदाद्वावयविनः कथंचिद्भेदः प्रसाध्येत। सर्वथा वा प्रसिद्धिकथंचित्तदासिद्धसाधनं। न खलु तत्संबंधिनो वयविनो योगवन्नि
रंशत्वमस्माभिरपीष्यते तत्प्रतिसंबंधिसंबंधिनः कथंचित्भेदाभ्युपगमात्। सर्वथानन्दोद्देशसाधनेन तु रूपादिलक्षणेनानेकान्तस्य रूपरसा
दिलक्षणानंतरमप्युपादानसहकारित्वाकिल लक्षणाविरुद्धधर्माध्यासेप्यभेदाभ्युपगमात्। नहि रूपलक्षणस्य रूपलक्षणानंतरमप्युपादानत्वात्कि
न्त्वरसादिलक्षणानंतरं प्रति सहकारित्वात्किं रसादेः स्वपि रूपत्वप्रसंगात्। तथा हि रसो रूपस्वभावो रूपलक्षणोपादानसद्भावेनोत्पाद्यमानत्वात्तदनंतर-
रूपलक्षणवत्। नापि सहकारित्वात्किं खेषु रसानन्तरस्य रूपस्यापि रसत्वप्रसंगात्। तथा हि। रससहभावि रूपं रसस्वभावं प्राक्तनरूपे-
णासहकारितस्येत्पाद्यमानत्वाद्रसवत्। ततो रूपरसयोर्भेदमिच्छता कारणस्योपादानेतरशक्तयोर्वास्तवोभेदोभ्युपगन्तव्यः। अथ एक
लिंगत्वात्तद्भेदो वास्तवस्तथाप्यवास्तवस्त्वेककार्यकारणलक्षणस्याप्यवास्तवत्वप्रसक्तिनो रसादूपादेरव्यभिचारिणोनुमानस्या ८०
नुपपत्तेः। कथमेकसामग्र्यधीनस्य रूपादेः रसतो गतिः स्यात्। यदप्युक्तं। रूपरसाद्यात्मकत्वमपीत्यादि तदप्यसंगतं प्रमहमद्भावात्तेन नहि
तेनैव स्वज्ञापी स्वानुसंधानमत्यपारद्वयविनो रूपाद्यात्मकत्वप्रसिद्धेः। नहि द्वाभ्यामिंद्रियाभ्यां रूपस्पर्शाधारैकार्थग्रहणमंतरेणानुसं
धानमत्यपोघटते। रूपस्पर्शयोश्च प्रतिनियतेंद्रियग्राह्यत्वाद्दर्शनेन संभवति। तदेवं प्रसिद्धसद्भावस्यावयविनो नानापदूषणोपकल्पनं पटत्वेप

रमाणुमात्रत्वस्याप्यपकृष्टत्वप्रसंगात्॥ नन्वन्तरेणाप्यस्य तत्रावस्थापकोपायसंभवात् कार्यैकत्वपरिमाणादल्पपरिमाणकारणारब्धं
यथा पटकार्यं द्व्यणुकस्येतरस्यात्॥ अल्पपरिमाणं किंचित्तरतमकाष्ठामापन्नं प्रकृष्यमाणत्वान्महापरिमाणवदित्यतो व्यादावस्था
पनं स्यात्॥ कथं चावयविनोपकृष्टे सकलानुमानोच्छेदो न स्याद्धर्मिहेतुदृष्टान्तानामवयविस्वभावानां भवनोऽप्रसिद्धेस्तदप्रसिद्धौ वाक
यं तदपकर्षस्यैव परमाणुरूपतामेवाप्रसिद्धेरिति॥ ततः सिद्धं स्यात् यवेभ्यः कथंचिदभिन्नो वा सत्वो वा घटादिरेकानेकस्वभावो वय
वीति निरपेक्षपरिकल्पितं कार्यकारणभूतं परमाणुद्व्यणुकादिरूपं विद्यमानमवतिष्ठते॥ अतः पृथिव्यप्तेजोवायवो द्विविधानि स्वानित्यभेदा
दित्यादि वस्तु कणभक्षप्रकारेण परपरिकल्पितस्य परमाणवादिद्रव्यस्यावस्थितेः कुतस्त्यास्य द्रव्यत्वं सिध्येत्॥ द्रव्यत्वयोगाद्वेत्॥ न
तु द्रव्यस्वभावो द्रव्यत्वं न च द्रव्ये सत्तेति ज्ञायते॥ द्रव्यत्वं च विना न द्रव्यव्यक्तिः जातिः वैशेषिकैर्नीतिहारेणैव द्रव्यादिषु वृत्तिपदत्वमुपगमात्॥ स्य
मोन्याश्रयः॥ किंच सामान्यं संस्थानादिना केनचिद्व्यज्यते॥ यथा गोत्वं खुरककुदादिसंस्थानेन घटत्वं तत्तादीनां वाताश्वासिनां तत्त्वानां
धेन च॥ नेह किंचिद्व्यंजकमस्ति॥ क्रियावत्वं समवायिकारणे गुणवत्त्वं समवायिकारणत्वं च नास्तीति चेत्॥ न तर्हि व्यस्तं वा व्यंजकं
तावदवलं क्रियावत्त्वस्याकाशादिद्रव्यव्यक्तिष्वसंभवात्॥ गुणवत्त्वस्यापि सद्यः समुत्पन्ने घटादिष्वसंभवान्न व्यंजकत्वं॥ तस्याप्यत्वलाभो
त्पत्तयवी गुणोत्पत्तेः समवायिकारणं भवतीति॥ सद्यः समुत्पन्ने घटे गुणाभावो भवद्भिरेवेष्यते योगिनां न तत्र द्रव्यबुद्धिर्न स्यात्॥ नापि
समवायिकारणत्वं तद्व्यंजकं तस्यापि सर्वदासंभवात्॥ न हि सर्वः सर्वदा समवायिकारणमित्यस्य लक्षणस्य सर्वत्राव्याप्तिदोषः॥ किं
च यदा कारणं तदा न समवायि यदा समवायि न तदा कारणं कार्योद्धि पूर्वसिद्धत्वात्कारणं न च तदा कार्यमस्ति॥ येन कार्यसमवायि
स्यात्॥ यदा च कार्यं समवायि तदा निष्पन्नत्वात् कारणमित्यसंभवो लक्षणदोषः॥ यदत्र संभवति तन्न लक्षणमित्यत्रापि सद्यः समुत
न्ने घटादावसंभवतदोषः॥ तत्र कस्यचिदपि तत्त्वस्यासंभवात्॥ समुदितानां लक्षणत्वेप्यव्याप्तिरेव॥ सद्यः समुत्पन्ने घटादौ चित पद्या॥

न्या॰कु॰चं॰ स्वभावात्॥ आकाशादेर्हेतुक्रियावत्त्वस्येति॥ यदपि द्रव्यमितरेभ्यो भिद्यते द्रव्यत्वाभिसंबंधादित्याद्यनुमानं तत्रस्य साधनस्यानुमानेनाप्रसिद्धत्वात् उभयवादिप्रसिद्धे

८१ धर्म्मिणि पक्षे तो सति प्रवर्त्तते न्यथा॥ हेतूनामाश्रयासिद्धता स्यात्॥ दृष्टांते चोभयवादिसंप्रतिपन्ने साध्यधर्म्मिवत्साध्यधर्म्मिणी संदिग्धे न्यथा

प्रसिद्धविशेषणः पक्षः स्यात्॥ धर्म्मिणि चोभयवादिसंप्रतिपन्ने साध्यधर्म्मिवत्साध्यधर्म्मिणी संदिग्धे न्यथाप्रसिद्धविशेषणः पक्षः स्यात्। ध

र्म्मिणि चोभयवादिसंप्रतिपन्ने साधनधर्म्मे धूमे न्यथासिद्धो हेतुः स्यात्॥ न चेह तद्द्वयमस्ति प्रकारे धर्म्मी कस्यचित्केनचित्प्रमाणेन प्रसिद्धो नापि तत्र प्र

वर्त्तमानं द्रव्यत्वादिसाधनं भेदाख्यस्य साध्यधर्म्मस्येति॥ भेदो हीतरेतराभावः स च प्रतियोगिसव्यपेक्षस्तत्प्रतीयते। प्रतियोगिनश्च द्रव्यव्यतिरेकि

णोऽनंतास्ते योगिनां कस्य प्रमाणस्यायात्या इति चिंत्यं॥ किं च प्रतियोगिनो गुणप्रमाणाः किं वा द्विन्नागतये भिन्नाः प्रथमपक्षे भेदग्राहकप्रमाणे

नैव तद्ग्रहणं स्यात्तेभ्यो भेदः प्रसिद्ध इति तदनुमानमनर्थकं॥ द्वितीयपक्षे तु परस्परसंकीर्णो गुणप्रमाणादिर्धर्म्मः कस्य कस्माद्भेदस्तत्प्रसिद्धविशेषणः

पक्षः स्यात् किं च केवलव्यतिरेकी हेतुः॥ स उच्यते यस्य पक्षव्यापकत्वे सति केवलो व्यतिरेको नान्वयः स्यात्॥ तच्च यत्र यस्य भेदाख्यः साध्यधर्म्मोऽस्ति

न तद्द्रव्यत्वमपि नास्तीति रेको नयोर्द्धर्म्मयोरसति प्रतिबंधे कथं निश्चेतुं शक्यते॥ किं भेदाभावात् न द्रव्यत्वं नास्ति वस्त्वं तदसत्त्वे इति संदेहः॥ प्रत

िप्रतिबंधप्रतिपत्तिश्चैकाभावे द्वितीयो नास्तीति युक्तं यथाग्निधूमयोः प्रत्यक्षानुपलंभादिप्रमाणेन प्रतिपन्ने कार्यकारणभावे त्वभावाद्धूमो

नास्तीति॥ न च पुनः साध्यसाधनधर्म्मयोरुक्तप्रकारेण स्वरूपतो सिद्धत्वात्॥ केनचित्प्रमाणेनाविनाभावस्याग्रहीतत्वात्॥ न साध्याभावे साध

नाभावप्रतिपत्तिरिति॥ केवलव्यतिरेकिणोऽनुमानस्यानुमानत्वात् नेनेतरेभ्यो भेदो व्यवहारो वा साधनीयो यथाप्यस्तु॥ एतेन पृथिवीत्वाभि

संबंधादित्यादि केवलव्यतिरेक्यनुमानं प्रत्याख्यातमनुक्तदोषाणामत्राप्यविशेषात्। किं च पृथिव्यादीनामन्यस्मात्तत्त्वं तत्स्वभावत्वेऽसिद्धमन्यत्र तद्गुं ८२

ज्ञाकारेण न च नसिद्धं प्रतिगतानामविशेषतो रूपरसगंधस्पर्शात्मकत्वाभ्युपगमात्तत्तदात्मकत्वे पृथिव्यादीनां चतुर्णामप्यविशेषेण

गंधादिप्रतीतिः स्यात्तत्रैवं चतुर्ष्वप्येतेषु गंधादिगुणचतुष्टयस्य प्रतिनियमेन चाधेयत्वप्रतीतेः॥ उक्तं च गंधः पृथिव्यामेव रसस्तेजसि

रूपं वायोः स्पर्श इति॥ पृथिवीत्वादिप्रतिनियतजातिसंबंधोपि तेषामेकत्वे दुर्घटः अन्योन्यं हि तेषां तत्त्वांतराभावेनाभिन्नजातीयत्वे वादी-
नामप्यविशेषतः पृथिवीत्वाद्यभिसंबंधः स्यात्॥ न खलु घटपटौ सत्त्वोरंच ताद्दीनां तथाभिन्नजातीयत्वे विशेषतः पृथिवीत्वाभिसंबं-
धरएवं तन्नैषामविशेषत्वस्तत्संबंधोस्ति। पृथिव्यामेव पृथिवीत्वाभिसंबंधप्रतीतेः अन्यत्रावेव कनकादिसंबंधप्रतीतेरिति॥ ८॥ एकत्वानभ्यु-
पगमे॥ यत्र बहुकमेकं बहुत्वाद्व्यापकत्वमित्यादि तदसमीक्षिताभिधानं पुनः प्रतिनियतगंधादिगुणाधारत्वानियमस्तत्त्वतत्त्वान्तरत्वयाख्यान॥ न
चाद्यविकल्पोयुक्तः पृथिव्यां चलादावपि गंधादिगुणचतुष्टयसद्भावनलक्षणाधारत्वातिनियमानुपपत्तेः॥ कुतः प्रमाणात्तत्र तत्सद्भावः सिद्ध इति चेत्॥
अनुमानादिति ब्रूमः तथाहि॥ जलादयो गंधादिमंतः स्पर्शवत्त्वात् यः स्पर्शवान् तद्गंधादिमत्प्रसिद्धं यथा पृथिवी स्पर्शवंतश्च जलादय इति॥ यत्तु न गंधा-
दिमत्तन्न भवति न तत्स्पर्शवत् यथा गगनादीति निर्विपक्षत्वाद्बाधकं प्रमाणं॥ अथ गंधादिगुणानामभिव्यक्तापेक्षया पृथिव्यादीनां तदाधारत्वानियमा-
भिधीयते॥ तदपि यत्किंचित् तथापि न तावता तत्त्वांतरत्वसिद्धिर्जलकनकादिसंयुक्तानलेनानैकांतात्॥ न तत्रानभिव्यक्तभासुररूपो जलकनका-
दिसंयुक्तानलेभिव्यक्तभासुररूपोष्णस्पर्शादनलाद्द्रव्यांतरं भवनासिद्धेः द्रव्यसंख्याव्याघातप्रसंगात्॥ एवं पृथिव्यादिरप्यनभिव्यक्तानां विशिष्टगुणा-
दीनां पत्ता नान्योन्यमत्यंतद्रव्यांतरत्वेनाप्रतीतं॥ यदि विशिष्टगुणोपेतं तत्तद्द्रव्यान्यमत्यंतद्रव्यांतरत्वेनार्थांतरं यथात्मादिस्वविशिष्टरूपादिगुणो-
पेतं च पृथिव्यादीनि॥ यथैव ह्यात्मनो बुद्ध्यादिमत्त्वाविशेषादन्यान्योन्यमत्यंतनतत्त्वांतरत्वेनार्थांतरत्वं॥ तथा पृथिव्यादीनामपि रूपादिमत्त्वाविशे-
षादत्यंतमतत्त्वांतरत्वं॥ यत्पुनरुक्तं॥ पृथिवीत्वादिप्रतिनियतजातिसंबंध इत्यादि तदप्यविचारितरमणीयं तत्त्वांतरस्यासत्त्वेप्यवांतरजातिसंबंधस्य
सर्वथा तत्त्वभेदाप्रसाधकत्वात्॥ व्यक्तिभेदमेव हि संसाधयति न तत्त्वभेदं॥ अन्यथा घटत्वादिप्रत्यावांतरजातिसंबंधाद्घटादीनामपि तत्त्वांतरत्व-
प्रसंगात् संख्याव्याघातः स्यात्॥ जातिभेदेनान्योन्यं पृथिव्यादीनामात्यंतिकभेदाभ्युपगमे चोपादानोपादेयभावो न स्यात्॥ येषां जातिभेदेनात्यं-
तिको भेदो न तेषामुपादानोपादेयभावो यथात्मपृथिव्यादीनां तथा च नेदं स्य पृथिव्यादीनामंभवद्भिरिष्टमिति॥ ननु यदा यदुपादानोपादेयभावेनच भि-

न्या॰कु॰चं॰ वारपरिहारार्थमात्यंतिकविशेषणं॥ नहि तत्रात्यंतिकस्तद्भेदोस्ति पृथिवीत्वादिसामान्यस्याभिन्नस्यापि संभवात्॥ नन्वेवं द्रव्यत्वादिना पृथिव्यादि
८२ नामभेदसंभवात्तद्भेदोस्ति॥ इत्यप्ययुक्तं॥ आत्यंतिकपृथिव्यादीनामप्येवं तद्भेदाभावादुपादानोपादेयभावः स्यात्॥ तथा चात्यंतभेदप्रसंगात्पृथिव्यादि
द्रव्यचतुष्टयं चायदानोजलांजलिः॥ तस्मादात्यंतिकभेदाभ्युपगमे पृथिव्यादीनां नतद्भावो घटते॥ अस्ति चासौ चंद्रकांतात्जलस्य जलाच्च मुक्ताफला
देरुत्पत्तिप्रतीतेः॥ आत्मोत्पत्तेनेषां सर्वथा तत्त्वांतरत्वेन भेदे पृथगप्युपादानोपादेयभावोत्र ते पामन्योन्यमत्यंतं तत्त्वांतरत्वेन भेदाद्यथा तंतुपटा
दीनामुपादानोपादेयभावश्च पृथिव्यादीनामिति चंद्रकांतादंतर्भूता जलादिद्रव्यादेव जलादेरुत्पत्तिरित्यप्ययुक्तं॥ न च तत्सद्भावे वरकप्र
माणाभावात्॥ विजातीयादि जातीयस्योत्पत्तेनात्मव्यवस्थाभावप्रसंगात्तदंतर्भूतात्तद्द्रव्यादेव तदुत्पत्तिरित्यभ्युपगमे मृत्पिंडांतर्भूतात्
घटादेरेव घटाद्युत्पत्तिरित्यप्यभ्युपगम्यतामिति सांख्यदर्शनसिद्धिः॥ ततो मौक्तिकादेः घटादिवच्चंद्रकांतादेर्जलादेरुत्पत्तिदर्शनादात्यंति
कभेदेष्वोपादानोपादेयभावानुपपत्तेः॥ पर्यायभेदेनान्योन्यं पृथिव्यादीनां भेदो रूपरसगंधस्पर्शात्मकपुद्गलद्रव्यरूपतया चाभेदः दर्शनप्रसिद्धाद
देः प्रतिपत्तव्यः॥ नतन्नित्यादिस्वभावमात्यंतिकभेदभिन्नं परपरिकल्पितं पृथिव्यादिचतुःप्रकारं द्रव्यं व्यवतिष्ठते॥ छ॥ नाप्याकाशद्रव्यं परपरिक
ल्पितस्वभावस्यास्यापि सद्भावे प्रमाणाभावाविशेषात्॥ ननु तत्सद्भावे शब्दलिंगप्रभवमनुमानमस्त्येव प्रमाणं॥ तथाहि॥ शब्दः क्वचिदाश्रितो गु
णत्वाद्रूपादिवत्॥ न चास्य गुणत्वमसिद्धं॥ गुणः शब्दो द्रव्यकर्मान्यत्वे सति सत्तासंबंधित्वाद्यदेवंविधं तत्तद्गुणो यथा रूपादिस्तथा चायं तस्मात्तथे
ति॥ न च द्रव्यकर्मान्यत्वमसिद्धं॥ तथाहि शब्दो द्रव्यं न भवत्येकद्रव्यत्वाद्रूपादिवत्॥ किंचिद्द्रव्यमद्रव्यं भवति॥ नित्यत्वादाकाशात्मादिः॥ किंचिदनेकद्रव्यं
कार्यत्वाद्यथा घटादिः॥ न त्वेकद्रव्यं शब्दस्यैकद्रव्यत्वं कुतः सिद्धमिति चेत्॥ एकद्रव्यः शब्दः सामान्यविशेषवत्त्वे सति बाह्यैकेंद्रियप्रत्यक्षत्वाद्रूपादिव ८२
दित्यनुमानात्॥ अत्र च सामान्यविशेषवत्त्वादित्युच्यमाने परमाण्वादिभिर्व्यभिचारः स्यात् अतो बाह्यैकेंद्रियप्रत्यक्षत्वादित्युक्तं॥ तथापि घटादिना
नेकांतस्तन्निरासार्थमेकविशेषणं॥ एकेंद्रियप्रत्यक्षत्वादित्युच्यमाने आत्मना व्यभिचारस्तन्निरासार्थं बाह्यविशेषणं॥ रूपत्वादिना व्यभिचारपरि

हारार्थत्वसामान्यविशेषवत्त्वे सतीति विशेषणं॥ तथा कर्मापि न भवत्यसौ संयोगविभागकारणत्वाद्रूपादिवदेव॥ इतश्च न द्रव्यं न कर्म शब्दो नित्य
त्वे सतीति नियमेनाचाक्षुषप्रत्यक्षत्वाद्यद्येवं न तथा रसादि न तथा च शब्दस्तस्मान्नेति॥ आत्मनाप्यभिचारनिवृत्त्यर्थमनित्यत्वे सतीति नियमेनाचा
क्षुषप्रत्यक्षत्वाद्यद्येवं न तथा रसादि न तथा च शब्दस्तस्मान्नेति॥ आत्मनाव्यभिचारनिवृत्त्यर्थमनित्यत्वे सतीति विशेषणं॥ नपाप्यचाक्षुषप्रत
क्षप्रतीयमानं॥ द्रव्यकर्मभ्यां व्यभिचारस्तन्निरासार्थं नियमेनेति विशेषणं तयोः शब्दादिवदचाक्षुषप्रत्यक्षत्वानियमासंभवात्॥ तथा शब्दो न
द्रव्यं न कर्म व्यापकद्रव्यसमवेतत्वाद्यद्येवं न तथा यथा सुखादि न तथा च शब्दस्तस्मान्नेति॥ अतः सिद्धं द्रव्यकर्मान्यत्वे सतीति विशेषणं॥ द्रव्यकर्मा
न्यत्वादित्युक्ते सामान्यादिना व्यभिचारस्तन्निवृत्त्यर्थं सत्तासंबंधित्वादित्युक्तं॥ अतः सिद्धं गुणत्वेन शब्दस्य कश्चिदाश्रितत्वं। यश्चाश्रयस्तस्याविशे
षादाकाशं॥ तथाहि॥ न तावत्स्पर्शवतां परमाणूनां विशेषगुणः शब्दोऽस्मदादिप्रत्यक्षत्वात्कार्यद्रव्यरूपादिवत्॥ नापि कार्यद्रव्याणां पृथिव्यादीनां
विशेषगुणोऽसौ कार्यद्रव्यान्तरप्रादुर्भावेप्युपजायमानत्वात्सुखादिवत्॥ नापि कार्यद्रव्याणां पृथिव्यादीनां विशेषगुणोऽसौ कार्यद्रव्यान्तरप्रादुर्भावेप्यु
पजायमानत्वात्सुखादिवत्॥ अकारणगुणपूर्वकत्वादिच्छादिवत्॥ अयावद्द्रव्यभावित्वात् अस्मदादिपुरुषान्तरप्रत्यक्षत्वे सति पुरुषान्तरप्रत्यक्ष
त्वाच्च न दहनस्पर्शवत्पार्थिवादिरेस्पर्शोपलब्धेः स्पर्शवतां हि पृथिव्यादीनां पथो क्वचिदपि नागुणाः प्रतीयन्त इति॥ नाप्यात्मविशेषगुणः संकारणाविष
कत्वतो न ग्राह्येंद्रियप्रत्यक्षत्वात्॥ आत्मान्तरग्राह्यत्वाद्बुद्ध्यादीनां चात्मगुणानां तद्भेदप्रत्येवोपलब्धेः॥ नापि मनसो गुणोऽस्मदादिप्रत्यक्षत्वाद्रूपादिवत्।
नापि दिक्कालविशेषगुणास्तयोः पूर्वापरादिप्रत्ययहेतुत्वात्॥ अतः पृथिव्यादिव्यतिरिक्ताश्रयाश्रितोऽसौ न इति बाधकप्रमाणसद्भावे सति गुणत्वे-
ऽस्त्वेवं न भवति॥ नाऽसौ तथा यथा रूपादिस्तथा च शब्दस्तस्मात्तद्व्यतिरिक्ताश्रयाश्रित॥ इति परिशेषात् आसौ तदाकाशं शब्दलिंगाविशेषादिवे
षलिंगाभावाच्चैकं विभु च निरतिशयपरिमाणाधिकरणत्वात्॥ ह्यप्रमाणगुणविशेषसिद्धं तल्लिंगभूतस्य च शब्दस्योत्पत्तिप्रक्रियाप्रदर्श्यते॥
तथाहि॥ संयोगाद्विभागाच्छब्दाच्च शब्द उत्पद्यते॥ तत्र संयोगात्तदुत्पत्तावाकाशं समवायिकारणं भेर्याकाशसंयोगोऽसमवायिकारणं भेरी

त्संयोगो निमित्तकारणं॥ विभुद्रव्यविशेषगुणानां संयोगासमवायिकारणत्वाव्यभिचारात्॥ प्रयोगः संयोगनिमित्ता विभुद्रव्यविशेषगुणाः
८३ संयोगासमवायिकारणाः संयोगनिमित्तत्वे सति विभुद्रव्यविशेषगुणत्वात् यदित्थं तन्न तथा तु यथा रूपादयस्तस्यापि वाय्वादेस्तस्मान्नथेति॥ तथा विभाग
अपि शब्दोत्पत्तावाकाशासमवायिकारणं वंशदलाकाशविभागोऽसमवायिकारणं वंशदलविभागो निमित्तकारणं॥ ननु वंशदलविभागो नरका
शविभागोऽस्य निदर्शनायुक्तं तस्य निमित्तत्वं न पुनर्वंशदलविभागस्यासमवायिकारणस्यान्तरङ्गत्वे प्रमाणाभावादिति वचनेन तत्र निषेधः॥ शब्दनि
मित्तानामनेकद्रव्यगुणानां समानजातीयासमवायिकारणसमन्वितानां शब्दारम्भकत्वप्रतीतेः संयोगो विभागः स्वसमानजातीयेनासमवायि-
कारणेन सहितः शब्दमारभते अनेकद्रव्यगुणत्वे सति शब्दारम्भकत्वाद् यो य एवं स स तथा यथा भेरीदण्डसंयोगस्तथा च विभागस्तस्मात्तथेति शब्दाच्छब्दो
त्पत्तौ त्वाकाशासमवायिकारणं॥ प्राक्तनः शब्दोऽसमवायिकारणमदृष्टादिकं निमित्तकारणमिति॥ ६॥ अथ वर्णानिविपीपनेन यत्तावदुक्तं शब्दः क्वचिदा-
श्रितः स्यादिति॥ तदसमीक्षिताभिधानं॥ यतः क्रियतो नुमानात् शब्दस्याश्रयमात्राश्रितत्वं प्रसाध्यते॥ नित्यैकव्याप्याश्रितत्वं वाश्रयमपेक्ष्य यतो न
भेद्रव्यसिद्धिः आश्रयमात्रस्यैव सिद्धिप्रसंगात्॥ न च सिद्धसाध्यता शब्दस्य पुद्गलपरिणामत्वेन तदाश्रितत्वाभ्युपगमात्। नित्यैकव्यापीसम्भाश्रि
तत्वे तु साध्ये साध्यविकलो दृष्टान्तो रूपादीनां तद्विपरीताश्रयाश्रितत्वात्॥ गुणत्वं चास्यासिद्धं तत्साधकप्रमाणाभावात्॥ यदपि द्रव्यकर्मान्यत्वे
सति सत्तासंबंधित्वादिति तन्न तत्साधकं साधनमुपन्यस्तं॥ तदपि विशेषणैकदेशासिद्धत्वात्॥ तत्साधकं कर्मान्यत्वे सत्यपि हि शब्दस्य द्रव्यत्वोपप-
त्तेः॥ गुणक्रियावत्त्वं हि द्रव्यलक्षणं तच्चाविकलं शब्देऽस्तीति॥ अतो द्रव्यं शब्दो गुणक्रियावत्त्वात् यद् गुणक्रियावत्तद् द्रव्यं॥ यथा बाणादि गुणक्रियावांश्च श ८३
ब्द इति॥ न चायमसिद्धो हेतुस्तस्य महत्त्वप्रसाधकप्रमाणसद्भावात्॥ तथाहि॥ गुणवान् शब्दः स्पर्शाल्पत्वमहत्त्वपरिमाणसंख्यासंयोगाश्रयत्वाद
देवं विधं॥ न द्गुणवद्यथा बदरामलकादि तथा च शब्दस्तस्मात्तथेति॥ न च न तावत्स्पर्शाश्रयत्वमस्यासिद्धं॥ तथाहि स्पर्शवान् शब्दः स्वसंबंधार्थेनर
भिघातहेतुत्वाद् यदित्थं तत्तथा मुद्गरादि तथा च शब्दस्तस्मान्तथेति न चैवमसिद्धं॥ कंसपात्र्यादिध्वानाभिहतसंबंधे श्रोत्राभिघातप्रतीतेः॥ न च शब्दस

द्रवत्वेन वायुना वाभिधातव्यं । शब्दान्वयव्यतिरेकानुविधायित्वात् ॥ तथाभूतस्याप्यस्यान्यहेतुत्वकल्पने न क्वचिद्धेतुफलभावदर्शनेन नियमः स्यात् । गुणत्वे चास्य निर्गु
णत्वात्स्पर्शाभावान्न समवायिकारणत्वे चक्रकप्रसंगः ॥ गुणत्वं हि द्रव्यत्वे सिद्धे न तद्यस्पर्शवत्त्वेनापि गुणत्व इति । तथा स्पर्शवान् शब्दः स्पर्शवत्तायेनाभिहन्य
मानत्वात् गगनादिवदित्यनेनाप्यनुमानान्तरस्य स्पर्शवत्त्वसिद्धेः ॥ न चेदमसिद्धं प्रतिवातमभिव्यादिभिः स्पर्शवद्भिर्नदीभिघातप्रतीतेः ॥ न चास्य स्पर्शाभ्यप्रत्यक्षत्वं
नाप्यणुपरिमाणाश्रयत्वं ॥ अल्पमहत्त्वप्रतीतिविषयत्वात् प्रत्यक्षप्रतीतिविषयत्वपरिमाणाश्रयो यथा बदरामलकादि तत्प्रतीतिविषयश्च शब्द इति ॥ न चाय
मसिद्धो हेतुरल्पः शब्दो महान् शब्द इति तत्प्रतीतिविषयत्वस्याबालं सुप्रसिद्धत्वात् ॥ तथाभूतस्याप्यस्य तत्प्रतीतिविषयत्वस्यान्यदेवद्ररादावपि तत्प्रतीतिवि
षयत्वापत्तेः प्रसंगात् सर्वत्रैतत्प्रतीतिप्रसंगः स्यात् ॥ न खलु प्रतीतेः अन्यत्र तत्त्वव्यवस्थापनाय प्रसिद्धिः ॥ अथ बदरादेर्द्रव्यत्वात्तत्परिमाणसिद्धिः कान्तशब्दोऽपि प
र्याया तदप्यसदन्योन्याश्रयप्रसंगात् । सिद्धे हि वा द्रव्यत्वे तत्परिमाणाभावसिद्धिस्तत्सिद्धौ चाद्रव्यत्वसिद्धिरिति ॥ न च तत्परिमाणानभ्युपगमे किं निबंध
ना शब्दे तत्प्रतीतिः स्यात् ॥ कारणगता तत्त्वमहत्त्वपरिमाणनिबंधना चेन्न व्रणादावप्यसौ स्वकारणाल्पमहत्त्वपरिमाणनिबंधना स्यात् । तथा तत्राप्येव
मिति न क्वचित्मुख्यतोऽल्पमहत्त्वपरिमाणनिबंधनात्तत्प्रतीतिः स्यात् ॥ प्रतीतिनिर्विरोधेऽप्यन्यत्रापि विशिष्टत्वान्नास्याल्पमहत्त्वपरिमाणाश्रयत्वमसिद्धं । नापि
संख्याश्रयत्वमेकः शब्दो द्वौ शब्दौ बहवः शब्दा इति प्रतीत्या घटादिवच्छब्देसंख्यावत्त्वप्रसिद्धेः ॥ अथोपचाराच्छब्दे संख्यावत्त्वप्रतीतिर्नत्त्विति किंगतासंख्यात
त्रोपचर्यते ॥ कारणगता विषयगता प्रत्यासत्तिकारणगता नत्रापि किं समवायिकारणगता कारणमात्रगता वासौ तत्रोपचर्येत ॥ तत्राद्यपक्षे एकः शब्द इति सर्वदा
व्यपदेशः प्रसंगो गगनलक्षणतत्समवायिकारणस्यैकत्वात् ॥ द्वितीयपक्षे तु बहवः शब्दा इति शब्दव्यपदेशः स्यात् । तद्व्यपदेशभाजो न स्युरेकाहि विषय-
स्यैकत्वात् ॥ पञ्चादीनां च बहुत्वादेकशेषे गोशब्द इति व्यपदेशः सर्वोऽपि दुर्लभः । अथाविरोधसंख्योपचारस्य प्रयुक्तं । सर्वसंख्योपैतत्त्वविरोधसंभवा
त् किंचविपरीतेनोपलंभस्य सद्भावे सत्युपचारकल्पनास्यादग्निर्माणवकस्त्वादिवत् । न चायि सदितिमाणवकेऽप्येकत्वादिसंख्या सहित शब्दस्योपलंभो
स्तीति । कथमुपचारात्तत्र तत्कल्पना स्यात् तथापि न तथात्वकल्पनेनोपचारेण मे वनकिंचित्स्यात् ॥ कथमेवं भवता मप्येकं रूपमित्यादिगुणेषु संख्या

न्या॰कु॰चं॰
८५

पाः गुणत्वं तन्मतेएवास्यात् तत्रासंभवतस्तस्य परेशाभावप्रसंगो। नास्माकं प्रमेयत्वगुणत्वादिवत् द्रव्येन यातस्याभ्युपगमात्॥ धर्म्माणां च गुणादे
भावेन विरुद्धता॥ अन्यथा नेयात्मप्रमेयत्वादिष्वसंगः॥ कथमन्यथावरण शरीरस्यादिव्यपदेशः स्यात्॥ तत्र संख्याश्रयत्वमप्यस्यासिद्धं नापिसंयोगाश्र
यत्वं वायुपादिनाभिहन्यमानत्वात् घंटाद्यादिनाभिहन्यमानं तत्संयोगाश्रयोयथापांस्वादिनेनाभिहन्यमानश्च शब्दइति॥ नचैतदसिद्धं देवदत्तं प्रत्याग
च्छतः शब्दस्य प्रतिवातादिवायुनाप्रतिनिवर्त्तनप्रतीतेः येन येन प्रतिनिवर्त्तनं प्रतीयते तेनाभिघातोस्ति यथापांस्वादेः प्रतिवातादिनाप्रतिवातादिनाप्र
तिनिवर्त्तनं प्रतीयते च शब्दइति। नन्वप्रतिनिवर्त्तनमस्ति यथा लतादेः तथाभूतस्यान्यस्यासेन यथाभूतस्तथाभूतेन गत्पनेन च शब्दइति ननु गंधादयोरेवं
तं प्रत्यागच्छतस्तेन प्रतिनिवर्त्यते॥ न च नेयानेन संयोगेनि निर्गुणत्वाद्गुणानामित्यप्यवोचाम्। न द्रव्यं इत्यस्यैवानेनप्रतिनिवर्त्तनानात। केवलंतानेयानिःकि
यत्वेनागमप्रतिनिवर्त्तनानुपपत्तेः॥ अतः सिद्धं शब्दस्य संयोगाश्रयत्वं॥ तत्कारणत्वस्य संयोगप्रतीतेः अन्यत्वेन तस्यास्यैवान्यतोसर्वं संयोगवानोष्ट
प्रसंगो रुंध्योरेप एवान्यतस्वेवोत्पत्तिप्रवाहेः नन्वासिद्धं शब्दस्य गुणवत्त्वं॥ नापिक्रियावत्त्वं पूर्वदेशत्यागेनदेशान्तरे समुपलभ्यमानत्वाद्वाणादिवत् दे
शांतरे समुपलभ्यते॥ नहि पावद्द्युदं यथावाणादि तथात्रसमुपलभ्यते च शब्दइति॥ न चेदमसिद्धं वक्तृमुखप्रदेशत्यागेनान्यत्रलोकप्रदेशे शब्दस्यो
पलंधेः सकलजनप्रसिद्धत्वात्। नापिसामान्यादिनाव्यभिचारित्वं विशेषणस्याप्रसक्तेः ननुनाद्यस्य वाणभूतकुंठवनुष्ययसंयोगादेः समवायप
रिवर्तिनिमित्तकारणत्वान्नातः शब्दः श्रोत्रेणागत्य संबध्यते। नैयामन्यक्रियावत्त्वं स्यात्। किंतु वीचीतरंगन्यायेनानन्तपदेशवाकाशशब्दादिलक्षणास्सम
वायासमवायिनिमित्तकारणोत्पन्नोनान्यत्र वा स॥ कथमस्यक्रियावत्त्वसंभवेनेत्यप्यसमीक्षिताभिधानं सर्वैकदिक्कियेः कृत्स्नसंगात् वाणादेयोपिहि
शर्वशर्वस्वभावजातीयलक्षणप्रभवात्तत्परदेशान्याभिनिभ्रश्रवणस्वभावानिकस्थनेत्यन्यत्रापिसमानं उपाध्यायेनोक्तं मृणामिश्रियोक्तं मतशोयोत्यक
लत्वादिशः अप्यपिज्ञानमस्यशब्देषिप्रतीतेः॥ ननुप्रत्यभिज्ञानस्याभवन्यतेः दर्शनस्मरणकारणत्वात् तत्र च तदभावात्कथं॥ तदुक्तंतिनैतत्तूपाध्यायायु ८६
केयाद्देदर्शनवत्स्मरणं संभवत्यः स्यापूर्वदर्शनाद्याहितसंस्कारप्रबोधप्रतिबंधनत्वात् न च कारणाभावे कार्यस्योत्पत्तिर्युक्तातिप्रसंगादित्यप्युपपन्नं

संबंधिनाप्रतिपत्तिद्वारेणावैकल्यस्यप्रतीतेः॥संबंधिनापि चदर्शनस्मरणयोःसद्भावसंभवात्प्रत्यभिज्ञानस्यात्वनिर्विकल्पं॥तथाहि॥प्रमत्तानुपलं
भतोनुमानतोवातत्कार्य्यतयातत्संबंधिनंशब्दंश्रोत्रपथेप्रदानींतद्दर्शनस्मृतिप्रभवंप्रत्यभिज्ञानंतत्संबंधितयाशब्दंप्रतिपद्यमानेभवत्कथंविरोधस्तत्र
निपपन्ने॥व्यंजनानिलवत्॥कथमन्यथोपाध्यायोकेस्तुणोमीत्यादिप्रतीतिःस्यात्॥नदुक्तोद्भूतंनत्सदृशंशब्दंनारंग्रामीतिप्रतीतिप्रसंगात्॥अ
चाल्पत्वतुन्नतानत्वकेशादिवत्सादृश्यापराधेनामित्रनिबंधनमेतत्प्रत्यभिज्ञानं॥नैकत्वनिबंधनंभेदेनदाणारावपिसमानमित्यदोषोर्थानांक्षणि
कत्वप्रसंगात्सोगतमतसिद्धिःस्यात्॥ननुशब्दस्यागलीवनरलीवतश्वरीवमंदमंदतरमंदतमत्वतारतम्यभेदभिन्नःप्रतीयमानत्वादिरतस्य
वनेद्रूदप्रतीत्यन्यथानुपपत्त्याक्षणिकत्वंपरिकल्प्यते॥नवाणादेर्विपर्य्ययात्तत्कथंसोगतमतसिद्धिःस्यादित्यप्यविचारितरमणीयं॥नेद्रूदप्रतीतेः
क्षणिकत्वाप्रसाधकत्वात्॥अन्यथावाणयोरपिक्षणिकत्वप्रसंगोव्यंजनादिकारणकलापप्रभवस्यास्यापिवत्वाद्यन्तगादिवृत्तिभेदेनोवत्तमादिभेदे
नप्रतीयमानत्वाविशेषात्॥वाणयोरपिचैवंनतत्प्रसंगोऽल्पदेशावच्छिन्नस्यास्यापितथाविधेस्तद्द्रूदेनप्रतीयमानत्वासंभवात्॥क्षणातीव्रत
मादित्वभावक्रियानिबंधनत्वंद्रूदप्रतिभासस्येतरत्रापिसमानं॥अथात्रबाधकसद्भावात्क्षणिकत्वकल्पनाप्रकाशवाणादौविपर्ययात्॥ननुत्र
किंबाधकंप्रत्यक्षमनुमानंवाप्रत्यक्षंचेत्किमेकत्वविषयंक्षणिकत्वविषयंवा॥नतावदेकत्वविषयंसमविषयत्वेननद्बाधकत्वप्रसंगात्॥नापिक्षणि
कत्वविषयंप्रत्यक्षेणप्रत्वात्तद्विषयस्यासिद्धत्वात्॥अथानुमानंतद्विषयंतद्बाधकं॥तथाहि॥क्षणिकःशब्दोस्मदादिप्रत्यक्षत्वेसतिविभुद्रव्यविशे
षगुणत्वात्सुखादिवदिति॥तदपिमनोरथमात्रमेकशाखाप्रभवत्वकालात्ययापदिष्टत्वादेहेतोः॥तथाह्यनरपरिहत्वमसिद्धंप्रत्यभिज्ञाप्रत
स्वबाधितत्कर्म्मनिर्देशानंतरंप्रयुक्तत्वान्नविभुद्रव्यविशेषगुणत्वंचासिद्धं॥शब्दस्यद्रव्यत्वप्रसाधनात्॥वीचीतरंगन्यायेनचशब्दस्योत्पत्त्यभ्युपग
मेप्रथमतोवक्तृव्यापारादेकःशब्दःप्रादुर्भवेदनेकोवाप्रथमेकः॥कथंनानादिक्कानेकशब्दोत्पत्तिःसहत्स्यात्॥सर्वदिक्कास्ताल्वादिव्यापारजनितवाय्वा
काशसंयोगानामसमवायिकारणानां॥तेनासमवायिकारणस्यवाकाशस्यसर्वगतस्वभावात्सकलसर्वदिक्कानेकशब्दोत्पत्त्यविरोधेशब्दस्यारं

न्या॰कं॰ भकत्वानुपपत्तिः॥ यथैव वा त्वाद्यः शब्दो न शब्देनारब्धस्तालत्वाद्याकाशसंयोगादेवासमवायिकारणादुत्पन्नस्तथा सर्वदिक्कशब्दान्तराण्यपि ताल्वादि
८५ व्यापारप्रभवताल्वाद्याकाशसंयोगेभ्य एवासमवायिकारणेभ्य उत्पत्तिसंभवात्॥ तथा च संयोगाद्विभागाच्छब्दाच्च शब्दोत्पत्तिरिति प्रवचने॥ अथ
शब्दान्तरारम्भे प्रथमः शब्दोऽसमवायिकारणं तस्य तद्देशत्वात्। अन्यथा न हि सहदेशशब्दान्तरोत्पत्तिप्रसंगो नियामकाभावात्। नन्वेवं प्रथमस्यापि श
ब्दस्यान्यस्मात् शब्दादसमवायिकारणादुत्पत्तिः तस्याप्यपरस्मात् पूर्वशब्दादित्यनादित्वापत्तिः शब्दसंतानस्य स्यात्॥ अथ प्रथमः शब्दः प्रतिनिय
तः प्रतिनियतात् तद्वक्तृव्यापारादेवोत्पन्नः स्वसदृशानि शब्दान्तराण्यारभते। न हि किं साध्येन शब्देनासमवायिकारणेन किंचिदेन न प्रतिनियतव
क्तृव्यापारात् तत्प्रभवप्रतिनियतताल्वाद्याकाशसंयोगेभ्य एव सदृशापरापरशब्दोत्पत्तिसंभवात्। तस्मिन्नेकः शब्दः शब्दान्तरारम्भकः नाप्यनेक एकस्मा
त्ताल्वाद्याकाशसंयोगादनेकशब्दोत्पत्तेरनुपपत्तेः न चानेकस्ताल्वाद्याकाशसंयोगः सकृदेकस्य वक्तुः संभवति प्रयत्नस्यैकत्वात्। न च प्रयत्न
भेदमन्तरेण ताल्वादिक्रियाद्विपृथक्कोऽन्यतरकर्मजस्ताल्वाद्याकाशसंयोगोऽपरत्र। यतोऽनेकः शब्दः स्यात्। अस्तु वा कुतश्चिदाद्यः शब्दोऽनेकस्तथा
प्यसौ स्वदेश एव शब्दान्तरमारभते। देशान्तरे वा तत्तद्देशे देशान्तरे शब्दोपलम्भाभावप्रसंगात्॥ अथ देशान्तरे तत्र गत्वा स्वदेश एवासमवायिदेशान्तरे
तान्येव जनयेत्। परिस्पन्दे शब्दस्य एवंविधस्य चापि शरीरे देशान्तरमेव मणिमुक्ताफलाद्याकर्षणं कुर्यात्। तथा च धर्माधर्मौ स्वाश्रयसंयुक्ते आ
श्रयान्तरे कर्मारम्भेते इत्यस्य विरोधः। अथ श्रोत्रप्रदेशागतः शब्दोत्पत्तेः तद्विषयविषयविज्ञानोत्पत्तेः श्रोत्रसंगात् शब्दानां तत्र स्वकाल्पनिकाः
चकल्पनानर्थक्यं॥ अथ वीचीतरंगादाव प्राप्तकार्यदेशान्येव तस्यारम्भकत्वं दृष्टं येनाप्राप्तेन तथा कल्पेनानाध्यक्षविरोधात्॥ अथ तद्देशगत्वा सिद्धं तर्हि शब्दस ८५
क्रियावत्त्वं॥ आकाशगुणत्वे चास्याकाशविभुत्वस्यानुपपत्तिस्तस्यात्यन्तपरोक्षत्वात्। योऽत्यन्तपरोक्षगुणिगुणो नासौ बाह्यैकेन्द्रियप्रत्यक्षो यथा परमा
णुरूपादिस्तथा च परेणाभ्युपगतः शब्द इति॥ नन्वसमवायिकाशस्यात्यन्तपरोक्षाकाशविशेषगुणत्वायोगः। यदस्मदादिप्रत्यक्षं तन्नात्यन्तपरोक्षगुणिगु
णो यथा घटरूपादयस्तथा च शब्दा इति॥ यच्चोक्तं। सत्तासंबन्धित्वादिनित्यत्वं किं रूपम् न तथा सत्तासंबन्धित्वं विवक्षितं। अर्थान्तरभूतया वा प्रथमविकल्पे

सामान्यादिभिर्व्यभिचारस्तेषां द्रव्यकर्म्मान्यत्वे सति तथाभूतयासत्तया संबंधित्वेपि गुणत्वाभावात्॥ द्वितीयविकल्पस्त्वयुक्तः स्वतोऽसत्तासंबंधान
न्भूतसत्तातः सत्त्वस्य स्वतोऽर्थाः संतु स्वसत्ता यदि तस्य तन्निषेत्स्यमानत्वात्॥ यच्चान्यदुक्तं॥ शब्दो द्रव्यं न भवत्येकद्रव्यत्वादिति॥ न चैकद्रव्यत्वसाधनमपि
दं॥ यतो गुणत्वेन गगनस्यैकद्रव्यत्वे साध्ये न चक्षुर्वेवसिद्धेनत्सिद्धेत्॥ नचोक्तं नीत्या पाक्षिकमिति कथं तत्सिद्धिः॥ बद्धव्येकद्रव्यत्वे साधनमुक्तं॥ एकद्र
व्यः शब्दः सामान्यविशेषवत्त्वे सति बाह्येकेंद्रियप्रत्यक्षत्वादिति॥ तदपि न स्पर्शानुमानबाधितं तथा त्वनेकद्रव्यः शब्दोऽस्मदादिप्रत्यक्षत्वे सति स्पर्शवत्त्वा
द्घटादिवदनुमानेनैकांतव्यसहि सामान्यविशेषवत्त्वे सति बाह्येकेंद्रियप्रत्यक्षोप्यनेकद्रव्यः॥ चक्षुषैकेनक्षत्रनीयमाने घटादावर्कादिभिर्व्यभिचारः स्पर्शवत्त्व
स्पर्शोबाह्येंद्रियांतरेणाप्युपलब्धेति॥ शब्देपि समानाश्रयत्वेन यानुपलंभोन्यत्रापितुल्यः॥ यच्चोक्तं नित्यत्वे सति विभुत्वे वाचाक्षुषप्रत्यक्षत्वादित्युक्तं॥ न
स्पर्शस्युक्तं॥ वायुनानैकांतिकत्वात्॥ सत्यनित्यत्वे सति नियमेनाचाक्षुषप्रत्यक्षोपि द्रव्यमिति॥ यदपि व्यापकद्रव्यसमवेतत्वादित्यभिहितं न तदपि भि
धानमात्रमसिद्धत्वात्॥ सिद्धे हि गुणत्वेन वास्य समवेतत्वं सिद्धेत्॥ न च तत्सिद्धमुक्तप्रकारेणानिरस्तत्वात्॥ यच्चान्यदुक्तं॥ नतावत्स्पर्शवतां परमाणू
नामित्यादि तत्सिद्धसाधनं न गुणत्वस्य शब्देनाभ्युपगमात्॥ यथा चास्मदादिप्रत्यक्षत्वे शब्दस्य परमाणुविशेषगुणत्वविरोधः॥ तथाकाशविशेषगुण
त्वविरोधोस्ति॥ न तस्यास्मदादिप्रत्यक्षत्वं परमाणुविशेषगुणत्वमेव निराकरोति॥ शब्दस्य नाकाशविशेषगुणत्वमुभयत्राविशेषात् न चैवं हि परमाणुगु
णो रूपादिरस्मदाद्यप्रत्यक्षस्तथाकाशगुणो महत्त्वादिरपि॥ यदप्याश्रयादन्यत्रोपलब्धेरित्याद्युक्तं तदप्ययुक्तं यतो देशः शब्दाश्रयत्वासिद्धत्व
स्य तन्निमित्तकारणत्वात्॥ आत्मादिगुणत्वनिषेधस्तु सिद्धसाधनात्समाधानमर्हति योपि वाच्योत्पत्तिप्रक्रियाकाशसमवायिकारणमित्यादिको
साप्येतेन निरस्ता शब्दस्याकाशगुणत्वनिषेधे तं प्रत्यस्य समवायिकारणत्वानुपपत्तेः यदि वाकाशं निरवयवं शब्दस्य समवायिकारणं स्यान्न हि तद्व
स्याविभ्याप्तिप्रसंगो देशात्मनं हि नैपत्तमव्यापित्वमुच्यते॥ न चाकाशस्य तस्य समवायिकारणस्यादेशात्वेति दुर्घटं॥ योपि निःप्रदेशाद्द्रव्यगुणो नासौ व्याप्यव्यापको
पयात महत्त्वं परमाणुरूपादिर्वा निःप्रदेशस्याकाशस्य गुणश्च भवद्भिः परिकल्पितः शब्द इति॥ तस्याप्यव्याप्तिरनित्येवाकर्षतदाधारस्याकाशस्य समप्रवत्वंन

न्या॰कु॰चं॰ स्यात्॥प्रदेशाद्वा निर्गुणोपि प्रदेशाधास्येति कोन्योऽत्रात्मनो ब्रूयात्॥ परिदृश्यमानवयवं तु भो नभसेन साम्यो। तत्र समवेतस्येव त्वस्यां च वर्तिनोपि शब्दस्यास्म
९६ दादिरूपलंभः स्यात्॥ निरवयवैकाकाशलक्षणश्रोत्रसमवेतत्वात्॥ अथ धर्माधर्मावपि संस्कृतकर्णशष्कुल्यवरुद्धाकाशदेशास्य श्रोत्रं॥ तत्र तत्रांशव
र्तिनः शब्दस्यासमवायान्नास्मदादिभिरुपलंभः॥ ननु धर्माधर्मयोर्बिलप्रवेशन्यायेन सावयवत्वांगीकारस्य परिहारः॥ श्रोत्राकाशादेवानन्तप्रदेशांशुव
र्तिशब्दाधारकाशदेशस्यानन्त्यात्॥ अव्याप्यवृत्तित्वं वा स्पर्शपुरसत्रूपं प्रसक्तरूपं वा स्यात्॥ आद्यपक्षे स्वदेशवर्तित्वमेवोक्तं स्यात्॥ आकाशैकदेशव्याप्य
शब्दानवर्तनरतिव्रुवतानतरे शौवर्तनमहत्त्वस्युपगतं स्यात्॥ व्याप्यवृत्तित्वं हि सामस्त्यस्पर्शितत्वं न तन्निषेधविवेकेदत्राश्वनित्यं स्यात्॥ तत्राकाशस्य निःप्रदेश
त्वे निर्घटमित्युक्तं॥ प्रसक्तपक्षेतु वृत्तिप्रतिषेधमात्रमेवोक्तं स्यात्॥ न चैतदुपपन्नं शब्दस्य गुणत्वेन द्रव्याश्रितत्वेन स्वत्वनिषेधविरोधात्॥ न स्वनिषे
धे वा गुणत्वानुपपत्तिर्यस्य सर्वथा वृत्तिप्रतिषेधो नासौ गुणो यथा वंध्यास्तनंधयः सर्वथा वृत्तिप्रतिषेधश्च शब्दस्येति॥ समवायस्य तत्र वृत्तिहेतोरभ्युपग
मेऽपि कदेशेन सामस्त्येन वेत्यादिदोषस्त्यपि अवश्यमात्रं तस्यापि निराकरिष्यमाणत्वात्॥ निरवयवत्वे च सर्वात्ततदेशब्दस्यागतस्य श्रोत्रेणोपलब्धिर्न
स्यात्॥ अपरापराकाशदेशोत्पत्तिद्वारेण स्यादिति तत्र समवेतत्वानुपपत्तेः॥ वीचीतरंगन्यायेन तस्यापरापराकाशदेशे शब्दोत्पत्तिकल्पने कथं नास्य सावयवत्वं
निरवयवत्वस्याकाशानी सिद्धेत्सर्वथाकाशस्यानवयवत्वमुक्तं॥ नापि सर्वथा नित्यत्वप्रसंगात्॥ तस्यादिविनाशः आश्रयविनाशात्॥ विरोधिगुणप्रादुर्भावात् निमित्तापायाद्वाभावाद्वा
तत्तावदाश्रयविनाशात्तस्य सर्वथा नित्यत्वप्रतिज्ञानात्॥ नापि विरोधिगुणप्रादुर्भावात्॥ यतः कोपि विरोधी गुणस्तन्महत्त्वं संयोगादिर्वा॥ तत्राद्यः पक्षोयु रो
क्तः तन्महत्त्वस्यैकार्थसमवेतत्वेन विरोधित्वासिद्धेः॥ तस्मिन् हि सत्यसाश्रवणसमयेपि तद्भावप्रसंगो तु भवत्वनिवेदना तदापि तन्महत्त्वस्य सद्भावात्॥ द्वितीयप
क्षोप्यनुपपन्नः संयोगादेः शब्दोत्पादं प्रतिकारणत्वेन विरोधित्वानुपपत्तेः॥ नापि तन्निमित्तापायाद्भावात् एवं भावस्तु तद्भावस्याकाशोय्यरानर्थक्यप्रसंगतः ९६
नाद्यविधातार्थदेशात्कारणत्वात्॥ तदेवमाकाशगुणत्वस्य शब्दे नुपपत्तेः पौद्गलिकत्वमेवाभ्युपगंतव्यं॥ तथाहि॥ पौद्गलिकः शब्दो गुणक्रियावत्त्वे
सत्यस्मदादिबाह्येंद्रियप्रत्यक्षत्वात् यथा घटादिस्तथा च शब्दस्तस्मात्तथेति॥ ननु शब्दस्याकाशगुणत्वासिद्धेः नासौ लिंगमिति ज्ञानस्तन्नसङ्

वसिद्धेः॥ नन्वेवमाकाशद्रव्या पत्तेर्वे कथं भवतां नापसिद्धान्तः स्यादिति चेन्न सारं॥ परपरिकल्पितस्यैव सिद्ध्या निरंशस्य भावस्यास्माभिः प्र
तिक्षेपात्॥ न तर्हि परिनस्यास्ये कदेशवयोगो वक्तव्योऽनित्यत्वात्॥ कुतः तस्य कदा चित्सिद्धिर्भवतामपीति चेन्न॥ युगपन्निखिलद्रव्यावगाहकार्यादिति ब्रूमः॥
तथाहि॥ युगपन्निखिलावच्छिन्नावगाहः सर्वेषां अवगाहः समवायिकारणापेक्षो ह्येकपरम्परेण सलिलादिनः पानिमन्त्यावगाहत्वादवगाह
स्यायमिति॥ ननु सर्पिषो मधुन्यवगाहे भस्मनि जलस्य जलेऽश्वादेर्वा॥ नथैवानेकाकन्मस्य रेखुपार्था वगाहे भविष्यन्ति नः कथमस्मादाकाशसिद्धि
रित्यप्यसुंदरमनयोरप्याकाशाभावे वगाहानुपपत्तेः॥ नन्वखिलार्थानां यथा काशे वगाहे नैनत्स्यात्तथाप्यन्यस्मिन्नपि कोरणेऽवगाहेन भवितव्यमित्य
नवस्था॥ तस्य स्वरूपेणवगाहे सर्वेषामात्मन्यवगाहप्रसंगात्कथमाकाशस्यानः सिद्धिरित्यप्यचेतनत्वमाकाशस्य व्यापित्वेन स्वावगाहित्वोपप
त्तेर्नानवस्थानुपपत्तेः॥ स्वन्येषामव्यापित्वेन स्वावगाहित्वायोगाच्च॥ न हि किंचिदल्पपरिमाणं वस्तु स्वाधिकरणं दृष्टमल्पोऽदेशेनाधिकरणान्त
र्नीतेः॥ कथमेवं दिक्कालात्मनामाकाशेऽवगाहो व्यापित्वादित्यप्यसांप्रतं तेषां व्यापित्वसिद्धेः॥ न दीर्घादिप्रत्ययस्यासत्वेनाकालात्मनेश्वरस्य
दुर्लभत्वेन वक्ष्यमाणत्वात्सिद्ध॥ नन्वेवमप्यमूर्तत्वेन कालात्मनोः पाताभावात्कथं नरस्थे यत्तत्प्ययुक्तममूर्तस्यापि ज्ञानादेरात्मन्याधेयत्वसिद्धेः
स्तेनाकार्त्वाव्याकाशसंबन्धस्य तदधिकारणमित्यपि प्रयुक्तं॥ अमूर्तस्याप्यात्मनो ज्ञानाधिकारणात्वप्रतीतेः समस्तमपवर्तित्वान्निखिलार्थानां नापा
रापेक्षभावोऽन्यथाकाशादुनरकालेतेषांभावस्यादित्यप्यसमीचीनं समयवर्तिनामस्मत्काममूर्तत्वादीनां तद्भावप्रतीतेः॥ न खलु परत्वादिप्रत्यशब्दापरि
भावोऽप्युपगम्यते॥ नित्यत्वाभावाद्युपगमात्॥ नन्वपरपरिकल्पितमाकाशद्रव्यं घटते॥ ॥ नापि कालद्रव्यं नमुकालद्रव्यस्य परापरादिप्रत्ययलक्ष
णलिंगात्प्रसिद्धेः कथमपरम्यानना॥ तथाहि॥ दिग्देशाकृतपरापरादिप्रत्ययविपरीताः परापरादिविशिष्टप्रत्यया विशिष्टकारणपूर्वकाविशिष्ट
प्रत्ययत्वाद्विचित्रप्रत्ययः॥ सविशिष्टकारणशब्दकोऽदृष्टोपपादकोऽस्यादित्यपविशिष्टश्चैनेपरापरयोगपद्यचिरक्षिप्रप्रत्यय निपरापरत्वो
हि दिग्देशाकृतयोर्यतिकरो न दृश्यते। यत्रैव हि दिग्देशविभागे स्थितेपितर्युत्पन्नं॥ परत्वं तत्रैव स्थिते पुत्रे परत्वं पत्रत्वस्थितेपुत्रे परत्वमुत्पन्नं

न्या·कु·चं· चैवविषयिनेपितरपरत्वमुत्पद्यमानंदृष्टमिति॥ अतोदिग्देशाभ्यामसमन्वितनिमित्तान्तरमवश्यमभ्युपगन्तव्यं॥ तदन्तरेणतद्यनिकाराणुपपत्तेरितिचपरापर
८७ दिग्वत्ययानानारित्यादिक्रियावावलिपलितादिकं वानिमित्तं पुक्तं॥ तस्यत्वयविलक्षणत्वात्परादिप्रत्ययवत्॥ तथा सर्वं च परत्वापरत्वयुगपद्युगपच्चि
रंक्षिप्रमितिकाललिंगानि॥ तल्लिंगाविशेषादिविशेषलिंगाभावाच्चाकाशवदेकत्वविभुत्वादयः धर्माः अतिदेष्टव्याः॥ तथाभूतस्य च कालद्रव्यस्ये
तरस्मादिदंकालइतिवाव्यवहारेसाध्येपरापरादिप्रत्ययएवलिंगं॥ तथाहि॥ कालइदमस्माद्भिद्यतेकालमदरति वा व्यवहर्तव्यः॥ परापरादिप्रत्य
८५ यलिंगत्वात् यदेवंतन्नेतरस्माद्भिद्यतेकालइतिवानव्यवहर्तव्यं यथा वृक्षलिंगोयथाष्टपिव्यादिस्तथा च कालस्तस्मात्तथेति॥ रू॥ अनयतिरिति विधीयते
यत्तावदुक्तं परापरेत्यादिनवसमीचीनं यतोऽत्रलिंगकालः किमेकद्रव्यस्वरूपोऽनेकद्रव्यस्वरूपोवासाध्येत॥ तत्राद्योनुपपन्नोनित्यनिरंशैकरू
पतयाविचार्यमाणस्यास्याऽनुपपद्यमानत्वात् यदिद्रूपतयाविचार्यमाणं नोपपद्यते॥ ननतद्रूपतयाभ्युपगन्तव्यं यथाजगद्व्याद्वैतरूपतयानित्य धू·ख·पु·
निरंशैकरूपतयापिविचार्यमाणोनोपपद्यते च कालइति॥ नचेदमसिद्धं तत्तद्रूपतायाः परस्परविलक्षणपरापरप्रत्ययादिकार्यभेदानुपपत्तेः॥ अ
नीतादितद्रूपभेदानुपपत्त्या चानुपपद्यमानत्वात्॥ नहिसर्वथानित्यस्यनिरंशस्यैकस्वभावस्य वार्थस्यानित्यविभिन्नदेशानेकस्वभावकार्यकारित्वं
घटते॥ द्रव्यान्तरापेक्षयैवंविधस्यानेकव्यापारा मादिकार्यकर्तृत्वानुपंगमित्यद्वैतसिद्धिप्रसंगात्॥ विचित्रसहकारिवशात्तथाविधस्यापितत्कर्तृत्वाविरोध
इत्यप्यत्रथाविधिप्रतिपाद्यः सहकारिणोऽन्यत्रापिसंभवात्॥ नचस्वरूपमभेदयतांसहकारित्वंसंभवतीत्युक्तमीश्वरस्यैवविचारप्रक्रमे॥
अतोऽत्रयौगपद्यादिप्रत्ययानुपपत्तिः स्वपत्त्रवत् खलुकार्यजातमेकस्मिन्कालेकृतं तद्युगपत्कृतमित्युच्यते॥ कालस्यनित्यैकत्वादिरूपत्वेन तुल्याद् ८७
त्वेनकार्याणामेकदैवोत्पत्तिप्रसंगात्न किंचिदयुगपत्कृतंस्यात्॥ चिरमितिप्रत्ययस्तदा यदा भावस्य प्रदिबहुनाकालेनकृतं तच्चिरेणकृतमित्युच्यते॥ य
च स्वल्पेनकृतंतत्क्षिप्रंकृतमिति॥ तच्चैतदुभयं कालस्यसर्वथानित्यादिरूपतयां दुर्घटं॥ ननु कालस्यतद्रूपतापांसत्याम् अप्युपाधिभेदोपपत्तेर्न यौग भेदात्
पद्यादिप्रत्ययाभावः॥ नदुक्तं॥ मणिवत्पावकवद्वोपाधिभेदात्कालभेदइतितदप्यसमीक्षिताभिधानं॥ यतोऽत्रोपाधिभेदः कार्यभेदएवसचयुगपत्कृ

भिन्नत्वाप्यस्यैवेति॥ किंमित्य युगपत्त्वमत्ययोन स्यात्॥ अथ क्रमभावी कार्यभेदः कालभेदव्यवहारहेतुः॥ अथ को ऽयं क्रमभावो युगपत्त्वं वास्य
न। ननु युगपत्त्वसारइत्यस्य भाषितस्य को ऽर्थः॥ एकस्मिन्काले उत्पादध्वंसेन। ननु यमिनरेतराश्रयः यावद्धि कालस्य भेदेन सिद्ध्यति॥ न तावत्का
र्याणां भिन्नकालोत्पादलक्षणः क्रमः सिद्ध्यति। यावच्च कार्याणां तथाविधः क्रमो न सिद्ध्यति न तावत्कालस्योपाधिभेदाद्भेदः सिद्ध्यतीति। ततः स्वरू
पतश्च कालस्य भेदो ऽभ्युपगन्तव्यः॥ तथा चैककालमिदं चिरेण क्षणमनन्तरेण क्षणमित्यादिव्यवहारः सुघटो नान्यथा॥ एतेनाऽपरापरव्यतिकरोपाधिभिन्नतः स
र्वथा नित्यादिसत्त्वमेककालेन स्यापत्त्युपपद्यमानत्वात्॥ यथैव हि भस्य च यथैव लोकाव्यवस्था बहुभिर्वन्नेति वस्तुविप्रकृष्टपरमिति चोच्यते। स्वलेप कृतेतीरि
तं स्वस्तिकृष्टमपरमिति च। तथा बहुभिः क्षणै रहोरात्र्यादिव्यवहारानिबन्धनः॥ काले कर्त्तव्ये सर्वथानुपपद्यः॥ यस्मात् परापरादिप्रत्ययहेतुत्वेनैव तथाभूत्वा
दिप्रदेशाः॥ परापरादिप्रत्ययहेतुश्च कालहेतो॥ यच्चान्यदुक्तं॥ न लिंगादिविशेषादितरव्युक्तिमात्रं तदपि विशेषस्यासिद्धत्वात्। न हि योगपद्यादिप्रत्ययाल्ल
लिंगभूताः स्वरूपतो ऽन्योन्यमविशिष्टाः॥ परस्परस्वरूपविविक्ततयातेषां प्रत्यक्षतः प्रतीतेः। प्रत्येकमपि तेषां विशिष्टतानुभूयते ऽन्यथा हि युगपद्धुक्ताद्यु
गपत्तु सास्थितागतादेः स्वदेतत्त्वरूपता न मविशेषोस्तिप्रतीतिविरोधात्॥ अस्तु वा तत्त्वत्तन्यथा विशेषस्तथाप्यतः कालस्यैकत्वाभ्युपगमे गुरुत्वादि
प्रत्ययाविशेषवत्स्याप्यतः कालस्यैकत्वाभ्युपगमे गुरुत्वादिप्रत्ययाविशेषादुरुत्वपरिमाणादेरप्येकत्वप्रसंगस्तुल्यास्येय समाधानत्वात्॥ नैतो गुरुत्व
परिमाणादेरनेकद्रव्यरूपता ऽभ्युपगन्तव्या॥ नित्यनिरंशैकद्रव्यरूपत्वे चास्यार्थानां भूतभविष्यद्वर्त्तमानत्वं दुर्घटमतीतानागतवर्त्तमानकालभेदाभा
वात्। सिद्धेदिनष्टं देहनेन संबंधार्थिनां न तथाव्यपदेशः स्यात्॥ नान्यथातिप्रसंगात्। न चास्य तत्सिद्धिर्यदनेन नित्यनिरंशैकरूपत्वाद्येकसंबंधं न तथातीता
दिव्यवहारभेदो यथा परमाणोर्नित्यनिरंशैकरूपस्याभ वद्भिः परिकल्पितः कालश्चेत्॥ अस्तु वा तत्र तद्देशस्यापत्तिरस्य नोत्पद्यमानतीतादिकालसंबंधाद
तीतादिक्रियासंबंधस्यात्॥ न तावत्तत्त्वतो निरंशत्वभेदरूपत्वयोर्विरोधात्। नाप्युपपद्यमानातीतादिकालसंबंधात्॥ न ह्येकरूपतया परकालस्येवासंभवात्
संभवे वा ऽनवस्थाततः तेनातीतत्वादेरप्युपपन्नातीतादिकालसंबंधेनोपपत्तेः॥ अथानीतादिक्रियासंबंधात्स्यादतीतादित्वं ननु क्रियाणां कुतो ऽतीतादिरूपता॥

न्या·कु·चं· सिद्धिरपरातीतादिक्रियासंबंधात्तथाविधकालसंबंधाद्वा प्रथमविकल्पे नवस्थाद्वितीयविकल्पे त्वन्योन्याश्रयः सिद्धे हि क्रियाणामतीतादित्वे तत्संबंधा-
८८ त्कालस्यातीतादित्वसिद्धिस्तत्सिद्धौ च तत्संबंधात्तासां तत्सिद्धिरिति॥ भवतु वा कुतश्चित्तत्रातीतादिभेदसिद्धिस्तथापि कालस्य तद्भेदेऽप्येकत्वप्रतिज्ञानेन स्व-
वचनविरोधः। स्वयमेव चास्यातीतादिरूपतयाभेदप्रतिपादनात्। लोकविरोधश्च॥ न खलु लौकिकास्यातीतादिरूपस्य स्वरूपस्यार्थस्यार्थान्तरमभ्यान्त्यापरान्न स-
भावस्यातीतोऽयमवर्त्तिस्वरूपस्य च कालस्यैकत्वं प्रतिपद्यन्ते॥ तत्त्वैकत्वे तस्यैवैभेदाभ्युपगमात्॥ अनुमानविरोधश्च॥ तथाहि॥ यत्सक्रमेतरधर्म्माध्यस्तं
धर्म्मिद्रव्यं तदनेकं यथा पृथिव्यादि सक्रमेतरधर्म्माध्यस्तं च कालद्रव्यमिति॥ यथैव हि पृथिव्यादिद्रव्याणां परस्परानेकरूपतया जीवद्रव्याणां च कुंथु-
गजादिजीवद्रव्यभेदस्वभावतया सक्रमेतरधर्म्माध्यस्तत्वादनेकद्रव्यत्वं॥ तथा कालद्रव्यस्यापि समयमुहूर्त्तादिविशेषोपेततया तद्धर्म्माध्यस्तत्वसं-
भवादनेकद्रव्यत्वं प्रतिपत्तव्यं॥ मुख्येतरविकल्पसंभवाच्च न हि समयावलिकादिर्व्यवहारकालो मुख्यकालद्रव्यमन्तरेणोपपद्यते॥ यथा मुख्यसत्त्वम-
न्तरेण क्वचिदुपचरितं सत्त्वं॥ स च मुख्यकालोऽनेकद्रव्यं प्रत्याकाशप्रदेशं व्यवहारकालभेदान्यथानुपपत्तेः॥ प्रत्याकाशप्रदेशं विभिन्नो हि व्यवहार-
कालः। कुरुक्षेत्रलंकाकाशप्रदेशयोर्दिवसादिभेदान्यथानुपपत्तेः। अतिलोकाकाशप्रदेशे कालस्याणुरूपतया भेदसिद्धिः॥ तदुक्तं गाथा॥ लो-
यायासपएसे एक्केक्के जे ठिया हु एक्केक्का। रयणाणं रासीविव ते कालाणू मुणेयव्वा॥१॥ इति॥ छ॥ ननु कालद्रव्यस्य विचार्यमाणस्य स्वरूपस्या-
संभवात्तस्यैकद्रव्यत्वप्रतिक्षेपेणानेकद्रव्यत्वं प्रतिपाद्यते॥ न त्वतीतादिभेदभिन्नः कालः संभवति॥ यत्संबंधार्थानामतीतादित्वं स्यात्॥ स्वतः प-
रतो वास्यानवस्थानुपपत्तेः। स्वतो हि कालस्यातीतादित्वे र्थानामपि स्वत एव॥ तदस्त्वलं कालकल्पनया॥ परतोप्यतीतादिकालांतराभिसंबंधादतीतादि-
क्रियाभिसंबंधाद्वा स्यादतीतादित्वाभ्युपगमे प्रागुक्तदोषानुषंगः। अतः प्रमाणापेक्षयायमतीतादिव्यवहारः॥ प्रमाणेन हि युगपदनुभूयमानं व-
स्तु वर्त्तमानमित्युच्यते॥ अयुगपदनुभूयमानं तु पूर्वक्षणभावि भूतमुत्तरक्षणभावि तु भविष्यदिति॥ छ॥ अत्र प्रतिविधीयते॥ यत्तावदुक्तं कालद्र-
व्यस्यैव तावदित्यादि विचारितरमणीयं॥ यतः कुतोऽस्य स्वरूपस्यैवासंभवो ग्राहकप्रमाणाभावादतीतादिभेदासंबंधत्वाद्वा तत्राद्यपक्षोऽनुपपन्नः

परापरादिप्रत्ययलिंगप्रभवानुमानस्यैवानतद्भावावेदकप्रमाणस्य सद्भावात्। नहि तत्प्रत्यया निर्निमित्ताः कदाचित्कत्वात् प्राच्यादिवि-
दि शिष्टनिमित्तविशिष्टप्रत्ययत्वात्॥ नापि गुणजातिनिमित्तास्तज्जन्यप्रत्ययवैलक्षण्येनोत्पत्तेः। न चात्र परदिगवच्छिन्नेष्टसंबंधमजा-
नीयस्थवीरपिंडे परोयमिति प्रत्ययो दृश्यते। परदिगवच्छिन्नत्वेनाज्ञानीये प्रसंगे द्वितीयपिंडे परोयमिति॥ अथादित्यादिक्रियापातन्नि-
मित्तं जन्मनो हि प्रथमेनैकस्यादित्यपरिवर्त्तनानि भूयांसीति परत्वं अन्यस्य चाल्पीयांसीत्यपरत्वं॥ नन्वेकं कथं यौगपद्यादिप्रत्ययप्रादु-
र्भावः स्यात् कालातिरिक्तस्य निमित्तस्याविचार्यमाणस्यानुपपद्यमानत्वात् तद्यादित्यपरिवर्त्तनस्याक्रियाविशेषः एककर्तृकर्मणो वा
नानावर्गादित्यपरिवर्त्तनमेकस्मिन्नप्यादित्यपरिवर्त्तने सर्वेषामुत्पादात्॥ आदित्यस्य हि परिवर्त्तनमेकप्रादक्षिण्येन पौरस्त्यमणामेरा
त्रमभिधीयते॥ तस्मिन्नेकस्मिन्नपि यौगपद्यादिवर्त्तिनि निखिलभूतानामर्थानामुत्पादः प्रतीयत एव तथा अपरेषामभावाच्चायुगपत्का-
लस्तीति हि व्यपदेशो न च पुनर्युगपदादित्यपरिवर्त्तनमिति क्रियाविशेषोप्यादित्यपरिवर्त्तनरूपः घटिकादावुदकसंचारादिरूपो वा न त्राद्यविक-
ल्पोयुक्तः प्रागुक्तदोषानुषंगात् द्वितीयविकल्पोप्यनुपपन्नस्तस्यन तदनुमापकत्वात्॥ न चाद्येनावलितद्घटिकायामुदकसंचारेणाव-
न च्छिन्नः कालजनितक्रियाविशेषः कालानुमापको न पुनः स एव कालः किं चित्क्रियायाः क्रियान्तरस्य तथात्वात् क्रियायाः स्वपरेतुल्यं स्यात्तन्न
पुनर्युगपदादिप्रत्ययहेतुत्वं युगपत्तदुदकसंचारक्रमेणानदुदकसंचारजनि॥ तत्क्रियाविशेषोपि कालोपाधिकएवप्रतीयतेतदन्यक्रि-
यावत्तत्कथं स एव कालः स्यात्॥ न स्ववैतत्कार्यनिचनकस्य कालस्य क्रियेतिनाम्नान्तरकरणेनामप्रमात्रमेव विधेयं॥ अथ कर्त्तृकर्मणोस नि
न्वैवयौगपद्यादिप्रत्ययनिमित्तं तद्युक्तं यतो यौगपद्यं बहूनां कर्त्तॄणां कार्ये व्यापारेण युगपदेते कुर्वन्तीति समधिगम्यो बहूनां च कार्याणामात्म-
लाभो युगपदेतानि कृतानीति प्रत्ययाधिरूढः। न चात्र कर्तृमात्रं कार्यमात्रं वालंबनमनिप्रसंगात्। यत्रादिक्रमेणकार्यं जायते तत्रापिक-
र्तृकर्मणोः सद्भावात्स्यादेतन्नहि तत्रासंबन्धेव। एतेनायुगपत्प्रत्ययोपि चिंतितः न हि सोप्ययुगपदेते कुर्वन्तीति अयुगपदेतत्कृतमित्यादिरू-

व्या॰ कु॰ च॰ पोविशिष्टं कर्म कर्म्ममात्रमालंबतेति प्रसंगादेव॥ अतल्लिंगोपगं कालोभ्युपगंतव्यः॥ कथमन्यथाचिरक्षिप्रव्यवहारोपिस्यात्॥ एकस्यहि
कर्त्ता किंचित्कार्यं चिरेणाकरोति व्यासंगादनर्थित्वाद्वा। किंचित्तु क्षिप्रमर्थित्वात्तत्र चिरेणाकरणं क्षिप्रं करणमिति धर्म्मयोर्विशिष्टत्वाद्विशिष्टंनिमि
त्तमाक्षिपतः इति कालसिद्धिः॥ ननु ग्राहकप्रमाणाभावात्कालस्यासंभवः नाप्यतीतादिभेदासंभवात्॥ स्वरूपत एवास्यातीतादिभेदसंभवा
त्स्वपररूपयोरतीतादिस्वरूपे स्वरूपतो नियतत्वे नान्यत्र परापेक्षतानुपपत्तेः॥ यद्यत्स्वरूपतो नियतं तन्न तत्र परमपेक्षते॥ यथात्मपररूप
प्रकाशे प्रदीपः स्वपररूपयोरतीतादिस्वरूपे स्वरूपतो नियतश्च कालः इति॥ नैवमर्थानामपि स्वत एवातीतादिस्वरूपभेदोस्त्वित्यभिधा
तव्यं॥ प्रतिनियतस्वभावत्वाद्भावानां नत्वेकस्य स्वभावः सर्वत्रारोपयितुं युक्तः॥ प्रदीपस्य स्वत एव स्वप्रकाशोपलंभेन घटादीनामपि तथा
प्रसंगात्॥ तथा च प्रतिनियतार्थ व्यवस्थाव्यवस्था विलोपः स्यात्॥ यच्चान्यदुक्तं॥ प्रमाणाभावादसत्वादि॥ तदयुक्तमिदं प्रमाणेन युगपद्भू
यमानत्वं नाम प्रमाणेन सहैककालतयानुभूयमानत्वमिति चेन्न॥ नत्वत्वचनविरोधानुषंगात्॥ एवं वदता हि भवतात्मवचनेनैव कालः प्रतिपादि
इत कु॰ न॰ कु॰ स्था॰। तः॥ तदनभ्युपगमे एककालत्वेनानुभवत्वमभिधातुमशक्तेः॥ पूर्वेतरणाभावि भूतेमित्यादिवचनानुपपत्तेश्च कालस्यैव लक्षणापरपर्यायेणाभिधानात्॥
अतः कालोपाधिकमेवेदं भावानां वर्त्तमानत्वादिकं स्वरूपं प्रमाणापेक्षया व्यवस्थापिते॥ क्षेत्रोपाधिकदूरांतिकवादिस्वरूपवत्॥ कालानभ्युपगमे लो
कप्रतीतिविरोधश्च लोके वसंतादिकालप्रतीतिसद्भावात्॥ अतीयं तेहि प्रतिनियतएव काले प्रतिपन्नावनस्पतयः पुष्प्यंतीत्यादि व्यवहारं कुर्वंतो नि
रीक्ष्य व्यवहारिणो यथावसंतादिसमय एव पाटलादयः प्रतीति। एवं कांचीनरेषाम्प्यभ्युत्थं प्रस्तवनकालमपेक्षते॥ इति व्यवहारात्समयमुहूर्त्ता
दिव्यवहाराच्च तत्सिद्धिः अतः सिद्धो वास्तवः कालोनेकद्रव्यस्वभावः॥ तच्चपरपरिकल्पितं कालद्रव्यमपि व्यवनिरूपितं॥ ॥ नास्तिद्रव्यं नतत्त्व
स्यकालस्य परापरादिप्रत्ययविपरीतप्रत्ययवैपरीत्यलिंगात्परिनीयमानत्वात्कर्मैव व्यवस्थितिः॥ तथाहि॥ मूर्तेष्वेकद्रव्ये प्रमूर्त्तद्रव्यमपि
हृत्यस्मतः पूर्वोत्पादेशि योगपद्यं मेनोत्तरेणापूर्वं वृद्धिं दर्शनेनोरवलितापरेण प्रेरणस्वभावयोत्तरेणोत्तरः पूर्वेणापकृष्टानुपरिष्टाद्दिनस्य मौ च यत्र।

याभवंति सा दिगिति॥ अत्र तद्धर्मिनियमं लोकिकोलिंगं॥ न हीमे प्रत्यया निर्निमित्ताः कदाचित्कत्वात् नाप्यविशिष्टनिमित्ताः वैचित्र्यप्रस
त्त्वात् इत्यादिप्रत्ययवत्॥ न चान्योन्यापेक्षमूर्त्तद्रव्यनिमित्ताः परस्पराश्रयत्वेनोभयप्रत्ययाभावप्रसंगात्॥ ततोऽन्यनिमित्तो नाद्यत्वासंभवादेते दिशस्त्वानु
मापकाः॥ प्रयोगोऽपरेतत्पूर्वापरादिज्ञानं तन्मूर्त्तद्रव्यव्यतिरिक्तपदार्थनिबंधनं तत्प्रत्ययविलक्षणत्वात् सुखादिप्रत्ययवत्॥ तथाहि मूर्त्तद्रव्यमितरेभ्योऽभि
द्यते दिगिति वा व्यवहर्त्तव्यं॥ पूर्वादिप्रत्ययलिंगत्वात् यत्तु न तथा न तत् पूर्वादिप्रत्ययलिंगं यथा क्षित्यादि न चायं तस्मात्तथेति विभुत्वैकत्वनित्यत्वादयः
श्चास्या धर्माः कालवदवगंतव्याः॥ न चास्या एकत्वे द्रव्यादिभेदव्यवहारो दुर्घटः सवितुर्मेरुप्रदक्षिणावनिमानस्य लोकपालपरिगृहीतदिक्प्रदेशैः
संयोगोऽनस्य सुघटत्वात् इति॥ छ॥ अत्र प्रतिविधीयते॥ यत्तावदुक्तं मूर्त्तेषु द्रव्येष्वित्यादि तत्र समीचीनं यतो मीमांसकाः कार्यभूताः संतः किं कारणमा
त्रस्यानुमापकाः दिग्द्रव्यलक्षणाकारणविशेषस्य वा॥ प्रथमपक्षे कथमतो दिग्द्रव्यस्य सिद्धिः कारणमात्रस्यैव सिद्धेः॥ न तच्च सिद्धसाध्यता नेषां
नाकाशलक्षणकारणपूर्वकत्वाभ्युपगमात्॥ तस्यैव दिगिति नामांतरकरणे नाम्न्येव विवादो नार्थे दिशस्ततो द्रव्यांतरत्वासिद्धेः॥ एतेन द्वितीयविक
ल्पोऽपि प्रत्याख्यातो दिग्द्रव्यस्य हि खरविषाणवत्सर्वथासंभवे कथं तत्पूर्वकत्वं तत्प्रत्ययानां स्यात् यतस्तेऽस्यानुमापकाः स्युः॥ न च तत्संभवेऽप्याभ्या
दिग्व्यवहारः स्यादित्यभिधातव्यं॥ आकाशप्रदेशश्रेणिष्वेवादित्योदयादिवशात्प्राच्यादिव्यवहारोपपत्तेः तथा चैषां न निर्हेतुकत्वं नाप्यविशिष्टपदार्थहे
तुकत्वं स्यात्॥ तथाभूतप्राच्यादिदिक्संबंधाद्धि मूर्त्तद्रव्येषु पूर्वापरादिप्रत्ययविशेषस्योत्पत्तेः न परस्परापेक्षया मूर्त्तद्रव्याणामेव तद्धेतुत्वं येनेतरेतरस्य
पूर्वत्वासिद्धावपरस्यापरत्वासिद्धिः तदसिद्धौ चेतरस्य॥ पूर्वत्वासिद्धिरितीतरेतराश्रयत्वेनोभयाभावः स्यात्॥ ननु मूर्त्तद्रव्येषु पूर्वापरादिप्रत्ययस्या
काशप्रदेशश्रेणिहेतुत्वे तत्र तत्प्रत्ययस्य किं हेतुत्वं स्यादिति चेत्॥ स्वरूपहेतुत्वमेवेति ब्रूमः नभःप्रदेशा एव ते स्वपररूपयोः पूर्वापरादिप्रत्ययहेतुः स्वरूप
त्वात् प्रकाशस्य स्वपररूपायाः प्रकाशहेतुत्वरूपवत्॥ कथमन्यथा दिक्प्रदेशेष्वपि तत्प्रत्ययोत्पत्तिः स्यात्॥ तत्रापि हि पूर्वापरादिप्रत्ययोत्पत्तिः स्वभावतो
दिग्द्रव्यांतरापेक्षया वा स्यात्॥ यदि स्वाभावतस्तदा नभःप्रत्ययपदार्थनिर्देशः स्यात्॥ यत्र हि दिक्प्रदेशेषु पूर्वापरप्रत्ययहेतुत्वं तत्र देवताः परप्रत्ययहेतुत्वं स्या

[illegible]

न्या·कु·वं· १८७

न॥ यत्र यत्र च तत्र प्राक्प्रत्ययहेतुत्वमिति॥ अस्ति च न तत्र एव वृत्तिः॥ यत्रो हि दिक्प्रदेशो विवक्षितः प्रदेशापेक्षया पूर्वप्रत्ययहेतुत्वं दृष्टं॥ न त्वेवापरप्रदेशापे
क्षयापरप्रत्ययहेतुत्वं तदुक्तं श्लोके॥ प्राग्भागो यः सुरासुराणां मालवानां स दक्षिणः॥ याम्यभागः पुनर्येषां ते पानुत्तरतः स्थिताः॥ इति॥ दिग्द्रव्यांतरापेक्ष
या न तत्र तत्प्रत्ययहेतुत्वे त्वनवस्था॥ तत्रापि तत्प्रत्ययहेतुत्वाद्याः परदिग्द्रव्यहेतुत्वप्रसंगात् परस्परापेक्षया च तत्प्रदेशानां तत्प्रत्ययहेतुत्वेऽन्योन्याश्रयानु
षंगः॥ सवितुर्मेरुं प्रदक्षिणमावर्तमानस्य तत्तद्देशाद्यवच्छिन्नदिग्द्रव्यप्रत्यासत्त्यादिव्यवहारोपपत्तौ तत्प्रदेशापेक्षिकोपाधिभेदेन व्यवहारोपपत्तेरलं दिग्द्रव्यकल्प
नयाकाशप्रदेशद्रव्यस्यापि कल्पनाप्रसंगो यमनः पूर्वादिवाच्यत्वादिप्रत्ययस्य प्रदेशद्रव्यमंतरेणानुपपत्तेः॥ अथ मूर्तद्रव्यादिरिक्तं न पृथिव्यादिषु पूर्वादेशा
दिप्रत्ययस्तत्रेदं न्यस्तेनोपमानं दिशो गगनप्रदेशपंक्तेः तत्कल्पनायामपि तत्त्वात्सिद्धं तत्त्वे वाच्यमादित्योदयादिसंचारे वाकाशप्रदेशपंक्तिषु पृथिव्या
दिष्वपि पूर्वापरादिप्रत्ययप्रसिद्धेराकाशप्रदेशश्रेणीकल्पनाप्यफलेनैरपेक्ष्यात्समीक्षिताभिधानं॥ पूर्वस्यां दिशि पृथिव्यादयस्त्वाधाराधेयव्यवहारोप
लंभनः पृथिव्याद्यधिकरणाभूताकाशप्रदेशाः पंक्तेः परिकल्पितस्य सफलत्वात् प्रसाधितं वाकाशं सुहृद्यमाणेन प्रागित्युक्तं पुनः प्रसंगेन तत्रे
न परेतत्पूर्वापरादिज्ञानमित्याद्यनुमानं नत्वयुक्तं॥ तज्ज्ञानस्य मूर्तद्रव्यव्यतिरिक्ताकाशप्रदेशाप्रदेशप्रदेशपंक्तिलक्षणपदार्थनिबंधनत्वादिक्षव्य
निबंधनत्वानुपपत्तेः॥ अतो दिग्द्रव्यस्य कुतश्चित्प्रमाणादप्रसिद्धेः दिग्द्रव्यभिन्नेभ्यो भिद्यते॥ इत्यादिनिबंध्या कुत्सितो भाष्यव्याख्यानप्रयासामित्युपेक्षते
न परपरीकल्पितं दिग्द्रव्यमपि व्यवतिष्ठते॥ छ॥ नाप्यात्मद्रव्यं न त्यापि सर्वगगनत्वादिधर्म्मोपेतस्य कुतश्चित्प्रमाणादप्रसिद्धेः॥ नन्विदमयुक्तं॥
तद्धर्म्मोपेतस्यात्रानुमानतः प्रसिद्धेः तथा ह्यात्मा व्यापकोऽणुपरिमाणानधिकरणत्वे सति नित्यद्रव्यत्वाद्यदेवं तत्तथा यथाकाशं न यथा चात्मा
तस्मात्तथेति॥ न चास्याणुपरिमाणानधिकरणत्वमसिद्धं॥ तथा ह्यणुपरिमाणानधिकरणम् आत्मा स्मरणादिप्रत्यक्षविशेषगुणाधिकरणत्वात् य
दित्थं तत्। तथा नित्यद्रव्यमात्मा अस्पर्शवद्द्रव्यत्वादाकाशवत्॥ अथवा नित्य आत्मा सर्वांके विशेषगुणाधिकरणत्वादाकाशवत्। तथा द्रव्यमात्मा
गुणवत्त्वाद्घटवत्॥ यदि चात्मा व्यापको न स्यात्तदा देवदत्तांगत्वे द्वीपांतरवर्तिमणिमुक्ताफलादेर्देवदत्तं प्रत्युपकारकस्योत्पादो न स्यात् तस्य तद्गुणपूर्व

कत्वात्। तथाहि। देवदत्तांगनाद्यंगं देवदत्तगुणपूर्वकं कार्य्यत्वे सति तदुपकारकत्वाद्ग्रासादिवत्। कार्य्यदेशे च सन्निहितं कारणं कार्य्यं जनयति न
व्याप्रियते॥ नान्यथाग्निसंयोगादूर्ध्वगमनं दिग्भागादिषु भिन्नदेशेन तत्कारणत्वेन तद्गुणासिद्धिः। यच्च गुणाः प्रतीयते न च तद्गुणमप्यनुमीयते॥ न च
तेरणतेयामनुपपत्तेः स्वाश्रयसंयोगापेक्षाणामाश्रयान्तरे कर्मारम्भकत्वोपपत्तेश्च। तथात्वदृष्टं स्वाश्रयसंयुक्ते आश्रयान्तरे कर्म्मारभते। ए
कद्रव्यत्वे सति क्रियाहेतुगुणत्वात् प्रयत्नवत्। स्वक्रियाहेतुगुणत्वमसिद्धं॥ अग्नेरूर्ध्वज्वलनं वायोस्तिर्य्यक्पवनमणुमनसोश्चाद्यं कर्म्म
देवदत्तविशेषगुणकारितं कार्य्यत्वे सति तदुपकारकत्वात् पाण्यादिपरिस्पन्दवदित्यनुमानेन तस्यानिसिद्धेः॥ नाप्येकद्रव्यत्वं तथात्वे कद्रव्यमदृष्टं
विशेषत्वात् स्वतन्त्र एकद्रव्यत्वादित्युच्यमाने स्वाश्रयासंयुक्तलोहादिक्रियाहेतुनायस्कान्तेनानैकान्तिकत्वमित्यर्थं गुणत्वादित्युक्तं॥ किंचा
त्मनो सर्वगतत्वे दिग्देशान्तरवर्त्तिभिः परमाणुभिर्युगपत्संयोगाभावान्नाद्यकर्म्माभावस्तदभावात्तत्संयोगस्यानिमित्तत्वाच्छरीरस्यानेनानन्तसंब
न्धस्य चाभावात्तदुपायासिद्धेः सर्वदा सर्वेषां मोक्षः स्यात्॥ अस्तु वा यथाकथंचिच्छरीरोत्पत्तिस्तथापि सावयवं शरीरं प्रत्यवयवमनुप्रविशन्नात्मा
सावयवः स्यात्॥ सावयवत्वे चास्य घटादिवत्कार्य्यत्वप्रसंगः कार्य्यत्वे चासौ समानजातीयैर्भिन्नजातीयैस्तथापि सावयवं शरीरं प्रत्यवयवमनुप्रविशन्ना
त्मा सावयवः स्यात् सावयवत्वे चास्य घटादिवत्कार्य्यत्वप्रसंगः॥ कार्य्यत्वप्रसंगः कार्य्यत्वे चासौ समानजातीयैर्भिन्नजातीयैर्वा कारणैरारभ्यते। न तावद्भिन्नजातीयैर्विजातीयानामना
रंभकत्वात्॥ अथ समानजातीयैस्तु समानजातीयत्वं तेषामात्मत्वाभिसंबंधादेव स्यात्॥ तथा चात्मभिरात्मारभ्यत इत्युक्तं स्यात्तथा सत्येकस्मिन्नायुक्त
मेकशरीरे नैकात्मनामात्मान्तरारंभकाणामसंभवात्॥ संभवे वा प्रतिसंधानानुपपत्तिः न ह्यन्येन दृष्टमन्यः प्रतिसंधातुमर्हतीत्यतिप्रसंगात्॥ तदा
रम्भत्वे चास्य घटस्येवावयवक्रियातो विभागात्संयोगविनाशादिनाशः स्यात्॥ शरीरपरिमाणत्वे चात्मनो मूर्त्तत्वादनुप्रवेशानुपपत्तेः शरीरेऽनुप्रवेशो न स्या
त्। मूर्त्तस्य मूर्त्तेऽनुप्रवेशविरोधात्॥ ननु निरवकाशमेवाखिलं शरीरं समनुप्रपद्यते(?)॥ कथं वा तत्परिमाणत्वेन बालशरीरपरिमाणस्य सतो युवश
रीरपरिमाणस्वीकारः स्यात्॥ तत्परिमाणपरित्यागात्तदपरित्यागाद्वा॥ पूर्वपरित्यागात्तदा शरीरवत्तस्यानित्यत्वप्रसंगात् परलोकाय

न्या.कु.चं.
८१

भावानुषंगात्॥ अथापरित्यागान्न पूर्वपरित्यागेन शरीरस्य तत्संयोगनश्वरपरिमाणेन तत्परिमाणेनानुपपत्तेः॥ न तर्हि परिमाणान्तेवात्मनः शरीरदेहे देहे प्रसंगः। इति मध्यपरिमाणनिषे
धनेन यत्तावदुक्तमात्मव्यापकत्वादित्यसमीचीनं॥ असमस्तपाधितपक्षनिर्देशानन्तरमुक्तत्वं हेतोः कालात्ययापदिष्टत्वात्। सुखमहमित्यादिप्रत्यक्षेण
आत्मापरिमाणस्य शरीरव्यापकत्वेन परशरीरेनाप्यंतराले व्यापकस्य सर्वशरीरवृत्तित्वानिष्पत्तेः भोजनादिव्यवहारसंकरश्च स्यात्। ननु चाव्यापकत्वे
चात्मनः प्रतिपन्नोपपत्तस्य प्रमस्तवाधात् पुकांतानुमानत्वे साध्ये प्रत्यक्षानिर्णतिवत्॥ न चास्य तथाप्रतिपत्तिरस्ति नियतदेशावच्छेदाभावादिति। तदयुक्तं। य
तः कोयं तर्वंश छेदाभावो नाम नियतदेशानानुभवस्तदुल्लेखिशब्दप्रयोगो वा॥ नाद्यः पक्षोनुपपन्नो नियतदेशानुभवस्यात्मनि प्रतीयमानत्वात्॥
सुखमहमित्यादिप्रत्ययेन स्वात्मा सुखात्मकः शरीरप्रदेशात्मवानुभूयते॥ घटोयमितिप्रत्ययेन तु रेखेवाप्रथुबुध्नोदराद्याकारघटवत्। न खलु प्रत्यक्षे
णावस्तुनियतदेशकालाकारानुभवव्यतिरेकेणानुभवितुं शक्यते प्रसंगात्॥ द्वितीयविकल्पोप्ययुक्तो यतो यदि नामनियतदेशोल्लेखिशब्दप्रयोगः
तथापि कथं प्रत्यक्षेणानदर्शनानुभवो न हि शब्दानुविद्धत्वं प्रत्यक्षस्य स्वरूपेण तदभावेन स्वार्थस्वरूपविवेचकत्वाभावः स्यात्। तद्वक्तरि तु विद्यत्व प्रत्य
गेहकुत्तोनरत्वात्। यतो भवोत्तरकाली नस्पत्तवसर्वत्र शब्दप्रयोगः। अनुभूयते स्यनेकधाध्यासितेवस्तुनिवचनोत्तोनुभवबाधनिबंधनसंकेतस्मरणासु
पजायतेऽत्र चैव शब्दप्रयोगोनान्यत्र तत्कथं नरप्रयोगात्तदनुभवाभावः॥ नियतदेशोल्लेखि शब्दाप्रयोगात् देहेनैवस्यानमनुभवे वकालनियतत्वस्या
प्यननुभवः स्यात्॥ नहि घटोयं सुखमहमित्यादिवहिरंतः प्रतीतौ रेखाकालाकारं नेयस्यो ल्लेखि नामवेदानीं हृदा शब्दानां प्रयोगोस्ति॥ अतोत्र प्रतीतौ प्र
तिनियतस्य वस्तुस्वरूपस्य कस्यचिदपि प्रतिभासाभावान्न खलु प्रतीतौ नास्याः कश्चिद्विशेषः स्यात्॥ सत्त्वासत्त्वप्रतिभासकृतः सोस्त्यसौ इति चेत् स
न असत्त्वरूपारप्रयोगे॥ तस्याप्यसंभवात् वस्तुनाशेनापि परमाण्वाकाशप्रतीतिनः किंकृतोस्याविशेषः स्यात्॥ स्फुटत्वप्रतिभासकृतश्चेतिचे
त्॥ न नियतदेशकालाकारग्रहणाग्रहणव्यतिरेकेण स्फुटत्वास्फुटत्वप्रतिभासस्यैवासंभवात्॥ ततः प्रमस्तप्रतीतितरप्रतीतितो विशेषमिच्छता
देशादिनियत्यैव प्रतिभासस्तरूपानप्रयोगेप्यभ्युपगंतव्य इति सिद्धा पक्षस्य प्रत्यक्षबाधाहेतोश्च कालात्ययापदिष्टता किंचाणुपरिमाणानधिकरण

त्वं॥ नन्वात्मनोणुपरिमाणानधिकरणत्वे तत्परिमाणाधिकरणत्वप्रतिषेधः स किं पर्युदासरूपः प्रसज्यरूपो वा स्यात्॥ यदि पर्युदासरूपस्तदा सो भावान
न्तरस्वीकाररूपेण प्रवर्तते॥ भावान्तरं चात्र परममहापरिमाणाधिकरणत्वमवांतरपरिमाणाधिकरणत्वं वा स्यात्॥ प्रथमपक्षे तु विशेषणासिद्धो हेतुर्यथा
नित्यः शब्दो नित्यत्वे सति निर्वाह्येंद्रियग्राह्यत्वादिति॥ द्वितीयपक्षे तु विरुद्धविशेषणो यथा नित्यः शब्दो नित्यत्वे सति बाह्येंद्रियप्रत्यक्षत्वादिति पक्ष
न्यपक्षे तु सिद्धत्वं तु तत्स्वभावावबोधस्यात्मनि विचारावसरे प्रमाणगोचरत्वानिरूपत्तिपादयिष्यमाणत्वात्॥ सिद्धो वा किमसौ साध्यस्वभावः
कार्यो वा स्यात्॥ यदि स्वभावस्तदा साध्यतापि न स्यात् तत्स्वरूपेणानुषंगात् तत्स्वभावाभावाद्भिन्नस्वभावत्वाद्गगनेंदीवरवत्॥ अथ कार्यं न तु
यत्तु तत्स्वभावं तन्न कार्यं यथा खरशृंगं तु तत्स्वभावस्य भवद्भिः परिकल्पितोणुपरिमाणप्रतिषेधइति॥ कार्यत्वे चास्य कादाचित्कत्वप्रसंगात्तद
भावेऽपि ह्यात्मनोणुपरिमाणत्वं स्यात्॥ तन्नात्मनो विचार्यमाणोणुपरिमाणप्रतिषेधो घटते॥ यदपि नत्विदं पक्षरादिमत्त्वविशेषगुणाधिक
रणत्वादिति साधनमुक्तं॥ तदप्ययुक्तं तन्निषेधे बौद्धादिविशेषानुषंगात् सिद्धसाधनादिप्रसंगात्तद्वाणुपरिमाणप्रतिषेधमात्रस्य परैरपि
स्वात्मन्यप्यभ्युपगतत्वात्॥ नित्यद्रव्यत्वं चात्मनः कथंचिदिव सिद्धं सर्वथा वा कथंचित्पक्षे तदा सिद्धादिनानैकांतस्याणुपरिमाणानाधिकरण
त्वे कथंचिन्नित्यद्रव्यत्वे च सर्वथा व्यापित्वाभावात्॥ अथ सर्वथा तदसिद्धं सर्वथा नित्यस्य वस्तुनोर्थक्रियाकारित्वाभावेन खरविषाणवदसत्त्वस्यै
वासंभवात्॥ एतेनास्पर्शवद्द्रव्यमात्मनो नित्यत्वसाधनाय यदुक्तं तदपि प्रत्युक्तं मनसोहेतत्वस्य कथंचिन्नित्यत्वसाधने सिद्धसाध्यता॥ सर्वथान
त्वापत्तेर्हेतोरन्यथानुपपत्त्याकाशादीनामपि सर्वथानित्यत्वस्य प्रतीतिविरुद्धत्वात्॥ एतेन क्षणिकविशेषगुणाधिकरणत्वादित्यपि प्रत्युक्तं॥ विद्युदा
दिनानैकांतिकत्वाच्च क्षणिकभास्वररूपादिलक्षणगुणाधिकरणत्वेप्यसर्वथानित्यत्वासंभवात्॥ अथ भास्वररूपादेः क्षणिकविशेषगुणत्वं ना
स्ति वन्ह्यादौ तस्याक्षणिकत्वप्रतीतेः॥ तर्हि बुद्ध्यादेरपि न विशेषगुणत्वं मा भूदिति अन्येन स्यात् क्षणिकत्वप्रतीतेः॥ यदप्युक्तं॥ देवदत्तांगनाद्यंगमित्या
दिनवस्य साधनं॥ यत्र सत्कारणत्वेनाभिप्रेतानां ज्ञानादीनां यो देवदत्तात्मगुणधर्माधर्मौ ताव पयमपालेकालात्ययापदिष्टो हेतुर्ज्ञानादीनां

न्या·कु·चं· देवदत्तांगनांगादिजन्मन्यव्याप्रियमाणानां तद्देहस्य चलनादितः प्रतीतेः॥ अथ धर्म्माधर्म्मौ तर्हि तदंगादिकार्यनिमित्तमस्माभिरपीष्यते॥ स्ववृ
९८३ त्तात्मगुणत्वं तु तयोर्नेष्यते अचेतनत्वात् रूपादिवत्। न सुखादिना हेतोर्व्यभिचारिता तस्याचेतनत्वाभावात् न हि दुःखादेः स्वसंवेदनलक्षणं चैतन्यं ना
स्त्यव्याप्तत्वात्॥ नाप्यसिद्धता तस्य चेतनत्वे तेनैतौ स्वग्रहणविधुरत्वात् घटादिवत्। न चानेनानैकान्तो ज्ञानस्य स्वग्रहणात्मकत्वप्रसाधनात् प्रसाधयि
ष्यते च कर्म्मणां पौद्गलिकत्वं मोक्षविचारावसरे इत्यलमतिप्रसंगेन॥ अस्तु वा तयोरात्मगुणत्वं तथापि न तदंगादिप्रादुर्भावे देवदत्तसद्भावसिद्धिः॥
न खलु कार्यदेशे सन्निहितमेव सकलं कारणं कार्यजन्मनि व्याप्रियत इति नियमोऽस्ति। अंजनादिना तत्कृद्व्यादेराकृष्यमाणांगनादिदेशासन्निधा मन्त्रादे इ. पु.
कर्षणादिकार्यकर्तृत्वोपलंभात्॥ कार्यत्वसत्त्वे इति विशेषणं च किमर्थं कालेश्वरादिना व्यभिचारनिवृत्त्यर्थमिति चेत् न। न हि कालेश्वरादिकमनु
गुणपूर्वकमपि यदि तदुपकारकं कार्यमपि किंचिदन्यगुणपूर्वकमपि तदुपकारकं भविष्यतीति संदिग्धविपक्षव्यावृत्तिकत्वादनैकान्तिको हेतुः॥ सद्भा
तत्वाभावे साध्ये वकृत्वादिवत् प्रासादिवदिति दृष्टान्तश्च साध्यविकलः॥ न च तथात्मनः को गुणोऽभिप्रेतो धर्म्मादिः प्रयत्नो वा यदि धर्म्मादिः साध्य
त्वप्रसंगः। अथ प्रयत्नो न तु कोऽयं प्रयत्नो नामात्मनः करचरणादीनां वाहत्स्य विज्ञानां परिस्पंदः स तर्हि चलनलक्षणक्रिया कथं गुणः अन्य प्रतिपत्ता इ. पु.
थागमनादेरपि गुणत्वानुषंगात् क्रियावादोच्छेदः स्यात्। एतेनादृष्टं स्वाश्रयसंयुक्ते आश्रयान्तरे कर्म्मारभत इत्यादि प्रत्याख्यातं अदृष्टस्याकण्टका
रत्वागुणत्वासिद्धेः। अतो विशेष्यासिद्धो हेतुः। विशेषणासिद्धश्च तदेकद्रव्यत्वाप्रसिद्धेः। किं हि किमेकस्मिन्द्रव्ये संयुक्तत्वात् समवायेन वर्त्तनाद्वा
तस्मात्॥ न तावत् संयुक्तत्वात् संयोगस्य गुणत्वेन द्रव्याश्रयत्वात् अदृष्टस्य वा द्रव्यत्वादन्यथा गुणवत्त्वेनास्य द्रव्यत्वानुषंगात् क्रियाहेतुगुणत्वादितिवि तत्त्वो
रोधे॥ समवायेन वर्त्तनं च समवायासिद्धेरसिद्धम्। प्रत्यासिद्धो नियेत्स्यमानत्वात् तन्नोपपद्यते तत्त्वमभ्युपगमादेवायुक्तः। क्रियाहेतुत्वमप्यसिद्धं रोध्‍
तथा हि॥ देवदत्तशरीरसंयुक्तात्मप्रदेशो वर्त्तमानमदृष्टं द्वीपान्तरवर्त्तिमणिमुक्ताफलादिषु देवदत्तं प्रत्युपसर्पणवत्सु क्रियाहेतुरुतद्वीपान्त
रवर्त्तिद्रव्यसंयुक्तात्मप्रदेशोऽथ वा सर्वत्र तत्राद्यविकल्पोऽनुपपन्नोऽतिव्यवहितत्वेन तत्रास्य संबंधाभावतः क्रियाहेतुत्वानुपपत्तेः। अथ तत्रात्मसंयो

[illegible] ... [illegible]

गः संबंधसंभवानदृष्टाभावोसिद्ध इत्युक्तं तस्य सर्वत्र सद्भावतः सर्वस्याकर्षणप्रसंगात्॥ यददृष्टेन यज्जन्यते तेन तददृष्टेन तदेवाकृष्यते न सर्वमित्य
प्युक्तं॥ ईश्वरस्य शरीरारंभकपरमाणूनां नादृष्टाजन्यतया कर्षणाभावप्रसंगात्। न चाप्याकर्षणेतिप्रसंगः॥ द्वितीयविकल्पोपि यथा वायुः स्वय
मुपसर्पणवानन्येषां तृणादीनां प्रत्युपसर्पणहेतुस्तथात्मगुणमपि स्वयं प्रत्युपसर्प्य तद्दृष्टान्तराश्रयमेवास्यात्प्रत्युपसर्पणे द्वीपां
तरवर्तिद्रव्याणामपि तथैव तत्प्रसंगादृष्टकल्पनानर्थक्यं॥ यदेवद्रव्यं प्रत्युपसर्पति तद्देवदत्तगुणाकृष्टं प्रत्युपसर्पणादिति हेतुश्चाने
कांतिकः स्यात्। दृष्टान्तरगतस्य तं प्रत्युपसर्पणेनवस्थानस्याप्यदृष्टान्तरप्रत्युपसर्पणप्रसंगात्॥ अथ द्वीपान्तरवर्तिद्रव्यसंयुक्तात्मप्रदे
शस्यैव॥ तेनैषां तं प्रत्युपसर्पणहेतुर्नान्यत्र य[illegible]दात्मगुणेन तथानभ्युपगमात् न खलु यत्नोयासादिसंयुक्तात्मप्रदेशाश्रयस्य व
मासादेर्देवदत्तगुणं प्रत्युपसर्पणहेतुरन्तरालप्रयत्नवैफल्यप्रसंगात्॥ सर्वत्र चादृष्टस्य देवदत्तसर्वद्रव्यक्रियाहेतुत्वं स्यात्। यददृष्टं यद्द्रव्यमुत्पा
दयति तददृष्टं तत्रैव क्रियां करोतीत्यपि चाविवारीरारंभकपरमाणुक्रियानस्यादित्युक्तं॥ कालात्ययापदिष्टश्चायं हेतुः यत्र तत्रबाधितकर्मनिर्देशा
नंतरं प्रयुक्तत्वात्॥ अदृष्टस्य तत्राश्रयस्त्वात्मा सर्वद्वीपान्तरवर्तिद्रव्यैर्विप्रयुक्तमेवात्मानं स्वसंवेदनप्रत्यक्षतः प्रतिपद्यते इति॥ तद्विप्रयुक्तत्वेनात्म
त्वनीतावप्यात्मनस्तद्द्रव्यैः संयोगाभ्युपगमे घटादीनामेवोदिग्भिः संयोगः सिद्धः किन्न स्यात् अतः सांख्यदर्शनं न स्यात्। प्रमाणबाधनमुभ
यत्र समानं॥ किं च धर्माधर्मयोर्द्रव्यान्तरसंयोगस्य चात्मिकत्वाश्रयः॥ स च भवन्मते नित्यं ज्ञानेन धर्मेणाधर्मेण भाभ्यां वा सर्वात्मनात्मालिंगि
तत्वेनान्यतत्संयोगादेस्तत्रावकाशलेनवानधर्मादेरिति॥ अथ तत्र लिंगितत्वस्वरूपपरिहारेण द्रव्यान्तरसंयोगादिस्तत्र प्रवर्तते तर्हि घटा
दिवदात्मनः सावयवत्वं सारंभकावयवारभ्यत्वमनित्यत्वं च स्यात्। एतेनैतन्निरस्तं देवदत्तं प्रत्युपसर्पन्तः पश्वादयो देवदत्तगुणाकृष्टाः तं
प्रत्युपसर्पणवत्वाद्ग्रासादिवदिति॥ तेषां तद्गुणाकृष्टत्वेनोक्ताशेषदोषानुषंगात्॥ देवदत्तशब्देन चात्र कोर्थोऽभिप्रेतः शरीरमात्मा तत्संयो
गः॥ आत्मसंयोगविशिष्टं शरीरं तत्संयोगविशिष्ट आत्मा शरीरसंयुक्तात्मप्रदेशो वा यदि शरीरं तर्हि तं प्रत्युपसर्पणात्तद्गुणाकृष्टाः पश्वा

रदृष्टस्यात्मविशेषगुणत्वे साध्ये शरीरगुणत्वस्य साधनाद्विरुद्धो हेतुः। अथात्मा गच्छन्नागच्छन्वा मणिः स्वदेशकालाभ्यां सर्वदाभिसंबध्यमानं तथा निर्वर्तयति किं
चिदुपसर्प्यति। न तावदेतन्नास्ति एकं वर्त्मनि नात्मगुणमुपसर्प्यति। अन्यदेशे प्रवृत्तोऽर्थोऽन्यदेशमर्थं प्रत्युपसर्प्यति। यथालस्यं वनि वाणादिः। अन्यकालं यावत्स्यन्यकाले।
यथाङ्कुरं प्रत्युपसर्पणशक्तिपरिणामलाभे नवीजादिः। न चैवं तदुभयं नित्यत्वव्यापित्वाभ्यामात्मनि सर्वत्र सर्वदा सन्निहिते संभवति। अतो देवदत्तं प्रत्युपसर्प्य
तदनिधर्म्मिविशेषणं देवदत्तगुणत्वाद्यनिसाध्यधर्म्मः। तं प्रत्युपसर्प्यणवत्त्वादिति साधनधर्म्मः। अपरस्य कल्पनाविशिष्टकल्पितत्त्वप्रसङ्गस्यात्। शरीरस्य संयो
गस्य चेद्देवदत्तशब्दवाच्यत्वे तं प्रति चेष्टासु पसर्प्यतोऽनङ्कुरणाद्वा लेखत्वात्तेन चक्षुषो गुणाः संति। निर्गुणत्वात्तेषां आत्मसंयोगविशिष्टं शरीरं तच्च द
वाच्यमित्यव्यापित्वे देवविरुद्धमित्यं दृष्टव्यं। शरीरसंयोगविशिष्टतच्छब्दवाच्यत्वस्य वाप्यात्मपक्षाभावे दोषः स्यात्। तथाविधस्याप्यस्य नित्यव्यापित्वेन सर्व
त्र सर्वदा सन्निधानेऽनिवारणात्। न खलु घटसंयुक्तमाकाशं मेघादौ न संनिहितं। अथ शरीरसंयुक्तात्मप्रदेशस्य तद्रूपत्वेनोच्यते। स किं कल्पनिकः
पारमार्थिको वा। काल्पनिकत्वे कल्पितात्मप्रदेशगुणत्वाद्दृष्टः पश्चादृष्टस्यात्मानं प्रत्युपसर्प्यणवत्त्वादिति न कुर्यात् नापि काल्पनिकत्वं प्रसाधयेत्।
तथा च सौगतस्येव न कुर्यात्। वैतथ्यभावो न पारमार्थिकः स्यात्। न हि कल्पितस्याग्नेरूपाद्यो दाहादिकार्य्यं वा पारमार्थिकं दृष्टं। अथ पारमार्थिकः स किं
मात्मनोऽभिन्नोऽभिन्नो वा। यद्यभिन्नस्तदा स एवासाविति नोक्तदोषपरिहारः। अथ भिन्नस्तर्हि न तद्विशेषगुणत्वमदृष्टस्य। पश्चादपदश्येन तत्रैवात्मत्वं प्रसज्यती
त्यन्यात्मकल्पनानर्थक्यं, कल्पनेवा सावयवत्वेन कार्यत्वमनित्यत्वं चापद्यत इत्युक्तं। यदप्यभिहितमात्मनोऽसर्वगतत्वे दिगन्तरदेशान्तरवर्त्तिभिः परमाणुभि
रित्यादि। तदप्यभिधानमात्रं यदीनसंयुक्तं तं प्रति तद्देशोपसर्प्यणेऽनिनियमासंभवात्। अयस्कान्तं प्रत्ययसस्त्वेनासंयुक्तस्याप्याकर्षणोपलंभात्।
यस्य चात्मा सर्वगतस्तस्यारब्धकार्य्यैरन्यैश्च परमाणुभिर्युगपत्संयोगात्तथैव तच्छरीरारंभः प्रत्येकसुखीभूतानां परमाणूनामाद्यं कर्म्मारब्धं प्रीति। नैव
नीरस्तु तन्न नियुक्तेऽपि तेषां तदर्हदेशापेक्षा नाम स्वकार्यसमवाय उपकारः सहायककर्म्मजननं वा। न तावदाद्यः पक्षो नुपपन्नः सर्वपरमाणुसंयोगान्नो देवद
त्तान्तरेणसहिकार्यसमवायसंभवात्। द्वितीयपक्षोऽप्ययुक्तोऽपेक्ष्यात्मपेक्षकस्यासंबंधोनवस्थानुषंगेणोपकारस्यैवासंभवात्। सहायककर्म्मजन

नमित्यप्यसद्विशेषणं ।। सर्वत्र तज्जननस्यापि प्रसंगात् ।। न तत्संयोगाददृष्टयोरन्यतरस्य केवलस्यैव तज्जननसामर्थ्यं परापेक्षानुपपत्तेश्च ।। यदि पुनः
संहतौ तावादृष्टसंयोगयोः सहितयोरेव कार्यजननसामर्थ्यमिष्यते । तर्हि तत्सहादृष्टस्यैव स्वाश्रयसंयोगनिरपेक्षस्य तत्सामर्थ्यमिष्यतां द्रष्टो हि
हस्तादाश्रयेणाप्यसंयुक्तानादिना स्वाश्रयासंयुक्तस्य भूभागस्थितस्य लोहादेराकर्षणं ।। यच्चान्यदुक्तं ।। सावयवं शरीरमनुप्रविशन्नात्मेत्यादि तदप्य
क्षिप्तं सावयवत्वेन भिन्नावयवारभ्यत्वस्य घटादावप्यसिद्धेः । न खलु घटादिः प्रावयवे शोपि प्राक्प्रसिद्धसमानजातीयकपालसंयोगपूर्वको दृष्टः ।। कुं
भकारकरादिव्यापारान्वितान्मृत्पिंडात्प्रथममेव पृथुबुध्नोदराकारस्यास्योत्पत्तिप्रतीतेः द्रव्यस्य हि पूर्वाकारपरित्यागेनोत्तराकारपरिणामः कार्यत्वं
तच्च बहिरंतश्चावयवानामनुभूयत एव ।। न चावयवावयविसंयोगपूर्वककार्यत्वोपलंभात्सर्वत्र तथाभावो युक्तः ।। काष्ठे लोहलेख्यत्वोपलंभाद्वज्रेपि त
थाभावप्रसंगात्प्रमाणबाधनमुभयत्रतुल्यं । न चोक्तलक्षणकार्यत्वाभ्युपगमेप्यात्मनोनित्यत्वानुषंगात्प्रतिसंधानाभावोनुषज्यते ।। कथंचिद
नित्यत्वे सत्येवास्योपपद्यमानत्वात्तस्य प्रमाणत्वात् ।। एतेन बालशरीरपरिमाणत्यादिप्रयुक्तं प्रत्युक्तं युवशरीरपरिमाणावस्थायामात्मनो बा
लशरीरपरिमाणपरित्यागेपि सर्वथा विनाशासंभवात् ।। विफणावस्थात्यागेनोत्फणावस्थोत्पादे सर्पवत् ।। अतः कथं परलोकाभावोनुषज्यते ।।
पर्यायतस्तस्यानित्यत्वेपि द्रव्यतो नित्यत्वात् ।। यदप्युक्तं शरीरस्य खंडे खंडे खंडनप्रसंगादिति तदपि न चारुकर्णं चेतनचेतनस्य खंडशः खंडनात् ।। शरीरसंबद्धात्मप्रदेशे
भ्यो हि कतिपयात्मप्रदेशानां छिन्नशरीरप्रदेशेऽवस्थानमात्मनश्छेदः ।। स चात्रास्त्येव अन्यथा शरीरात्पृथग्भूतावयवस्य कंपोपलब्धिर्न स्यात् ।। न च छि
न्नावयवप्रविष्टस्यात्मप्रदेशस्य पृथगात्मत्वप्रसंगस्तत्रैवानुप्रवेशात् ।। कथमन्यथा छिन्ने हस्तादौ कंपादिलिंगस्यादर्शनं तदनंतरमेव चागतत्वात
स्य न च लिंगानुपलब्धिरित्यभिधातव्यं ।। एकत्वादात्मनः शेषव्यापित्वेन तत्संगमने प्रसंगः नापि तत्रावस्थितस्यास्य तत्रैव विनष्टत्वात्तदुपल
ब्धिरित्यभिधातव्यं ।। शेषव्यापित्वेन तत्संगमनप्रसंगे नापि तत्रावस्थितस्यास्य तत्रैव विनष्टत्वात्तदुपलब्धिरित्यभिधातव्यं ।। शेषस्याप्येकत्वेन
तद्विनाशप्रसंगे ।। नैकसंतानेन कस्यात्मान्ते कार्यप्रतिभासित्वाभावान्नैकप्रमात्राधारतया प्रतिभासः संकलनात् ।। शरीरांतरव्यवस्थिता

न्या·कु·चं· नेकज्ञानावभासमानैकसंवित्तिवत् ॥ अतोन्यत्रागतेस्यासत्वाद्विनष्टत्वाच्च न तद्देशनरदेशानुप्रवेशोनुमीयते ॥ कथं छिन्नावयवयोः संघटनं पश्चादिति
८५ चेत् ॥ नैकान्तेनच्छेदस्याभ्युपगमात् ॥ पद्मनालतंतुवच्छेदस्याप्यभ्युपगमात् ॥ तथाभूतादृष्टवशाच्च तत्संघटनमविरुद्धमेवावयवसंयुक्तं शरीरपरि
माणत्वेकोपि तत्त्वानुषंगादित्यादि ॥ ननु किमिदं मूर्तत्वं नाम यदात्मनोनुपक्रम्येत ॥ असर्वगतद्रव्यपरिमाणत्वं रूपादिमत्त्वं वा तत्राद्यपक्षे तानदो
षावहोभीष्टत्वादीदृशमेव दोषापन्नायते ॥ द्वितीयपक्षस्त्वनुपपन्नोऽव्याप्त्यभावात् ॥ नहि यदसर्वगतं तेन नियमेन रूपादिमत्त्वेन विनाभावोस्ति
मनसोसर्वगतत्वेपि तदसंभवात् ॥ अतो नात्मनः शरीरेनुप्रवेशस्यानुपपत्तिर्यतो निरात्मकं तत्स्यात् ॥ असर्वगतद्रव्यपरिमाणलक्षणमूर्तत्वस्य
मनोवत्तत्र न निबंधकत्वात् ॥ रूपादिमत्त्वलक्षणमूर्तत्वोपेतस्यापि हि जलादेर्भस्मादावनुप्रवेशो न प्रतिबध्यते ॥ आत्मनस्त्वमूर्तत्वप्रतिहतत्वान्नत्रा
सौ प्रतिबध्यत इति महच्चित्रं ॥ ततो पचयापनिर्बाधबोधे प्रतिभासते ॥ तथैव परमार्थतः सद्व्यवहारमवतरति यथा सुखः प्रतिनियतदेशकालाकारत
या प्रतिनियतः प्रतिनियतदेशकालाकारतया प्रतिनियतः प्रतिनियतदेशकालाकारतयानवधिबोधे प्रतिभासते ॥ तथात्मेति न चायमसिद्धो हेतुः ॥ श
रीराद्बहिस्तत्प्रतिभासाभावस्य प्रतिपादितत्वात् ॥ अनेकप्रकारेण चात्र बाधकस्य बाधकप्रमाणस्य कस्यचिदप्यसंभवान्न विशेषणासिद्धत्वं ॥ तथात्मा
व्यापको न भवति ॥ सामान्यविशेषवत्त्वे सत्यस्मदादिप्रत्यक्षत्वात् यदेवंविधं तत्तथा यथा घटादि सामान्यविशेषवत्त्वे सत्यस्मदादिप्रत्यक्षश्चात्मा तस्माद्व्या
पको न भवतीति ॥ तन्न परेषां यथाभ्युपगतस्वभावमात्मद्रव्यमपि घटते ॥ छ ॥ नापि मनोद्रव्यं नित्याणुस्वभावस्यापि कुतश्चित्प्रमाणादप्रसिद्धेः ॥ ननु का
र्यत्वानुपपत्तेर्नित्यस्वभावता मनसः सिद्धैव तदनुपपत्तिश्चेत् तदारंभककारणाभावात्सुप्रसिद्धा तस्यारंभकं कारणं विजातीयं द्रव्यं स्यात्सजातीयं वा तत्राद्यपक्षोनु
पपन्नो विजातीयस्यारंभकत्वात् ॥ विजातीयानामनारंभकत्वमित्यभिधानात् ॥ द्वितीयपक्षोप्ययुक्तो यतो मनसः प्रादुर्भावे मनस एव सजातीयत्वं ॥ न ८५
चानेकमनःप्रादुर्भावे कारणभूतानेकमनःसद्भावप्रसंगः एकस्य द्रव्यांतरैरल्पस्याकारणत्वात् ॥ द्रव्याणि द्रव्यांतरमारभंत इति वचनात् ॥ नैक
त्र शरीरे नैकमनःसद्भावोस्ति प्रतिशरीरमेकैकतया तेषां स्थितत्वात् अन्यथा प्रतिशरीरं युगपदनेकज्ञानोत्पत्तिः स्यात् ॥ न च प्रतिनियतशरीरावरुद्धत्वेना

न्योन्यं तेषां संभवति संयोगः॥ नाप्यसंयुक्तानां तज्जनकत्वमतिप्रसंगात्॥ अथ युक्तमनसां तद् दृष्टाभावतोन्योन्यसंयोगसंभवात्तज्जनकत्व
मिष्यते॥ न द्युक्तं धर्माधर्मानधिष्ठितानां तेषां तज्जनकत्वानुपपत्तेः॥ अतोप्यकार्यत्वानुपपत्तेः सिद्धा नित्यता सद्भावसिद्धिस्तु युगपज्ज्ञानानु
पपत्तिलिंगात् युगपत् स्वविषयसंबद्धेष्वपि सर्वेषु चक्षुरादिष्वेकस्यैव मनसा प्रेर्यते॥ न देवस्त्वविषयेषु बुद्धिसुखादयो नैतिन्नियं क्रिया या युगपत्संनिहि
ताः स्वकार्यैकमवकरणापेक्षास्तरसामग्रीसद्भावेपि क्रमेणोत्पद्यमानत्वात्॥ दृष्टा चापेक्षा यस्याकारादिवत्॥ चक्षुरादिकं करणापेक्षं का
रणांतरकालेऽसत्यप्युत्पाद्योत्पादकत्वाद्वासीकर्णादिवत्॥ सुखादिज्ञानमिंद्रियार्थसन्निकर्षजं प्रसज्येत अतः सुखादिवद्भवरूप
त्वात् तत्सिद्धावनुमानाच्च॥ न चासुसंचारित्वेनास्त्वलक्षनित्वादस्पर्शोऽस्पर्शत्वादेवाकाशवन्नित्यं॥ क्रमेणार्थपरिच्छेदकत्वादव्यापकं॥ अ
दृष्टविशेषवशाद्प्रत्यात्मभिन्नमिति॥ ८॥ अत्र प्रतिविधीयते॥ यत्तावदुक्तं तस्यारंभकं कारणं सजातीयं वेत्यादि तदसमीचीनं॥ यतः किमेष
एकारणस्य सजातीयेतरचिंता प्रवर्त्यते॥ पृथिव्यादिद्व्यणुकेष्वेषां तर सामान्यं तदानंतु परादीनामपि कार्यकारणभावो न प्राप्नोति॥ तेषाम
न्योन्यासंभवात्तांतरसामान्याधारत्वपातरपेक्षयासजातीयत्वानुपपत्तेः॥ न हि तंतुत्वापेक्षया परस्परसजातीयत्वं संभवति॥ पटत्वापेक्षया तंतू
नां वा अथ पृथिव्यादिद्व्यणुकापेक्षया॥ नर्हि तदपेक्षया च यत्तंतुपरादीनां सजातीयत्वसंभवात् कार्यकारणभावः॥ तथा तद्द्व्यणुकापेक्षयात्पर्श
दिव्यंजकतया प्रतिनियतभूतकार्यत्वाप्रतिपन्नामनसस्त्वविशेषतो निखिलरूपादिव्यंजकतया तत्कार्यत्वासंभवान्न कथं तद्दृष्टांतेनतस्य
पुद्गलकार्यतास्यादित्यपि मनोरथमात्रं तेषां प्रतिनियतभूतकार्यत्वस्य बुध्येंद्रियपुद्गलात्मकमित्यत्र पंचत्वप्रतिक्षिप्तत्वात्॥ तद्भूतजाति
भेदस्य च पृथिव्यादिचतुर्विधद्व्यणुनिषेधावसरे निषिद्धत्वात्॥ सकलस्येव रूपादिमनः पुद्गलस्येनैव चक्षुरादयः पर्यायाः॥ ततो न दृष्टांतता वृत्तिक्यो
वैषम्यं यदि च चक्षुरादीनां प्रतिनियतरूपादिव्यंजकत्वात्प्रतिनियतभूतकार्यतेष्यते॥ न तु मनसः सकलरूपादिव्यंजकत्वात्सकलभूतकार्यतेष्य
तामविशेषात्॥ यदप्युक्तं नित्यादिस्वभावस्य मनसः सद्भावसिद्धिस्तु युगपज्ज्ञानानुत्पत्तिलिंगादित्यादि तदप्यसमीक्षिताभिधानं॥ परमाणुरू

K: ... मनसः ... संभवात् स स्यात्, तत्र च सोऽहं मनसः ... प्रयोगः – ... । ननु चक्षुरादीनां प्रतिनियत ...

न्या.कु.चं. यद्यमनसा युगपदधिष्ठीयेत क्रमेणैवातत्त्वात्पर्यसोनुपपन्न एकपरमाणुरूपेणानेन युगपदनेकाधिष्ठानत्वे पृथक्परमाणुत्वरूपं च भक्षकत्वेन

८५ मनस्ति॥ द्वितीयपक्षेपि प्रत्यासन्नत्वधिष्ठितार्थेषु क्रमेणैव प्रतीतिः स्यात्॥ आशुसंचारित्वात्क्रमेपि प्रतीतावपि युगपत्प्रतीतिभ्रमश्चेत्यप्यपेशलमव

यवप्रतीतेरपि भ्रांतित्वप्रसंगात्॥ एकस्मिन्नपि हि पुरोवर्तिन्यर्थे क्रमेणैकैकरश्मिजनितं ज्ञानं क्रमेणैकैकमेवार्थमवगृह्णीयात्॥ युगपदवि

लावयवैकाकारप्रतीतिस्तु भ्रांता स्यात्॥ धनूरकपुष्पवदारोसत्त्वमाणामप्यंते महत्त्वं भिन्नचविषयेरत्त॥ नहि क्रमप्रवृत्तपरमाणुज्ञानं नपावद

संप्रसिद्धं च युगपद्ग्रहणादुत्पत्तिः दीर्घशष्कुलीभक्षणादौ युगपदपि रूपादिज्ञानपंचकोत्पत्तिर्नप्रतीतेः॥ क्रमभावेप्याशुवृत्त्यानद्रूनानांयोगप

द्यप्रतीतिरित्यप्यचारुनिखिलभावानां क्षणिकत्वप्रसंगात्॥ अक्षणिकत्वाध्यवसायस्य सर्वत्राशुवृत्तिप्रवर्तमानत्वात्॥ प्रत्यक्षबाधाभयच

तुल्याश्रयान्योगपद्यप्रतीतिर्भ्रांतानपायस्तत्त्वानुपपत्तेर्नक्रमप्रतीतिबाधकत्वं॥ नतु कुतोस्याः भ्रांतत्वसिद्धिरेकमनःसंबंधकत्वेनयोगपद्यानुप

पत्तेरिति नेतरेतरक्रमप्रसंगः॥ तत्प्रतीतेः भ्रांतत्वसिद्धौ हि मनसः तत्त्वानुपपत्तेः सिद्धिस्तत्सिद्धौ च क्रमप्रतीतेरबाध्यत्वसिद्धिस्तत्सिद्धौ चैकमनः सि

द्धिरिति॥ एतान्यक्रमिंद्रियार्थद्वयादितरप्येनेन प्रत्युक्तं॥ क्रमेणकार्यकर्तृत्वस्यैवाप्रसिद्धत्वात्॥ दीर्घशष्कुलीभक्षणादौ युगपदपि ज्ञान

पंचककर्तृत्वप्रतिपादनात्॥ मनसोनेकांतिकं चेदं न हि तेन रूपादिकस्य कल्येपि क्रमेणकार्यकर्तृत्वेन च क्रमवत्करणापेक्षमनस्त्वप्रसंगात्प्रसि

द्धांतप्रसंगात्॥ अप्येनानुत्पादोत्पत्तिकत्वादित्यपि असिद्धत्वं भवत्यभ्युपगतेन मनसैवानेकांतात्॥ न खलु कारकांतरसाकल्येनुत्पाद्योत्पादकत्वमपि तैः

क्रमवत्करणांतरापेक्षत्वमनस्त्वस्यापाश्रयसिद्धांतस्य च प्रसंगात्॥ किंचानुत्पाद्योत्पादकत्वमस्य क्रमेण युगपद्वा विवक्षितं यदि क्रमेण तदासिद्धो हे

तुर्दीर्घशष्कुलीभक्षणादौ युगपदपि ज्ञानोत्पत्तिप्रतिपादनात्॥ अथ युगपत्तदा विरुद्धत्वं धोत्पादकत्वस्याक्रमिकरणाधीनत्वात्प्रसिद्धस्वभाव ८५

नेककार्यकारित्वात्प्रदीपवत्॥ यदप्यभिहितं सुखादिज्ञानमिमादिरितरप्यभिधानव्यावर्तितेनास्यप्रसिद्धविशेषणत्वात् न हि सुखादिज्ञानस्य प्रत्यक्षत्वं

सिद्धमिंद्रियाश्रितत्वेपि तत्संबंधत्वेनेतरवत्क्वचित्किंचिदिंद्रियकारणभूतमस्ति॥ यदाश्रितत्वेनास्य प्रत्यक्षतास्यात्॥ नास्य कुतश्चिदस्य प्र

सिद्धेः अत एव तत्सिद्धावन्योन्याश्रयः मनःसिद्धौ हि तद्गुणस्य तदाश्रितत्वेन भवतस्तत्त्वसिद्धिस्तत्सिद्धौ च॥ सविशेषणे तु सिद्धे धर्मिणि मनःसिद्धेः
निर्विशेषस्यासिद्धस्यात्मसुखादेर्भिन्नस्य न सुखादिकारणस्याप्रतीतेः॥ अत एवाश्रयासिद्धश्चायं न हि घटादि वस्तु सुखाद्यविशिष्टस्वरूपं प्रथमतस्तं
पुनरिन्द्रियेण संबध्यते। ततो ज्ञानं यद्गृह्णाति चेति लोके प्रतीतिरस्ति॥ प्रथममेव च विशिष्टविषयानुभवात् नात्मप्रकाशात्मनो ज्ञानस्य स्वात्मप्रतीतेः किं
च परत्र संयुक्तमनस्त्वत्र समवेते ज्ञाने सुखादौ यदि तद्भ्युपगमे सकलात्मसमवेतेषु सुखादिषु न ज्ञानमुत्पादयेत्। नित्यव्यापित्वेन मनसात्मनां
संयोगाविशेषात्॥ तथा च ज्ञानिनां भिन्नं मनोऽन्तरं न्यायं यस्मान्मनस्त्वेन तस्य मनस्त्वापि नित्यत्वेन तुरिन्द्रियपक्षे ह्यामा नं प्रतिनियतान्तःकरणसंबंधि
त्वेनैवासिद्धेः॥ तदिदं कार्यत्वात् दुष्कियमाणत्वात् तत्संयोगान्तरस्यैवेति तत्तन्तरात्मस्थैर्यत्वादस्यात्॥ तनार्थत्वात्कार्यत्वादयसिद्धौ
तत्प्रसंगात्॥ नित्यत्वविशेषात्तु यंगाच्च॥ नापि तदुष्कियमाणत्वात्सर्वथानित्यतया नादेयाभ्युपेत्यानिराशयात्स्याप्यनुपपद्यमानत्वात्॥
नापि तत्संयोगात्सर्वात्मस्यैवविशेषतः॥ सर्वसंबंधित्वानुषंगे एवाविशेषतत्तत्कथ्यापि विज्ञानं जनकत्वप्रसंगात्॥ नापि यदृष्टविशेषं तत्त्व
र्मनैवानन्तरत्वमभिधानकं॥ अचेतनस्यादृष्टस्यानियतनरकादिशरीरोपसर्गादौ तत्प्रेरणासंभवात्॥ अन्यथेश्वराख्येचेतनाधिष्ठान
परिकल्पनानर्थक्यं तस्यादृष्टप्रेरकोऽन्यापारान्तानर्थकमित्यभ्युपगमे तस्यैवासौ प्रेरकोऽस्तु तत्र मनया परंपरया॥ तस्य सर्वसाधारणत्वात्कृ
तोऽनन्नियमो युक्तः॥ न चादृष्टस्यापि प्रतिनियमः सिद्धस्तस्यात्मनो मन्तृभिन्नत्वात्॥ तनतत्त्वदृष्टं तदभेदेऽपि समवायित्वनिनियमसिद्धिरित्य
सुंदरं तस्यासिद्धस्वरूपत्वात्सर्वसाधारणत्वाच्च॥ येनात्मना यन्मनः प्रेर्यते॥ ततस्तेनान्यस्यापि सारमनुपलब्धस्य प्रेरयितुमशक्यत्वात्॥ तथा
विधस्यापि प्रेरणोऽदृष्टपरम्परयावादेरपि प्रेरणाप्रसंगादीश्वरकल्पनावैयर्थ्यात्तन्मनसः कुतश्चित्सिद्धिः सिद्धौ वा तन्तुसंयोगं निरंतरायात्मम
नसोरेकदेशेन संयोगे सांशत्वं सर्वात्मैकत्वप्रभवव्याघातकारि स्यात्॥ तन्नयथोपवर्णितस्वभावं मनोऽनुव्यमपि परेषामुपपद्यते॥ तदेवं
परपरिकल्पितेन द्रव्यपदार्थे विचार्यमाणे न घटामनयुते॥ छ॥ नापि गुणपदार्थस्तस्यापि विचार्यमाणत्वयथाभ्युपगतस्वरूपेणाव्यवस्थितेः

ननु गुणपदार्थस्य लक्षणाभिरभ्युपगतं तल्लक्षणं द्रव्याश्रितत्वादिकं सा च प्रमाणेन तथैव प्रतीयमानत्वात् कथमव्यवस्थितिः॥ तथा च न लक्षणं लक्षणं द्रव्याश्रय्यगुणवान्
न्या॰ कु॰ वं॰ ८६ संयोगविभागेष्वकारणमनपेक्ष इति॥ द्रव्यमाश्रयो यस्यासौ द्रव्याश्रयी द्रव्यत्वं च॥ अगुणवान् निर्गुणः संयोगविभागेष्वकारणमनपेक्षः सन्नेककर्मैव तल्लक्षणं
कारणत्वमस्येत्यर्थः॥ अनेन च लक्षणेन लक्षिताः शुक्लः पटो मधुरमाम्रं सुगन्धि मृगमदः॥ शीतलं जलमित्यादिविविधप्रत्ययप्रमयाद्यवहारदर्शनेन प्रसिद्धा रूपा
दयश्चतुर्विंशतिरेव गुणाः॥ उक्तं च लक्षणकृता रूपरसगन्धस्पर्शाः संख्यापरिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखेच्छाद्वेषौ प्रयत्नश्च गुणा
इति कण्ठसंगृहीताः सप्तदश चशब्दसमुच्चिताः गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाः सप्तैवेति॥ तत्र रूपं चक्षुर्ग्राह्यं पृथिव्युदकज्वलनवृत्ति॥ रसो रसनेन्द्रि
यग्राह्यः पृथिव्युदकवृत्तिः॥ गन्धो घ्राणग्राह्यः पृथिवीवृत्तिः॥ स्पर्शस्त्वगिन्द्रियग्राह्यः पृथिव्युदकज्वलनपवनवृत्तिः॥ एते च रूपरसगन्धस्पर्शाः पार्थिवपर
माणुष्वनित्याः पाकसंयोगात् तेषां पाकजरूपाद्युत्पत्तेः॥ अप्तेजोवाय्वणुषु पुनः संभवन्ति नित्याः कुतश्चिदप्यनेषां तत्राग्न्यप्रकोपेणानुत्पत्तेः॥ पार्थिवादिकार्यद्रव्ये
ष्वनित्याः॥ संख्या त्वेकत्वादिव्यवहारहेतुः एकत्वादिलक्षणा सा च एकद्रव्या चानेकद्रव्या च॥ तत्रैकसंख्या एकद्रव्या अनेकद्रव्या तु द्वित्वादिसंख्या तासामत्र स्वल्प एव
सिद्धाः॥ विशेषस्तु द्वेष्वनिमित्तोत्तरणेषु स्वात् अनुमानेनोपि तत्रैकत्वसंख्या नित्यद्रव्येषु नित्या कार्यद्रव्येष्वनित्या द्वित्वादिसंख्या तु परार्द्धान्ता अपेक्षाबुद्धिजन्यास
र्वत्रानित्या॥ परिमाणं व्यवहारकारणं परमाणु महत् अणु दीर्घं ह्रस्वमिति चतुर्विधं तच्च महद्द्विविधं नित्यमनित्यं च नित्यमाकाशकालदिगात्मसु परममहत्त्वं॥
अनित्यं त्र्यणुकादिद्रव्येषु अण्वपि द्विविधं नित्यानित्यविकल्पात् द्विभेदं परमाणुमनस्सु पारिमाण्डल्यलक्षणं नित्यं अनित्यं द्व्यणुके एव॥ वदरामलकबिल्वादिषु तु मह
त्त्वेपि तत्प्रकर्षाभावमपेक्ष्य भाक्तोऽणुव्यवहारः॥ द्व्यणुके ह्रस्वत्वमनित्यं त्र्यणुकादौ दीर्घत्वमनित्यं॥ ननु द्व्यणुके अणुत्वह्रस्वत्वयोर्विनिगमनयोः त्र्यणुकादौ च
महत्त्वदीर्घत्वयोरन्योन्यं कश्चिद्विशेषो वर्तते वा उक्तं॥ महत्सु दीर्घमानीयतां दीर्घेषु महदानीयतामिति व्यवहारभेददर्शनेन महत्त्वदीर्घयोः परस्परतः भे ८६
दसिद्धिर्भेदश्च सिद्धः॥ अणुत्वह्रस्वत्वयोस्तु विशेषो योगिनामेव प्रत्यक्षः॥ एतच्च महदादिपरिमाणं रूपादिभ्यो भिन्नं तन्तुसमवायित्वलक्षणाद्व्यवहारात्त्वास्तु
स्वादिवत्॥ संयुक्तमपि द्रव्यं यद्वशादेनं पृथगिति यतो धत्स्यचेने॥ तत्पृथक्त्वं व्यवहारकारणं पृथक्त्वं॥ तच्चैकत्वसंख्याविशेषितमेकत्ववन्नित्यमनित्यं च वोद्

त्वं॥ दिक्पृथक्कालविपरीतदिक्पृथक्कालादिस्वारसिकः नित्यमेव॥ अप्राप्तिपूर्विका प्राप्तिः संयोगः प्राप्तिपूर्विका चाप्राप्तिर्विभागः॥ तौ च द्रव्येषु यथाक्रमं संयुक्त
विभक्तप्रत्ययजनकावनित्यावेव॥ इदं परमिदमपरमिति॥ प्रत्ययाभिधानयोरन्यतरयोर्भवतः यथाक्रमं परत्वमपरत्वं तद्द्वानित्यमेव तु द्यापृथ्व्यपर्यन्ताः
अनित्यात्त्वात्तु गुरुत्वं च पृथिव्युदकवृत्ति पतनक्रियानिबन्धनं॥ न च पार्थिवाम्बुगुणं नित्यं परमाणुकादिष्वनित्यं॥ द्रवत्वं पृथिव्युदकज्वलनवृत्तिस्यन्दनहे
तुः॥ न च पृथिवीतेजसोर्नैमित्तिकमनित्यं॥ अपां सांसिद्धिकं परमाण्वापरमाणुषु नित्यं॥ अन्यत्वापरमाणु नित्यं प्राप्य द्व्यणुकादौ त्वनित्यं॥ स्नेहोऽम्भस्येव स्निग्धप्रत्यय
हेतुः स चाप्यपरमाणुषु नित्यः द्व्यणुकादावनित्यः॥ संस्कारस्त्रिविधो वेगो भावना स्थितिस्थापकश्चेति॥ तत्र वेगाख्यः पृथिव्यप्तेजोवायुमनस्सु मूर्तद्रव्ये
षूत्पन्नाभिधानविशेषापेक्षात्कर्मणः समुत्पद्यते॥ नियतदिक्क्रियाप्रबन्धहेतुः स्पर्शवद्द्रव्यसंयोगविरोधी च॥ भावनाख्यः पुनरात्मगुणो ज्ञानजो ज्ञा
नहेतुश्च॥ दृष्टानुभूतश्रुतेष्वर्थेषु स्मृतिप्रत्यभिज्ञानकार्योन्नेयो मानसप्रत्यक्षनिमित्तश्च॥ स्थितिस्थापकः॥ यत्नावयवसन्निवेशविशिष्टं स्वमाश्र
यं प्रयत्नतोऽन्यथास्थितमपि स्पर्शवद्द्रव्याश्रितं स्थापयतीति क्रूराद्दर्शने च नाल्पयत्नादेः प्रभूततरकालसंनिहितस्य प्रत्यवसायं पुनः स्वयं पूर्ववदेव
स्थाने संस्कारवशात्॥ एवं धनुः शाखादयस्त्वादेः कार्यमस्य दृष्टत्वात् च त्रिविधोऽप्ययं संस्कारोऽनित्य एव॥ धर्माधर्मौ चात्मविशेषगुणावनित्यावेव
शब्दस्तावदाकाशविशेषगुणो नित्य एवेति॥ छ॥ अत्र वृत्तिविधीयते यत्नाद् बुद्ध्यादीनां आत्मादिगुणानां लक्षणं॥ न दृश्यमाने चैतन्ये भवत्यस्मिन्नेतद्बुद्ध्यत
स्थिते तेषां नदान्यितत्वाद्युपपत्तेः॥ अस्तु वा तेषां नवानामित्याद्येकं लक्षणं न पापि न लक्षणानि स्थिताभावाद्यव्याप्तेर्विशेषणिव गुणानां पृथक्तयाभासा
पन्नं॥ अनेकधा गुणानां स्थवरास्तो लोके हि सौर्यधार्य्याद्योऽनेकधा गुणाः समुत्पद्ये॥ वैयाकरणानां पुनर्विशेष्यं तु अविशेषणानां गुणशब्दनिर्दिष्टं॥ यत्र
गुणस्य भावाद्द्रव्ये शब्दनिवेशनादभिधानलक्षणात् अनित्याभिधानात्॥ वैशेषिकानां नेति विशदं सुस्थिरत्वपिच्छिलत्वादीनां गुणत्वप्रसिद्धिः॥ सांख्याद्
नः सत्त्वरजस्तमसां गुणत्वं प्रतिपन्नाः॥ इति कथं नेत्याभिधानावधारयितुं शक्यं॥ किं चैते रूपादयः एकस्मिन् घटाद्यवयविनि निरङ्गैकस्वभावाभ्य
ताभ्युपगम्यन्ते॥ तथा चक्षुरिन्द्रियावरणादिनोपलभ्यमाने घटादौ पादद्रव्यवर्तिनो रूपादेरविहितं नष्टोपलब्धिः स्यादन्यथा निरंशैकरूपता व्याघाते

न्या॰कु॰वं॰
८७

नहि तद्रूपस्य प्रतिभासाप्रतिभासनलक्षणविरुद्धधर्म्माध्यासो युक्तो विरोधात्॥ एवं जलसेकादिना पृथिव्यां क्वचिदभिव्यज्यमाने गंधे समवायभेदोऽस्माकम
विगतस्य गंधस्याभिव्यक्तिः स्यात्॥ अन्यथाभिव्यक्तेतरविरुद्धधर्म्माध्यासात्स्वरूपविच्छेदेन कश्चिदेको गुणः स्यात्॥ अथ विसंयोगात् साकं जरूपोत्सेतो
तु विप्रतिपन्नभावस्तु अस्माभिरभ्युपगमात्॥ अपेक्षाया विरुद्धधर्म्मादिसंख्योत्पादनस्यैतन्न युक्तं। तस्याः परापेक्षत्वभावसिद्धत्वात्॥ नह्यपेक्षा
रूपत्वापेक्षाबुद्धिजन्यो न स्वरूपं चरमलक्षणेऽस्थूलादिव्यवहारवत्॥ यथैव हि स्वकारणकलापात्स्थूलत्वादिधर्म्मोपेतद्रव्योत्पत्त्येषु वरणादिषु तदवन
ल्पापेक्षाबुद्धिर्जायते॥ एवमात्रापि तत्रापेक्षाबुद्ध्या पौनःपुन्यनिरिति प्रामाणिको पंक्ति॥ एतावता मात्रादर्थनिष्पन्नो सर्वस्यैकाभिप्रेतार्थसिद्धि
प्रसंगात्॥ किंचैकस्यां बुद्धौ प्रतिभासमानाएकैकगुणाः॥ कथं कदाचित् द्वित्वसंख्या रूपनिकदाचिद्बहुत्वं नहि नैयामेकत्वे कश्चिद्विशेषः॥ नचैत
एकैकगुणे तेषां द्वित्वसंख्यामुत्पादयतो यच्च बहुत्व सैव बहुत्वसंख्या मित्यभिधातव्यं॥ द्वित्वादिसंख्योत्पत्तेः प्राक् तेषु द्वित्वस्य बहुत्वस्य चासंभवा
त्॥ गुणत्वं चास्याः न संभाव्यं गुणेऽपि संभवात्॥ पुनः सिद्धोऽयं एकं ज्ञानं द्वे ज्ञाने चतुर्विंशतिर्गुणाः षट्पदार्था इत्यादि वनीतो गुणेषु संख्यासद्भावः
नच भेदेकार्यं प्रत्ययोऽस्खलद्गतित्वात्॥ एवलक्षणे नित्वे हि भाक्तप्रत्ययस्य लक्षणं माणवके सिंहप्रत्ययवत्॥ यदपि महद्गुणेरपि बहुत्वमिति वस्तुद्वारे
माणं प्रतिपादितं तस्य च तत्र मोविलसितं वस्तुसंस्थानविशेषव्यतिरेकेण तद्भेदस्यासंभवात्॥ कस्य गुणत्वं वा प्रदर्शितं न हि दोषस्य [illegible]
वर्णितेव वर्तुलत्वम्न चतुरस्रादेरपि गुणरूपो मा पवर्णानानुषंगात् नवतुर्विधात्वा पवर्णनं ज्ञो भेत॥ यदप्युक्तं वद एममलकास्विभाको गुण्य वद्दा
रस्त्यादि॥ तदप्युक्तं॥ न च गौणत्वप्रतिपत्तेः कस्यचिदप्यभावात्॥ न खलु यथा सिंहमाणवकादिषु मुख्यगौणविवेकप्रतिपत्तिः॥ सर्वेषाम ध्वियोगेना
स्तित्वाद्यणुकएवाणुत्वह्रस्वत्वे मुख्ये अन्यत्र गौणे इति तद्विवेकप्रतिपत्तिः प्रक्रियामात्रप्रदर्शनस्य च सर्वशास्त्रे सुलभत्वात् नातः प्रतिनियतवस्तु
स्वरूपव्यवस्थितिः॥ आपेक्षिकत्वाच्च परिमाणस्यागुणत्वं न हि रूपादेः सुखादेर्वा गुणस्यापेक्षिकत्वं दृष्टं॥ योऽपि नीलनीलतरादेः सुखसुखतरादेर्वा
आपेक्षिको व्यवहारः॥ सोऽपि तत्प्रकर्षापकर्षनिबंधनो न पुनर्गुणस्वरूपनिबंधनः॥ यदप्यपोद्धारव्यवहारकारणं पृथक्त्वमित्याद्युक्तं॥ अपोद्धारव्य

वहारोऽपि भेदव्यवहारः स च सर्वेषां स्वगतासाधारणभेदकर्म्मनिबंधन इति॥ किं च तत्र पृथक्त्वलक्षणगुणांतरकल्पनया अन्यथा अपृथक्त्वमप्यभेदव्य
वहारकारणं गुणांतरं कल्प्यतामविशेषात्॥ द्वित्वपृथक्त्वादिशंका च द्वित्वादिसंख्यादूषणेनैव दूषिता॥ संयोगोऽपि नैरंतर्यावस्थितार्थव्यतिरेकेण
प्रतीतावनोपपन्ने। नैरंतर्येण परिणता हि पदार्थाः संयुक्तव्यवहारगोचरतां प्रतिपद्यंते॥ नैरंतर्यरूपसंयोगस्य च गुणत्वप्रसंगात्॥ गुणसंख्याव्याघातश्चेत् [illegible]
भागोऽपि संयोगाभावमात्रं न तु विभक्तार्थव्यतिरिक्तो गुणांतरम्। विभागगुणान्नान्योऽपि च सत्यविंध्यादौ विभक्तप्रत्ययोत्पत्तेर्न हि तत्र तद्गुणोऽस्ति॥ संयो
गविशिष्टार्थे एव तत्संभवात्॥ प्राप्तिपूर्विका अप्राप्तिर्विभाग इत्यभिधानात्॥ न चासौ प्रसंयोगाभावको वैलक्षण्याभावात्॥ न हि मेषयोर्विभक्तो [illegible]
ण्डौ विभक्तावित्यनयोः प्रत्ययोर्वैलक्षण्यमवधार्यते येन [illegible] लक्षिताविशेषात्॥ परत्वापरत्वयोरपि संख्यावच्छिन्नावयवोपचयलेशबुद्धिजन्य
त्वाविशेषात्। सन्निकर्षविप्रकर्षयोरेव हि परापरव्यपदेशानुप्रवेशेन [illegible] किंचापरापरादिव्यवहारः सत [illegible]
प्यसिद्धः॥ सर्वं च स्वसंकेतवशात् [illegible] मात्रनिबंधनो [illegible] किं च [illegible] परत्वगुणनिबंधनत्वसाधने [illegible] किंचैवं सति मध्यत्वमपि गु
णः स्यात्॥ कालकृतस्यादिकृतस्य च मध्यव्यवहारस्य दर्शनात् [illegible] गुरुत्वं च प्रत्यक्षेणानुमेयमित्ययुक्तं करतलस्थिते सुवर्णपिंडे पा
तनं विनापि दशपलोऽयं पंचपलोऽयमिति प्रतीतेः॥ किंच गुरुत्वं [illegible] तारतम्यं [illegible] नानाविधा [illegible]
संख्यातुं शक्यते॥ प्रधानभूतानि [illegible] पेक्षितं गुरुत्वपरिगणनाभावात्॥ किंच गुरुत्वे लघुत्वमपि गुणः
स्यादविशेषात् गुरुत्वाभावरूपत्वात् [illegible] गुरुत्वमपि लघुत्वाभावः किं न स्यात्॥ न लघुत्वस्याभावरूपत्वे [illegible]
न्यत्रापि समानं न च [illegible] कर्म्मकारणं च गुरुत्वव्यवहारः॥ [illegible] गुरुरित्यासज्य [illegible] गुरुत्वव्यवहारदर्शनात्। किंच
द्विगुरुत्वं गुणः स्यात्तदा [illegible] कार्यगुणाः [illegible] स्त्रस्य [illegible] अभ्युपगमात्॥ न तु [illegible] परिमाणेन गुरुत्वेन [illegible] गुरुत्वस्य [illegible] माणांसा
तिशयः स्यात्॥ [illegible] तथा च तुला [illegible] स्यात् [illegible] एवमपि [illegible] कर्म्मकारणं द्रवत्वं [illegible] विशेषात्॥ [illegible]

[illegible] ‹left margin note›
[illegible] ‹left margin note›
[illegible] ‹right margin note›
[illegible] ‹right margin note›
[illegible] ‹right margin note›

न्या.कु.चं. त्रिरात्रादिरिव यदि द्रवत्वं न वार्थगताः यावत्यः परिसंख्यातुं शक्यन्ते तत्युक्तं। न च त्रिद्रव्यवृत्तिरत्वस्य प्रसक्तं तेजस्यभावात् सुवर्णादौ चैतेजसत्वमसिद्धं

९८ त्वसिद्धेर्वा पतत्र द्रवत्वमुपलभ्यते॥ तत्त्वं शुक्लसमवायात्पार्थिवमेव रसादिवत्॥ न च पृथिव्यामपि पर्वद्रियां द्रवत्वं संभवति। शुष्ककाष्ठादिष्वभावात्

एतेन स्नेहगुणोपि प्रत्याख्यातो न हि सोपि सामर्थ्यविशेषादन्यो यो विशेषगुणो वा एवं तेन्। घृते तैलादिषु पार्थिवेषूपलंभात्। नतिमृद्व्यभिरद्भिः स्ना

ने पुरुषे स्निग्धो जन्यपोहृष्टः संयोगहेतुत्वं वस्तुसामर्थ्यात्। पार्थिवलाक्षादीनामपि दृष्टं। योपि संस्कारस्त्रिविधः सोप्यनुपपन्नः॥ तावत्॥ क्रियाणां सं

तत्येवोत्पादनसामर्थ्याद् एक एव देशान्तरव्यापी गुणः कल्प्यते व्यापारान्तरानुपपत्तेः। कथं तर्हि वेगेन गच्छतीति प्रतीतिर्न विरुद्ध्यते॥ इति चेत् शीघ्रक्रियाणां

सानत्येवेगेन गच्छतीति प्रतीतिरविरोधः॥ अतः प्रतीतिर्वेगाख्यगुणसद्भावे नैव वेगेन शक्यं ज्ञातुं॥ वेगेन षष्टिकाः पच्यन्ते इत्यत्रापि वेगगुण

सद्भावः स्यात् संतानेन गच्छतीति संतानेपि गुणः स्यात्॥ भावनारूपोपि संस्कारः आत्मनः स्मरणजननशक्तेर्नान्यः स्थितस्थापकोपि

संस्कारः प्रत्याख्यातो न हि सोपि यथावस्थितवस्तुस्थापनात् स्वभावादपरः प्रतिभासते॥ न चासौ सोपि यथावस्थितवस्तुस्थापयति॥ आकृष्यमाणो यः

स्वरूपात् शिथिलीक्रियते शाखादिर्गमनस्य स्थानस्य च दर्शनात्॥ धर्माधर्मावपि नात्मगुणौ प्रतिपादयितुं शक्यौ न च विप्रतिपत्तेः सिद्धेः सिद्धिः

तौ संस्कारमनेन बुद्धिधर्मौ मीमांसकानां तेन द्रव्यादिकं श्रेयःसाधनत्वाविशिष्टं तच्च वाच्यं॥ बौद्धाः ते ज्ञानस्यैव वासनारूपं शक्तिरूपं कर्म

निषसिद्धं॥ एतेन शब्दोप्याकाशगुणः प्रत्युक्तो विप्रतिपत्तेः नामविशेषात्॥ तथाहि जैनाः पौद्गलिकं तं प्रतिजानते॥ मीमांसका नित्यद्रव्यं शि

काः मीमांसकविशेषाः वायवीयं पिसी निकाः परमाणुरूपं करणाः स्फोटात्मकं॥ सांख्याः प्रकृतिपरिणाममिति तत्त्वगुणपदार्थोपि प

रपरिकल्पितो विचार्यमाणो घटते॥ ६॥ एतेन कर्मपदार्थोपि प्रत्याख्यातः॥ न तु कर्मणो गुणलक्षणादिभिन्नलक्षणत्वात् कथं तत्र प्रत्या ९८

नेनास्य प्रत्याख्यानं॥ तथाहि लक्षणं एकद्रव्यमगुणं संयोगविभागेष्वनपेक्षकारणं कर्मेति॥ एकद्रव्यमाश्रयो यस्यास्तीत्येकद्रव्यं नास्य गुणाः सं

ति॥ स्वयं च गुणो न भवतीत्यगुणं संयोगविभागयोः कर्त्तव्ये पुनः किंचित्कारणं मपेक्षत इत्यनपेक्षं॥ तज्ज्ञाने न लक्षणेन लक्षितं कर्म पंचप्रकारं भ

र्तते॥ यथा सूत्रं॥ उत्क्षेपणमवक्षेपणमाकुंचनं प्रसारणं गमनमिति कर्म्माणीति॥ तत्रोत्क्षिप्यतेनेनेत्योर्ध्वं क्षिप्यतेनेन पादः स्याकुंच्यतेनेन पाणिः प्र
सार्य्यतेंगुलिरित्यादिविशिष्टव्युत्पत्त्याद्यर्थानर्थांतरं॥ तत्रोत्क्षेपणं पदार्थस्याधःप्रदेशैः संयोगविभागकारणं कर्म्मोत्क्षेपणं॥ यथा तत्रैवावपवेन
लंबेद्वसुसलादौ बुद्धिरिष्यते॥ सा ताकाभावेगकारणं॥ अधोदेशेभ्यश्च विभागकारणं गुरुत्वप्रयत्नसंयोगवशात्तत्कर्म्मावक्षेपणं॥ उक्तं चैतेन
संयोगविभागकारणं तदवक्षेपणं॥ ऋजुनो द्रव्यस्य कुटिलत्वकारणं कर्म्माकुंचनं॥ तद्यथा ऋजुनो बाह्वादिद्रव्यस्याग्रावयवानामंगुल्यादीनां
तद्देशैश्च संयोगविनाशकाशाद्यैर्विभागे सति मूलप्रदेशैश्च संयोगे येन कर्म्मणा वक्रवी कुटिलः संपद्यते तदाकुंचनं॥ तद्विपर्ययेणानुसंयोगविभागो
त्पत्तौ येन कर्म्मणा वक्रवी ऋजुः संपद्यते तत्प्रसारणं॥ अनियतदिग्देशैर्यदादिभिर्यत्संयोगविभागकारणं तद्गमनं॥ उत्क्षेपणादिकं चतुःप्रकार-
मप्यनियतदिग्देशैस्तत्कारणं॥ अत एव पंचैव कर्म्माणि भवंति॥ भ्रमणं स्पंदनं रेचनं नारीणां गमनं स्वानं भौवारिनि॥ ७॥ अत्र परानि विधीयते न प
तावदुकमेकद्रव्यमित्यादि कर्म्मणो लक्षणं तरसमीचीनं॥ भवं चैव चक्रसरिरूपिते द्रव्यवृत्तिविशेषमत्यनवलक्षणतानुपपत्तेः॥ अस्तु तर्हि द्रव्यं तया
प्येन अंतःस्वभावमगंतृस्वभावमुभयरूपमनुभयरूपं वा कर्म्मणोऽऽश्रयः स्यात्॥ गंतृस्वभावं चेत्तर्हि न घनिरिक्तकल्पना ये पर्य्यन्तं स्वभावस्यापि
तत्कल्पनेनैव स्यात्प्रसंगात्॥ किं च सर्व्वदा गंतृस्वभावत्वात् एव तन्। स्वयं कदाचिन्नदाशर्वमगंतृस्वभावं न मस्वायूंतृस्वभावमित्यापात्तं॥ न च च स्थ्रां
गंतृस्वभावतां स्वीकुर्य्यात् परित्यागेन वा परित्यागेन न तदा दिबादिद्रव्यस्यानित्यता प्राप्तेः॥ स्वभावप्रच्युतिलक्षणत्वात् स्यात्। अथापरित्यागे
न नत्वापरित्यक्तागंतृस्वभावस्य हि मा चलादिवद्गंतृस्वभावसमावेशानुपपत्तेः॥ नन्वगंतृस्वभावस्याश्वादिद्रव्यस्य कर्म्माश्रयत्वं घटते॥ नाप्य
गंतृस्वभावस्याकाशादिवत्तथाविधस्याप्यन्यदाश्रयत्वविरोधात्॥ पूर्वमगंतृस्वभावस्योत्तरकाले गंतृस्वभावतापत्तौ तस्य तदाश्रयत्वे चोक्तदोषानु
षंगः॥ नाप्युभयस्वभावस्य उभयपक्षनिक्षिप्तदोषानुषंगात्॥ किं चोभयस्वभावता युगपत्क्रमेण वा स्यात्॥ न तावद्युगपद्गंतृत्वागंतृत्वस्वभा
वयोर्विभिन्नकालनिबंधनत्वाद्ययोर्विभिन्नकालनिबंधनत्वं न तयोर्युगपद्भावो यथा प्रसारितेतरांगुलिस्वभावयोस्तत्कालनिबंधनत्वं च तत्स्व

न्या·कु·चं·
९९

भावयोरिति॥ युगपद्वा देवदत्तयोर्विरुद्धधर्म्माध्यासतो भेदप्रसंगादेकरूपताव्याघातः क्रमेण तद्भावाभ्युपगमे प्रागुक्तरूपत्यागेनात्यागेन वांशतयोत्पा
दे वा युक्तदोषानुषंगः। अतएव रूपताविरोधान्न युक्ताभिविधिप्रतिषेधधर्म्मयोरेकतरप्रतिषेधेन्यतरविधेरवश्यंभावित्वात्॥ ततः सर्वथैकरूप
भावे वस्तुनि कर्म्मणोनुपपद्यमानत्वान्न परेषां कर्म्मपदार्थो घटते॥ अस्तु वासौ तथापि देशान्तरप्राप्तिहेतुः परिस्पंदात्मकः परिणामोर्थस्य कर्म्मेत्येतावता
वैनैर्यपीसत्वान्न तत्पंचकप्रकारतोपवर्णनं प्रयुक्तमुत्क्षेपणादीनामप्येवाप्रस्तान्तर्भूतानामपि किंचिद्विशेषमारोप्य भेदेनाभिधाने भ्रमणस्पन्दनादीनां
यत्नोक्तादेनाभिधानानुषंगात्कथं पंचप्रकारतैव स्यात्॥ किंचोत्क्षेपणादिकर्म्मणो भेदः स्वरूपनिबंधनो जातिनिबंधनो वा स्यात्॥ स्वरूपनि
बंधनश्चेत्किं स्वरूपमात्रनिबंधनो वा स्यात्स्वरूपनिबंधनश्चेत्॥ किं स्वरूपमात्रनिबंधनो विशिष्टरूपानिबंधनो वा न तावत्स्वरूपमात्रनिबं
धनस्तन्मात्रस्य सर्वेषामविशिष्टत्वादविशिष्टस्यापि भेदकत्वे एकत्वानेकेष्वपि भेदकत्वप्रसंगात् न क्वचिदेकत्वव्यवहारः स्यात्॥ विशिष्टस्वरू
पनिबंधनश्चेत्॥ किंकृतं तद्वैशिष्ट्यं जातिकृतमिति चेन्नहि जातिनिबंधनस्तद्भेदः स्यात्पातं॥ तत्राप्युत्क्षेपणत्वादिजातिरभिव्यक्ता वा कर्म्मणो भेदं वि
दध्यात्॥ नानावदनभिव्यक्ता सर्वत्र सद्भावात्तद्भेदाभिव्यंजकत्वप्रसंगात्॥ अभिव्यक्ता चेत्कुतस्तदभिव्यक्तिस्तत्कर्म्मभेदादन्यतो वा न तावदन्यतो वि
जातीयव्यक्तीनामभिव्यंजकत्वेकर्म्मादिभ्योपि तत्त्वाभिव्यक्तिप्रसंगात्॥ तत्कर्म्मभेदस्य चाभिव्यंजकत्वेन्योन्याश्रयः सिद्धे हि तत्कर्म्मणोभेदे तत्त
ज्जातीनामभिव्यक्तिसिद्धिस्तत्सिद्धेश्च तत्कर्म्मणो भेदसिद्धिरिति॥ किंवासौ तत्कर्म्मणो व्यंजकस्तत्समुदायो वा न तावत्तत्क्षणः प्रथमतरोसमु
त्पन्नस्य तत्कर्म्मतत्क्षणमात्रस्य दुर्वृत्तत्वापोदेशपरिणामत्वाद्विजात्यभिव्यंजकत्वायोगात्॥ नहि क्षणमात्रभाविकर्म्मोत्क्षेपणमपक्षेपणं वास्मदादि ९९
भिर्लक्ष्यते॥ येनातत्तज्जातिभेदाभिव्यंजकः स्यात्॥ तस्यानित्यत्वेन योगिनामेव प्रत्यक्षत्वात्॥ नापि तत्समुदायो व्यंजकः कर्म्मणां क्षणिकत्वे
न समुदायस्यैवासंभवात्॥ बुद्धिपरिकल्पितः सोस्तीत्यप्ययुक्तं॥ वस्तुभूतार्थक्रियायां काल्पनिकस्य सामर्थ्यासंभवात्॥ सर्वथा यदर्थान्तरस्य
ग्राहकप्रमाणाभावात्सत्वं॥ यथैकः सर्वथार्थान्तरं प्रमाणतो न प्रतीयते न तत्तथाभ्युपगंतव्यं॥ यथा सामान्यादेः स्वरूपसत्वं सर्वथार्थान्तरं

नुपनीयते चक्षुर्न क्षिप्रमाणात्कर्म्मेति॥ ततो यथोक्तस्वरूपमेव कर्म्म प्रतीतिपथमुपारोहदुत्क्षेपणादिशब्दैः प्रतिपत्तव्यं॥ ६॥ ननु सालो-
कावयविद्रव्यसंयोगविभागव्यतिरेकेण नापरं किंचित्कर्म्म प्रतीयते॥ ऊर्द्ध्वं दूरे चालोकावयविद्रव्यसंयोगविभागपरंपरैवोत्क्षेपणमु-
च्यते॥ एवमेवेतरेषामपि वक्तव्यमित्यन्यः सोपि प्रतीत्यपलापित्वादपास्तः। केनचित्संयोगविभागौ चलतीत्यादिप्रतीतेरालंबनतां प्रति
पाद्येते। संयुक्तो विभक्तश्चेति प्रतीतिगोचरत्वात्तयोः अन्यथा विषयमवितथप्रत्ययप्रबन्धेनेत्यध्यापत्स्वपि घटालंबनः स्यात्॥ नचैवं नरवत्तु
नदीमध्यस्थितेस्याश्रयो जलप्रवाहेणाश्रयेण नवासंयोगविभागेषु प्रवर्त्तमानेष्वपि स्थाणुश्चलतीति प्रत्ययोपि कस्यचित्स्यादिति वाच्यं॥ निरंतरं च
संयोगविभागयोर्ग्रहणात् स्थिते हस्तरत्नवद्भूमावपि चलतीति स्यात्॥ नहि संयोगविभागयोरुभयवृत्तित्वाविशेषे हस्तरत्न एव चलतीति भवति न
भूमावेति॥ निर्निबंधनाव्यवस्थितिर्युक्ता स्वेच्छाचारित्वप्रसंगात्॥ अथ पदेस्य दत्तक्रियस्यैवतौ जन्येनेन भूमिक्रियायाः अपूलवैव न स्यतीति युक्ता
स्पतो नभसो यदेवं क्रिया स्वावयवव्यतिरेकानुविधायित्वात् चलतीति॥ सिद्धं क्रियालंबनत्वमेव संयोगविभागग्रहणेपि च निरालंबे विहायसि वि
हरतीति विहंगमे चलतीति प्रत्ययप्रतीतेश्च॥ नहि गगनसंयोगोस्मदादेः प्रत्यक्षः प्रत्यक्षेण रदुष्करत्वात् उपवनमहीरुहसंयोगवत्॥ ननु विनना
लोकावयव्यवकाशत्वेन वपनत्रिसंयोगोस्मदादेः प्रत्यक्ष एवेत्यपस्कंदः॥ सम्बंधकारे खद्योतो गच्छतीति प्रत्ययाभावप्रसंगात्॥ नहि तत्रा
लोकावयवी विद्यते॥ यत्संयोगविभागग्रहणनिबंधनोयं प्रत्ययः स्यात्॥ नाप्यंधकारलक्षणं किंचिद्वस्त्वस्ति येन वस्तुत्वेति आलोकाभावस्य
मत्यभ्युपगमात्॥ भूकंपे महाते च जाते चलतीव क्रमनीयप्रतीतिर्द्दृश्यते॥ न चलनक्षमात्मा तद्धेतुना संयोगविभागौ गृह्येते धनस्यान्तःसंयोगा-
द्यालंबना चलनीतिप्रतीतिः किंतु क्रियालंबनैव॥ किं चैवं संयोगविभागौ स्वहेतुकौ वा स्यातां सहेतुकौ वा॥ अहेतुकत्वे सर्व्वदा सत्त्वमसत्त्वं
वा स्यात्॥ सहेतुकत्वे कस्तयोर्हेतुः यदर्थस्वरूपमात्रं तर्हि विशिष्टपरिणामो वा प्रथमपक्षे स्थिरेप्यर्थे परापरप्रदेशावयविद्रव्यसंयोगविभा
गोत्पादप्रसंगः तत्स्वरूपमात्रस्य तत्रापि विशिष्टत्वात्। विशिष्टपरिणामहेतुकत्वे तु नाममात्रभेदः॥ कर्म्मण एव तत्परिणामशब्देनापि

धानात् तद्व्यतिरेकेणापरापरस्मरेशावयविद्रव्यसंयोगविभागाभ्यां देशदेशान्तरेष्वर्थान्तरं विभिन्नप्रत्ययग्राह्यत्वाद्रूपरसवत्॥ न चेदमसिद्धं
संयोगविभागयोः संविद्रूपप्रतिष्ठतया संवेदनात्॥ कर्म्मणस्त्वेकत्वं चिन्तितमनयानुषादेव पत्तनस्थलान्निश्चलस्यायोदेवदत्तप्रत्यये घ्यःक
म्पनस्वदत्तस्यापायमेव चलतीति प्रत्ययवेद्यमनस्तद्योऽभिन्नं सर्वत्र भेदव्यवस्थायाः संविद्रूपनिबन्धनत्वात्॥ न तु लक्षणमात्रस्यापि चिन्तया॥
र्थानां देशादेशान्तरप्राप्त्यसंभवाच्चेन लक्षणमपि कर्म्मोपपन्नमित्यपि मनोरथमात्रं लक्षणिकत्वस्यार्थानां निराकरिष्यमाणत्वात्॥ न
न्वकर्म्मपदार्थोऽपि परपरिकल्पितो विचार्यमाणो घटते॥ स्व॥ नापि सामान्यपदार्थः तत्स्वरूपस्यापि विचार्यमाणस्यानुपपद्यमानत्वा
त्॥ ननु द्रव्यगुणकर्म्मानिमित्ता बाध्यमानानुगतज्ञाननिमित्तं सामान्यं॥ तत्स्वरूपस्य वास्तवत्वं विचार्यमाणस्यानुपपत्तिस्तद्रूपत
या सप्रत्यक्षादिगोचरत्वादिरितया समर्थयिष्यमाणत्वात्॥ तद्रूपेपतंत्र सामान्यं द्विविधं परमपरं चेति॥ तत्र परं महाविषयं सत्ताख्यं
तच्च सत्तेति द्रव्यगुणकर्मसु सदिति प्रत्ययस्यैव हेतुत्वात्सामान्यमेव न विशेषः॥ अपरं तु द्रव्यत्वगुणत्वकर्म्मत्वादिलक्षणं तच्च स्वाश्र
येष्वनुवृत्तिप्रत्ययहेतुत्वात्सामान्यमित्युच्यते विजातीयेभ्यः स्वाश्रयस्य व्यावृत्तप्रत्ययहेतुत्वाच्च॥ सामान्यमपि सद्विशेषत्वमभिधी
यते॥ तथा हि॥ गुणादिषु द्रव्यमगुणादित्यादिका व्यावृत्तबुद्धिरुपपद्यते॥ तां च त्येषां मेव द्रव्यगुणत्वादीनां हेतुत्वं प्रतीयते॥ नान्य
स्यैकस्यास्य सामान्यविशेषभावो विरुद्ध इत्यभिधातव्यं अपेक्षाभेदात्तत्र सद्भावस्याविरोधात्॥ तत्सद्भावे च प्रत्यक्षमेव नानात्वप्रमा
णं विभिन्नगोत्वादिव्यतिरिक्तस्यानुगतस्यैकस्यास्य गौर्गौरित्याद्यनुगतेन्द्रियप्रभवप्रत्ययोऽविभासमानत्वात्॥ न हीदमनुगतैकाकारेष
त्वालंबनत्वमन्तरेणोपपद्यते॥ निर्हेतुकत्वे न सर्व्वदा सत्त्वस्यासत्त्वस्य वा प्रसंगात्॥ खंडादिवदन्यत्रापि वा नियामकाभावतः प्रत्ययानुवृ 
गात्॥ न च व्यक्त्यालंबनत्वादस्य दोष इत्यभिधातव्यं। व्यक्तीनां व्यावृत्तरूपतयानुगतैकाकारप्रत्ययालंबनत्वायोगात्॥ अन्यकार
प्रत्ययस्यालंबनात्वे सर्वत्रानाकाराणां क्वचित्प्रतिनियतार्थसिद्धिः स्यात्॥ तथानुमानमपि तत्सद्भावे केवलत्वेन प्रवर्तते॥ तथा हि॥ ग

वास्यमस्ति वा यद्गवादिषु गवाद्यभिधानज्ञानविशेषाः समयाधीनाः पिंडादिव्यतिरिक्तस्वरूपासंसर्गिनिमित्तान्तरनिबंधना गवादि
विषयत्वे सति पिंडादिस्वरूपाभिधानज्ञानव्यतिरिक्ताभिधानज्ञानविशेषत्वात्। यथानेव गवादिषु सवत्सधेनुर्भीरकाते।
द्विपरीतंउदाहरणमितिप्रकृतेनाभिसंबंधः॥तद्विपर्ययात्साध्यवैधर्म्यादतद्धर्म्मभावीदृष्टांतउदाहरणं॥यथानित्यःशब्दउत्पत्तिधर्म्मकत्वा-
त्तुनित्यंनउत्पत्तिधर्म्मकंनभवतियथापरमाण्वादीनि॥उदाहरणापेक्षस्तथेत्युपसंहारोनतथेतिवासाध्यस्योपनयः॥उदाहरणोपनयात्तः
उदाहरणाधीनःसाध्यसाधर्म्ययुक्तेउदाहरणेतथाचशब्दउत्पत्तिधर्म्मकइति॥वासाध्यस्योपनयःउदाहरणापेक्षउदाहरणाधीनःसाध्यसा-
धर्म्ययुक्तेउदाहरणेतथाचशब्दउत्पत्तिधर्म्मकइतिसाध्यस्यशब्दस्योत्पत्तिधर्म्मकत्वमुपसंह्रियते॥साध्यवैधर्म्ययुक्तेतुयथाकाशादिद्रव्य-
मनुत्पत्तिधर्म्मकंनित्यंनचतथाशब्दइत्यनुत्पत्तिधर्म्मकत्वस्योपसंहारप्रतिषेधेनोत्पत्तिधर्म्मकत्वमुपसंह्रियते॥हेत्वपदेशात्प्रतिज्ञायाःपुन-
र्वचनंनिगमनं॥द्वयोरुदाहरणयोःसाधर्म्येणवैधर्म्येणवाहेतावुपसंहृतेप्रतिज्ञायाःपुनरभिधानंतन्निगमनं॥संदिग्धेर्थेन्यतरपक्षेनुकूलका-
रणदर्शनात्तस्मिन्संभावनाप्रत्ययस्तर्कः॥तथाचसूत्रं।अविज्ञाततत्त्वेर्थेकारणोपपत्तितस्तत्त्वज्ञानार्थमूहस्तर्कः॥किमर्थोयमितिचेत्॥तत्त्व-
ज्ञानार्थंमनुमानप्रमाणप्रवृत्त्यर्थंतर्कोविविक्तंविषयंप्रमाणाभिप्रायच्छिंदतीनिःप्रमाणानुग्राहकस्तर्कः॥साधनोपलंभअन्वाततत्त्वावबो

न्या·कु·च· धोनिर्णयः॥ तत्त्वं च विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः। विमृश्यानित्यः शब्दो नित्यो वेति संदिह्य पक्षप्रतिपक्षाभ्यां साधनत्वात्साधनो

११३ पालंभोपलक्षितपक्षाभ्यां तु कौतनाभ्यामार्थस्य साध्यस्यानित्यत्वस्य कृतकत्वादित्यवधारणं निर्णयः॥ वीतरागकथा वस्तुनिर्णयफलो वादः॥ तथा

च सूत्रं॥ प्रमाणतर्कसाधनोपालंभः सिद्धांताविरुद्धः पंचावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः। एकाधिकरणौ वस्तुधर्मौ विरुद्धावेक

कालावनवसितौ पक्षप्रतिपक्षौ वस्तुधर्मौ वस्तुनो विशेषौ यथा सत्त्वासत्त्वे नित्यानित्ये चेति वा॥ अधिकरणनानात्वे चैकमधिकरणं प्रयोः तत्तौ विचारं प्र

योजयतो नानाधिकरणौ विरुद्धावपि यथा नित्य आत्मानित्या बुद्धिरिति। अविरुद्धावपि विचारं न प्रयोजयतो यथा क्रियावद्द्रव्यं गुणवद्वेति॥ भिन्न

कालावपि न विचारांगं द्वयोः प्रमाणोपपत्तेः॥ यथा क्रियावद्द्रव्यं निःक्रियं च कालभेदे सति॥ तथावसितौ विचारं न प्रयोजयतो निर्णयोत्तरकाले

विचाराभावात्॥ तावेवंविशेषणौ धर्मौ पक्षप्रतिपक्षौ तयोः परिग्रहः स्वीकारो नियमः॥ एवंधर्मायं धर्मी नैवंधर्मेति च पक्षप्रतिपक्षपरिग्र

हश्च जल्पवितंडयोरप्यविशिष्टः अतः प्रमाणतर्कसाधनोपालंभ इति विशेषणं प्रमाणैस्तर्कैश्च साधनमुपालंभश्च यस्मिन् स तथोक्तः प्र

माणाभावेन प्रमाणमूलाः प्रतितर्कस्य चावयवव्यपदेशेन॥ ननु वादे प्रमाणबुद्धिपरिगृहीतयोरेव साधनोपालंभयोः प्रयोगः॥ न छलादेव न भूत प्र

गतिन्यायेन वीतरागकथाज्ञापनादुद्भावितो न यतो पलभ्यते॥ न वादे प्रमाणबुद्ध्या परेण छलजातिनिग्रहस्थानानि प्रयुक्तानि तत्त्वनिर्णयबुद्ध्योद्भाव्यंते॥ किंतु निवारण

बुद्ध्या तत्त्वज्ञानायावयवोः प्रवृत्तिरेव साधनाभासो दूषणाभासो वा तत्त्वज्ञाननिमित्तमतो न तत्र योगोऽनुक्तः॥ उपालंभश्च प्रमाणत्वमतो निग्रहस्थाना

नुषंग इति चेन्नोत्तरयोः परयोर्नियमार्थत्वात्॥ तत्र सिद्धांताविरुद्धस्थाने नापसिद्धांतः॥ पंचावयवोपपन्न इत्यनेन न्यूनं चावयवहीनं न्यूनाधिकेषु न ग्रह

णादेतावतां संवत्कंचेति॥ अप्रयोजननिग्रहस्थानानि वादे निषिध्यंते॥ कस्मादिति चेत् गुर्वादिना सह वादो यत्र ज्ञातं॥ यस्मादयं न तत्त्वबुभुत्सु गुर्वादिना सह सं ११३

शयविच्छेदाय आगामीवचोधर्मवति शिष्यानुशासनलक्षणं विविधफलमाकांक्षन्नवतारं करोति॥ ततोऽप्यनन्तबुभुत्सा ~~[illegible]~~ तावदनेन साधनं

वक्तव्यं॥ एवं वस्तौ मतं प्रतिपद्यतेऽपसिद्धांतत्वात्॥ विजिगीषुकथा तु रूपसंकीर्तनफला जल्पः॥ सूत्रं यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाध

नोपालंभात्र तु पक्षस्य ते॥ न तस्य लक्षणे सिद्धान्ताविरुद्ध॥ पंचावयवोपपन्नस्तु न पक्षद्वयस्यानियतः स्यादनियमनिबंधनस्याचाभिसंबंध-
संभवात्जल्पे समस्तनियमस्यानाभासंभवात्॥ ननु छलजातिनिग्रहस्थानसाधनोपालंभः स उक्तः पक्षलादीनामसदुत्तरत्वेन साधनदूषणत्वानुपप-
त्तेः न तदुक्तं प्रमाणैः क्रियमाणयोः साधनोपालंभयोः छलादीनां अंगभावो रक्षणार्थत्वान्न स्वतंत्राणां साधनदूषणभावो न हि तानि स्वतंत्रं साधनत्वेन
दूषणत्वेन वा प्रयुज्यंते॥ किंतु सम्यक्साधने प्रयुक्ते परः छलजात्यादिना प्रत्यवतिष्ठमानः छलं जातिनिग्रहस्थानं वा तत्र यथा प्रयुक्तमित्येवं तद्दूषणतया
ऽस्यानिरस्यैव निरस्ते तस्मिन् स्वपक्षः॥ परिरक्ष्यते नाम यत्नेन परेणाविसाधने प्रयुक्ते सदसदोषप्रसंजनं स्वयं जात्यादिना प्रत्यवतिष्ठते॥ जात्याद्यु-
द्भावितं तत्र प्रतिवादी उत्तरमप्रतिपद्यमानो जीयते॥ जितेन तस्मिन् न कि पक्षः स पक्षसिद्धिरिति॥ स उक्तलक्षणोपपन्नः तत्त्वज्ञानसंरक्षणपक्ष-
विहीनः एतस्य तु पक्षप्रयुक्तस्य॥ छलादीनि जल्पस्यायासोऽजस्रमतिदुष्टतार्किकपरिकल्पितदूषणाद्वेरेण तत्त्वाध्यवसायात्मत्वात्॥ तदुक्तं॥ तत्त्वाध्य-
वसायसंरक्षणार्थं जल्पवितंडे बीजप्ररोहसंरक्षणार्थं कंटकशाखावरणवदिति॥ जल्पविशेषो वितंडा॥ यथा च तत्र प्रतिपक्षस्थापनाहीनो वितंडा॥
स यथोक्तो जल्पः॥ प्रतिपक्षस्थापनाहीनं यदि वितंडात्वं प्रतिपद्यते॥ वैतंडिकस्य च स्वपक्षस्थापनसाधनवादिवत् दोषं च पश्यति पक्षोऽसि प्र-
तिपक्षस्तु न्यायेन तस्मिन् प्रतिपक्षे वैतंडिको न साधनं वक्ति केवलं परपक्षदूषणेव प्रवर्तत इति॥ अहेतवो हेतुवदाभासमाना हेत्वाभासाः पंच॥
सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीता हेत्वाभासाः॥ इति सूत्रेण च कारणवचनात्॥ तत्र सव्यभिचारस्य लक्षणं अनैकांतिकः सव्यभिचा-
रः॥ व्यभिचारो नियमः तेन सह वर्तत इति सव्यभिचारः अन्यत्रानैकांतिकः एकस्मिन्नंते भवति ऐकांतिकस्तद्विपर्ययादनैकांतिकः॥ यथा नित्यः शब्दः प्र-
मेयत्वादिति॥ विरुद्धलक्षणं॥ सिद्धांतमभ्युपेत्य तद्विरोधी विरुद्धः॥ सिद्धांतशब्दो धर्मविशिष्टधर्मिणि प्रसिद्धो यः साध्यविषयो यदि तत्स्मा स्ते-
न साध्यधर्मः अभ्युपगम्य पक्षं विरुणद्धि विपर्ययं साधयतीति॥ स विरुद्धो यथा नित्यः शब्दः कृतकत्वादिति॥ प्रकरणसमस्य लक्षणं॥ यस्मात् प्रक-
रणचिंता स निर्णयार्थमपदिष्टः प्रकरणसमः॥ विचारमाणौ पक्षप्रतिपक्षौ प्रकरणं तस्य चिंता संशयात्प्रभृत्यानिर्णयात् परिमर्शः॥ तथा परोपि हि

न्या·कु·चं·

११६

मर्शोत्पत्तिं केवलत्वेन॥ सा च विशेषानुपलंभादेव भवति॥ स एव च विशेषानुपलंभो यदा निर्णयार्थमपदिश्यते॥ तदा प्रकरणमनतिवर्त्तमानत्वा
त्प्रकरणसमो भवति, यथा नित्यः शब्दो नित्यधर्म्मानुपलब्धेरेकावावित्येकेनोक्ते द्वितीयः प्राह अनित्यः शब्दो नित्यधर्म्मानुपलब्धेर्घटवत्तत्र यथा
त्मकानि वस्तूनि प्रयुज्यंते॥ प्रमाणान्तरमनुसरन्तु सिद्धान्तमनवधारयन्तो भाष्यं तीक्ष्णं साध्यसमस्य लक्षणं॥ साध्याविशिष्टः साध्यत्वात्साध्यसमः
नित्यादीनां प्रतिसाधयितुं यदुपादीयते। तत्साध्यान्तरविशिष्टो हेतुः साध्यसमः कथं हेतोः साध्येन तुल्यतेति चेत्साध्यत्वात् यथा मीमांसकं प्रति नित्य
नित्यः शब्दः कृतकत्वात् घटवदिति॥ कालात्ययापदिष्टस्य लक्षणं कालात्ययापदिष्टः कालातीतः हेतोः प्रयोगकालः प्रत्यक्षागमाबाधितपक्षप
रिग्रहात् अनंतरं तमतीत्य यो हेतुरपदिश्यते॥ स कालात्ययापदिष्टः यथानुष्णस्तेजोऽवयवी कृतकत्वात् घटवत्॥ ब्राह्मणेन सुरा पातव्या द्रव
त्वात्क्षीरवदिति॥ अर्थविकल्पैर्वचनविघातश्छलं॥ तस्य लक्षणं॥ वचनविघातोऽर्थविकल्पोपपत्त्या छलं॥ वचनविघातेनाभिप्रायविधानेनापि
र्थविकल्पोपपत्त्या वक्तुरनभिप्रेतमर्थं तदुक्ते वचसि समारोप्य छलवादी तन्निषेधं करोति॥ कल्पमानघटने प्रीति सामान्यलक्षणं॥ तच्च त्रिविधं
वाक्छलं सामान्यच्छलमुपचारच्छलं चेति तत्र सामान्यलक्षणलक्षितं छलं वाक्छलादिभेदेन त्रिविधं भवति॥ तत्र विशेषोऽभिहितेऽर्थे वक्तुरभिप्रा
यादर्थान्तरकल्पना वाक्छलं॥ अविशेषाभिहिते विशेषेण शब्दप्रयुक्ते सति वक्तुरभिप्रेतमर्थमपहृत्यापरिकल्पितनिषेधवचनं निमित्तभूता
यां छलं वाक्छलं॥ यथा नवकंबलोऽयं देवदत्त इत्युक्ते परः कंबलोऽस्य न नव कंबला अस्येति॥ चत्र[redacted]मासपरमर्थद्वयोपि विशिष्टं तत्राभिनवकंबलत्वं
वक्तुरभिप्रेतं प्रमाणोपपन्नं चापहृत्य नवसंख्यासंबंध्याध्यासेऽप्यनन्तनिषेधेन परः प्रत्यवतिष्ठते॥ कुतोऽस्य नव कंबला इति संभवतोऽर्थस्यातिसा
मान्ययोगादसद्भूतार्थकल्पना सामान्यच्छलं अतिव्यापकं सामान्यं अतिसामान्यं तद्योगात्॥ क्वचिद्व्यवहार्यस्य कस्यचित्संभवेनोच्यमानेऽर्थे
भाव्यमाने निष्फले वक्त्राभिहितस्य सतोऽपरसद्भूतार्थकल्पनया प्रत्यवस्थानं तत्सामान्यनिमित्तत्वात्सामान्यच्छलं यथा संभवति ब्राह्म
णो विद्याचरणसंपदित्युक्ते छलवादी स्वप्राप्तानैकांतात्॥ न ह्युक्ते हेतुत्वेनाभ्यन्तरं हि ब्राह्मणत्वं विद्याचरणसंपन्नो हेतुत्वेनोपन्यस्तं॥ किं तर्हि

अवयवारो

११६

प्रसंगो वा वादोयमिति धर्म्मविकल्पनिर्देशेर्थसद्भावप्रतिषेधउपचारच्छलं॥ धर्म्मः क्रोशनादिलक्षणविकल्पउपचारस्तेननिर्देशेमंचाः क्रोशंतिगौ
णीत्यादिप्रयोगेकृतेयोर्थसद्भावनिषेधः समुख्यार्थप्रतिषेधः कथमचेतनामंचाः क्रोशंति॥ पुरुषास्तत्रस्थाः क्रोशंतिनमंचाइत्युपचारेण
मितं॥ छलमुपचारच्छलंतत्रयुक्तं॥ यथार्थस्याभिप्रायमप्रतिषेधात्॥ अभिधानप्रयोगोहिलोकेगौणोमुख्यश्चप्रसिद्धइति॥ हेतुप्रतिबिंबन
प्रायंप्रत्यवस्थानंजातिः॥ तथाचसूत्रं॥ साधर्म्यवैधर्म्याभ्यांप्रत्यवस्थानंजातिः॥ एकलजातीनांसामान्यलक्षणमिदंप्रतिकूलमवस्थानं
प्रत्यवस्थानंसाधर्म्येणवायत्प्रत्यवस्थानंहेतुप्रतिबिंबनप्रायंसाजातिरिति॥ तासांचतुर्विंशतिप्रकारोविभागः॥ साधर्म्यवैधर्म्योत्कर्षाप
कर्षवर्ण्यावर्ण्यविकल्पसाध्यप्राप्त्यप्राप्तिप्रसंगप्रतिदृष्टांतानुत्पत्तिसंशयप्रकरणाहेत्वर्थापत्त्यविशेषोपपत्त्युपलब्ध्यनुपलब्धिनित्यानित्यकार्यसमाः॥
इतिसूत्रकारवचनात्॥ तत्रसाधर्म्यवैधर्म्यसमयोर्लक्षणं साधर्म्यवैधर्म्याभ्यामुपसंहारेतद्धर्म्मविपर्ययोपपत्तेः साधर्म्यवैधर्म्यसमौ॥ साधर्म्ये
णवैधर्म्येणवासाधनमभिधानमभिधायसिसाधयिषितपक्षोपसंहारेसाधनवादिनाकृते॥ साध्यधर्म्मविपर्ययोपपादनायसाधर्म्येणप्रत्यवस्था
नं॥ साधर्म्यसमः प्रतिषेधः यथानित्यः शब्दः प्रयत्नानंतरीयकत्वात्प्रयत्नानंतरीयकंतदनित्यं॥ यथाघटइतिसाधर्म्येणहेतौप्रयुक्ते॥ जातिवादि
साधर्म्येणैवप्रत्यवतिष्ठते॥ नित्यःशब्दोनिरवयवत्वाद्यन्निरवयवंतन्नित्यंदृष्टंयथाकाशमिति॥ नचास्तिविशेषहेतुरस्तिघटसाधर्म्यात्प्रयत्नानंतरीय
कत्वादनित्यःशब्दोनत्वाकाशसाधर्म्यान्निरवयवत्वान्नित्यइतिवैधर्म्येणवाप्रत्यवतिष्ठते॥ यतःशब्दोनिरवयवत्वात्पुनरनित्यंनत्सावयवंदृष्टंयथा
घटोनचास्तिविशेषहेतुर्घटसाधर्म्यात्प्रयत्नानन्तरीयकत्वादनित्यःशब्दोनपुनर्घटवैधर्म्यान्निरवयवत्वान्नित्यइति॥ छ॥ वैधर्म्यहेनापिसा
धनवादिनाप्रयुक्तेनित्यःशब्दःप्रयत्नानंतरीयकत्वात्पुनरनित्यंनभवति॥ नत्प्रयत्नानंतरीयकमितिविज्ञापिनभवति॥ यथाकाशमित्युक्तेप्येतेनैव
पूर्वोक्तप्रयोगद्वयेनप्रत्यवस्थानंवैधर्म्यसमइति॥ छ॥ उत्कर्षसमादीनांलक्षणं॥ साध्यदृष्टांतयोर्धर्म्मविकल्पादुभयसाध्यत्वाच्चोत्कर्षापकर्ष
वर्ण्यावर्ण्यविकल्पसाध्यसमाः॥ यत्रदृष्टांतधर्म्मसाध्यधर्म्मिण्यसंतमप्यारोपयन्प्रयुक्तेणप्रत्यवस्थानंकरोति॥ सोत्कर्षसमाजातिः यथानित्यः

न्या॰ कु॰ चं॰
११५

शब्दः प्रयत्नानंतरीयकत्वात् घटवदित्युक्ते परः प्राह॥ यदि प्रयत्नानंतरीयकत्वात् घटवदनित्यः शब्दस्तर्हि तद्वदेव मूर्त्तोप्यस्तु॥ अथ न मूर्त्तस्तर्हि अनित्योपि मा भू-
दविशेषादिति॥छ॥ दृष्टांतधर्म्माविकल्पेनैव साध्यधर्म्मिणि सिद्धस्यापि धर्म्मस्यापकर्षेणा प्रत्यवस्थानमपकर्षसमा जातिः यथास्मिन्नेव प्रयो-
गे घटः प्रयत्नानंतरीयकोऽश्रावणो दृष्टः शब्दोपि तथास्त्वन्यथानित्यो न स्यादविशेषादिति॥छ॥ प्रख्यापनीयो वर्ण्यः साध्यधर्म्मिधर्म्मः तद्विपर्ययादवर्ण्यो दृ-
ष्टांतधर्म्मः॥ तौ वर्ण्यावर्ण्यौ विपर्यस्यन्नितरमितरेण समीकुर्वन्प्रत्यवस्थानं करोति॥ यदि शब्दो नित्यत्वेन वर्ण्यते साध्यते तदा घटोपि वर्ण्यतां साध्यतामिति
वर्ण्यसमा घटश्चेन्न वर्ण्यते न साध्यते॥ तर्हि शब्दोपि न वर्ण्यतामित्यवर्ण्यसमा॥छ॥ धर्म्मान्तरविकल्पेन प्रत्यवस्थानं विकल्पसमा यथात्रैव साधने प्र-
युक्ते परः प्रत्यवतिष्ठते॥ प्रयत्नानंतरीयकं किंचिन्मृदु दृश्यते॥ यथा वस्त्रादि किंचित्कठिनं कुप्यशस्त्रादि एवं प्रयत्नानंतरीयकं घटादि किंचिन्नित्यं भविष्यति शब्दादि
तु नित्यमिति॥छ॥ उभयोरपि साध्यदृष्टांतयोः साध्यत्वापादनेन प्रत्यवस्थानं साध्यसमा यथात्रैव साधने प्रयुक्ते परः प्रत्यवतिष्ठते॥ यदि यथा घटः तथा श-
ब्दस्तर्हि यथा शब्दस्तथा घटो न्तु शब्दश्चानित्यतया साध्य इति घटोपि साध्य एव स्यात्॥ कथमन्यथा तेन तुल्यता॥छ॥ प्राप्त्यप्राप्तिविकल्पेन हेतुं प्रत्य-
विशेषापादनं प्राप्तिसमौ हेतौ साधनवादिना प्रयुक्ते प्रतिवाद्याह॥ अयं हेतुः साध्यं साधयेत् प्राप्य वा अप्राप्य वा प्राप्य तर्हि द्वयोर्विद्यमानस्वरूपयोर्यु-
गपत्संभवात्कथमेकस्य साध्यतान्यस्य हेतुत्वं विशेषाभावादिति प्राप्तिसमः प्रतिषेधः॥छ॥ अप्राप्य हेतुः साध्यं साधयेत्॥ न तर्हि सर्वं साध्यं किं न
सैव साध्यं सर्वाविशेषात्॥ न ह्यप्राप्य प्रदीपः प्रकाश्यं प्रकाशयतीत्यप्राप्तिसमः॥छ॥ दृष्टांतस्य कारणानपदेशात्प्रत्यवस्थानात् प्रतिदृष्टांतसमौ य-
थाप्रयत्नेनैव साध्यत्वेन घटादेर्दृष्टांतस्यानित्यतायां किं कारणं न च वचनं तेन साध्यसिद्धिरतिप्रसंगात् हेत्वंतरान्वेषणे वानवस्थेत्येवं प्रसंगसमः प्र- ११५
तिषेधः॥छ॥ प्रतिदृष्टांतेन प्रत्यवस्थानं प्रतिदृष्टांतसमः यथा प्रयत्नानंतरीयको घटादिरनित्यो दृष्टस्तथाकाशं प्रयत्नानंतरीयकं नित्यं दृश्यते॥ तद्वच्छ-
ब्दोपि नित्यः स्यात्॥ कः पुनराकाशस्य प्रयत्नानंतरीयकत्वं वदेत्॥ कूपखनननिवृत्तिलाकाशाकार्पितं जन्यात् कश्चिदेवं ब्रूयात्॥ न चैवं व्यभिचारो ज्ञा-
नमेतत्सम्यगुत्तरं नाप्युत्तरप्रकारो जातिप्रयोगस्त्वभिधातव्यः॥ एतेनानेहेतोरनैकांतिकत्वमुद्भावयन्नपि साधुरिव जातिवादी प्रत्यवतिष्ठते॥ अ-

पितुदृष्टांतवनेनच नित्यमेव साधर्म्येणनुत्तिष्ठत इति ॥छ॥ प्रागुत्पत्तेः कारणाभावादनुत्पत्तिसमः ॥ यथात्रैव प्रयोगे विवादास्पदे शब्दमनुत्पन्ने तत्राश्रयेप
क्ष्मिणि प्रयत्नानंतरीयकत्वं धर्मः क्व वर्त्ततामनवधारणपक्ष इति चेत् ॥ कथमनित्यत्वं साधयेदसिद्धे वानित्यत्वे शब्दस्य वस्तुनो नित्यत्वमेव सिद्धेन ॥ का
रणाभावात् अनित्यत्वसिद्धिकारणस्य प्रयत्नानंतरीयकत्वस्याभावात् ॥ अथवा नित्यशब्दोत्पादककारणाभावादनुत्पन्नेत्र शब्दे निराश्रयो हेतुरि
ति ॥छ॥ सामान्यदृष्टांतयोरैंद्रियकत्वे समाने नित्यानित्यसाधर्म्यात् संशयसमः ॥ यथात्रैव प्रयोगे परेणोक्ते अत्र च निश्चये परेणानित्येन प्रयत्नानंत
रीयकत्वं शब्दस्य साधर्म्यं सामान्येन च नित्येनैंद्रियकत्वं ॥ ततः किं प्रयत्नानंतरीयकत्वादनित्यः शब्दः सामान्यवदैंद्रियकत्वान्नित्यो वेति संशय इति ॥छ॥
उभयसाधर्म्यात् प्रक्रियासिद्धेः प्रकरणसमः ॥ यथास्मिन्नेव प्रयोगे नित्यसाधर्म्यात् प्रयत्नानंतरीयकत्वात् कश्चिदनित्यतां साधयति ॥ अपरः पुनर्नि
त्याकाशसाधर्म्यान्निरवयवत्वान्नित्यतामिति ॥ अतः पक्षे विपक्षे च प्रक्रिया समानास्तीति ॥छ॥ त्रैकाल्यानुपपत्तेर्हेतोरहेतुसमः ॥ यथा सम्यक् साध
ने प्रयुक्ते दूषणमपश्यन् जातिवादी आह ॥ साध्यात्पूर्वं साधनमुत्तरं वा सहभावी वा स्यात् ॥ न तावत् पूर्वमसत्यर्थे तस्य साधनत्वानुपपत्तेः ॥ नाप्युत्तर
मसति साधने पूर्वं साध्ये साध्यस्वरूपत्वासंभवात् ॥ नापि सहभावि स्वतंत्रत्वेन पाप्रसिद्ध्योः साध्यसाधनभावासंभवात् त्रैकाल्येपि अहेतुरित्यहेतुसमत्वेन प्र
त्यवस्थानमहेतुसमः प्रतिषेधः ॥छ॥ अर्थापत्तितः प्रतिपक्षसिद्धेरर्थापत्तिसमः ॥ यथा प्राक्तनेष्वेव साधने प्रयुक्ते जातिवादी आह यदि घटसाधर्म्यात् प्रयत्ना
नंतरीयकत्वादनित्यः शब्दः तदार्थापत्तेः निरवयवत्वादाकाशसाधर्म्यान्नित्य इति ॥छ॥ एकधर्मोपपत्तेरविशेषे सर्वाविशेषप्रसंगात् ॥ स
द्भावानंतरीयकत्वादनित्यः शब्दः नच सर्वासमपदे ॥ निरवयवत्वादाकाशसाधर्म्यस्य सद्भावोपपत्तेरविशेषसमः ॥ यथात्रैव साधने प्रयुक्ते प्रत्यवतिष्ठते ॥
यदि शब्दघटयोरेको धर्मः प्रयत्नानंतरीयकत्वमस्तीति तयोरनित्यत्वाविशेषोभिधीयते ॥ नहि सर्वार्थेषु सत्त्वधर्मस्योपपत्तेर्नित्यत्वाविशेषः
स्यादिति ॥छ॥ उभयकारणोपपत्तेरुपपत्तिसमः ॥ यथास्मिन्नेव साधने प्रयुक्ते जातिवादी प्रत्यवतिष्ठते ॥ यद्यनित्यकारणं प्रयत्नानंतरीयकत्वमस्तीत्यनि
त्योस्ति तदा नित्यत्वेप्यस्य कारणं निरवयवत्वमस्तीति नित्योस्त्विति ॥छ॥ निर्दिष्टकारणाभावेप्युपलंभादुपलब्धिसमः ॥ निर्दिष्टस्य साध्यधर्मसि

[illegible]

न्या॰सू॰वृ॰ ११६

द्विकारणस्याभावेपि साध्यधर्म्मोपलब्धौ तत्त्वस्यानुपलब्धिसमः प्रतिषेधः यथा चैतत्साधनेनयुक्ते परः प्रत्यवतिष्ठते॥ शाखाकम्पश्चिमंगजे।
शब्दे विधुरादौ चप्रयत्नानंतरीयकत्वाभावेप्यनित्यत्वमस्तीति॥ छ॥ तदनुपलब्धेरनुपलंभादभावसिद्धौ तद्विपरीतोपपत्तेरनुपलब्धिसमः॥ यथा
श्रोतृव्यवधानादिविद्यमानः शब्दो नस्त्यावरणानुपलब्धिः श्रावरणादेस्तंवानुपलब्धिः सिद्ध॥ यद्यनुदर्शनान्मानाविद्यमानस्यानुपलब्धिर्नन
स्यावरणानुपलब्धिर्यथा॥ यथावृतस्य घटादेरावरणानुपलब्धिश्च श्रवणात्प्राक्शब्दस्येत्युक्ते जातिवादाह॥ तदनुपलब्धिः शब्दावरणानु
पलब्धिरप्यनुपलंभादभावसिद्धिरावरणानुपलब्धिर्नास्त्यनुपलब्धेरिति नहि विपरीतोपपत्तेः॥ शब्दस्याभावविपरीतत्वेनभावस्योपपत्तेरनुप
लब्धिसमः प्रतिषेधः॥ साधर्म्यात्तुल्यधर्मोपपत्तेः सर्वानित्यत्वप्रसंगादनित्यसमः॥ यथास्मिन्नेव प्रयोगे परः प्रत्यवतिष्ठते॥ यदि शब्दस्यानित्ये
त्वेन स्यादिति॥ छ॥ नित्यमनित्यभावादनित्ये नित्यत्वोपपत्तेर्नित्यसमः॥ यथा नित्यः शब्द इत्युक्ते जातिवादी प्रनित्यत्वाख्यसाध्यधर्मस्य स्व
र्वविकल्पेन शब्दस्यानित्यत्वमापादयति॥ तथाहि॥ किमिदमनित्यत्वं शब्दस्य नित्यमनित्यं वा यदि नित्यं तर्हि धर्मस्य नित्यत्वात् तदाश्रयस्या
पि शब्दस्य नित्यमनित्यभावादनित्यधर्मोधारस्तथा सत्यनित्यत्वं॥ अथानित्यं तत्राप्यनित्यत्वे नित्ये सिद्धं नित्यत्वं शब्दस्येति॥ छ॥ प्रयत्न
कार्यानेकत्वात्कार्यसमः॥ यथा नित्यः शब्दः प्रयत्नानंतरीयकत्वादित्युक्ते परः प्रयत्नकार्यानेकत्वोपन्यासेन प्रत्यवतिष्ठते॥ प्रयत्नस्य कार्य द्वि
विधमुपलभ्यते॥ किंचिदसदेव प्रयत्नेनाभिनिर्वर्त्यते॥ यथा घटादि किंचित्सदेवावरणापनयनद्वारेणाभिव्यज्यते॥ यथा कांडपृष्ठावस्थं पटा
दीति कथमतः शब्दस्यानित्यत्वेति॥ छ॥ स्वपक्षदर्शनाभासौ विपरीतप्रतिभासश्च निग्रहस्थानं॥ तथा च सूत्रं॥ विप्रतिपत्तिरप्रतिपत्तिश्च निग्रह ११६
स्थानं॥ विरुद्धा कुत्सिता वा प्रतिपत्तिर्विप्रतिपत्तिः तत्प्रतिपत्तेरभावोऽप्रतिपत्तिः इति सकलनिग्रहस्थानानां सामान्यलक्षणमिदं॥ तानि च द्वाविं
[illegible] शतिप्रकाराणि भवंति॥ प्रतिज्ञाहानिः प्रतिज्ञांतरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वंतरमर्थांतरं निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यूनमधिकं॥
पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणं निरनुयोज्यानुयोगोऽपसिद्धांतो हेत्वाभासा

चनियमश्च व्याख्यातानि। इति सूत्रकारवचनात्। तत्राननुभाषणमज्ञानं प्रतिभाविक्षेपः॥ पर्यनुयोज्योपेक्षणमित्यप्रतिपत्त्या संगृहीतानि।
शेषाणि विप्रतिपत्त्या। तत्र प्रतिज्ञाहानेर्लक्षणं प्रतिदृष्टान्तधर्माभ्यनुज्ञा स्वदृष्टान्ते प्रतिज्ञाहानिः॥ प्रतिज्ञासिद्धये वादिना साध्ये विहिते प्रति
वादिना चलन च दूषणे तृतीयेवर्णे सिद्धे न मानो वादी प्रतिदृष्टान्तगधर्मं स्वदृष्टान्ते नुज्ञानाति तदास्य प्रतिज्ञाहापन॥ इति प्रतिज्ञाहानिर्यथानि
त्यः शब्द ऐंद्रियकत्वाद् घटवदित्युक्ते परः प्रत्यवतिष्ठते। सामान्यमैंद्रियकं नित्यं दृष्टमित्यनैकांतिको हेतुः इत्युक्ते साधनबाधात्॥ यदि सा
मान्यमैंद्रियकं नित्यं कामं घटोपि तथास्त्विति॥ छ॥ प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात्तदर्थनिर्देशः प्रतिज्ञान्तरं॥ प्रतिज्ञातार्थस्यानित्यः
शब्द इत्यादेरैंद्रियकत्वस्य हेतोर्व्यभिचारप्रदर्शनेन प्रतिषेधे कृते तं दोषमनुद्धरन् धर्मविकल्पं करोति॥ किमयं सर्वगतः शब्दो घटवत्किं
वासर्वगतः सामान्यवत्॥ यद्यसर्वगतो घटवत्तर्हि तद्वदेवानित्योऽस्त्विति सोयमनित्यः शब्द इति प्रतिज्ञान्तरं कुर्वन्निगृह्यते। साधनसामर्थ्याप
रिज्ञानादिति॥ छ॥ प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः॥ यत्र प्रतिज्ञा हेतुना विरुध्यते॥ हेतुर्वा प्रतिज्ञया स प्रतिज्ञाविरोधः। यथा गुणव्यतिरि
क्तं द्रव्यं रूपादिभ्योऽभेदेनानुपलब्धेरिति॥ छ॥ पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः॥ यथा अनित्यः शब्द ऐंद्रियकत्वाद् घटवदि
त्युक्ते पूर्ववत्॥ सामान्येनानैकान्तिकत्वे हेतोरुद्भाविते प्रतिज्ञासंन्यासं करोति॥ क एवमाह अनित्यः शब्द इति॥ छ॥ अविशेषोक्ते हेतौ प्रतिषि
द्धे विशेषमिच्छतो हेत्वन्तरं॥ यथा एकप्रकृतीदं व्यक्तं परिमाणात् मृदादिवत् परिमितत्वं हि घटादेरेकमृत्प्रकृतिकस्य दृष्टं तन्महदादि विकारजातेः
प्रतीयमानमेकप्रकृतित्वं प्रसाधयतीत्यस्य हेतोर्व्यभिचारेण प्रत्यवस्थानमेकप्रकृतीनां नानाप्रकृतीनां च दृष्टं परिमाणमित्यस्यैव
तावद्धेतुत्वे निश्चिते एकप्रकृतित्वे संबंधानुसति विकाराणां परिमाणादिति भवत्यसीदित्यविशेषणात् प्ररूपणमात्रं॥ छ॥ प्रकृतादर्थादप्रतिसंबद्धार्थम
नर्थकं यो कश्चन्नरोपत्तप्रतिपक्षपरिग्रहे हेतुतः साध्यसिद्धौ प्रकृतायां प्रकृतं हेतुं प्रमाणसामर्थ्येनाहमसमर्थः। असमर्थयितुमित्यवस्य चापि
कथां परित्यजन्नर्थान्तरं ब्रवीति नित्यः शब्दोऽस्पर्शवत्त्वादिति हेतुः हिनोतेर्धातोस्तुप्रत्यये कृदन्तं पदं पदं च नामाख्यातोपसर्गनिपाताः इति प्रक

न्या॰ कृ॰ चं॰ स्य नामादीनि व्याचष्टे इति॥ सू॥ वर्णक्रमनिर्देशवन्निरर्थकं॥ अभिधेयरहितकेवलवर्णानुपूर्वीमात्रं निरर्थकं नाम निग्रहस्थानं, यथा नित्यः शब्दो ज
१९३ बगडदस्त्वात् झभघढधवदिति॥ सू॥ परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थं॥ यत्साधनवाक्यं दूषणवाक्यं वा त्रिरभिहित
मपि परिषदा प्रतिवादिना च न ज्ञायते॥ अप्रसिद्धप्रयोगमतिद्रुतोच्चारितमित्येवंप्रकारमसामर्थ्यसंवरणाय यत्तेनाभिधीयते तदविज्ञातं ना
म निग्रहस्थानं॥ सू॥ पौर्वापर्यायोगादप्रतिसंबद्धार्थमपार्थकं॥ पौर्वापर्येणासंगतपदकदम्बकोच्चारणाद्यत्र निष्ठितवाक्यार्थसमुदायार्थकं ज्ञानं तेनाविपर्ययेन न
आक्रमोल्लंघनेन प्रयुज्यमानमनुमानवाक्यमप्राप्तकालं नाम निग्रहस्थानमपि ग्रहस्थानं॥ यथा दशदाडिमानि षडपूपाः कुण्डमजाजिनं पललपिं
डुरस्यादि॥ अवयवविपर्यासवचनमप्राप्तकालं॥ अवयवानां प्रतिज्ञादीनां विपर्यासेन यथाक्रमोल्लंघनेन प्रयुज्यमानमनुमानवाक्यमप्राप्तकालं
नाम निग्रहस्थानं भवति॥ सू॥ हीनमन्यतमेनाप्यवयवेन न्यूनं॥ पंचावयवे वाक्ये प्रयोक्तव्ये तदन्यतमेनाप्यवयवेन हीनं प्रयुंजानस्य न्यूनं नाम नि
ग्रहस्थानं भवति॥ सू॥ हेतूदाहरणाधिकमधिकं॥ एकेनैव हेतुनोदाहरणेन वार्थसिद्धौ हेत्वन्तरमुदाहरणान्तरं वा प्रयुंजानस्याधिकं नाम निग्रहस्था
नं भवति॥ सू॥ शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात्॥ शब्दस्यार्थस्य चाभिहितस्य पुनरभिधानं पुनरुक्तं नाम निग्रहस्थानमनुवादं व
र्जयित्वा॥ तत्र शब्दपुनरुक्तं यथा नित्यः शब्दो नित्यः शब्द इति॥ अर्थपुनरुक्तमनित्यः शब्दो निरोधधर्म्मको ध्वनिरिति॥ अनुवादे पौनरुक्त्यं न दो-
षाय यथा हेत्वपदेशात्प्रतिज्ञायाः पुनर्वचनं निगमनमिति॥ सू॥ अर्थादापन्नस्य स्वशब्देन पुनर्वचनं पुनरुक्तं॥ यथा उत्पत्तिधर्म्मकमनित्यमित्यभिधाय य
दोत्पन्नस्यार्थस्य योऽभिधायकः शब्दस्तेन शब्देन ब्रूयादनित्यमनुत्पत्तिधर्म्मकमिति॥ सू॥ विज्ञातस्यापि परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारण
मननुभाषणं॥ परिषदा विदितस्य वादिना त्रिरुच्चरितस्यापि पदस्याप्रत्युच्चारणं तदननुभाषणं तदननुभाषणसंज्ञं नाम निग्रहस्थानं भवति॥ अप्रत्यु
च्चारयन् किमाश्रयं दूषणमभिदध्यादिति॥ सू॥ अविज्ञातं चाज्ञानं॥ परिषदा विज्ञातस्यापि वादिवाक्यस्य प्रतिवादिना यदविज्ञातं तदज्ञानं नाम
निग्रहस्थानमजानन् कस्य प्रतिषेधं कुर्यादिति॥ सू॥ उत्तरस्याप्रतिपत्तिरप्रतिभा॥ परपक्षप्रतिषेध उत्तरं तदप्रतिपद्यमानस्तदा निगृहीतो भवे

दितव्यः॥ छ॥ कार्यव्यासंगात्कथाविच्छेदो विक्षेपः॥ आरभ्य पक्षं स्वसिसाधयिषितस्यात्र कस्य साध्यमानस्य सापकालयापनार्थं यत्र कर्तव्यं॥ व्यासज्य कथां विच्छिन
निरर्थकं करणीयं परिहीयते॥ तस्मिन्नवसिते पश्चात्कथयामीति विक्षेपो नाम निग्रहस्थानं॥ छ॥ स्वपक्षे दोषाभ्युपगमात्परपक्षे दोषप्रसंगो मतानुज्ञा॥ यः परे-
णापादितं दोषमनुद्धृत्याभ्युपगम्य च त्वदीयेति॥ भवतस्त्वप्ययं दोषः समान इति॥ परमतानुज्ञानात्स्वकृतानुज्ञानाम निग्रहस्थानमापद्यते॥ यथा चौरो भ-
वान् पुरुषत्वात्प्रसिद्धचौरवदित्युक्ते स आह॥ भवानपि चौरः पुरुषत्वाविशेषादिति॥ छ॥ निग्रहप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणं॥ पर्यनुयोज्यो ना-
म निग्रहोपपत्त्या चोदनीयः॥ इदं ते निग्रहस्थानमापन्नमतो निगृहीतोऽसीति वचनीयः तं न प्रत्युपेक्षते॥ नानुयुंक्ते स पर्यनुयोज्योपेक्षणान्निगृह्यते॥
न त्वेकस्य पराजयः स्वयमुक्तया परिषदा वचनीयं॥ न खलु निगृहीतः स्वं कौपीनं विवृणुयादिति॥ छ॥ अनिग्रहस्थाने निग्रहस्थानानुयोगो निर-
नुयोज्यानुयोगः॥ उपपन्नवादिनमनिग्रहार्हमपि निगृहीतोऽसीति यो ब्रूयात्सोऽभूतदोषोद्भावनान्निगृह्यत इति॥ छ॥ सिद्धान्तमभ्युपेत्यानियमात्
कथाप्रसंगोऽपसिद्धान्तः॥ यः पूर्वं किंचन सिद्धान्तमभ्युपगम्य कथायां प्रवृत्तः सिसाधयिषितार्थसमर्थनेऽक्षमः सन् दूषणोद्धरणाक्षमो वा स्वसिद्धान्तवि-
रुद्धमभिधत्ते॥ सोऽपसिद्धान्तेन निगृह्यते॥ यथा नित्यान्निज्ञापयञ्छब्दादीन्पुनरनित्याननुब्रूत इति॥ छ॥ हेत्वाभासाश्च यथोक्ताः॥ यथोक्ताः पूर्वोक्तल-
क्षणोपेता हेत्वाभासाः॥ पंचासिद्धविरुद्धानैकान्तिककालात्ययापदिष्टप्रकरणसमा निग्रहस्थानं भवन्तीति॥ छ॥ अथ प्रमेयनिरूपणं॥ एतावदु-
क्तं प्रमाणेत्यादि न च विचारितत्त्वरूपं भवत्परिकल्पितानां प्रमाणादीनां षोडशानां पदार्थानां स्वरूपतः प्रमाणेन विचार्यमाणानामघटमानत्वा-
त्तेन तत्त्वज्ञानान्निःश्रेयसप्राप्त्यनुपपत्तेर्नित्यस्वरूपतः प्रमाणेन विचार्यमाणानामनुपपद्यते॥ न न तत्त्वज्ञानान्निःश्रेयसप्राप्तिः॥ यथा तथा विपरि-
दृश्यस्वरूपज्ञानान्नोपपद्यते॥ नास्त्वरूपेण प्रमाणतो विचार्यमाणा भवत्परिकल्पिताः षोडश पदार्था इति॥ न च स्वरूपतः प्रमाणेन विचार्य-
माणानां तेषामघटमानत्वमसिद्धं तथा हि॥ यद्भवद्भिः सकलपदार्थानां गरिष्ठत्वात्प्रथमतः प्रमाणपदार्थः प्रतिपादितः स यथा स्वरूपतः प्रमा-
णेन विचार्यमाणो नोपपद्यते तथा प्रमाणस्वरूपनिरूपणावसरे प्रपंचितं॥ अनुमानादिप्रमाणस्वरूपनिरूपणप्रबंधेन प्रपंचयिष्य

न्या·कु·चं· तेषां चात्मनो भवत्परिकल्पितप्रमाणपदार्थस्याव्यवस्थितेः॥ कथं तत्परिच्छेद्यत्वेनात्मादिप्रमेयतत्त्वं व्यवतिष्ठेत॥ यथा चात्मा नित्यव्यापित्वादिरू-
[illegible] ११८ पो भवत्परिकल्पितो न व्यवतिष्ठते॥ तथात्र तत्त्वप्रमाणपरीक्षायां घटकेयति(?) प्रतिपादितं॥ शरीरं च सारंभ इंद्रियेभ्योऽर्थानां च व्यतिरिक्तनिराकरणादेव नि-
राकृतं॥ भौतिकानि प्राप्यकारीणि चेंद्रियाणि बुद्धं न वे वा बुद्धिरणु मनश्च नित्यं न यथा प्रागेवापास्तं॥ आत्मगुणत्वेन भवत्परिकल्पितयोर्द्धर्म्मा-
धर्म्मयोरप्यव्यवस्थितेस्तद्रूपादृष्टनिरस्याव्यवस्थितेस्तद्गुणत्वेनानयोरप्यव्यवस्थितिरात्मद्रव्यविचारावसर एव प्रतिपादितेति स्वभावस्यात्मनोऽव्यापिनः
स्वदेहमात्रस्य ... दोषफलदुःखानामात्मगुणानां गुणपदार्थविचार एव तैर्निराकृतिः कृता॥ अपवर्गश्च भवत्कल्पितो मोक्षस्वरूपनिरू-
पणप्रघट्टके प्रतिषेत्स्यते॥ तन्न द्वादशविधं प्रमेयं व्यवतिष्ठते॥ किंवा स्याद्द्वादशविधत्वावधारणं नान्यस्य च प्रमाणव्यापारपरिसमाप्तेः प्रयोजनपरि-
समाप्तेर्वा स्यात्॥ तत्राद्यः पक्षोऽनुपपन्नो दिक्कालाकाशपृथिव्यादिप्रपंचेऽपि प्रमाणव्यापारप्रतीतेः॥ न च तत्प्रपंचस्यात्रैवान्तर्भावस्तस्याभिधातव्यं॥
तेषां स्वरूपेण विलक्षणत्वाद्यतो यन्न विलक्षणं न तत्तत्रान्तर्भवति॥ यथा जलेन तेजोऽन्यं न विलक्षणं चाकाशादयो भावा भवत्परिकल्पितद्वादश-
विधप्रमेयपदार्थादिति॥ तथाविधानामप्येषामत्रान्तर्भावे वात्मन्येवाशेषार्थानामन्तर्भावाद्द्वादशसंगतेरगतार्थषोडशपदार्थकल्पनाद्दिति [illegible]
[illegible] यपदेशिकस्य प्रयोजनस्यात्रैव परिसमाप्तिर्लौकिकस्यापवर्गलक्षणस्य प्रयोजनमात्रस्य तत्प्रयोजनप्रसाधकानां घटपटमुकुटशकटान्नपाना- [illegible]
दीनामप्यसंग्रहात्॥ नाप्यपवर्गलक्षणस्य तत्प्रसाधकानां दीक्षाज्ञानध्यानादीनामत्रासंग्रहाभावात्॥ नापि तत्प्रयोजनमात्रस्य लौकिकेतरप्रयो-
जनातिरिक्तस्य प्रयोजनमात्रस्यैवासंभवात्॥ ततो युक्तमेतत् ज्ञानं सम्यक् सम्यग्ज्ञानवान्मोक्षाय भवावासानुभवेऽपि मिहाभीष्टं न प्रमाणादिमात्रकं स- ११८
स्येतरज्ञानपरिच्छेद्यस्याखिलस्य प्रमेयस्य द्वादशविधे प्रमेये संगृहीतुमशक्यत्वात्॥ पदार्थसंख्यायां संशयपरिगणनेऽपि विपर्ययानध्यवसाय-
[illegible] योजनाभिनिविष्टस्यापरिगणनप्रसंगः॥ न्यायपूर्वत्वं गत्वा तस्यैव परिगणनेऽनुग्रहेच्छापराभिभवाभिलाषलाभपूजाख्यात्यादेरपरिगणनप्रसं- [illegible]
गस्तस्य तत्पूर्वकत्वाविशेषात्॥ किंच नैयायिकैः प्रतिज्ञादयः पंचावयवास्तेषां जिज्ञासासंशयशक्यप्राप्तिप्रयोजनसंशयव्युदासास्त्वन्येऽप्यवयवाः

१ प्रयोजनको साधकानां स-पु। २ [illegible] स-पु।

वाः। अथ पंच प्रतिज्ञादयः तेषां च मध्ये भवता किमिति संशयप्रयोजने एव गृहीते॥ दृष्टांतोऽपि नोदाहरणादन्यस्तत्र तस्यास्य पृथगभिधाने सर्वेषाम
वयवानां पृथगभिधानप्रसंगो विशेषात्॥ सिद्धांतोऽपि प्रतिज्ञातो नार्थांतरमतो लक्षणाभिधानमनर्थकं॥ सर्वैरेव हि शास्त्रका
रैरपसिद्धांतं ब्रुवाणो निगृह्यते॥ न च सिद्धांतलक्षणं प्रतिज्ञातः पृथक् क्रियते॥ तस्मादेव सिद्धांतत्वेन सर्वेषां सुप्रसिद्धत्वात्॥ अवयवानां च परा
र्थसंख्यापरिगणनेऽनुमानस्यापि पृथक्परिगणनप्रसंगः॥ तस्य प्रमाणांतर्गतत्वात् पृथक्परिगणने वयवानामप्यनुमानात्मकत्वात् पृथक्
परिगणनं स्यात्। प्रधानभूतं चानुमानं प्रमाणांतर्गतत्वान्न पृथगुपदिश्यते। तदंतर्भूतास्त्ववयवाः पृथगुपादीयन्त इति महती प्रेक्षापूर्वकारिता॥
पादानेऽप्येषामियत्तत्वावधारणमयुक्तं॥ यावद्भिर्विवक्षितार्थप्रतिपत्तिर्भवति॥ तावतामेवोपादानार्हत्वात्॥ सा च व्यतिरेकिपदैर्भवतीति तर्कस्य
प्रमाणानुग्रपरिशोधकत्वं तन्निर्णयपर्यवसायनेन तत्त्वं संशयादिव्यवच्छेदेन तन्निश्चायकत्वं॥ तदुपग्रहरोपकत्वं तत्त्वप्रमाणस्यार्थे स्वतत्त्वेन यातत्त्व
रूपविवेचनमात्रं वा प्रथमपक्षे तेषपतीनि निर्विशेषो घटादिर्विशेषापरः कस्यांधकारादेर्लकादेपनयनायत्ततीति॥ द्वितीयतृतीयपक्षे स्यप्रमाणात्म
कोऽसौ तथा तन्निश्चयः तद्विवेचनमात्रं च कुर्यात् प्रमाणात्मको वा न तावदप्रमाणात्मकः। प्रमाणविषयस्याप्रमाणात्मना तेन परिशोधना
नुपपत्तेः॥ यदप्रमाणं न तत्प्रमाणविषयपरिशोधकं यथा मिथ्याज्ञानं प्रमेयो वा यच्च प्रमाणं च भवद्भिः परिकल्पितस्तर्क इति मत्वा शोधि
कत्वे वास्य प्रमाणत्वप्रसंगः॥ यत्प्रमाणविषयपरिशोधकं तत्प्रमाणं यथानुमानादि प्रमाणविषयपरिशोधकश्च भवद्भिः कल्पितस्तर्क
इति॥ अस्तु तर्हि प्रमाणात्मक एवासाविति चेन्न॥ न चत्वार्येव प्रमाणानीति संख्याव्याघातप्रसंगात्। निर्णयश्च प्रमाणफलं तत्त्व सति प्रमाणेऽव
श्यंभवति॥ इति न किंचित्तस्य पृथगुपादाने प्रयोजनं॥ अन्यथा हानोपादानादेरपि पृथगुपादानप्रसंगः प्रमाणफलत्वाविशेषात्॥ परैरपि वी
तरागकथेत्यादि वीतरागकथास्य लक्षणं॥ तदप्यनुपपन्नं तस्य वीतरागविषयत्वासंभवात्॥ तथा हि वादो नाविजिगीषुविषयो निग्रहस्थानवत्त्वा
ज्जल्पवितंडावत्॥ न चास्य निग्रहस्थानवत्त्वमसिद्धं न्यूनाधिकापसिद्धांतहेत्वाभासपंचकलक्षणानां निग्रहस्थानानां तत्र सद्भावात्॥ सर्वोम

न्या·कु·चं· येषां नियमेन चोद्भवनाभावात्॥ न वादे विजिगीषुविषयत्वेऽप्यसंभवं जल्पवितंडयोरपि तत्त्वोद्भवनाभावप्रसंगात् नैव विजिगीषुविषयत्वाद्र
११८ के॥ न च च्छलादिप्रयोगसंभवात्तत्र तत्त्वोद्भवनाभाव इति चेन्न॥ ननु वादे कुतस्तत्त्वाध्यवसायसंरक्षणार्थं रहितत्वादेव॥ जल्प
वितंडे हि तत्त्वाध्यवसायसंरक्षणार्थं तयोरेव तत्त्वप्रयोगेन वादे इति मत्सरग्रस्तमनसो विलसितं॥ छलादीनामसदुत्तरत्वात्तत्त्वाध्यवसायसंरक्ष
णहेतुत्वानुपपत्तेः॥ परस्य तत्त्वाभावनिमित्तत्वात्तेषां न हेतुत्वमुपपन्नमित्यसमस्त्वात्मस्य तत्त्वाभावासंभवात्॥ असदुत्तराणां मानंतर्या
त् तत्त्वाध्यवसायसंरक्षणार्थत्वरहितत्वं च वादे सिद्धं॥ तस्यैव तत्संरक्षणार्थत्वोपपत्तेः तथाहि॥ वाद एव तत्त्वाध्यवसायसंरक्षणार्थः प्रमाण
तर्कसाधनोपालंभत्वे सिद्धांताविरुद्धत्वे पंचावयवोपपन्नत्वे च सति पक्षप्रतिपक्षपरिग्रहवत्त्वात्॥ वस्तुतः तथा… कोवादिर्येन जीव
शेषणवाद तस्मात् तत्त्वाध्यवसायसंरक्षणार्थ इति॥ न चायमसिद्धो हेतुः प्रमाणतर्कसाधनोपालंभः सिद्धांताविरुद्धः पंचावयवोपपन्नः पक्ष
प्रतिपक्षपरिग्रहो वाद इत्यभिधानात् पक्षप्रतिपक्षपरिग्रहत्वाविशेषेऽपि जल्पस्यापि तथात्वप्रसंगात् व्यवधारणविरोधः स्यात् तत्परिहारार्थं प्रमाणत
र्कसाधनोपालंभत्वविशेषणं नहि जल्पे तत्संभवति॥ यथोक्तोपपन्नच्छलजातिनिग्रहस्थानसाधनोपालंभो जल्प इति वचनात्॥ नापि वितंडायामनुषज्य
ते॥ जल्पस्यैव वितंडारूपत्वात् स प्रतिपक्षस्थापनाहीनो वितंडेत्यभिधानात्॥ ततः प्रमाणतर्कसाधनोपालंभत्वविशेषणस्य पक्षप्रतिपक्षपरिग्रहस्य
जल्पवितंडयोरभावात् सिद्धं वादस्यैव तत्त्वाध्यवसायसंरक्षणार्थत्वं तत्त्वाध्यवसायो हि निश्चितस्य संरक्षणं न्यायबलान्निखिलबाधकनिरा
करणं॥ न पुनस्तत्र बाधका… यथाकथंचिन्निग्रहीकरणं॥ लकुटचपेटादिभिस्तन्मुखकरणस्यापि तत्त्वाध्यवसायसंरक्षणार्थत्वानु
षंगात्॥ न च जल्पवितंडाभ्यां निखिलबाधकनिराकरणं कर्तुं शक्यं छलाद्युपक्रमपरत्वात्ताभ्यां संबाधस्य विपर्ययस्य वा जननात्॥ तत्त्वाध्यवसा
येऽस्त्यपि हि परनिग्रहीकरणमात्रेणाप्राश्निकास्तत्र संदेहेन विपर्ययेण वा… किमस्य तत्त्वाध्यवसायोऽस्ति किं वा नास्तीति॥ नास्त्येवेति वा परनिग्र
हीकरणमात्रेण तत्त्वाध्यवसायरहितस्यापि प्रवक्तुः प्रलंभात्॥ तत्त्वोपप्लववादिवत्॥ ततो वादस्यैकैकः कथाविशेषस्तत्त्वाध्यवसायसंरक्षणार्थः ११८

लोलाभट्टनाख्यानिहेतुः निःश्रेयसशास्त्रेष्वप्युपगंतव्यो॥ न तु नर्जल्पवितंडे न हि पर्ष्यपात्॥ एतच्च वामेयकमलमार्तंडे सर्वं चर्चितमिह तु दृष्ट
व्यं॥ हेत्वाभासाश्चास्माकमतासंमता॥ किंतु ते गौतमाख्यानिर्दिष्टेभ्यो किंचिद्व्ययो ब्धं॥ अन्यथावलताभासानामपि निर्देशप्रसंगात्॥ अपो
ऊद्यपदार्थसंख्यासूत्रप्रसंगः॥ प्रसन्नादिप्रमाणानिर्देशो सामर्थ्यादिवत् हेत्वाभासानां लब्धत्वादनिर्देशोऽन्यथयन निर्देशसामर्थ्या देव हेत्वाभा
सानामपि लब्धत्वादनिर्देशोऽस्त्विविशेषात्॥ छलादीनि तु वालकोडाप्रायाणि न प्रामाणिकानां निःश्रेयसार्थीनां श्रवणं वपितुं युक्तानि॥ न
च तु दूषणाभासा हेत्वाभासैरेव संगृहीताः किमित्य नः पृथगुच्यते॥ न चैतासामियता कर्तुं पार्यते॥ युक्त्याभिः स्यासामानंत्येनाभ्युपग-
मात्॥ यदाह भाष्यकारः सम्यग्यानंत्येजातीनां असंकीर्णोदाहरणविवक्षया चतुर्विंशतिप्रकारा उच्यतेऽन्न संख्यानियमः किंचनेति॥ पर
स्परविवेकेनोपलक्षणार्थैन लक्षणप्रणयने च मिथ्योत्तरं जातिरित्येतावल्लक्षणं प्रणेतव्यं॥ सकलनद्यभिव्यापकत्वात्॥ एवं निग्रहस्थानाना
मप्यनंतत्वान्नेयत्ता कर्तुं शक्या॥ तदानंत्यं च भविष्यत्वाभिवेत् विप्रतिपत्त्यप्रतिपत्त्योर्भेदप्रकारस्य बहुलेपि द्वाविंशति निग्रहस्थानानि प्रपंचितान
नि भाष्यकारवचनात्॥ यच्च छलजातिजाभिनिग्रहस्थानानां अन्येकं दूषणं तत्र वामेयकमलमार्तंडे सप्रपंचं चर्चितमिह तु द्रष्टव्यं॥ तदेवं षोड
शपदार्थानां विचार्यमाणानामव्यवस्थितेर्न्नैयायिकानां पदार्थनियमवत्त्वोऽजपदार्थनियमोऽप्युपपन्नः॥ ननु धर्माधर्मद्रव्ययो
स्तर्हि यौगनभूतयोः सद्भावश्च॥ कुतः प्रमाणात् सिद्धिरिति चेत्॥ अनुमानादिनिश्चयस्त्याहि विवादापन्नाः सकलजीवपुद्गलाश्रयाः सकृ
द्गतयः साधारणबाह्यनिमित्तापेक्षायुगपद्भाविगतित्वादेकसरःसलिलाश्रयानेकमत्स्यादिगतिवत्॥ तथा सकलजीवपुद्गलस्थितयः साधार-
णबाह्यनिमित्तापेक्षायुगपद्भाविस्थितित्वादेककुंडाश्रयानेकबदरादिस्थितिवत्॥ यत्तत्साधारणं निमित्तं स धर्मोऽधर्मश्च ताभ्यां विना तद्गतिस्थिति
कार्यानुपपत्तेः॥ गतिस्थितिपरिणामिन एवार्थाः परस्परं तद्धेतवोऽन्योन्याश्रयानुसंगात्॥ सिद्धयोर्हि निश्चयपदार्थेभ्यो गच्छत्पदार्थी
नां गतेस्तेभ्यश्च स्थितपदार्थानां स्थितिसिद्धिस्तन्निश्चयो च गच्छत्पदार्थानां गतिसिद्धिरिति॥ साधारणनिमित्तरहितास्त्वखिलार्थगतिस्थितयः

न्या॰कु॰चं॰ प्रतिनियतस्वकारणप्रभवत्वादिति चेत् न। कथमिदानीमीश्वरोऽङ्कुरादिकार्योत्पत्तौ न निमित्तं योगाविशिष्टस्य सकलजनानां मानानन्दोत्पत्तौ
१२० साधारणं निमित्तं स्यात्॥ न तत्र तत्साधारणनिमित्तं तेन तदुत्पत्त्यनुपपत्तेरिति चेत् तर्ह्यन्यत्रापि समानं। न हि सकलार्थगतिस्थितये
पि सहकारि विध्याधर्माधर्मलक्षणासाधारणनिमित्तं तेन तेनोपपद्यते। अङ्कुराधिकार्येऽप्यदृष्टसहकार्ये तत्साधारणनिमित्तं तेनैवो
पपद्यते। यथाङ्कुरादिकार्यभूतानां जीवानां सकलार्थगतिस्थितये परिणतिरीश्वरस्य वा साधारणनिमित्तत्वं किं त्वप्ययुक्तं। न च गतिस्थितीनाम सं
भवाद्भूतादेत दर्शनात्। न हि सर्वदा तासां तन्निमित्तमस्तित्वमप्यनुपपन्नं गगनवत् निःपदार्थगतिस्थितीनां तत्संभवात्। तर्हि नभः साधार
णं निमित्तमासामस्तु सर्वत्र तत्संभवादित्यप्ययुक्तं तस्यावगाहननिमित्तत्वप्रतिपादनात्। न चैकस्यैवानेककार्यनिमित्तता यावनेक सर्व
गतपदार्थपरिकल्पनानर्थक्यप्रसंगात्। कालात्मदिक्सामान्यसमवायकार्यस्यापि चैवं घटादिप्रत्ययस्य युगपदीदमतः पूर्वेणेत्यादि
प्रत्ययस्य चोत्पद्यमानस्यैकैकस्मिन्निति प्रत्ययस्य चैकस्यैकनिमित्तत्वोपपत्तेः तस्य सर्वत्र सर्वदा सद्भावात्। कार्यविशेषात् कालादिनिमित्तभेदस्य
वश्यापत्त्यनु सर्वथाविशेषाभावात्। एतेनादृष्टनिमित्तत्वमप्यासां प्रत्याख्यातं पुद्गलानामदृष्टासंभवात् उपपदात्मोपभोग्याः पुद्गलास्त
द्गतिस्थितयः पदादृष्टनिमित्ता इत्येतदर्थे साधारणं निमित्तमदृष्टं तासां प्रतिनियतात्मादृष्टस्य प्रतिनियततद्गतिस्थितिहेतुत्वप्रसि
द्धेः। न च तदतिदृष्टं भूम्यादिवत् साधारणकारणस्यापरस्याभीष्टत्वात्। साधारणं तु कारणं तासां धर्माधर्मावेवेति सिद्धः कार्यविशेषा
न्तयोः सद्भावः॥ ततो यौगोपकल्पितपदार्थानां स्वरूपतः संख्यायत्तावधारणानवबोधात्॥ प्रमाणतो विचार्यमाणानामनुपपत्तेर्न तत्परिकल्पित १२०
भेदैकान्ते यस्य सिद्धिर्घटते॥ छ॥ नापि चार्वाकपरिकल्पितभेदैकान्ते तत्परिकल्पिततत्त्वानामपि स्वरूपतः संख्यातश्च विचार्यमाणानाम
नुपपद्यमानत्वाविशेषात्॥ ननु चार्वाकैः पृथिव्यप्तेजोवायुरूपाणि चत्वार्येव तत्त्वान्यन्योन्यासंभवित्तत्त्वलक्षणानि चाक्षुषैरिन्द्रियविषयलक्ष
णार्थक्रियासंपादनसमर्थानि प्रत्यक्षप्रमाणाधिगतस्वरूपाणि उपपद्यन्त एव। पृथिव्यप्तेजोवायुरिति तत्त्वानि तत्समुदाये शरीरेन्द्रियविषयसं

ज्ञातृत्वमभिधानात्॥ न नतोधिकानि तत्सद्भावे प्रमाणाभावात्॥ न खलु प्रत्यक्षमाकाशादिसद्भावे प्रवर्तते॥ तस्य रूपादीनर्थानिवार्थप्र
वृत्तिप्रतीतेः। न चाकाशादौ वेन तत्संभवत्यरूपिद्रव्यतयास्याभ्युपगमात्॥ अनुमानस्याप्रमाणत्वान्न ततोप्यस्य सद्भावसिद्धिः॥ ननु चा
त्मकस्यात्मनोभावे कथं चतुर्णामपि तत्त्वानां सद्भावसिद्धिः॥ प्रमाणाधीनत्वात्प्रमेयव्यवस्थाया इत्याशंक्याह॥ तेभ्यश्चैतन्यं॥ अत्र केचिद
भिव्यज्यत इति क्रियाभिसंबंधं प्रतिपद्यन्ते॥ अन्ये तु प्रादुर्भवतीति॥ स्वतः परपरिकल्पितो जीवो नानादिर्नान सन्तानो वा तस्य मानेनेति॥ अप्रत्या
ख्यातं तत्सद्भावे प्रमाणाभावात्। तत्त्वमेयत्वस्य च प्रमातृत्वमात्रेणाविनाभावप्रसिद्धेः चैतन्यमेव प्रमातृ भविष्यति॥ ननु विभिन्नेभ्यः
पृथिव्यादिभ्यः कथमभिन्नं चैतन्यमत्राभिव्यक्तिमाविर्भावं वा विभ्रद्विरुद्धमित्याह॥ मदशक्तिवदिति॥ यथैव हि मधांगानां किण्वादी-
नां देशकालावस्थाविशेषे मदशक्तिलक्षणावस्थाविशेषः प्रादुर्भवति॥ एवं पृथिव्यादीनां तद्विशेषेपि विशिष्टं प्रतिनियतघटादिग्राहकं
ज्ञानमिति॥ न च प्रतिनियतसुखदुःखादिकार्यवैचित्र्यस्य नियामकमंतरेणानुपपत्तेस्तन्नियामकस्य पूर्वभवोपार्जितस्यादृष्टस्य प्र
सिद्धेस्तत्कर्तुरात्मनः पूर्वभवेप्यस्तित्वसिद्धिर्यतः जलबुद्बुदवज्जीवाः यथैव हि समुद्रादौ नियामकादृते नाः॥ पदार्थसामर्थ्यवशादेवि
चित्राभासो बुद्बुदाः प्रादुर्भवन्ति तथा सुखदुःखवैचित्र्याभासो जीवाः पुनः कार्याकारपरिणतानि भूतान्यतिरिक्तात्सद्भावे प्रमाणं संप्रवर्तते॥ न
स्य प्रतिनियतेंद्रियसंबद्धरूपादिगोचरचारित्वादखिलपदार्थलक्षणो जीवो विषयत्वानुपपत्तेः॥ न च घटमहं वेद्मीत्यत्र — ज्ञानकर्तृतयात्मा त-
थावेधः प्रतिभातीत्यभिधातव्यं॥ तस्यापि स्थूलोहं कृशोहमित्यादिवच्छरीरविषयत्वस्यैवोपपत्तेः॥ न खलु तस्य त्वप्रत्ययस्यान्यालंबनत्वम
स्ति॥ तत्र स्थौल्यादिधर्मासंभवात् तथा घटमहं वेद्मीत्यादिप्रत्ययस्यापि न हि तस्यापि शरीरादन्यो भवद्भिः कल्पितः कश्चिदात्मालंबन
त्वेन स्वसंवेद्यः प्रतीयते॥ प्रतीतस्यापि कल्पने कल्पनागौरवं प्रतिनियतवस्तुव्यवस्थाभावश्च स्यात्॥ न चाप्रतीतसद्भावस्य [illegible] कर्तृत्वं युक्तं खपुष्पा
देरपि तत्प्रसंगात्॥ ततः प्रमाणप्रसिद्धस्य रूपस्य शरीरस्यैव चैतन्यं प्रति कर्तृत्वमुपपन्नं॥ तदन्वयव्यतिरेकानुविधायित्वाच्च यत् खलु

[illegible]

यस्यान्वयव्यतिरेकावनुकरोति ॥ तत्तस्य कार्यं यथा घटो मृत्पिंडस्य शरीरस्यान्वयव्यतिरेकावनुकरोति च चैतन्यमिति ॥ अन्वयव्यतिरेक
समधिगम्यो हि सर्वः कार्यकारणभावः तौ चात्र विद्येते सति शरीरे चैतन्यस्योपलब्धिस्तदभावे चानुपलब्धिः ॥ ननु प्रत्यक्षेणात्मनः सिद्धिः
नाप्यनुमानेनास्याप्रमाणत्वात्प्रमाणत्वे वा हेतोः प्रत्यक्षबाधितपक्षनिर्देशानंतरं प्रयुक्तत्वेन कालात्ययापदिष्टत्वात् । शरीरव्यतिरिक्तात्म
पक्षो हि प्रत्यक्षेण बाध्यते न चान्यत्किंचिल्लिंगमस्ति साध्येनाभावो वा क्वचिन्नस्य प्रसिद्धः सुखाद्युपलब्धिश्च भूतकार्यत्वेनान्यथैवाविनाभावसंभ
वात् ॥ न तस्यात्मनः सद्भावे प्रमाणासंभवे नन्वित्यत्वादिकं वक्तुं युक्तं व्यसौरभवत्वकं सुधीः अहषीनान्यतो गर्भादिमरणपर्यंतभूतकार्यमेव चैतन्यं प्रतिपत्तव्यं,
तदभिव्यंग्यं वा ॥ ननु क्षित्यादेश्चैतन्याभिव्यक्तौ शरीरवत् घटादिष्वपि तदभिव्यक्तिः स्यादित्याशंक्याह ॥ चैतन्यानभिव्यक्तिर्घटादिषु कारणानामभावात्सुरादिवन्
मिश्रकमदशक्तिवत् ॥ चैतन्याभिव्यक्तेर्हि कारणं क्षित्यादेः कायाकारपरिणतत्वं मदशक्तेः पिष्टोदकगुडधातक्यादिपरिणतत्ववत् ॥ न च घटादौ सास्तीति तत्र
तदभिव्यक्त्यभावः ॥ पांसुराशेरपि घटादिपरिणामाभावान्न दृष्टान्तः साधर्म्याभावात् ॥ नैवं मृतशरीरेपि चैतन्योपलंभप्रसंगस्तत्परिणामाविशेषादित्यभिधातव्यं ॥ कार
णवैकल्यात्तत्र तदनुपलंभोपपत्तेः ॥ कारणं हि चैतन्याभिव्यक्तेः स्वगस्थितिषितानप्राणादिपरिणामविशेषः तस्य वायुप्रचारणादिना वैकल्ये चैतन्यस्या
नवस्थानुपलब्धिः शरीराकारविशेषवत् एवं चाकारविशेषवच्चैतन्यस्य शरीरधर्मत्वसिद्धेः सिद्धः परलोकिनोऽभावात्परलोकाभावः यस्य हि शास्त्रार्था
दवगमानुष्ठानफलोपभोगैः संबंधः परलोकी तस्य चोक्तप्रकारेणाप्रसिद्धेः प्रत्यक्षप्रसिद्धः स्वयं परलोकप्रतिषेधः ॥ सू॥ अत्र प्रतिविधीयते ॥ यत्तावदुक्तं पृथिव्य
प्तेजोवायुरित्येतानि तत्त्वानीति तदसमीचीनं ॥ यतस्तत्त्वानामेतावत्त्वावधारणे तत्त्वांतराभावसिद्धेरसिद्धत्वात् ॥ तस्माद्बाध्यासिद्धो जीवलक्षणतत्त्वांतरस्य स्वसंवेदन १२१
प्रत्यक्षेणागमानुमानाभ्यां सद्भावप्रसिद्धेः ॥ प्रामाण्यं चानयोः प्रत्यक्षमेवैकं प्रमाणमित्यस्य प्रतिषेधावसरे प्ररूपितं तेन नु जीवस्य तत्त्वांतर
त्वमसिद्धं चेतनालक्षणस्यास्य भूतकार्यत्वेन यथा घटादिवत्तेषां चेतनाभावादित्यसमीक्षिताभिधानं ॥ भूतचैतन्ययोः कार्यकारणभावानुपपत्तेस्तथाहि ॥ न भूत
कार्यं चैतन्यं तेषु सत्स्वप्यभावात्सर्वदानुपलब्धिवत् ॥ यथैव घटे पृथिव्यादिभूतेषु सत्स्वपि सर्वदानुपलब्धिरभावान्नासौ तत्कार्यं तथा चैतन्यमप्यसि

शेषान्तरैरन्तर्भाविनः खल्वभूते पुनः कायव्यापनेकावस्थाविशिष्टेषु सत्स्वपि चैतन्यं सदोपलभ्येत॥ ननु पटादिवत्तेषामपि परिभावाभा
वाद्वा कारणाभावाभावे न हि चैतन्यरहितस्य परिणामः प्रकापः अथ मनःश्रनीयते यथा चैतन्यमिति॥ अतः सहात्तु हेतुना नयोः उपलंभात्
लाकलवन्नकार्यकारणाभावो भूतानां चैतन्यं प्रत्युपादानभावेन कारणत्वं स्यात्॥ सहकारिभावेन वा न तावदुपादानभावेन तेषु न
विक्रियमाणे तु यस्यापि विक्रियमाणस्याविक्रियमाणत्वात् यस्मिन्विक्रियमाणेपि यन्न विक्रियेत॥ न तत्तस्योपादानं यथा गोः
रश्वो विक्रियमाणेष्वपि कायाकारपरिणामभूतेषु न विक्रियेत च चैतन्यमिति॥ न चेदमसिद्धमन्यत्र गतचित्तानां वासीचन्दनकल्पानां वा दारुसंपा
तादिना शरीरविकारेपि चैतन्यस्याविकारस्य सिद्धेः। तदविकारे विक्रियमाणत्वाच्च नेत्यन्ये चेदमप्यसिद्धं शारीरगमनमात्राच्चाप्रसन्नतायाः कार
विनाशेपि कमनीयकामिनीसंनिधाने चैतन्यस्य हर्षादिविकारोपलम्भात्। न कश्चिदुपादानभावेन तेषां तज्जनकत्वं घटते॥ सहकारिभावेन तु तेषां त
ज्जनकत्वे न तोन्यत्र तस्योपादानमस्ति॥ न चापादि नास्तिकयमनुपादानस्यास्योत्पत्तिः स्यात्॥ यत्तु पादानं न तस्योत्पत्तिर्यथा खरविषाणस्यानु
पादानं च स्वसंवित्स्वभावस्य चैतन्यस्य सदृशं भवद्भिः परिकल्प्यते चैतन्यमिति॥ अथास्ति तत्किं चैतन्येन विजातीयं सजातीयं वा। न तावद्विजातीयपक्षो युक्तो-
विजातीयाद्विजातीयस्योत्पत्तौ जलादेरप्यनलाद्युत्पत्तिप्रसंगात् तत्त्वचतुष्टयभावानुषंगात्॥ अथ सजातीयं युक्तमेतत्तस्य तु सजातीयस्ये
वोपादानत्वोपपत्तेः॥ तथाहि॥ यद्यस्योपादानं तत्तेन सजातीयं यथा रूपादिमतो घटस्य तथाविधो मृत्पिण्डः॥ उपादानं च स्वसंवित्स्वभावस्य चैतन्यस्ये
ष्टं भवद्भिः किंचित्तस्य मनः॥ पृथिव्यादिभ्यो यौ तत्संतत्स्वभावमेव ... मित्यात्मकत्वसिद्धिः॥ किंच भूतानि निर्विशिष्टानि चैतन्यं जनयन्ति कारणभावं
प्रतिपद्यन्ते विशिष्टानि वा। यदि निर्विशिष्टानि सर्वत्र सर्वस्य ... तज्जनकत्वप्रसंगः॥ अथापि विशिष्टानि कुतस्तेषां वैशिष्ट्यं समुदायात्काया
काकारपरिणतेरवस्थाविशेषात्सकार्यात्तु राद्या॥ परिसमुदायावस्थायामपि दृष्टस्य च नरपाकस्य चैतन्योत्पत्तिप्रसंगस्तथा तस्य तु दापापि विशेषात्॥ अ
य कायाकारपरिणतेर्भ्रकुनस्तेषां सैव संपन्ना किं निर्हेतुका स्वरूप... प्रभवा दृष्टनिमित्ता वा स्यात्। निर्हेतुकत्वे सदा सत्त्वमसत्त्वं वा स्यात्॥ स्वह

५ इत्यत्र तत्त्वे हि मतं चैतन्यमात्रे ... तत्त्वाभ्युपगमे ... इत्यर्थः —

न्या॰कु॰च॰ पमात्रप्रभवत्वे सर्वेषु सर्वदा तेषां तत्परिणतिप्रसंगः। अस्मदुपभोगस्य सर्वेषु सर्वदाविशिष्टत्वात्॥ अथादृष्टं नानात्वदृष्टं न दृष्टप्रभवं भवान्तरप्रभवं वा

१२२ तद्धेतुः स्यात्॥ न चायं विकल्पेऽपि कुकर्मप्रसंगः। शरीरस्यैकस्य नित्यत्वस्य शरीरस्यापि नित्यत्वस्य ... नित्यत्वानभ्युपगमात् शरीरस्यैकत्वानित्यत्वेति॥ भवान्तरप्रभ

वत्वे च परलोकिनः प्रसिद्धेः परलोकिनोऽभावात्परलोकाभावरूपोऽयं प्रसंगः तत्स्यात्॥ अत्र वाकाराकारपरिणतिविशेषात् कांचित्तेषां तथाप्यवस्थाचैतन्यहेतु

त्वे मतशरीरेऽपि चैतन्योत्पत्तिप्रसंगो विशेषाभावात्॥ अथावस्थाविशेषोऽपि न हेतुः स तद्भावान्ननु चैतन्यप्रसंगः॥ तदाकारपरिणतानि हि भूतान्य

वस्थाविशेषविशिष्टानि हेतुत्वेनाभिप्रेतानि॥ ननु किमिदं तेषां तथाविधानामवस्थाविशेषविशिष्टत्वं नाम चैतन्योत्पत्त्यनुगुणः स्वभावो विशेषोपचितत्वं ... विशेषोपचितत्वे

... विशेषान्वितत्वं वा केवलविशेषान्वितत्वं वा ... हेतुत्वाभावप्रसंगात्॥ न तावत्तेषां तदुपेत्याभावात् ... तदापि तेषां तदुपेत्य

मिथ्यात्वे॥ तत्किं तेनैव चैतन्येन ततः पूर्वं तस्यात्॥ तेनैव चैतन्योत्पत्त्याश्रयसिद्धत्वात् चैतन्ये तेषां न हि विशेषत्वसिद्धेरन्योन्याश्रयाच्चैतन्यसिद्धिः

रिति॥ अथ पतनतः पूर्वं कर्मपरलोकिनोऽपूर्वरागचैतन्यात्पूर्वमपि चैतन्यप्रतिपत्ते सिद्धेः॥ अथावस्थाविशेषादृष्टान्विशिष्टत्वं तेषां न हि विशेषत्वसुव्यत

न दृष्टमनन्तकायकस्यान्यासिद्धेश्चैतन्याभावात्तत्साधकानुष्ठानाभावात्तद्भिन्नतिकत्वेनोपार्जितत्वाद्धा॥ प्रथमपक्षे तद्विशिष्टत्वस्य चैतन्य

साधकत्वे चैतन्यस्यैव तत्साधकत्वप्रसंगात्॥ एतेन द्वितीयमतं तृतीयपक्षोऽपि प्रत्याख्यातो॥ अदृष्टविशेषसाधकानुष्ठानस्य तद्भिन्नतिकत्वेनो

पार्जितत्वस्य च चैतन्यविशेषाधीनत्वात्॥ नापि धातुविशेषोपचितत्वमवस्थाविशेषविशिष्टत्वं॥ तेषां युक्तं सुषुप्तावस्थायां तदुपचितेऽपि शरी

रे चैतन्योत्पत्त्यप्रतीतेः॥ विशेषविशेषान्वितत्वेऽपि चैतन्यानुत्पादकत्वात्॥ नापि समस्तकार्येण गुडूतानां वैशिष्ट्यं तत्त्वचतुष्टयव्यतिरेकेण परस्पर

कार्यान्तरस्यानुपलम्भगत्वाद्भूपगमेवाचत्वार्येव तत्त्वानीत्यवधारणविरोधः॥ आत्मसिद्धिप्रसंगस्य तस्यैवात्मत्वात्॥ किंच सर्वेषु कार्येषु अन्वयं भव

त्यतश्चैतन्यस्य कार्यत्वे कस्यचिदात्मयोग्यकत्वम्॥ स च शरीरं भूतानां इन्द्रियाणामन्तर्विषयोवा स्यात्॥ न तावच्छरीरं भौतिकत्वात्तदिन्द्रियवत् तत्त्वा

न्तरत्वाद्घटादिवत्॥ एतेन भूतानामपि चैतन्याश्रयत्वं प्रत्याख्यातं॥ सर्वेषु सर्वदा तत्सद्भावानुषंगाच्च॥ तदाश्रयभूतानां तेषां सर्वेषु सर्वदा।

४ तदिति ... चैतन्ये ... प्रतिबुद्धं ... शरीरस्य ... त्वे इति —

विकल्पानां सद्भावाविशेषात्॥ अस्तु तर्हीन्द्रियाणां तत्राप्यन्यत्वमन्वयव्यतिरेकाभ्यां न स्यात् तत्पूर्वकत्वप्रसिद्धिरित्यपि नोत्तरं क्रमेण न भौतिकत्व।
दनुमानविरोधस्याबाध्यविशेषात्। किं च व्यस्तानां समस्तानां वा तेषां तदाश्रयत्वं स्यात्॥ यदि व्यस्तानां तन्नैकस्मिन् शरीरे केचन न संता
देकसंतानेऽप्यनेकसंतानवदनुसंधानाभावः स्यात्॥ कथं वा धारीरिन्द्रियाणामे रूपादिस्मरणं स्वभावस्यायां रूपरसादिज्ञानं प्रसुप्तिकादि
रोगेण चेन्द्रियोपघाते सुखदुःखादिज्ञानं स्यात्॥ न च यस्य विकारेऽप्यन्यविक्रियते न तत्तस्य कार्यमतिप्रसंगात्। सामस्त्यपक्षेऽप्येतेनैव तत्पुनः
मितः न त्वेकस्यापीन्द्रियस्यापायेऽसामस्त्यं घटते॥ तथा चान्धो ज्ञानलेशोऽपि नोत्पद्येत तर्हि स्यादेवस्यान्न तस्याप्यपेक्षासामस्त्यमंकुरोत्पत्तिर्वा
दृष्टा मनस्तर्हि निराश्रयोऽनुपरतेन्द्रियोऽन्धः॥ सकलरूपस्य ज्ञानस्यावभासनादिग्भिते चेत्॥ ननु तन्नित्यमनित्यं वा स्यात्तत्तावन्नित्यं न
त्वसंख्यासाधानानुषंगात् तत्परमतत्त्वे चावसंगात्॥ अथानित्यं तर्हि किं भूतहेतुकमन्यहेतुकं वा तन्नावदन्यहेतुकं मनस्युपगमात्॥ भूतहेतुक
त्वे भूतगुणभौतिकत्वादनुमानेऽस्य भूतेनाश्रयत्वात्पर्यायाः॥ किं च तत्समस्तभूतेन तत्कारणं तत्निरपेक्षसमर्थप्रतिभासं जनयति॥ तत्रापि
स्वोपरि निरपेक्षं सकृदेवाखिलार्थप्रतिभासप्रसंगात् सर्वः सर्वदर्शी स्यात्॥ अथ करणान्तरसापेक्षं तत्किं करणं तत्सापेक्षं तत्किंकर-
णान्तरं मनोऽन्यद्वा तन्नत्वेतच्चेतनमचेतनं वा तन्नावच्चेतनं तस्य चेतनाश्रयत्वाच्चेतनत्वप्रसिद्धानात्। अन्यथा प्रथमस्याप्यचेतनत्वापत्तिः
स्यात्॥ अथाचेतनं तर्हि चक्षुरपि करणान्तरापेक्षमर्थप्रतिभासं जनयतीत्यनवस्था स्यात्॥ नाप्यनुदृष्टपरेन्द्रियस्यान्येन्द्रियव्यापाराभावात्त्वा
पि विषयस्तदाश्रयः शरीरेन्द्रियाश्रयपक्षोपक्षिप्तदोषोपनिपातप्रसंगात्॥ ततो देहादभिन्नो विज्ञानस्यात्मैवाश्रयोऽभ्युपगन्तव्यः इति सिद्धो
ऽस्तित्वान्तरङ्गपमन्यथान रदहजातबालकस्य स्तनादौ प्रवृत्तेर्निबंधनमभिलाषादिकं सिध्येत्॥ न चास्यात्तन्निबंधनं प्रसिद्धं॥ तथा हि तदहर्जात
बालकस्य स्तनादौ प्रवृत्तिरभिलाषपूर्विका तत्त्वान्मध्यदशावदृत्तिवत्॥ अभिलाषोऽपि स्मरणपूर्वकः स्मरणमप्यनुभवपूर्वकं तत्त्वात्तद्वत्॥ न
च गर्भादौ तस्यानुभवादिकमस्तीति पूर्वभवानुभवसिद्धिः॥ यदि स्तुप्यादिनः स्तना तेषु सुखसाधनत्वेन स्मृत्वाभिलाषात्तत्र

प्रवर्त्तते॥ न चाननुभूतं पुरा यत्नमारभते॥ बालश्चापगतहृदि स्तन्यपानादिकं करोति॥ प्रयत्नादिश्च — —प्राग्भीनववानपरिडि।सुर्म्भीनुली
कल्कोऽमाश्लिष्यति॥ अपाम स्वानं च परिहरति॥ न त्वाननुभूतेष्टसाधनफलान्ते निमित्ते यत्संगान्यस्य च पूर्वभवानुभवसि
द्धिः सोऽनादित्वात् नानरभूतत्वस्यात्मनो देहेन्द्रियादिभिरभिसंबंधो जन्म न तु प्रादुर्भावः तन्निरोधो विनाश इति — — — — प्रथम स्वाङ्कितां देहानामि
तुक्तं तस्य तुर्कं प्रयोगपरिणामारम्भवादिपक्षतुल्यको इत्यत्र नरकोके नरनीतिनोऽभूतपरिणाम प्रादुर्भावविरोधात्॥ किञ्च लोके स्तुभूतपरि
णामविशेषेषु दोषो स प्रत्यक्षनीतिनिरुद्धविरोधात्॥ यच्चान्यत् जलबुद्बुदवज्जीवा इत्युक्तं तस्य सांप्रतं सान्न्यासंभवात्। जलबुद्बुदसंगतीनां तादृशं
नैवलक्षणाभावनं लव्धेतु कल्पोपपन्ने स्तनलाहेविता न त्रुपपन्नं भूतचैतन्ययोः पुनरत्यन्त तः कारणाभावस्यैवासंभवात्स्वाद्दृष्टत्वं नैरण
सुखदुःखादिविचित्र्यं शरीरादिविचित्र्यं वाउपपन्नं कथमन्यथा सेवाकृष्यादौ समर्थानामानां वा केषांचिदेव फलयोगोऽन्येषां चैवैफल्यं स्यात्
ततो दृष्टकारणव्यभिचारादृष्टकारणप्रसिद्धेः सिद्धमदृष्टवैचित्र्यात्सुखादिवैचित्र्यं तच्च कार्यकारणभावसंगीतक स्वपरलोकिनोपपन्न इति कर्त्तु
त्वाकः॥ नापि जन्यजनकभावं न तद्धावस्य परलोकसिद्ध्यनुकूलत्वात्॥ तथाहि॥ सत चैतन्यस्य व्यक्तिरस्ततः भवदृष्टस्यवास्यात्॥ प्रथमपक्षे
परलोकसिद्धिरविवादात्कायाकारपरिणतभूतेभ्यः प्रागपि चैतन्यसत्त्वसिद्धेः॥ प्रागसतो व्यक्तिस्तु वनीतिविरुद्धा सती हि घटादेर्दीपादिना
व्यक्तिकरणात्तमभिव्यक्तिः प्रसिद्धान तु नरस्य॥ अप्यसत् सदृशस्य किं सद्धे चार्वाकपक्षे दूषणतावस्यापि विरोधात्॥ अथ कथंचिज्जैनमतसिद्धिः
व्यनः सर्वैः पर्यायतत्वासत्त्वैचैतन्यस्य कायाकारपरिणतपृथिव्यादिपुद्गलेभ्यो व्यक्तेर्नैरर्थं च्यादितिसिद्धान्ताश्रयं नो यथा तथापि दृष्याः भिर्हि
तं तत्सद्भावे प्रमाणाभावादित्यादि॥ तदप्यभिधानमात्रं प्रमत्तस्यैवास्य सद्भावे प्रमाणस्य सद्भावात्॥ तथाहि॥ सुखमहमनुभवामीति स्वान्योन्य
विविक्तं पञ्चात्तत्त्वाने प्रतिप्राणिस्वसंवेद्यः प्रत्ययो जायमानः संशयेन मन्यतां मिथ्याबाधकाभावात्॥ नापि संदिग्धं उभयोरेकतंसस्वोभा
वात्॥ न चेत्यं भूतस्याप्यानालंबनत्वं सुखं रूपादिवत्प्रत्यक्षमालंब्यतस्यमसंगात्॥ नापि शरीरालंबनत्वं बहिःकरणनिरपेक्षान्तःकर

रााव्यापारेणोत्पत्तेः॥ नखलु शरीरमित्यं भूताहंप्रत्ययपर्यवसायं बहिःकरणविषयत्वात्॥ अतः शरीरातिरिक्तः कश्चिदेतस्यालंबनभूतोऽस्ता
वानयोऽभ्युपगंतव्यः॥ तस्यैव ज्ञानतोपपत्तेः मितु शरीरस्य भूतादप्यत्वाद् घटादिवत्॥ अहंभूतात्मस्य घटादेः स्थूलं च भूतात्मत्वाविशेषे
पि शरीरस्याहंप्रत्ययव्यापारताभविष्यतीत्यभिधानव्यं॥ मनःशरीरेणाव्यभिचारात्तु पापि स्थूलोऽहमित्यादिर्बुद्धिः सापाश्च्योपकारकत्वेनश
रीरस्याप मानोपचारिकी॥ अत्यंतोपकारके भृत्येऽहमेवायमितिवृत्तिनिर्वत्॥ तथानुमानेनाप्यात्मा प्रतीयते। रूपादिज्ञानं कचिदाश्रितं गुण
त्वाद्रूपादिवत्॥ ज्ञानसुखादिगुणानादृष्टमेकं कार्यत्वाद्घटादिवत्॥ नचशरीरे तदाश्रितं तस्य तद्रूपादावन्यत्वेच तत्त्वात्सिद्धसाधनमित्यभिधा
तव्यं॥ नचनदाश्रितं न तत्तद्रूपावानत्वयोः प्रावभ्रबंधेन प्रतिकूलत्वात्॥ तथा जीवच्छरीरं प्रयत्नवताधिष्ठितमिच्छानुविधायिक्रियाश्रयत्वाद्रथव
त्॥ श्रोत्रादीन्युपलब्धिसाधनानि कर्त्रप्रयोज्यानि करणत्वाद्वास्यादिवदिति॥ प्रामाण्यं वास्य प्रागेव प्रसाधितं॥ नदेवमनुमानस्य पृथिव्यादिभ्यस्तत्वां
तरस्य प्रसिद्धेः॥ कथं चार्वाकैर्वतत्त्वानीत्यवधारणमुपपद्येत॥ अन्योन्याभावोऽतररभावस्यैवेषांपृथिव्यादिचतुर्विधद्रव्यप्रतिषेधावसेयं प्रतिपि
द्धत्वान्नितरांनवधारणमुपपत्तिः॥ ततो योगन्वाचारोकोपकल्पितभेदैकांतस्यविचार्यमाणस्याकाकुत्रिज्ञापरीक्षानुपपत्तेः॥ नतत्र्यार्थक्रियासि
द्धिर्वातीपि संगच्छते॥ योऽप्येष कश्चिन्नेतु भेदैकांतेतथानर्त्सिद्धिर्नोपपद्यते तथायं तत्र कारिकायांप्रतिपादयिष्यते॥ तत्र भेदैकार्थक्रियासि
द्धिर्घटते॥ दृष्टान्तस्य भेदैकांतसर्वथाभेदरूपस्यासत्वात् प्रदेशैकांतस्य प्रागेवप्रतिक्षिप्तत्वात्॥ नतु माभूद्द्वैतैकांतरूपतयापरिकल्पिते
सर्वथाविचारसहे भेदैकांतेऽर्थक्रियासिद्धिः॥ प्रकृतिरूपेतु भविष्यति तस्य विचारसहत्वात्॥ सांख्याहि नित्यरंगमहादधिप्रगुणंप्रधानं जगत्स्वरूपं
नायांकारणमित्याचक्षते॥ प्रधीयते निक्षिप्यते कार्याणि तत्रेति प्रधानं तच्च संक्षेपतः त्रिविधं व्यक्तिः करणं कार्यमिति त्रेधा जगत्स्वयं॥ कार्यभूतानिक
रणं प्रतिनियतशक्तिगुणत्रयं॥ इत्यभिधानात्तन्निदिकार्यकरणशक्तिव्यतिरिक्तो जगत्सर्वेतोऽस्ति॥ नचकार्यस्वावि धर्मस्मान्महाभूतसंज्ञकं॥
करणं त्रयोदशविधं बुद्धीन्द्रियकर्मेन्द्रियासांतः॥ करणबुद्धहंकारभेदात्॥ शक्तिश्चातत्र भूयमानस्वभावाप्रकृतिरेवेन्मूलोपादानभूतान

न्या·कु·चं· सर्वेरकं तु भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च। कारणकार्यविभागादविभागाद्वैश्वरूप्यस्य॥ इति हेतुपंचकं परिनिर्णीतं तत्र भेदो एककार-
१२७ णाभूतस्यैव प्रतिपन्नं यथा घटसरावोदंचनादेरेकद्रव्यमृत्पिंडकस्य परिभिन्नं चेदं व्यक्तमेकादशेंद्रियादेरेकोऽहंकारः॥ पंचतन्मात्राणि यथाकारेंद्रिया
णि च पंचभूतानि अतो यत्र नैकं कारणं तत्र प्रधानत्वमेवेति तदस्तित्वसिद्धिः॥ समन्वयात् यज्ज्ञानि समन्वितं हि यत्तदात्मककारणकार्यं
यथा घटादयो मृदविशेषात्मज्ज्ञानि समन्विता महदात्मककारणकार्याः सत्त्वरजस्तमोज्ञानि समन्वितं चेदं महदादिव्यक्तं सत्त्वस्य हि प्रसा-
दलाघवोद्धर्षप्रीत्यादिकार्याः रजसस्तापशोषावष्टंभोद्वेगादि तमसो विषाददैन्यगौरवभ्रंसगौरवावरणादि महदादौ चास्ति प्रसादतापवि
षादादिकार्योपलंभो नाप्रधानास्तित्वसिद्धिः। शक्तितः प्रवृत्तेश्च यो हि यस्मिन्नर्थे प्रवर्त्तते स तत्समर्थो यथा तंतुवायः पटकरणे प्रवर्तते च प्र
धानं॥ व्यक्तकरणे तास्तित्वशक्तिर्यस्मान्महदादिकमुत्पादयति॥ सा च निराधारा न संभवतीति तदस्तित्वसिद्धिः॥ कारणकार्यविभागाच्च नहि कार
णमंतरेण महदादिकार्यविभागो घटते॥ मृत्पिंडमंतरेण घटादिवच्चायमतः॥ कार्यदर्शनात्कारणास्तित्वसिद्धिः॥ अविभागाद्वैश्वरूप्यस्य
महदादिप्रपंचोऽभिधीयते। न च प्रलयकाले कश्चिदविभागं गच्छति॥ भूतानि हि तन्मात्रेषु लीयंते॥ तन्मात्राणींद्रियाणि चाहंकारे अहंकारो बुद्धिः प्रकृता
स वितिं॥ एवं प्रमाणात् प्रसिद्धेनानाकाप्रकृतिरचेन क्रमेणानन्त्यस्यैषा प्रवर्त्तते॥ प्रकृतेर्महांस्ततोऽहंकारस्तस्माद्गणश्च षोडशकः॥ तस्मादपि पंचभ्यः पंच-
स्वभावानां प्रतिप्राणि विभिन्नान्यबुद्धिवृत्तयोभिः संगतानि ताः सर्वेऽपि स्वभावास्ततस्तस्मादहंकारस्तथाविधो जलनिधिरिव प्रतिप्राणि विभिन्नैस्तैस्तैः स्थू-
लोदंसुरूपोऽहमित्याद्यहंकारतरंगविशेषैः प्रसरति॥ स चाहंकारो वैकारिको भूतादिस्तैजसश्चेति त्रिधा तत्र मनोऽध्यक्षकारः प्रसरति॥ तत्र वैकारिकात्सात्त्विकात्प्रधाना
त्मकाहंकारादेकादशेंद्रियगणः॥ पंचबुद्धींद्रियाणि॥ श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणलक्षणानि बुद्धेर्यद्बुद्धिमभिव्यक्तुमिंद्रियाणि तानि पंचकर्म १२७
द्रियाणि वाक्पाणिपादपायूपस्थसंज्ञानि॥ कर्माणि कर्मोऽभिव्यक्तये इंद्रियाणीति॥ मनः संकल्परूपं यामेतं प्रस्थितः॥ सुवर्णप्रभासि भविष्यति
द्रव्यस्येत्यादि संकल्पवृत्तिर्मनः॥ भूतादेस्तु पंचतन्मात्राणि नित्यादिस्वभावानि तमोयिमत्राभ्यतानि॥ तथा भूतानीति एवं तेत्वस्थिर्विपाकभूत

सद्वेषु यथा प्रकृतिः प्रवर्त्तते ॥ तदा अथ मनो ब्रह्मणः प्रादुर्भावस्तस्य च महत्त्वात् योजनज्ञानपरिमाणाद् बुद्धिर्निःसरति ॥ अहंकारतत्त्वाद्वालंका
रस्कारद्वेष्टिद्रियाणि तन्मात्रेभ्यः सूक्ष्मदेहारंभकाणि भूतानि तदुपरि भूतेभ्यो भूतेभ्यः प्रतिकारस्थानीयः ॥ स्थूलो देहः सांसिद्धिकः कल्पता
दिक मन्वन्तरेणाङ्कुरितु त्यजते ॥ एवं मन्वादीनामपि मन्वन्तरेषु तु सूक्ष्ममूलारब्धं शरीरं सर्गप्रलयस्थायि प्रतिपाकारस्थानीयं तु मनुष्यादि
नां मातापितृजं देहकारकसुदृढं तत्सांलोपयाद्कमिति ॥ अयं च महदादि विवेचः प्रकृतौ सत्त्वैकवकुतश्चिदाविर्भावं प्रपद्यते ॥ असत्कारणादुपा
दानग्रहणात्सर्वसंभवाभावात् ॥ शक्तस्य शक्यकरणात्कारणभावाच्च सत्कार्यमिति हेतुपंचकादवसीयते ॥ यदि हि कारणे कार्यमसत्स्यात्तदा
नीरूपत्वात्खपुष्पवत्तत्कं तु न शक्येत ॥ यदि चासदेव कार्यं तर्हि नियतोपादानं न स्यात् ॥ यथैव हि तंतुषु घटस्यासत्त्वं तथा मृत्पिंडेऽपि घटस्यासत्त्व
त् ॥ तंतवोऽपि घटार्थिना उपादीयेरन् ॥ कार्य्यापेक्षयारोपः अयं तु कारणापेक्षया यदि चासत्कार्यं सर्वं सर्वस्माज्जायेत असत्त्वाविशेषात् ॥ न तस्य
मृत्पिंडादपि घटपिंडेऽपि तन्तुभ्यश्च स्यादित्यर्थः कारणस्य धर्म्मापेक्षया उपादानस्य ॥ कारणभावाच्च सत्कार्यं कारणा
भावो हि कारकत्वं तच्च नित्यसंबंधित्वात् कार्यसंबंधमपेक्षते ॥ न चासतां गगनांभोजप्रख्याणां कारणस्य कश्चित्संबंधो न कारणे भावो हि कारण
त्वं ॥ तच्च नित्यकार्यतादात्म्येन वर्तते ॥ कथमेवं तयोर्भेद इति चेत् हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिंगं सावयवं परतंत्रं व्यक्तं विपरीत
मव्यक्तं इति लक्षणभेदात् ॥ हेतुः कारणमस्यास्तीति प्रधानेन हि हेतुमती बुद्धिः बुद्ध्याहंकारेणाथो एकादशकोपकं ॥ पंचतन्मात्रैः पंचमहाभूतानि न हेतु
मत्प्रधानं तु कारणत्वात् ॥ निरूप्यं च पुरुषो न जडस्य कारणमस्य नित्यत्वात् ॥ जडजातां सा सूक्ष्मतरास्या ज्ञानोत्पत्त्यां तरस्वमतमस्ति ॥ न
न जडस्य जडस्य बाधधा संभवति कारणत्वाभावात् सिद्धमस्या हेतुमत्त्वं ॥ अतएव तन्नित्यं तद्विपर्ययात् महदादि अनित्यं कारणाच्च कार्याणां परि
णामेन भवितव्यमिति कारणापेक्षया महदादेरव्यापकत्वं विपर्ययात् प्रधानस्य व्यापकत्वं ॥ क्रियावत् परिस्पंदात्मिका तु मूले स्वैव महदादेर्भेदत्वेन
सक्रियत्वं एतद्विपर्ययान्निःक्रियं प्रधानं परिणामात्मिका तु क्रिया द्वयोरप्यस्ति ॥ बहूनामीश्वराणां परस्परमतभेदे न कार्यारंभो यथा ॥ कालवक्ष्या ९

जो मनु / मनुष्याणां ...

नृणी

व्यक्तमेव हेतुमत्

हेतुकार्ये ५

कारणापेक्षोत्पत्तिमत्तो दोषः। ... [illegible]

त्कार्योनिष्पत्तिः तथा बहूनां प्रसूनानामपीत्येकं चैतत्॥ व्यक्तं तु महदादिभेदादनेकं त्याश्रितं च व्यक्तं॥ यदात्मसात् दुत्पद्यते तत्स्वलक्षणं निश्चितत्वान्नत्वेवम
व्यक्तं॥ तस्याकारणत्वात् लिंगं च लीनं सत्त्वं स्वकारणं गमयति लयं गच्छतीति वा॥ घनीभूतावयवयोगात्सत्वादयं गोगिभूता च यथा
यथोक्तं नैह पर्यायान्निरवयवमव्यक्तं हेतुमत्त्वाश्रितत्वाभ्यां परतंत्रं व्यक्तं तत्त्वेव मव्यक्तं नातैव मव्यक्तयोरात्मनोभेदः सर्वत्र गुणानामविवेकित्वं विषयः सा
मान्यमचेतनं प्रसवधर्म्मित्युक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् इति लक्षणाभेदात् तयोर्भेदस्याप्युपपत्तेः॥ सत्वरजस्तमोमयत्वाद्व्योरपि त्रि
गुणात्वं तुल्यं॥ इमे सत्वादयो गुणाः इदं व्यक्ताव्यक्तमिति पृथक्कर्तुमशक्यत्वादविवेकित्वं तथा दयमपि विषयो भोग्यस्वभावत्वात्॥ विषय इति भोग्यत
या वधार्तीद्रियाणि इति सामान्यं न सर्वपुरुषोपभोग्यत्वादेशकुटीवत्॥ विषयत्वादेव चाचेतनं तत्॥ चेतनस्यैवं स्वत्वानुपपत्तेः प्रसवधर्म्मि च द्वयम
पि प्रसवः कार्यजननं धर्म्मोस्येति तथा हि प्रधानं बुद्धिं जनयति॥ बुद्धिरप्यहंकारमहंकारोपि तन्मात्राणीन्द्रियाणि चैकादश तन्मात्राणि महाभूतानि
जनयंतीति॥ पुरुषस्तु सामान्यधर्म्मणा सरूपोन्यैस्तु धर्म्मैर्विरूपः॥ यथा हि प्रधानं भोग्यत्वेन सर्वभोक्तृसाधारणं तथा पुरुषोपि भोक्तृत्वेन सर्वभोग्य
साधारण इति॥ ८॥ अत्रप्रतिविधीयते॥ यत्तावदुक्तं प्रकृतिसद्भावे परकं भेदानां परिमाणादित्यादिहेतुपंचकं॥ तदाश्रयासिद्धिदोषदुष्टत्वादयुक्तं॥
प्रकृतेरसंवेद्यस्वभावतया स्वरूपेणासिद्धत्वात्तस्याधिकरणासिद्धत्वात्॥ परिमितत्वादिकं हि साधनं भेदेषु वर्तते सिद्धत्वं तु साध्यं प्रकृतावितिः॥ अथ
महदादिभेदानामेवानेककारणपूर्वकत्वं प्रसाध्यते अतो नोक्तदोषद्वयाभावस्तत्प्रधानपुरुषयोरनेकांतात्॥ तयोरेकत्वान्नैकत्वसंख्यया महापरिमाणे
न च परिमितत्वेप्येककारणपूर्वकत्वसंभवात्॥ किंच परिमितं च स्यादेककारणपूर्वकत्वं प्रसाध्यते नो नोक्तदोषद्वयाभावस्तत्प्रधानपुरुषयोरनेकां
तात्॥ नैकत्वानेकत्वसंख्यया महापरिमाणेन च परिमितत्वेप्येककारणपूर्वकत्वसंभवात्॥ किंच परिमितं च स्यादेककारणपूर्वकं च न स्यात् किंचि १२५
रुद्धेन एककारणपूर्वकत्वेन च स्वरः॥ कालादिर्निःएकं कारणं भविष्यतीति विरुद्धत्वं॥ दृष्टांतस्य च साध्यविकलता घटादेरेककारणपूर्वकत्वासं
भवात्॥ नत्येकं किंचिज्जनकं घटीयते॥ सहकारिनिरकारणप्रभवत्वात्कार्याणां मृत्पिंडस्याप्यनेकावयवसमुदायात्मकत्वात् सर्वथैकत्वासंभवात्

स्यापि प्रतिपर्यायं भेदात्। अतः परिमितत्वमनेककारणपूर्वकत्वं नैयत्यात् सत्त्वादिदृष्टं। समस्तपतत्वादित्यप्यनैकांतिकं च हंति पुरुषाणामनेककार-
णपूर्वकत्वाभावेपि नित्यव्यापित्वादिधर्मैः समन्वयसत्त्वात्। पुरुषाणां चाभोक्तृत्वादिधर्मैरिति॥ भिन्नजातीनां च जलानलादीनामेकोपादान-
प्रभवत्वं दुरुपपादं परस्परजातिहेतुत्वस्य कारणैकत्वविरोधित्वात्। असिद्धं चेदं नहि समग्रभूतग्रामस्य सुखदुःखमोहमयत्वेन प्रधानान्वितत्वमसिद्धि-
सि रस्ति॥ सुखादीनामंतःसंविद्रूपतया प्रतिभासतो बाह्यार्थानां तन्मयत्वानुपपत्तेः॥ नहि कश्चिद्दारत्वं स्रक्चंदनादिकं सुखमिति प्रतिपद्यते॥ सुख-
जनकत्वेनापि वाच्यं तन्मयसिद्धेः न च कार्यकारणयोरैकत्वमनौपचारिकं प्रामाणिकैरिष्यते। प्रधानसत्त्वस्य चावाप्यप्रसिद्धेः तत्सेवशक्तितः प्रवृत्तेरस्त-
संगतं त-पु-। दर्शनमिति किं केन संगच्छतां अन्यथा खपुष्पमप्यस्ति तस्यैव शक्तितः प्रवृत्तेरित्यप्यस्यात्॥ शक्तेश्च व्यतिरेकाव्यतिरेकैकांतेः कथं॥ ततः कस्यचित्प्रवृ- स्तुपमिते
त्तिः कारणकार्यविभागाच्चेतनत्वसिद्धिः खरविषाणसत्त्वसिद्धिमन्वाकर्षति॥ न खलु खरविषाणवत्प्रधानस्य सत्त्वं कुतश्चित्सिद्धं॥ प्रलयका- कामे
लस्याप्रसिद्धेः अविभागोपि वैश्वरूप्यस्य लोकप्रकारेण प्रसिद्ध एव तल्लोकहेतुभ्यः प्रकृतिसिद्धिः॥ अस्तु वा ततः प्रसिद्धिस्तथापि प्रकृतिस्तत्स्व-
तो भूतसृष्टौ च प्रवर्तमाना स्वभावतः प्रवर्तते॥ किंचिन्निमित्तमाश्रित्य वा स्वभावतः प्रवृत्तौ नैयत्येन वृत्तिः प्रवृत्तेर्न विरामश्च न स्यात्। येन त्वस्य-
न्यस्येतावतात्येवतत्त्वसृष्टिरिदमस्यैव चोपकारकं भवतीत्यनुसंधानविकलस्य तदसंभवात्। निमित्तं च किं पुरुषप्रेरणा पुरुषार्थकर्तव्यता वा स्यात्॥
न तावत्पुरुषप्रेरणं निरभिलाषस्योदासीनतया तस्यैवैकस्मात् भवति इत्यनुसंबंधानाभावतः प्रतिनियतायां प्रसवक्रियायां तत्प्रेरणासंभवात्॥
नापि पुरुषार्थकर्तव्यता पुरुषस्य निरभिलाषतया पर्युत्सेवासंभवात्॥ प्रकृतेश्च जडतया पुरुषप्रयोजनमहं संपादयामीत्यनुसंधानानुपपत्तेः
नहि पुरुषेणाहमभिलाषितः पुरुषार्थीनाम्नो केचिदस्यैदमभिलषितमिति॥ नह्यचेतना रन्धनी वा कुतश्चिन्निश्चित्यास्याभिलाषितमहं संपा-
दयामि॥ मेया पामर्षं यनीत्यनुसंधाय च प्रवृत्तिः प्रतीयते॥ अथास्याः स्वभावतः शक्तिरेव नियतप्रकाश्यस्याभिलाषं पूरयामीत्यनुसंधानमनुप्रा -जैन
प्येदं विधत्ते प्रपंचमाचरतीति तत्स्वयं स्वभाववादः अप्रमाणप्रतिपन्नेव स्तुत्युपपन्नो यथाग्न्याकाशयोरैक्येनेन स्वभावतापानरप्रतिपन्नेपित

न्या.कु.चं. रभ्युपगमे चैवं ध्यानुतादेरपि जगद्वैचित्र्यविधाने स्वभावाभ्युपगमः किं न स्यात्॥ ततः प्रधानस्य परिणामवत्त्वानुपपत्तेरयुक्तं प्रकृतेर्म्महदादिस्यादि

१२६ श्लोकी/ नत्वसत्सत्कर्महदूरुषणं॥ किंचायं महदादिप्रपंचः प्रकृतेर्भिन्नोऽभिन्नो वा भेदे द्वयोरप्यविशेषतः कार्यत्वं कारणत्वं वा स्यात्॥ तथा च प्रकृतेः कारणत्वमेव

श्लोकटेक्स्ट/१२६ मूर्तेंद्रियलक्षणषोडशकगणस्य कार्यत्वमेव॥ बुद्ध्यहंकारतन्मात्राणां स्वभावापेक्षया कार्यत्वं चैतेनैतज्ज्ञातं विरुध्यते॥ तथा चेदमसंगतं मूलप्रकृ कारणत्वं

क तिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः इति॥ पंचप्रकृतौ महदादिप्रपंचस्य सत्त्वसाधने सद

कार्य कारणादिसाधनमनुपपन्नं॥ तत्र को धर्मी किं वा साध्यं यदि कार्यं धर्मि प्रागुत्पत्तेः सदिति साध्यं तदा व्यधिकरणासिद्धो हेतुः सत्त्वं हि साध्यं महदादिका

र्येषु वर्तते॥ असदकरणं तु साधनं वस्तुध्यापारकार्येषु इति॥ यथा सदकरणं सतः करणादित्यत्र पर्यवस्यति॥ तदा साध्याविशिष्टत्वं॥ अथ क्रियमा

णत्वं हेतुः प्रागुत्पत्तेः कार्यं सदिति किं प्रमाणं स्यात्॥ असदकरणादिति तु व्यतिरेककथनं परस्त्वत्र क्रियते॥ यथा गगनकुसुममिति तदप्यविचारित

रमणीयं॥ सतः करणविरोधात् यदि निष्पन्नं स्यात् सर्वात्मना तत्पुनरपेक्षत्वं तत्सद्भावे विरुध्यते। तस्य च कथं करणं प्रयोगो यत्सर्वात्मना सतस्तस्य केन

चित्कर्तुं शक्यं तावत् यावत्प्रकृतिः पुरुषो वा सत्त्वं सर्वात्मना परसमेते कार्यमिति॥ अतो निष्पन्नं क्रियते॥ यथा प्रमेये वकरणमनुपपन्नं निष्पन्नत्वा

निष्पन्नत्वयोश्च विरुद्धधर्म्मयोरेकत्र धर्मिण्यनेकान्तवादिनः समावेशासंभवादनेन विरुद्धोऽयं हेतुः॥ क्रियमाणत्वस्य सत्त्वेऽसत्त्वे च संभवात्॥

असत्कार्यवादानभ्युपगमे च कथं कारणेऽसतो हेतुमत्त्वादयो धर्माः कार्ये भवितुमर्हंति। न खलु ते व्यक्तव्यक्ते संति कालात्ययापदिष्टश्च पक्षः बा सत्कार्य

धनात्। न खलु सतः प्राक्कार्यस्य सत्त्वं कारणात्मकं वा प्रत्यक्षतः प्रतीयते। सतो हि क्षीरादेर्विशिष्टाकारसंस्थानरसादयो न दध्यादेः प्रत्यक्षेणावसेयं

भाव्यं॥ दध्याद्यर्थिनः क्षीरादौ प्रवृत्त्याचेत्॥ अपनतासादृश्यकोऽभूत्ता दध्यादिवस्यात्तस्य साध्ये॥ किंतु शक्त्यात्मना तत्र व्यवस्थितं दध्यादि व्यक्तीभवती १२६

ति॥ ननु केयं शक्त्यात्मकता नाम दध्यादेः स्वरूपेण सूक्ष्मरूपेणावस्थानं क्षीरादेस्तज्जननसामर्थ्यं वा न तावदाद्यः पक्षो युक्तो न हि पदार्थस्य द्वैरूप्यं स्थूलं सूक्ष्मं

चं निष्पन्नानिष्पन्नादिपदार्थस्वरूपप्राप्तिः॥ सा चेदस्ति किं स्थूलसूक्ष्मभेदेन। द्वितीयपक्षे तु न सत्कार्यवादः समर्थितो न हि सामर्थ्यमेव कार्यं युक्तं किंतु

कार्यं नाम किमुच्यते । अप्रादुर्भावे योगिनि भावगमनं धर्मिणो पूर्वधर्मत्यागेन धर्मान्तरस्वीकारो वा ॥ प्रथमपक्षे स्वस्मिन्निरोधो द्वितीयपक्षे गुणकी

गांगिभावार्थी गुणप्रधानभावश्चेत् ॥ तथा हि यत्र सत्त्वमंगि रजस्तमसी चांगे तत्र सात्त्विकः परिणामः सुखात्मा प्रसादनादिः यत्र रजोंगि सत्त्वतमसी चांगे तत्र इत्य. चं,

राजसः दुःखात्मा द्वेषकंपकादिः यत्र तमोंगि सत्त्वरजसी चांगे तत्र तामसो मोहकारादिरिति नियतस्य ह्यकुंदनादेः सुखाद्यात्मकत्वस्य शास्त्रप्रसिद्धेर्येषात् ॥ सं

अवैलक्षण्ये गांगिनां च सत्त्वादेः पूर्वरूपवैलक्षण्येनाप्रास्यात् ॥ अवैलक्षण्ये अंगिनैवांगत्वेऽन्वास्यात् ॥ वैलक्षण्ये तु धर्मिणः पूर्वधर्मत्यागेन धर्मान्तरस्वीकारस्य

स्वीकृतः स्यात् ॥ सत्त्वादेः सूक्ष्मरूपत्यागेन स्थूलरूपेणोपादानात् ॥ पूर्वधर्मस्य च त्यागेनाभूतिरेभावो नाशाभ्युपगमेस्त्र मनन्तानि ॥ तिरोभाव

श्चातिरोभावं विना सूक्ष्मतो स्थानोपपत्तेः ॥ तदभ्युपगमे च पूर्वधर्मं विना सत्त्वा नाभ्युपगम्यतां ॥ किमनेनान्तरगडुना तथा च परमतप्रवेशो वा ॥ धर्मान्तरस्वी

कारेऽपि तदुत्पत्तेरभिव्यक्तिर्वीनता वा तदुत्पत्तेः सत्कार्यवादक्षतिप्रसंगात् ॥ अभिव्यक्तिरपि सतान धर्मस्योत्पधर्मस्य वा स्यात् ॥ यदि सतो धर्मस्य तर्हि सा किमा

वस्थेनसोऽप्यभिव्यक्तः स्यात् एतेन हि धर्मस्यासौ न तद्वान्न प्यतित्कालेऽसत्त्वं पूर्वकालस्थितं वा पूर्वकालस्थितत्वे पूर्वमप्युपलंभः स्यात् ॥ तत्काले

सत्त्वे च सत्कालीनसत्त्वेऽसत्कार्यवादस्थितिरेव ॥ अपि धर्मस्तेऽप्यपरिस्य सदा सत्त्वमिति नास्याः सदा सत्त्वानुषंगात् ॥ सदैवाभिव्यक्तोऽर्थः स्यात् सदा सत्त्वे वा

स्यात् असत्कार्यवादप्रसंगात् स एव परमतप्रवेशानुषंगः ॥ अभिव्यक्तेश्च पूर्वं घटाद्यवस्थायां [illegible] दिक्रियापां च सत्त्वे समर्थं तथाभिव्यक्तावपि तत्कथंनत्वं अभिव्यक्तावपि सं.पु.

भवः कार्यं चाप्रलक्षस्य भावस्य प्रधानस्य पत्य तत्त्वभावो भावरूपश्च स्यात् नीरूपस्वभावस्य च रूपसम्भावनेरूपादप्यनेनोरूपवद्भाववप्रपंचवत्त्वं भवेवेनना-

द्यात्मनो भवनेनतेजोजगत्प्रपंचः ॥ किं तेन स्याद्यतोऽत्र स्याद्वैतसिद्धिर्न स्यात् ॥ न च सत्कार्यवादे कारकाणां साफल्यं आगमस्य किंचिदप्यकुर्वतां कारकत्वापरे

शसाप्यसंभाव्यमानत्वात् प्रयोगो यद्विद्यमानसाध्यं न तत्कारकं यथा चैतन्यमविद्यमानसाध्यश्च परमतेकारकानामिमताः पदार्था इति ॥ न चाभिव्य

क्तेस्तेषां व्यापारस्तत्रापि सत्त्वासत्त्वपक्षयोः करणासंभवात् ॥ न च खलु सापि विद्यमानाकर्तुं शक्या करणासमप्रसंगात् ॥ अविद्यमाना चापि करणे सत्का

रणमत्कार्यवादहानिः स्यात् ॥ कारकाणां चोपादानसहकारिभेदेन विभिन्नानां तत्र कुघटादिकार्यस्य स्वरूपेणाकरणान्नाभिव्यक्तस्याप्यभावस्त्युपादानेम्

कुटादि ख.पु.

न्या॰कु॰चं॰

१२७

१२८

लिंगत्वेनैतदंशादीनामकारकत्वं एतेनोपादानग्रहणादिकमपि प्रयुक्तं॥ अन्यथानुपपत्त्यधिकरणसिद्धत्वादेर्दोषस्याभावाच्चविशेषणात्॥ किंचान्वय
व्यतिरेकसमधिगम्यः कार्यकारणभावः। यच्च यस्मादन्वयव्यतिरेकाभ्यामुपजायमानं दृष्टं तत्तदीयधर्मिभिरुपादीयते॥ न तु प्रधानवशात्कार्यस
मुत्पत्तिः कार्यस्य तदंगीकारेऽपि सत्कार्यत्वमलनस्योपादानग्रहणाभावप्रसंगात्॥ न हि विद्यमानवस्तुसिद्ध्यर्थं किंचिदुपादानं गृह्णीत। प्रधानपुरु
षयोरपि सिद्ध्यर्थमुपादानग्रहणानुषंगात्॥ सर्वमूलत्वस्योपादानग्रहणाभावप्रसंगात्॥ न हि विद्यमानवस्तुसिद्ध्यर्थमुपादानग्रहणानुषंगात्।
सर्वसंभवाभावोऽप्येतेन चिंतितः॥ सर्वसंभवाभावो हि नियतस्य नियतात् जन्मोच्यते॥ न च सत्कार्यवादे घटते। यतोऽन्वयव्यतिरेकाभ्यामेवाव
गम्यते यदिदं यस्मादुपजायमानं प्रमाणतः परिच्छिन्नं तत्कथमन्यतोऽपि स्यात्। शक्तस्य शक्यकरणात् कारणभावोऽप्येतेन न कृतो न रंकिमर्थं-
चिरोऽप्याप्नीति भवतः शास्त्रप्रणयनं हेतूपन्यासश्च संशयोच्छित्तिर्निश्चयोत्पादार्थमिति चेत्॥ शक्तस्य शक्यकरणात् कारणभावोऽप्येतेन
न कृतो न रंकिमर्थं चिरोऽप्याप्नीति भवतः शास्त्रप्रणयनं हेतूपन्यासश्च संशयोच्छित्तिनिश्चयार्थमिति चेत्॥ नो यदि संशयनिश्चयौ शिष्यबुद्धि
स्थौ सत्त्वेनाज्ञानेकथं न दुष्टिरित्यादिकं॥ अथ संशयस्य निरोभावमात्रं तेन किंयते नास्त्यं न पुच्छेदो नाभावो विपर्ययेन सत्यम्भुपगमात्॥ निश्चयस्या
प्यभिव्यक्तिमात्रमित्यपि मनोरथमात्रं पुनः सर्वापाविर्भावप्रसंगात्॥ तथा च संज्ञानयोगायरनोजलांजलिः। अत्यन्तं संशयोच्छेदस्य कुतश्चिदरत्यसं रश्मायंते २६
भवात्। अभिव्यक्तिश्चत्यत्सतो वानसंभवतीत्युक्तं॥ अथ व्याप्यसाधनप्रयोगताफल्यार्थं प्रसनउत्पत्तिः एतेनोचिता सांख्यांगीकियते॥ नहि नैव
सत्कारणमित्यादेर्व्यभिचारइतितदेवं प्रधानसद्भावस्य न च महदादिसद्भावस्य च कुतश्चिद्धेतोरप्रसिद्धिः॥ एतेन तत्त्वसृष्टिप्रक्रियाकृतः प्रस्थि १२७
कयावत्तप्रपञ्चसोरभव्याकरणेन प्रत्येतव्यमुपेत्तेने॥ ततः स्थितमेतदेकान्तभेदेऽनेकांतयोरनुपलब्धेरयं स्याद्वादसिद्धिरनेकांतात्मिनि॥ कुत एतदित्याह॥ नांतर्व
हिर्वेत्यादि यथा सौगतकल्पितं स्वयोपपन्नतां संवेदनाद्वैतं वा दिवसत्त्वा नीरकल्पितं नत्वमेवं स्यादित्याह॥ नांतर्बहिर्वेत्यादि सत्त्वलक्षणं सौग
तकल्पितं सामान्यलक्षणं ब्रह्माद्वैतवादिसांख्यपरिकल्पितं प्रमेयं नेति संबंधः। कथं न बहिर्बहिः तर्हि योगकल्पितं नत्वमेवं स्यादित्याह॥ नांतर्बहि

द्वैत्यादि स्वलक्षणानां सौगतकल्पितं सामान्यलक्षणानां ब्रह्माद्वैतवादिनां स्वयमभिकल्पितं प्रमेयं येनेति संबंधः। कथं न द्वि द्वित्वान द्वैतो गतकल्पितं तत्प
यंत्याविन्याचारः॥ नांतर्द्वि द्वैत्यादि स्वलक्षणानां सौगतकल्पितं सामान्यलक्षणं ब्रह्माद्वैतवादिनां स्वयमभिकल्पितं प्रमेयं येनेति संबंधः। कथं न
द्वैविध्यं न द्वैविध्ये गकल्पितं नत्प्रमेयं स्यादित्याचारः॥ परस्परतादात्म्यकं अन्योन्यमनन्यं न भिन्नं स्वलक्षणं सामान्यलक्षणं चान प्रमेयमभिन्नति संबंधः। क
थं न प्रमेयमभिन्नं स्यात्॥ यथेत्यादि यथा येन प्रकारेण अन्यानन्यं परैरिति नहि भेदाभेदैकांतव्यतिरेकेणान्यस्य संभवान्न किंचित्प्रमेयं स्यादित्याचारः॥
द्रव्येत्यादि। द्रव्यपर्यायात्मकत्व स्वलक्षणात्मा स्वभावो यस्यार्थस्य तस्य द्वैधा प्रत्यक्षादिप्रतीतौ प्रतिभासभेदात्स्वरूपाद्यानाः प्रमेयः सिद्धः॥ ॥ ननु द्र
व्यपर्याययोर्भिन्नप्रतिभासत्वादिनान्यो न्यत्वं न भिन्नत्वात्कथं न तादात्म्यात्मकत्वं प्रमेयस्य स्यात् तथाहि। द्रव्यपर्यायौ स्वरूपतो भिन्नौ भिन्नप्रतिभासत्वं तं भिन्नौ
भिन्नप्रतिभासत्वात् घटपटादिवत्॥ घटपटादौ हि भिन्नप्रतिभासत्वमन्यत्वं भेदं सत्यं चोपलब्धं न द्रव्यपर्याययोरूपलभ्यमानं कथं नान्यत्वं
भेदं प्रसाधयेदन्यत्राप्यसत्त्वनदप्रसाधकत्व प्रसंगात्॥ न च नयोर्भिन्नप्रतिभासत्वमसिद्धं तत्रादिद्रव्यप्रतिभासस्य पटादिपर्यायप्रतिभासेभ्यो ल
क्षणे ऽखिलप्राणिनां सुप्रसिद्धत्वात्॥ तथा विरुद्धधर्माध्यासितत्वोप्यन्यो ज्वलनानलवद्भेदः। न चानयोरुद्धध्यासो सिद्धः॥ घटो हि परस्वजाति
संबंधिविलक्षणार्थक्रियासंपादकोति वायेन महत्वमुक्तो ऽनुभूयते॥ न नंतवस्तु नं तुलजानि संबंधिनो ऽल्पपरिमाणादिधर्म्मोपेता अवस्थिति कथं न भिद्येते॥
तादात्म्यैकत्वमुच्यते॥ तस्मिन्नसति प्रतिभासभेदो विरुद्धधर्माध्यासश्च न प्राप्नोति॥ विभिन्नविषयत्वात्तयोः। तथा तंतुपटादीनां नादात्म्ये पटस्तंत
र्शनं संज्ञाभेदो वचनभेदः पटस्य भावः पटत्वमिति विषयोऽन द्विनो सन्निरूप्यं न प्राप्नोति॥ नथा तत्तादात्म्येन तंतुरूपवत् तुरीवेमादि द्रव्य सामग्री जन्य नानु
वेति॥ सति हि भेदे न तु रूपो दृष्टो यथा राज्ञः पुरुष एवं नं तून्तां पटइति वहुव्रीहिर्यथा चित्रगुरेवं नंतूनां कारणाकः पटइति द्वंद्वश्च यथा प्लक्षन्यग्रोधौ ए
वं न तु पटाविति॥ किंच तादात्म्यमित्यत्र किं स्वपरः स्वात्मा येषां ते तत्त्वनेषां भावस्तादात्म्यमिति विग्रहः॥ तेषां तंत्रवस्त्रात्मा यस्य पटस्य स चेन च स्वा
त्मा यस्येति निकृत्याप विकल्पे पटस्यैकत्वात्तंतूनामनेकत्व प्रसंगो ऽन्यथा न तादात्म्यानुपपत्तिः॥ द्वितीयविकल्पेऽपि तंतूनामनेकत्वात्पटस्यापेन

न्या॰कु॰चं॰ १२८ कथानुषंगोऽन्यथा तद्वाशान्यं न स्यात्॥ तृतीयविकल्पस्त्वविचारितरमणीयः तद्व्यतिरिक्तस्य वस्तुनोऽसंभवात्। न हि तं तु पर्यायातिरिक्तं किंचि द्रूप्यंतरमस्ति यस्य तं तु परात्मकतोच्येत॥ ननु द्रव्यपर्याययोस्तादात्म्यं स्यात् तं भिन्नप्रतिभासत्वविरुद्धधर्माध्यासादेश्च न द्वाधकस्य चाप्यविशेषात्। गुणागुणादीनां चाकारणानात्वेप्यन्योन्यमनानात्वे वहिरंतर्धर्मिणां भावात्वादात्मनोऽभेदः स्यात्॥ किंचैकं नित्यं निरवयवं व्यापि च सामान्य स्वरूपं न हि परेण स्वभावान्धविशेषाः। न त्वयदि वस्तुनः सामान्यस्वभावता प्रतिक्रियेत तत्कथं न विशेषरूपता साधितेत्यभिधानात्। अथ विशेषरूप तास्यं गीक्रियते॥ तदा सामान्यस्वभावताऽत्र न स्यात् न स्वभावाभावात्मकं स्वधर्मिणां व्याप्त विरोधात्तौ वदुर्घटं किं च भावोपमर्द नात्मकस्वभावस्य स्वरूपं तेन न च यदि भावरूपता नाम्नासीकृता न तदाभावरूपतैव न च स्यादिति भावरूपताया नामापि न स्थयेत्॥ पुनरपदार्थेच मिश्रितं नृत्याहि केन स्वरूपेणानंतुष्कादीनां भेदः केन चाभेद इति संशयः॥ तथा यत्राभेदस्तत्र विरोधः यत्र च भेदस्तत्राभेदस्य प्रशीनोऽनुपलब्धे रिति विरोधः॥ तथा भेदस्यैकत्वस्वभावस्यान्यदधिकरणं भेदस्यानेकत्वस्वभावस्यान्यदिति वैयधिकरण्यं॥ तथा एकांतेनेवात्मकत्वे योऽ योऽमेनेकस्वभावताभावलक्षणोऽनेकांतत्वे चैकस्वभावत्वाभावलक्षणः सोऽवाप्यनुपक्षत्त्वरस्तु भयदोषः॥ तथा येन स्वभावेनार्थस्यैकस्वभा वता तेनानेकस्वभावत्वस्यापि प्रसंगो येन चानेकस्वभावता तेनैकत्वस्यापीति संकरप्रसंगः सर्वेषां युगपत्प्राप्तिः संकर इत्यभिधानात्॥ तथा येन स्वभावेनानेकत्वं तेनैकत्वं प्राप्नोति येन चैकत्वं तेनानेकत्वमिति व्यतिकरः परस्परविषयगमनं व्यतिकर इति वचनात्॥ तथा येन रूपेणाभेदस्तेन क थंचिद्भेदो येन च भेदस्तेनापि कथंचिदभेद इत्यनवस्था॥ प्रतिपत्तिनिरोधो भावस्तत्त्वस्यानुपलंभेनानेकांतवादिनां सर्वथैवात्माऽनेकांताभ्युपगमेप्य नेदोषा दुर्वाराः॥ तथानेकांतेऽमुक्तोऽप्यमुक्त एव स्यात् मुक्तोऽपि च मुक्त एवान्यथानेकांतहानिः स्यादिति॥ अत्र प्रतिविधीयते। यत्तावदुक्तं॥ द्रव्य १२८ पर्याययोस्तयोर्भिन्नोऽभिन्नप्रतिभासत्वादिति तत्र भिन्नप्रतिभासत्वं भिन्नप्रमाणग्राह्यत्वमभिप्रेतं भिन्नाकारावभासित्वं वा प्रथमपक्षे व्याप्त्या विनानेकांतः प्रत्यक्षादिभिन्नप्रमाणग्राह्येप्यस्मिन् भेदासंभवात्॥ द्वितीयपक्षेऽपि कथंचिद्भिन्नाभिन्नाकारावभासित्वं विवक्षितं सर्वथा वा

एवं विषयभेदाभ्युपगमे

ङिकर्यं चित्तत्कथंचिदेव चातस्तयोर्भेदः सिद्धोनेनैवास्याविनाभावसंभवान्निश्चयतः सर्वथात्तद्विपर्ययात्। नचायं हेतोर्विरुद्धत्वं साध्यविपर्ययसाधनात्।
सिद्धसाधनं वास्माकं कथंचिद्भेदस्येष्टत्वात् सर्वथा नेष्टस्य साधने तु कालात्ययापदिष्टत्वं प्रत्यक्षबाधितपक्षनिर्देशानंतरं प्रयुक्तत्वाद्धेतोर्निर्दुष्टत्वादिति
यथा द्रव्यपर्यायरूपतया प्रमाणेनानवनीयते। नच तद्रूपतया प्रमाणेनावनीयमानेन तद्रूपतयाभ्युपगंतव्यं। यथा घटः पटरूपतया प्रमाणेनानवनीयते। नायं
तभेदरूपतया द्रव्यपर्यायात्मकस्तस्माद्द्रव्यपर्यायात्मक इत्यनुमानबाधितपक्षनिर्देशानंतरं प्रयुक्तत्वाद्धा दूरोत्सारितो नैकांतिकत्वं चेहि दूरतस्तद्देश
वर्तिप्रतिपत्तॄणामस्पष्टेतरप्रत्यक्षप्रत्यययोस्तथाभिन्नप्रतिभासत्वेपि न तद्भेदसंभवति॥ ननु चात्र प्रत्यय — द्वित्वीयभेदोस्त्येव तयोर्हि प्रथमं दू
रदेशवर्तिनो विज्ञानमात्रादूरं दृता सामान्यविषयमुत्तरज्ञानं तु तद्विशेषपर्यायेणैव पश्यामीत्येकत्वात्त्वं वस्तावाभावसंगानस्पष्टेतरप्रतिभा
सत्वादिभिन्नविषयत्वान्। तद्विषयावेव तद्विशेषाणामेकविषयत्वं विनिश्चीयते॥ सामान्यविशेषयोस्तथान्यविषयभेदः कथमेवमेकांताभ्युपगमो न विशीर्यते॥
द्रव्यपर्याययोरपि तद्वत्कथंचिद्भेदप्रसिद्धेः॥ अथ सर्वथा नयोर्भिन्नाकारावभासित्वं विवक्षितं। न रसिद्धं कथंचिनात्म्यापत्तयोरेवद्रव्यपर्या-
ययोस्तादात्म्ये नव भासमानत्वाज्ञान। यथा वाचाध्यवसेयाभासमानत्वं नैवाभ्युपगंतव्यं। यथानीलाद्यनीलतद्वा भासेनैव तत्कथं
चित्तादात्म्येनवगम्य यावन्निनवेनथा नतरेव भासिनोध्यक्षस्याबाधकत्वमस्तिदं तद्बाधकस्य चिरपि प्रमाणस्यासंभवात्। नहि प्रत्यक्षं तद्
धकमत्यंतं तद्भेदस्याचाव्यतिभासमानत्वात्। अनुमानमप्यतद्वेवान्यद्बाधकं स्यान्ननावरे अस्याध्यक्षबाधितविषयत्वेयोः स्यान्नस्यैवासंभ
वात्। भ्रांतत्वान्निरदिव विषयस्यानेन बाधेपि चेन्न। कुतस्तद्भ्रांतत्वमनेनबाधनाद्वेत्त्वचक्रकप्रसंगः॥ तथास्य बाधितविषयतया स्यैव स्यानेधकस्याने
नबाधातस्याचतस्मात्तस्य भ्रांतत्वं न सिध्यत्यबाधितविषयतयास्यैव स्यान्नेति॥ कथंचैवमनुमेयोविः सत्वाद्यनेकांतवदित्यस्याप्यबाधित विषयत
याप्रवर्तिनं स्यात्॥ भिन्नप्रतिभासत्वस्यैव वादाप्रतिनिबंधस्तस्य पदेश्वस्तत्वतः बाधनादस्यागमकत्वमप्यवाप्यशिक्षितं ज्ञानेनानुमानेन तु स्य
साधनं त्वनुमानांतरेणतद्बाधने स्यैवैयर्थं साध्यस्याप्यस्वरूपप्रसिद्धेः॥ नच तद्बाधकं नरं नरस्वानिननन्खलु भिन्नार्थक्रियाकारित्वाभिन्नकारण

न्या·कु·चं·
१२८

प्रभवत्वाभिन्नकालत्वाद्विरुद्धधर्माध्यासाद्यलिंगादार्यां नित्ये तद्बाधकं स्यात्। न चात्र यत्तोऽपुनर्न कदा नेत्यादिना नैकान्तात्। कोऽपि हि नित्यकारणाग
लक्षणसामग्रीसन्निधिप्रतिपादितलक्षणो भेदः स कजनानां त्र्यापि प्रतिपादितलक्षणं वा नेयाः अन्योन्यविलक्षणाः मध्यक्रियां करोतीति भिन्नकारणप्रभवत्वमप्य
कुत्रचिन्नानैकान्तिकम्। ततः स्यैकस्यापि प्रसिद्ध्याद्यनेककारणकलापात् स्वात्पत्तिनीतेः॥ अथ भिन्नोपादानकारणप्रभवत्वं भेदकं न भिन्नकारणप्रभ
वत्वमात्रं तेषामस्ति तेनायमदोषः; कथमेवं गुणगुण्यादीनामपि भेदः स्यात्? अभिन्नोपादानकारणप्रभवत्वस्य तत्राप्यसंभवात्। अभिन्नकालत्वा
दप्यत्र मपरावस्थेभ्यः प्राक्तनावस्थाविशिष्टेभ्यः तन्तुभ्यः पटस्य भेदः साध्यते प्रागपरावस्थाभावाद्य भयपक्षेऽसिद्धमनाद्यंवेत्तदव्यवस्थयोः सकलभा
वानां भेदाभ्युपगमात्। न खलु ये वार्थस्य पूर्वावस्था भवितुमर्हति। पूर्वाकारपरित्यागेनैवोत्तराकारस्योत्पत्तेः॥ द्वितीयपक्षे त्वसिद्धो हेतुः
परावस्थातन्तूनां पटाभिन्नकालत्वस्यासंभवात्॥ विरुद्धधर्माध्यासोऽपि धूपदहनादिना नैकान्तिकः। तत्र खलु हस्तलग्नेन एकदेशे शीतस्पर्शोल
क्षणविरुद्धधर्माध्यासेऽपि धूपदहनादेर्भेदः प्रतीयते न च हस्तलग्नेतरदेशयोः शीतोष्णस्पर्शाधारतानधूपदहनादावयविनः स्यादभिधान
त्वं। न च तत्र विशेषात् अतोऽत्यन्तभेदस्यैवतादात्म्यविरोधित्वात् या विरुद्धधर्माध्यासाभिवृत्तिर्न तत्कथंचिद्भेदस्य, यथा रज्जोः ऽप्ययोर्हस्तस्य संकोचप्रसा
रणे सर्पस्य कुंडलीभावे ऽत्यन्तभेदोऽपि परार्थानां सर्वथाप्रतीतोऽभ्युपगम्यते सा चेद्रवस्थातद्वतोः कथंचिद्भेदे न दृष्टा तदा शाश्वप्यपि किमिति नाभ्युपगम्यते॥ न चे
पं एवं परेकस्य नानावस्थात्मकत्वं नास्तीति यथैकोऽपि क्रमभाविनीनामवस्थानामनुक्रियमाणानामनेन तस्य कथंचिदेकत्वविरोधः।
प्रमाणाद्विषयविषयं वस्तु स्वरूपं च ज्ञायते तथाविधमेव चाभ्युपगन्तव्यं। यथा तत्र भेदं तत्र ज्ञायते न तत्र्यं भेदो यथा घटपटयोः। यत्र तु कथंचिद्भेदं
न तत्र कथंचिद्भेदो। यथा रज्जुसर्पादौ तदेवमनेकदोषदुष्टत्वाद्विवृत्तिभासत्वादिसाधनं॥ न द्रव्यादीनामत्यन्तभेदप्रसाधकं घटते॥ दृष्टान्तोऽपि साध्यविक
लो घटपटादीनामप्यत्यन्तभेदासंभवात् तत्संभवे च सत्त्वादिनान्योन्यं तेषामभेदानुप्रसिद्धेः; साधनविकलश्च प्रावृत्ति तेऽप्यन्धस्य
घटादीनां प्रतिभासासंभवात्॥ न च प्रतिविषयं विज्ञानभेदोऽभ्युपगन्तव्यो द्वयविसिद्धभावप्रसंगात् ऊर्ध्वोमध्यभागेषु गंडे रस्याः तापिकल्पितं भूवा स्वला

त्वात् नीतिवाधान्यत्रापि न काकेभ्योऽस्तिनाश्यति च दृष्टान्ते त्वंतभेदेनासस्याध्युपलंभाद्दृष्टवर्ण्यायाहीनावव्यत्वंतभेदे साध्ये गमकत्वमिष्यते न
तदाश्रावणः शब्दः सत्वात् घटादिवदित्यादेरपि गमकत्वमिष्यतां॥ सपक्षे घटादौ सत्वादिरश्रावणत्वादिना प्रतिबंधप्रतिपत्तेरन्यत्राप्यविशे
षात् पक्षस्य सत्त्वबाधनादस्यागमकत्वमन्यत्राप्यविशिष्टं यदप्युक्तं नतः पटइति संज्ञाभेदइत्यादि॥ तदप्युक्तिमात्रमवस्याभेदनिबंधन
त्वात् संज्ञाभेदस्य वासौ न साधयति न खलु दर्शनभेदं प्रत्यनैकांतिकश्चायं गगननभआकाशविहायसादावत्यंतभेदाभावेपि संज्ञाभेदस्य जलमापइ
त्यादौ तु संज्ञाभेदस्य वचनभेदस्य संभवात्॥ अनन्यथवस्तुविषयोहि संज्ञाभेदो वस्तुनोत्यंतभेदस्य साधको नान्योतिप्रसंगात्‌ अथ योऽपि
त्यकान्येवस्तुनि संज्ञादिभेदो नासावत्यंतभेदस्य साधको यथा जलमाप इत्यादि ... रिभेदश्चायं नंतनयपट इत्यादिरिति॥ नत्वेवं गगनाकाश
दिवत् यत्तु घटादावपि यथा पटशब्दस्य संनिकृष्ट इति चेत्॥ स्ववमेव तद्वाच्यानामवस्थाविशेषवाचित्वात्। योपितादिकरण्याशरोत्सा ... नाहितं
तदः कुविंदादिव्यापारप्रवृत्तिः ... नादौ सर्वासमर्थानं तु व्यपदेशं लभंते॥ व्यापारं तूत्तरकालं विशिष्टावस्थाप्राप्तास्समर्थीपट इत्यपदेशं च
चान्यदुक्तं॥ पदस्यभावइत्यादिनत्तदपि उक्तं॥ यत्कां पदार्थानामस्तित्वं स्वरूपं परार्थानां धर्मेरित्यादौ भेदाभावेपि स्याद्युत्पत्तिदर्शनात् न खलु
भवतां षट्पदार्थातिरिक्तमस्तित्वादिरिष्यते॥ ननु संज्ञापकप्रमाणविषयस्य भावः सत्वं तदुपलंभप्रमाणविषयत्वं नाम धर्मान्तरं षण्णाम
स्तित्वमिष्यते॥ अतो नानेनानेकान्त इत्यनुपपन्नं षट्पदार्थसंख्याव्याघातप्रसंगात्॥ तत्तत्त्वधर्मस्यतेभ्योऽर्थान्तरत्वात्॥ ननु धर्मिरूपाएव
षडेभावास्ते षट्पदार्थाः प्रोक्ताः धर्मरूपास्तु तदतिरिक्ताः एव॥ तथा च पदार्थ … धर्मो विनाधर्मिणामेवानिर्देशः कृतइति
श्रवस्ते तं तथाप्यस्तित्वादेः धर्मस्य षट्पदार्थैः सार्द्धं कः संबंधो येन तत्तेषां धर्मः स्यात् संयोगः समवायो वा न तावत्संयोगोस्य गुणत्वेन द्रव्या
श्रयत्वात्॥ नापि समवायस्तस्यैकत्वेनैवेष्टः समवायेन चास्तित्वमवायसंबंधेनास्यानेकत्वप्रसक्तेस्तु दिष्टिव्याघातः॥ संबंधमंतरेण च धर्म
धर्मिभावाभ्युपगमेऽतिप्रसंगः॥ किंचास्तित्वादेरपराऽस्तित्वाभावात् कथं न व्यतिरेकनिबंधनाविशक्तिर्भवेत्॥ अथ तत्राप्यपरमस्तित्वं मन्

न्या॰कु॰चं॰ क्रियेतेन दानवस्थास्यात्। अथवा परधर्म्मस्य समावेशेन च सत्त्वादेर्धर्म्मिरूपत्वानुषंगात्॥ पटे वा धर्म्मिणा त्वस्वरूपापत्तेः यैश्च धर्म्मिरूपतेत
एवं वत्तिनावघातिताः तत्प्रसारं। गुणकर्म्मसामान्यविशेषसमवायानामनिर्देश्यानुषंगात्॥ नहि येषां धर्म्मिरूपत्वमेव द्रव्याश्रितत्वेन धर्म्मिरूप
१३० त्वस्यापि संभवात्॥ तथात्वस्याभावः प्रत्वमित्यादौ शब्दावपि निर्दिष्टौ सत्तेरूपत्वं भावतापि भेदपक्ष एवाभेदेन॥ यदप्यभिहितं तत्सुरूपेत्यादि त
१२० दभिधानमात्रं॥ पतत्सेनाक्षेपकान नष्टत्वात् तत्त्वादेर्भेदभावेपि न सुरूपोत्पत्तेः॥ मत गजा वीर पुरुषके नेत्यादौ बहुव्रीहिश्च यत्रयुक्तं॥ नाद
त्यर्थं त्वकिंसपदः अत्रास्येत्यादिनेत्यर्थविग्रहो द्रष्टव्यः॥ तत्सवस्तु न स्यात्मानो द्रव्यपर्य्यायौ सत्वासत्वधर्मौ वा न तदात्मानो भेदेन वस्तुनः प
रामर्शानयोर्भावत्वादात्म्यं भेदाभेदात्मकत्वं॥ वस्तुनो हि भेदः पर्यायरूपेनैवाभेदस्तु द्रव्यरूपत्वमेव च भेदाभेदौ तु द्रव्यपर्यायस्वभावावेव॥
न च वस्तु द्रव्यमात्रं पर्यायमात्रं वा वस्तु उभयात्मनः सन्तुदायस्य वस्तुत्वात्॥ द्रव्यपर्याययोस्तु न वस्तुत्वं नाप्यवस्तुत्वं किंतु वस्त्वेकदेशता। यथा समुद्रां
शो न समुद्रो नाप्यसमुद्रः किंतु समुद्रैकदेशः॥ तदुक्तं॥ श्लोक॥ नायं वस्तु न चावस्तु वस्त्वंशः कथ्यते बुधैः॥ नासमुद्रः समुद्रो वा समुद्रांशो यथैव
हि॥ सपदस्यात्मायेत्यामित्यपि विग्रहेन दोषो वस्त्वाविशेषादेशतया तत्रेकानेकत्वसंभवात्॥ नहि तेनैवं न च अत्रात्मावस्थेति विग्रहे स्तं तत्रानेने
कत्वपदस्याप्यनेकत्वं स्यादिति चेत्॥ ननु किमिदं तत्स्यानेकत्वं नाम किमनेकिमहेकात्मपदात्मकत्वं अनिर्नतु नत्त्व संगेवात्मयपदेसिद्धसाध्य
ता अमीर्थविनानीभूतानेकत्वं तत्साध्यव पदात्मकत्वात्सर्वं हि तीयपदत्व सद्भूकः अस्येकनेयांतत्वाविरोधात्मासंभवात्। अनेनविनानीभावलक्षणे
हि तेषां परिणामविशेषः पटः स च सपुदितानां भेदानामीयां प्रतीयते॥ नान्यथा भूतानां भेदे पटस्यात्मेत्युच्यते॥ द्विविधो हि वस्तुनः परिणामः सत्ये
कावस्था पांसु द्वायावस्थायां च घोटादिवद्बुध्यादिवत्वात्एवं द्रव्यपर्यायवद्गुणगुणादीनां सर्वपिकसंचिनारान्यं प्रतिपत्तव्यं॥ प्रतिभासभेदस्य १३०
विरुद्धधर्म्माध्यासस्य च सर्वथा भेदाप्रसाधकत्वप्रतिपादनात्॥ यच्चान्यदुक्तं॥ गुणगुण्यादीनां चाकारनानात्वपीताधितस्य चारुकर्णनिर्देशा
भेदात्मनानुगुणगुण्यादिवन्निरिक्तिलाभीनां ग्रहणसंभवतोन्यतोन्यस्यात्मत्वापत्तेः॥ नाथात्म्याकारवेलत्वरणेपहि तेषां भेदाभेदौ तथावभासन

मेकत्वोभयात्मनायद्ग्रहणंनचान्यत्रनास्तीतिकथंचबहिरंतर्वानानात्वमेकान्तिकेदः स्यात्॥यदप्युक्तमेकंनित्यमित्यादि॥तदपिअवद्यमात्रं
सामान्यस्यानेकानित्यसावयवाव्यापिस्वरूपत्वप्रतिपादनात्॥अनेनविशेषपरिणामवृत्तावस्तुलक्षणसामान्यपरिणामोप्यर्थानांवनिव्यक्ति
विभिन्नएव॥तथाविधसदृशेतरधर्म्माधारतयावामीषांवस्तुत्वेनप्रतीतेः॥कथंसामान्यस्वभावतोऽविशेषरूपतांगतोविरुद्धेनाथ
र्म्मधर्म्मिणोश्चनसर्वथाभेदेभेदेवातदुभयोपपत्तेः॥सत्यंविध्यवतरस्यतरस्वरूपवत्॥किंतुकथंचिद्भेदेहि धर्म्मधर्म्मिणाः भावेवाअभेदस्तु
तयोर्द्रव्यांतरंनेतुमशक्यत्वलक्षणमशक्यविवेचनत्वं॥नखलुघटपटादीनामिवोभयोर्लक्षणमशक्यविवेचनत्वंनसंभवति॥घटपटादि
धर्म्मिणोर्मिथःभिन्नानामपिसदृशेतरपरिणामाद्यशेषधर्म्माणांघटादिद्रव्यैरेकेनैवात्मनातान्धर्म्मिणोधर्म्माणामेकान्ततोभेदाभ्युपगमेच
निःस्वभावतापत्तिःस्वभावस्यापिधर्म्मत्वात्ततोभेदात्॥तथाचास्यासत्वंयन्निःस्वभावंतदसत्यथागगनेन्दीवरंनिःस्वभावश्चायंस्वकीयैरभिप्रेतोधर्म्मी
तिएवंचधर्म्माणामप्यभावोनिराश्रयाणांतेषांसद्भावासंभवात्॥अतःसकलशून्यतापत्तिःपरस्परंहितोप्यायातानचनिःस्वभावस्याविष
र्मैस्तथाप्यन्तराश्रयत्वंयुक्तंखरविषाणादेरपितत्प्रसंगात्॥भिन्नस्यापिस्वभावस्यधर्म्मिणिसमवायान्ननिःस्वभावत्वमित्यप्ययुक्तंसमवा
यस्यप्रागेवापास्तत्वप्रतिपादनात्॥तथैकांततोधर्म्मधर्म्मिणोरभेदेप्यन्यतरस्वभावप्रसंगात्सत्वापत्तिः सर्वथाभेदेहितयोर्द्धर्म्ममात्रंधर्म्मि
मात्रंवास्यादित्यन्यतरःस्वभावाभावकल्पितत्वात्तद्भावस्यान्यतरभावेशेषायेत्यप्यसमीक्षिताभिधानं॥निर्व्वीजायाकल्पनायाएवानुपपत्तेः।
नचास्यानिर्वीजत्वमसिद्धंबहिरंतर्वावस्तुनएकानेकस्वभावात्तत्कारणत्वानुपपत्तेः॥तदेकानेकस्वभावमनेककल्पनावीजंयुक्तं॥विभिन्न
शक्तिशून्यस्यविभिन्नकार्यहेतुत्वानुपपत्तेः॥यद्विभिन्नशक्तिशून्यंतन्नविभिन्नकार्यहेतुयथानित्यमभिमतंचवस्तुविभिन्नशक्तिशून्यंचस्व
लक्षणाभिमतमेवेष्यते॥अतःकथमेतद्धर्म्मधर्म्मिकल्पनासद्भावकार्यस्यहेतुःस्यात्॥विभिन्नस्वभावंव्यावर्तिवत्वाद्विभिन्नशक्तिशून्यात्व
पिसलक्षणाद्विभिन्नकार्योत्पत्तिरविरुद्धेत्यप्यवर्थिताभिधानं॥तस्यास्तेनोभिन्नायाःसंभवाभावात्॥अवस्तुरूपतयाखरविषाणवद्विनः॥६

न्या॰कु॰चं॰ स्वभावानुसरने ष्वतद्रूपपरावृत्तानां वस्तुत्वमस्याः स्यादित्याशंकमभिचारात्‌ एवं सदेव सत्त्वेनाभेदे च वस्तुनो भेदो वस्तुत न तस्याविरोधात्‌ वस्तुभिन्ना
१३३ नेव वस्तुन भिधेयत्॥ इति किमपि महाद्भुतं व्याहतिर्भिराभ्युपगमेव सिद्धे धर्मभेदे व्याहतीनामपि धर्मत्वात्‌॥ परस्तु कं भावाभावात्मकत्वमित्यादिन
दूषयांप्रतं॥ न दात्मकत्वस्यार्थेषूपलभ्यमानत्वेन विरोधासिद्धेः। विरोधो ह्यनुपलंभसाध्यो यथा वंध्यायां स्तनंधयस्य। न च स्वरूपादिना वस्तुनः॥ सत्त्वे
पररूपादिनासत्त्वस्यानुपलंभोस्ति। न खलु वस्तुनः सर्वथा भावरूपत्वा स्वरूपं स्वात्मनैव परात्मनापि भावप्रसंगात्‌॥ सर्वस्य सर्वात्मत्वानुषंगतः स-
कर्दितं स्यात्‌ न च प्रागेव कृतो नरं नाप्यभाव एव पररूपेणेव स्वरूपे णाप्यभावप्रसंगतः सर्वस्य शून्यप्रसक्त्यानुषंगात्‌ सकलशून्यतानुषंगान्निरिव
लव्यवहारोच्छेदः स्यात्‌॥ क्वचिदपि प्रवृत्त्याद्यभावात्‌॥ प्रतिनियतिहितार्थेन शून्यता पाग्रस्यलं पुनः प्रसंगेन। न च स्वरूपादिनासत्त्वमेव पररूपादिना
सत्त्वं पररूपादिनासत्त्वमेव स्वरूपादिना सत्त्वमित्यभिधातव्यं॥ न रपेक्षणीयनिमित्तभेदात्‌ स्वद्रव्यादिकं हि निमित्तमपेक्ष्य सत्त्वं व्यवस्थाप्यते।
परद्रव्यादिकं त्वपेक्ष्यासत्त्वमतो विभिन्ननिमित्तनिबंधनत्वात्‌ सत्त्वासत्त्वयोर्भेदोयस्य विभिन्ननिमित्तनिबंधनत्वं तस्य भेदो यथैकत्वादिसंख्यायावि
भिन्ननिमित्तनिबंधनत्वं सत्त्वासत्त्वयोरिति॥ न चायमसिद्धो हेतुरुक्तप्रकारेण समर्थितत्वात्‌ दृष्टांतस्य साध्यसाधनवैकल्यमप्यनुपपन्नं स्वरूप-
मात्रापेक्षैकत्वसंख्यातो द्रव्यांतरापेक्षद्वित्वादिसंख्याया विभिन्ननिमित्तनिबंधनत्वे भेदस्य चानुपसिद्धत्वात्‌॥ सर्वथाभेदे त्वनयोस्तत्रि
बंधित्वानुपपत्तिः सर्वथाभिन्नं न तत्र विभिन्ननिमित्तनिबंधनत्वं यथा सत्त्वे सत्त्वात्सर्वथाभेदश्च सत्त्वासत्त्वयोर्भवद्भिरिष्ट इति॥ प्रतिनियतसद्स
त्त्वनयगोचरत्वादित्वानुपपत्तिश्चनयोस्तत एव न हेतुः॥ अभिन्ननिमित्तनिबंधनत्वे च न तत्त्वनयोः सर्वथा हेतुरभेदात्‌ फलभेदस्याप्यनुपगमो विरुद्ध
ना॥ प्रतिनियतवस्तुव्यवस्थाविलोपश्च सत्त्वयोः सर्वथाभेदे पटो हि यथा स्वद्रव्यादिना सीति नैवं परद्रव्यादिनापि तत्सत्त्वाव्यतिरिक्तत्वात्‌ तद १३१
सत्त्वेनापि स्वद्रव्यादिनाप्यसत्त्वं स्यात्‌ तदसत्त्वाव्यतिरिक्तत्वात्‌॥ सत्त्वस्याप्यतः प्रतिनियतवस्तुस्वरूपाव्यवस्थितिः सिद्धा प्रतिनियतवस्तुव्यवस्थाविलो
पः पक्षत्वे सत्त्वमेवान्योविविक्ततद्विशिष्टं न च वस्याहेतुरित्यपि धर्मविलक्षणे चाम्नायानुसरणाम सत्त्वस्यैव विविक्तैनितामांतःकरणानानतः

स्वपररूपाभ्यां सदसदात्मकाः सर्वे भावाः प्रतिपत्तव्याः॥ प्रतिनियतरूपव्यवस्थान्यथानुपपत्तेः प्रतिनियतकार्यकारित्वान्यथा-
नुपपत्तेश्च। अन्यथेतरेतराभावव्यतिक्रमव्यवस्था भविष्यतीत्युच्यते॥ ननु किं स्वभावोयमितरेतराभावः स्वतन्त्रो भावधर्मो वा। न तावत्स्वतन्त्र-
स्तथाविधस्याप्रतीयमानत्वात्। अथ भावधर्मः कस्य पुनर्भावस्य धर्मोसौ घटस्य भूतलस्योभयस्य वा। प्रथमपक्षे घटस्य तत्त्वापि किं घट-
स्वरूपस्य निषेधको न वा निषेधकश्चेत्। किं घटस्य भूतले वा। प्रथमपक्षे कथं घटधर्मोसौ धर्मिणा एव सत्त्वात्। कथं वा भूतले घटो नास्ती-
ति प्रतीतिः घट एव न नास्तीति प्रसंगात्॥ द्वितीयपक्षेत्वस्मन्मतसिद्धिर्घटाभावस्य घटधर्मत्वे वस्तुतो भूतले घटस्वरूपप्रतिषेधकत्वेना-
स्माभिरभ्युपगमात्॥ अथानिषेधकस्तदा भूतलेपि घटस्वरूपप्रसंगादभावकल्पनावैयर्थ्यं। अथ भूतलधर्मोसौ तत्र घटो नास्तीति
प्रतीतिः सामानाधिकरण्येन प्रतीयमानत्वान्नो घटधर्मत्वस्यायोपपत्तेर्भावत्॥ यदैवं तर्हि घटोस्तीति सामानाधिकरण्यप्रतीतेर्भावोपि घट-
धर्मत्वाभावोपि भावस्याधारधर्मत्वे प्राप्ते येन सामानाधिकरण्याविरोधे भावस्यापि तद्धर्मत्वेपि न दविरोधोस्तित्युक्तं उभयधर्मत्वं तु
नो घटादिः स्वरूपव्यावर्त्तितं स्यात्। एतेनोभयधर्मताप्यसत्त्वस्य अन्तु कासत्त्वस्यापि तद्धर्मताप्रसंगात्। यदप्युक्तं भावरूपतायां सौ कृते-
त्यादि। तत्र किमिदं तत्त्वाभावरूपतायां सौ करणं नाम स्वरूपापहारः। एकान्तप्रतिषेधो वा। न तावत्स्वरूपापहारः सत्त्वासत्त्वयोस्तुल्य-
त्वेपान्योन्यस्वरूपापहारकत्वायोगात्॥ नाप्येकान्तप्रतिषेधः स्वपररूपाभ्यां भावाभावयोरेकत्राप्याश्रये सद्भावप्रतिपादनात्॥ यदा त्वन्तु-
कं शुक्लरूपपदार्थस्याविनत्वस्वसंवेद्यप्रतीत्या निश्चिन्न एवैकान्तेन तत्प्रयोगाभ्युपगमात्॥ नचैवं सर्वमनेकान्तात्मकमित्यभ्युपगमविरोधः॥ प्र-
माणविषयापेक्षया सर्वस्यानेकान्तात्मकत्वप्रतिज्ञानात्। नयगोचरापेक्षया त्वेकान्तात्मकस्याप्यभ्युपगमात्॥ अनेकान्तोप्यनेकान्तः प्रमाणनय-
साधनः इत्यभिधानात् धर्म्मिणोऽनेकरूपत्वं धर्म्माणां त्वेकरूपत्वमेव विवक्षितं॥ यदप्यभिहितं तदात्मकत्वे संज्ञाद्यविशेषेत्यादि। तदपि बत्ये-
रवमात्रं वस्तुनः सदसदाद्यनेकधर्म्मात्मकत्वे न प्रतीतौ संज्ञाद्यनुपपत्तेः यथा धर्म्मात्मकत्वेन प्रतीयते॥ न तथा तदात्मकत्वेन प्रतीयमान

१ त ख. पु नास्ति। २ निश्चित्येत ख. पु। ४ प्रत्येय ख. पु। ३ निश्चित ख. पु। ५ तत्संज्ञा ख. पु।

स्या·कु·चं· स्यस्थाणुपुरुषादयसदसदाद्यनेकधर्मात्मकत्वेन प्रतीयेत च सर्वे भावा इति॥ न चायमसिद्धो हेतुः सदात्मकत्वेन न प्रतीतेः अस्त्यनिपादि
१३२ तत्वात्॥ नापि दृष्टान्तः साध्यविकलः स्थाणुत्वादिधर्मप्रतीतेः स्वभावेपि स्या एवादो संशयापत्तेः ; न च प्रतीतानामेव तत्तनर्ई न विनावलितावप
१३२ तीतिः संशयो न च सदाद्यात्मकत्वेन प्रतीतिस्तथा न खलु वस्तुनः स्वपररूपाभ्यां सदसत्त्वप्रतिपादने निश्चयः कस्यचिदनुपहतनेत्रेन सो दोलायते॥
स्थाणुपञ्ज्ञायमानेपि संशयो प्रत्ययवत्प्रसाद्यते॥ नन्वेवं कस्यचिद् विशेषनिश्चयरूपस्य वस्त्वानवस्थानस्यात्॥ सर्वत्र तस्यापारम्पर्यमुपशक्यत्वात् यदा
पिहि घटादिरूपता किं निरंशा वयविरूपस्यत्तणिकपरमाणोर्त्मानो ज्ञानस्य च स्वभावस्य परमात्मस्वरूपस्य वा स्यादित्यादि संज्ञायसंभवा
त्प्रसिद्धेन॥ ततोपदार्थः प्रतिनियतरूपस्यानवस्थानिश्चयानानुपजायमानः संशयो वक्तादापाद्यः तन्नसदः सदात्मकोयं वस्तुनि संशयो युक्तः।
नापि विरोधः सत्वासत्वयोस्तत्र भिन्ननिमित्तबंधनत्वात्॥ ययोर्भिन्ननिमित्तबंधनत्वं न तयोरेकत्र धर्म्मिणि विरोधाय थैकत्वानेकत्वयोः
तद्भ्नत्वासत्वतयोर्वा भिन्ननिमित्तबंधनत्वान्नोकतधर्म्मिणि सत्वासत्वयोरिति॥ किंच विरोधः सर्वत्रानुपलंभसाध्यो भवति। यत्खलु
यत्रोपलब्धिलक्षणप्राप्तं सन्नोपलभ्यते॥ न तत्र विरुद्धं यथा तुरंगमोत्तमांगे शृंगं न च स्वरूपादिनावस्तुनि सत्वोपलंभे पररूपादिनासत्वस्या
नुपलंभो स्तीति न चोपलभ्यमानयोरप्युभयोर्विरोधाभ्युपगमे स्वस्वभावेनापि वस्तुनो विरोधानुषंगात्तन्निःस्वभावतापत्तिः स्यात्॥ यदि चैकत्र
विधिप्रतिषेधात्मकत्वं विरुध्यते॥ तदा कथमनुवृत्तव्यावृत्तप्रत्ययहेतुः शक्तिद्वयात्मकत्वं सामान्यविशेषस्य स्यात्॥ एकानेकस्वभावात्मकत्वमेचकस्य
वा कथं चैकस्य नरसिंहत्वमुभयत्वं वा स्यात्॥ अन्यं नरत्वमन्येदंपरत्वं त्रापि समानम्॥ उक्तंच॥ नरेवत्वस्यान्यनेदत्वचस्यान्नयाद्वनीनेक
वतत्कथं विज्ञा॥ दृष्टान्तान्वविरोधोपि॥ कथ्यते युक्तिशालिभिः॥ — — — विरोधोद्भिमयानुहेनमतेमतः॥१॥ हवतनेमेचकारोहिनीलपीता १३२
दिसंभवः॥ पंचवर्णयतोरत्नं॥ मेचकं परिकीर्तितं॥२॥ न नरः सिंहरूपत्वान्नसिंहो नररूपतः॥ शब्दविज्ञानकार्याणां भेदाज्जात्यंतरं हि तत्॥
॥३॥ न नरो नर एवेति न सिंहः सिंह एव वा॥ सामानाधिकरण्येन॥ नरसिंहः प्रकीर्तितः॥४॥ दृष्यान्यस्मादभिन्नात्मा ख्यात्वा स्यात्स्वपरस्वरूपं॥

मज्जंति निमज्जंति॥ जलकल्लोलवत्॥५॥ इति किंच विरोधोऽविकलकारणस्यैकस्य भवतो द्वितीयसन्निधानेऽभावाद्गम्यते शी
तोष्णवत्॥ न हि सत्त्वसन्निधाने सत्त्वस्य तत्सन्निधाने वासत्त्वस्याभावः कदाचिदप्यनुभूयते॥ अपि चानयोर्विरोधः सहानवस्थानलक्षणः।
परस्परपरिहारस्थितिस्वभावो वाध्यघातकस्वरूपो वा स्यात्। न तावत्सहानवस्थानलक्षणोऽन्योन्याव्यवच्छेदेनैकस्मिन्नाधारे सत्त्वासत्त्व
योः प्रतीयमानत्वात्। यथा तथा प्रतीयमानत्वं न तयोस्तथाविरोधो यथा रूपरसयोस्तथा प्रतीयमानत्वं च सत्त्वासत्त्वयोरिति॥ परस्पर
परिहारस्थितिलक्षणस्तु विरोधः सहैकाम्रफलादौ रूपरसयोरिवानयोः संभवतोरेव स्यात्। न पुनरसंभवतोः शशाश्वविषाणवत्। संभ
वतः संभवतोर्वंध्यास्तनंधययोरिव किं वायं विरोधो धर्मयोर्धर्मिधर्मिणोर्वा। प्रथमपक्षे सिद्धसाधनमेव लक्षणत्वाद्धर्मिणां न
चैवंविधविरोधाक्रांतानां तेषामेकाधिकरणत्वविरोधस्तथाविधानामप्येषां तदधिकरणतया प्रतीतेर्मातुलिंगे रूपादिवत्॥ धर्मधर्मि
णोस्तु विरोधे धर्मिणि धर्माणां प्रतीतिरेव न स्यात्॥ न चैवमबाधबोधाधिरूढप्रतिभासत्वात्तेषां वध्यघातकरूपो विरोधः फणिनकु
लयोरिव बलवदबलवतोः प्रतीतः सत्त्वासत्त्वयोस्तु समबलत्वान्नाशंकनीयः। अस्तु वा कश्चिद्विरोधस्तथाप्यसौ सर्वथा कथंचिद्वा स्यात्॥ न ता
वत्सर्वथा शीतोष्णस्पर्शयोरपि सत्त्वादिस्वरूपाव्यवच्छेदतः तद्रूपतया विरोधासिद्धेः। यद्रूपस्वरूपाव्यवच्छेदकं तेन तद्रूपतयोर्वि
रुद्धं यथा परस्परादिसत्त्वादिस्वरूपाव्यवच्छेदकाश्च शीतोष्णस्पर्शादय इत्येकाधारतया प्रतीयमानत्वादपरेकाधारतया प्रतीयेत॥ न त
त्तथाविरुद्धं यथा रूपरसादि एकतुलायां नामोन्नामादिवा एकाधारतया प्रतीयते च स्पर्शादिस्वभावाः शीतोष्णस्पर्शादय इति॥ कथंचिद्विरोधस्तु
स्वरूपादावपि समानः स्वैकसदसद्रूपतावद्रूपादिस्वभावतायामपि न स्यात्॥ न चैतत्सुकं प्रतीतिविरोधात्॥ किंच भावेभ्यो भिन्नोऽभिन्नो वा विरो
धो भिन्नो वा। यद्यभिन्नः कथं विरोधको नाम स्यात्स्वाभूतत्वात्स्वरूपवत्॥ अथाभिन्नस्तथापि न विरोधकस्तर्ह्यर्थान्तरवत्॥ अथार्था
न्तरभूतोऽपि विरोधो विरोधको भावानां विशेषणत्वान्न त्वर्थान्तरं विपर्ययात्॥ तदयुक्तं। विरोधो हि तुच्छरूपो भावः समर्थितो द्रव्ययोर्विं

न्या·कु·चं· शेषणं धर्म्मिणोरदर्शनापत्तेः। अन्यतरविशेषणत्वे न देवदत्तयज्ञदत्तवद्विरोधि स्याद्घटस्यासौ विशेषणं नान्यत्र तु चैकत्रविरोधेनामासमवस्थितत्वात्॥
अन्यथा सर्वत्र सर्वदा तत्प्रसंगः। अथ विरुध्यमानत्वं विरोधकत्वापेक्षया कर्तृकर्मस्थो विरोधो विरोधसामान्यापेक्षयोभयविशेषणत्वादुक्तोभिधीय
ते। तन्न स्वरूपेणैव विरोधकत्वापत्तिसामान्यस्यापि सिद्धिप्रसंगात्त्वाविशेषात्॥ तथा च विरोधकल्पना वैयर्थ्यं भावस्वभावत्वेनास्य सामान्यविशेषभावा
नुपपत्तिः गुणादिरूपत्वे गुणादिविशेषणत्वानुपपत्तिः स्याद्विषयपदार्थस्यापि विरोधो नैकस्याविरोधविरोधकत्वं यदि विशेषप्रसिद्धः समाश्रीयते॥ न
चाप्यस्य संबद्धस्य द्रव्यादेर्विशेषणत्वं स्यात्संबंधस्य चानन्तावस्थसंबद्धस्यानिष्टप्रसंगात्। दंडेनेत्यादिप्रतीतेः न खलु पुरुषेणासंबद्धो दंडस्तस्य विशेष
णं प्रतीतो येनाचापि तथाभावः स्यात्। अथ संबद्धः किं संयोगेन समवायेन विशेषणभावेन वा न तावत्संयोगेनास्याद्रव्यत्वेन संयोगानाश्रयत्वा
त्। नापि विशेषणभावेनासंबद्धान्तरेणासंबद्धत्वनिष्टस्यानवस्थाप्रसंगात् अन्यथा रज्जुरूपादेः संयोगादिसंबंधाभावेपि तत्स्यादिति संयोगादिसंबंधकल्प
नापार्थका तत्त्वतो विरोधस्य विद्यार्थमारात्स्यानुपपद्यमानत्वात् सत्त्वासत्त्वयोर्धर्मिणः नापि वैयधिकरण्यमेकाधारतयाऽनिर्बाधबोधे तयोः प्रतिभास
मानत्वात्॥ नाप्युभयदोषानुषंगः चौरपारदारिकत्वाभ्यामिवैकस्य तादात्म्यकत्वात् जात्यन्तरत्वात्। न खलु सत्त्वमेवासत्त्वमसत्त्वमेव सत्त्वं येन भे
दयोर्वान्योन्यनिरपेक्षयोरेकत्वे येनायं दोषः स्यात्॥ तत्सापेक्षयोरेव तयोरभ्युपगमात्तथाप्रतीतेः। नापि संकरव्यतिक
रौ स्वस्वरूपेणैवार्थे तयोः प्रतीयमानत्वात्॥ नाप्यनवस्था धर्म्मिणामपरधर्म्मासंभवात्॥ धर्म्मिणोपेक्षयाऽनेकत्वेन धर्म्मिणां कथंचिन्नानेकत्वेनाभिधानात्।
अभावदोषस्तु दूरोत्सारित एवैकांतानेकांतपक्षयोरभ्युपगमे एकत्र नित्यसंभवात्। सुलक्षेन क्रमिधर्म्मापेक्षया तु क्रमानेकांतोत्तरत्र अनेकांता
त्मकोर्थस्याध्यक्षादिप्रमाणतः प्रसिद्धेः। यदप्युक्तं मुक्तोपमुक्तमुक्तरूपस्यादि न दृष्पनत्वं न मोक्षविलसितं। यतो हि द्विविधोस्तु अनेकांतो क्रमानेकांतः क्रमाक्रमानेकांतः १३३
कांतश्चेत्य तत्रानुसुखादेरेकाक्रमिधर्म्मापेक्षया क्रमानेकांतो युगपद्ध्येकचात्मनि संभवात्॥ सुलक्षेन क्रमिधर्म्मापेक्षया तु क्रमानेकांतो यु
गपदेवतत्संभवात्॥ तथा च॥ य एवात्मा पूर्वं बद्धः स मुक्तः स एवोत्तरकालं मुक्त इति न किंचिद्विरुद्धमनेकांतत्वेतिविरोधस्य उपेता। एकरूपत्वे चात्मनो बंधमो

स्वभावोऽवस्थस्य हि तुच्छत्वं न च स सर्वथैकरूपः स्यात् स्याद्वादप्रयोगोपुनको विरोधात्॥ न चैवमेकान्तदुराग्रहग्रस्ताभिनिवेशं परित्यज्यतनो निष्प्रकार
त्रिपरारूढमनेकान्तात्मकत्वं वस्तुनोऽभ्युपगंतव्यं॥ ततः स्थितमेतद्द्रव्यपर्यायात्मा वितदेवं नित्यत्वैकान्तलक्षणाख्यगोचरस्यवमस्त्वयात्मने
नात्मसमर्पणाभावात् स्वस्मात्कारणं संभवति॥ न केवलमित्यादिनाचेव दूषणांतरमिति निदिशन्नाह। न केवलं साक्षात्कारणमप्यतीकर
णमेकान्तेऽनित्यत्वैकान्ते नित्यत्वैकान्ते च न संभवति॥ श्लोकः॥ अर्थक्रिया न युज्येत नित्यक्षणिकपक्षयोः॥ क्रमाक्रमाभ्यां भावानां सा लक्षण
तया मता॥ ५॥ अर्थस्य ज्ञानस्यान्यस्य वा क्रियायाः संबंधात्संभवापोरस्पृशतीति सिद्धत्वात्॥ न च क्षणेणानित्यस्य कार्यकारित्वं घटते॥ नापि यौ
गपद्येनैकस्मिन्नेव क्षणे सकलकार्योत्पत्तिः प्रसंगतो॥ इतीयादि क्षणेन स्यात्कार्यकारित्वसाधनार्थक्रियाकारित्वेनाकारकत्वेऽपि वदसत्त्वप्रसंगः
अतः सर्वथानित्यस्य वस्तुनः क्रमाक्रमाभ्यामर्थक्रियाकारित्वासंभवार्यानित्यस्य वस्तुनः क्रमाक्रमाभ्यामर्थक्रियाकारित्वासंभवात्सर्वथा नित्यमात्मस्य
मारएवारिकं वासौ नित्यं किं वा समर्थं वा तत्कारित्वस्वभावेन नाः कदाचिद्दोषः यमपदेत् सर्वदैवानः सकलकार्याणामुत्पत्तिः स्यात्॥ सदैवं तेषाम विकल
कारणत्वात् यदविकलकारणं भवनं तेषामनिमन्यसिद्धं यथा समानसमयोस्पावीजावस्थायां अंकुरः अविकलकारणानि च सर्वदा कार्याकारित्वस्वभा
वनित्यार्थः कार्याणि तथाभिमतानामखिलकार्याणीति॥ अथ कदाचिन्निर्दिष्टं वै कार्यं स्याद् न समर्थस्वभावं स तत्र स्यात् समर्थस्वभावं भवतीत्यापा
तं न कापि तदुत्पत्तिसमायेनत्वसमर्थस्वभावं तु तस्य जातिः॥ न वा पदेरित्यजनि नहि सर्वदा कार्योत्पादकत्वप्रसंगः॥ पतत्खलु यद्द्वस्थान्तरेऽपरि
त्यक्तासमर्थस्वभावं च सर्वमिवतदुत्पत्तिसमयेऽनित्याभिमतं वस्त्विति॥ अथ तस्य जातिमन्यनित्यैकरूपत्वनपात स्वभावे न न तदुत्पादनासमर्थस्वभा
वपरित्यागासंभवात्॥ नत्वं भवेद्वास्यनित्यैकरूपतावधानोपगमस्थिरैककरूपस्वभावं न न तदेकरूपं यथा तुल्यादिपरित्यक्तरूपा तत्समर्थस्वभावं
चानित्यैकरूपं तथाभिमतं वस्त्विति॥ अथवा कथं तस्य नित्यैकरूपतावापीणाभिवस्थैवोपपत्तेः असमर्थस्वभावपरित्यागेन समर्थस्वभाव
भरित्यागे च समर्थस्वभावस्वीकारस्यतदन्तरेणानुपपत्तेः॥ न खलु नित्यैकरूपवस्तुनि पूर्वापररूपत्यागोपादाने घटेते, यत्वस्पर्शीयरूपत्वमोमा

न्या॰कु॰चं॰ सानेपक्षेने यत्र्चर्वीपररूपत्यागोपादानेन लक्षणमिति यथा॥ कुंडलेन यावस्थाकोऽङ्गीकृतं सर्प्पादिसामर्थ्येन लक्षणान्तरीयपररूपत्यागो

१२७ पादानेनत्स्यनित्यत्वमपाभिमतेनेवस्तुनीति॥ नित्यैकरूपोऽप्यर्थः सहकारिसहितः कार्य्यं करोति॥ नसर्व्वदैवेत्यभिदधिनापिपरिणामित्वमेवसमर्थित

मसाहित्यरूपत्यागेन साहित्यरूपोपादानादिति क्रमेण युगपद्वानेकधर्म्मात्मकस्यैववार्थस्यार्थक्रियाकारित्वं प्रतिपन्नं। प्रत्येकं चात्मादिनित्य

द्रव्याणां कृतेष्वपरिणामित्वे एवमर्थक्रियाकारित्वाभावो दुष्परः। यथा चैषां तथाभूतानां तत्कारित्वं न घटते॥ तथा च परार्थपरीक्षायां प्रकृ

ति परीक्षायां च विस्तरतः प्रतिपादितं तन्न नित्यस्य वस्तुनः क्रमयौगपद्याभ्यामर्थक्रियाकारित्वं घटते॥ कू॥ नापि क्षणिकस्य पूर्व्वापरस्वभावत्या-

गोपादानविकलत्वात् सकृदनेकशक्तिरहितत्वाच्च॥ यच्च तथाविधं न तत् क्रमयौगपद्याभ्यामर्थक्रियाकारि भवति। यथा खरविषाणमेकक्षण

स्थायि तथा निरंशतया च पूर्व्वापरस्वभावत्यागोपादानविकलं सकृदनेकशक्तिरहितं च परपरिकल्पितमेकान्तक्षणिकं वस्त्विति प्रतिविहितं च सं

तानपतिषेधावसरे सर्व्वथा क्षणिकस्यार्थक्रियाकारित्वं प्रतिषेत्स्यते॥ चार्थक्रियेव प्रमाणनिर्व्वाप्रमेयस्य वस्त्वार्थी भवति॥ न च क्षणिकत्वे किंचित्प्र-

माणमस्ति। ननु इदमस्ति यत्सत्तत्सर्व्वं क्षणिकं यथा घटः सन्तश्च भावा इति सत्त्वं स्वार्थक्रियाया कारित्वमित्यर्थः स च क्रमयौगपद्याभ्यां व्याप्तः सा च

क्षणिकत्वेन संभवति॥ न ह्यक्षणिकयोः क्रमयौगपद्ययोः संभवान्तरसंभवव्याप्यस्य सर्व्वदैकरूपत्वादतो र्थक्रियाप्यनेन सदैवकर्तव्या॥ न वा कदाचित्

विशेषात् क्रमेणास्यार्थक्रियाकारित्वसंभवेद्वा किं येन रूपेणैककार्यं करोति तेनैवापरं रूपान्तरेण वाते नैव चेत् हि द्वितीयक्षणकसाध्यकार्यस्य

प्रथमक्षणेनैवोत्पादप्रसंगतदुत्पादकस्य रूपस्य प्रागपि भावात्॥ रूपान्तरेण चेत्तर्हि पूर्व्वरूपस्यानिवृत्तत्वात् क्षणिकत्वं यत् क्रमवत्सह १२७

कारिसंनिधिमपेक्ष्य नित्यं तत्कार्यं करोति। ननु ते सहकारिणस्तस्योपकारं कुर्व्वन्ति न वा कुर्व्वन्ति चेत् किं तनो व्यतिरिक्तमव्यतिरिक्तं वा प्रथमपक्षे ऽतिरिक्तं

मरानदेवकुर्व्वतीत्यायातं तस्य चरद्धमेवनिष्पन्नं किंचित्सहकारिभिः क्रियते व्यपगत्यतिरिक्तं तदानस्यतिव्यपदेशाभावो। संबंधात्संबंधांतरकल्प

नेवानवस्थानं च क्रमेणाक्षणिकः कार्य्यमारभेत॥ नापि युगपदेकदैवाखिलकार्योत्पादकस्वभावतया प्रथमक्षणएवाखिलकार्योत्पादे

रूपाणां न रेतत्स्वाद्यकार्याभावतो नार्थक्रियाकारित्वेनाश्वविषाणवदसत्त्वप्रसंगात्॥ किं चेत्यादिना बोधकार्यग्रामस्य किमयासौ स्वभावो नि
वर्त्तते न वा यदि निवर्त्तते न तदा प्रथमक्षणवत् द्वितीयादिक्षणेपि न तत्स्वभावानिवृत्तेः। अन्नस्य मत्तसोन्माथमोदनस्यापि उत्पादनप्रसंगात्पि
ष्टपेक्षणानुषंगः निवर्त्तते। चेत हिं निवृत्तेनातस्यापि निवर्त्तितत्स्वभावत्वेनाभिन्नत्वादतः कथमस्याक्षणिकत्वं। तस्मात्ततोभेदेवात्मस्येति व्यपदेशा
नुपपत्तिः संबंधाभावात् तद्धावेमानवस्थानस्याप्यपरसंबंधपरिकल्पनप्रसंगात्। किं च कार्यैत्पादनसमयेषेषांप्राक्तनाकारस्वभावस्यागतिं नवा।
नास्ति चेत् पूर्ववत्तदाप्यतः कार्याणुत्पादप्रसंगोस्ति चेत् क्षणिकत्वं क्षणिकत्वं पूर्वस्वभावविनाशेनोत्पन्नपरस्मादेन चान्यत्वात्। प्रयोगोयं कृत्वा
कुर्वन्ति कार्यं ते प्रतिक्षणमेकरूपा यथा वीजादयो क्रमेणाकुर्वन्ति च नित्यत्वेनाभिमताः पदार्थाः कार्याणीति तथा चैषां कृतकत्वप्रसिद्धेस्ततोपि
क्षणिकत्वसिद्धं॥ न चाक्षिप्तकृतकत्वं तत्स्वरूपे किंचयथा विद्युत्प्रदीपादिकृतकाद्यविवादापन्नाः पदार्था इति हेनो हेत्वप्रमाणत्वं हि कृतकत्वं न च वि
नश्वरस्वभावनियमेन स्वहेतुतस्ततो हि भावाः समुत्पद्यमाना विनाशस्वभावनियता एवोत्पद्यंते तेन विनाशं प्रति कृतकत्वयोरिति कृतकत्वानित्यत्वयोस्ता
दात्म्यसिद्धिः॥ न च हेतुसामर्थ्यभेदवत्वाद्विशेषेपि केचिन्नित्याः केचिदनित्यास्वभावा भविष्यंतीति नानयोस्तादात्म्यसिद्धिरित्यभिधानव्यं॥ कारणसा
मर्थ्याभेदात्पावकादिवत्॥ न खलु पावकोत्पादककारणकलापः कश्चित्प्रकाशोष्णस्पर्शसहितं पावकमुत्पादयति कः कश्चिन्नहि विपरीतमिति तत्सा
मर्थ्यभेदः प्रतीतिगोचरे येना नानित्यानित्यस्वभावभावोत्पादकत्वेन कारणानां सामर्थ्यभेदः कल्पेत॥ यतो भावा भावाः प्रादुर्भवन्त एव विना
शस्वभावमेवाविर्भवयंतीति सिद्धं कृतकत्वानित्यत्वयोस्तादात्म्यं। ननु विनश्वरस्वभावत्वेप्यर्थानामनेकक्षणस्थायित्वेन विनाशो यदेव स्तिहेतुप्र
निपातस्तदैवासौ भवितव्यमितिनु त्यप्यपुक्तं नश्वरस्यापि प्रति क्षणमनाशो कालांतरेप्यविशेषतो नाशानुपपत्तेः, न हि प्रकाशानांतानस्वांवापुनः कालां
तरेप्रकाशना दृष्टा। अने चार्थानां नाशोपलंभान्नाशितेन प्रकाशस्य प्रकाशकत्वमस्ति देः स्वरूपमात्राविशेषाद्विनाशो विलंबेनादावप्यविशेषात्। किं
च ज्ञान सहस्रक्षणस्थितिस्वभावो भावः प्रथमक्षणे जातो द्वितीयादिक्षणेष्वपि वासेन वा यद्यास्ते तदा त्यक्षणेप्यस्त न वैवास्तित्वप्रसंगान्न कदाचि

न्या·कु·चं·

१२५ न्नाशोत्पत्तिः स्यात्॥ नन्वतत्स्वभावस्यापेक्षितमिदं क्षणिकत्वं प्रतिक्षणं स्वभावभेदलक्षणत्वात्तस्य किं वा क्षणिकत्वं नामार्थस्यानेकक्षणस्थायिनो प्र
त्यनेकक्षणयोगत्वं चास्यानेककालक्षणप्रतिपत्तेरुपलब्धं॥ न च वर्तमानार्थेन्द्रियसंबंधसामर्थ्यप्रभवं प्रत्यक्षं वर्तमानकालसंबंधमात्रव्यतिरे
केणार्थस्यानेककालक्षणव्यापित्वं प्रतिपत्तुं समर्थं॥ यदि हि स्थानेककालक्षणैः सह स्वरूपेणार्थस्य संबंधः स्यात्तदा तत्सामर्थ्यप्रभवमपि
प्रत्यक्षं तस्य तद्व्यापित्वं प्रतिपद्येत न त्वेवं तोऽसत्त्वं संभवति॥ पूर्वापरकालक्षणानां क्रमभावित्वान्नापि स्मरणात्प्रत्यभिज्ञानाद्वा तत्प्रतिपत्तिस्त
स्याप्रमाणत्वात्प्रागुक्तं॥ विनाशहेतूपनिपातसंभविष्यतीति तत्र विनाशहेतुर्विनश्वरं भावं नाशयत्यविनश्वरं वा तत्र नश्वरस्य विनाशे हे
तुरुपनिपातेऽपि नाशानुपपत्तिर्न हि स्वभावो भावानामन्यथाकर्तुं पार्यते॥ नश्वरस्य च नाशे न हेतूनां वैयर्थ्यं स हि स्वकारणेभ्य एवायातस्वभाव-
स्वार्थस्य तदर्थो व्यापारः फलवान्न च वस्तु पररूपस्य संगात्किं च स्वभावान्नाभिन्नो नाशो नाशहेतुस्तस्माद्भिन्नो वा यदि अभिन्नस्तदा भावव
दवहेतुभिः कृतः स्यात्तस्य च स्वहेतोरेवोत्पत्तेः कृतस्य च कारणयोगानैरर्थक्यं तद्धेतुवैयर्थ्यं कारणभेदानुपपत्तिश्च॥ अथ भिन्नस्तदा सो भावस्य
कालभावेऽपि तदुत्तरकालभावो वा स्यात्तत्र तत्सहभावित्वे युगपद्भावाभावयोरुपलंभः स्यादविरोधात् विरोधे वाभावेन कोऽपि लक्षणविनष्टस्योपलंभः स्या
दर्थक्रियाकारित्वं च न स्यात्प्राक्कालभावित्वे भावस्यैवाभावात्कस्यासौ स्यात्॥ स नो हि विनाशोऽनर्थस्य सत्ताकस्य च विनाश इति महच्चित्रं॥ तदुत्त
रकालभावित्वे पटादेः किमायातं येनासौ स्वोपलंभादिलक्षणामर्थक्रियां न कुर्यान्न हि नित्यादिभ्यः समुत्पन्ने पटे घटस्तां कुर्वन्केनापि दृष्टो निवेद्धुं
शक्यः॥ ननु घटस्याविरोधित्वान्न तदुत्पत्तौ परस्य स्वार्थक्रियाकारित्वाभावो भावस्य तत्तु न हि पर्यायात्तस्याप्याकिमिदं विरोधित्वं नाम नाशक
त्वं नाशरूपत्वं वा न चैव हि मुद्गरादिवन्नाशोऽस्यादहारेणानेन पटादिरुन्मूलयितव्यो नाशांतरेऽपि चायमेव पर्यनुयोग इत्यनवस्था नाशरूपत्वे १२५
न्नानुरूपमर्थांतरभूतोऽयं तस्य नाशोऽन्यथा पटो घटस्य नाशः स्यात्॥ विरोधित्वाविशेषात्क्रियाप्रसंगश्चार्थांतरत्वाविशेषात्कथं घटस्यैवासौ स्या
दविशेषादन्यथाप्यपि कस्मात् नोच्यते न चैवं नसंबंधस्तस्य भविष्यतीत्यभिधातव्यं भेदाविशेषातः संबंधस्यापि सर्वत्र प्रसंगात्स्वपक्ष

ण्टादिनापदादेः प्राक्तनरूपविकलरूपांतरंभंगुरत्वात्प्रविधीयते॥ तेनासौ न स्वरूपच्युते। नन्विकं स्यात्स्वनिवृत्ते नैव रूपेणावस्थितस्यास्य वि-
धीयते॥ विनश्वरस्वभावत्वात्तेनैव रूपेणावस्थितस्य विशेषान्न रूपांतरं युक्तं। न खलु तस्यैवतायां नीलरूपता पीतरूपता कर्तुं शक्या विनश्वरस्व-
भावत्वात्क्षणरूपांतरेऽसतिः शशविषाणवत्तु चक्रकप्रसंगश्च घटादेर्विनश्वरत्वे सति रूपांतरेऽन्यतिः सत्यां स्वतत्त्वाविनाशसंबंधः सतितस्मिन्
विनश्वरत्वमिति नित्य प्रसज्यप्रतिषेधात्मनो भावस्य कार्ययुग्मीधार्यैतावत्स्वरूपतापनेर्वस्तुनो हि कारणसामग्रीतो भावोर्थक्रियाकारित्वं च (क्रियाकारित्वं)
स्वरूपं। अभावोपि चेत्तत उत्पद्येत परोन्मूलनलक्षणां चार्थक्रियां कुर्यात्तदा को स्यात्तो विशेषः स्यात्॥ नु कस्य स्वरूपस्य चाभावस्याभावनिरूपका-
रणप्रकरणे विशेषतो निराकरिष्यमाणत्वात् अलमिहातिप्रसंगेन। पर्युदासप्रतिषेधे तु घटादेरन्यः कपालादिस्तेन रभावत्वस्य हेतुकत्वं केन
प्रतिषिद्धं। मुद्गरादीनां विसदृशसंतानोत्पत्तौ व्यापारस्याभिरभ्युपगमात्॥ घटादयस्तु स्वोत्पत्तिक्षणानंतरमस्थानशीलाः स्वकारणादेव संजा-
ताः क्षणान्तरमनुवर्तंते॥ ततः सिद्धं यो यद्भावं प्रत्यन्यानपेक्षः स तत्स्वभावनियतो यथांत्या कारणसामग्री स्वकार्योत्पादनं प्रति। विनाशं प्रत्यन्या-
नपेक्षाश्च सर्वे भावा इत्यतोऽप्यनुमानादुदयानंतरमस्थायित्वं भावानां तथा यथावभासते॥ तत्तथैव सदित्यभ्युपगंतव्यं॥ यथा नीलकु-
वलयं नीलतयाभासमानं तेनैव रूपेण सत् लक्षणपरिगतेनैव रूपेणावभासंते च सर्वे भावा इत्यनुमानतोपि वर्तमानग्रहणं हि रूपेण क्षणग्रह-
णमुच्यते॥ न चास्ति अन्यदेतन्न हि पूर्वापरकालपरिगतेनात्मभावाः प्रमस्तद्दिनाग्रहीतुं शक्यं तं रस्तु कं भाविनि॥ रूढ॥ अत्र प्रतिविधीयते न य-
तावदुक्तं यत्सदित्यादि तत्र किमिदं सत्त्वं नाम सत्तासंबंधः प्रमाणविषयत्वमर्थक्रियाकारित्वं वा॥ प्रथमपक्षे भागासिद्धत्वं सत्तासंबंधस्य सा-
मान्यादिष्वसंभवात्॥ अपसिद्धांतश्च तत्स्वरूपसत्त्वस्य सौगतैरनभ्युपगमात् प्रमाणविषयत्वमपि प्रतिपदार्थं भिद्यते॥ न वा यदि भिद्य-
ते तदार्थस्वरूपवद्भिन्नस्वरूपत्वान्नैकप्रत्ययविषयमतो नान्वयहेतुत्वं स्यात्॥ अथ न भिद्यते तदा यतीयते न चाद्य दिन प्रतीयते कथमस्ति-
प्रतीयते॥ चेन्नहि नानात्मतेरणसत्त्वेवाक्कास्यात्॥ तत्संबंधे चोक्तदोषानुषंगः प्रमाणविषयत्वस्य च तदंतरेणाप्रसत्ते नवस्थासत्वतः सत्त्वे तथा नाः

१ तदा हि भिन्नस्वरूपत्वान्नैकप्रत्ययविषयमतो नान्वयात् हेतुत्वं स्यात्। (...)

न्या·कु·वं· मपिसत्त्वं तदस्तु किं नस्तल्लक्षणकल्पनया विरुद्धं चेदं प्रमाणविषयत्वलक्षणं हि सत्त्वं क्षणिकस्य मलक्षणस्तु विपर्यये प्रसिद्धं ॥ तथा क्षणिकत्वमेव
१२६ मसाधयतो नित्यस्यार्थक्रियाकारित्वलक्षणमपि सत्त्वमसिद्धं विरुद्धं नैकान्तिकं कालात्ययापदिष्टत्वदोषदुष्टं न [illegible] नायात्वं तथासिद्ध
१२६ त्वं भवतार्थक्रियाकारित्वं ह्यर्थक्रियाहेतुत्वमुच्यते ॥ तथा सत्यामर्थक्रियायां दुरवबोधं न हि भावानां नानाविधशक्तियुक्तानां दर्शनमात्रा
देव तत्तत्कार्यकारणशक्तियुक्तत्वं ग्रहीतुं शक्यं योग्यता क्षणिकत्वे गृहीतेऽपि वस्तुसद्भावे तत्राकृतेन निश्चेतुमिति भवद्भिरेवाभ्युपगमात् । ननु
संभावनामात्रेणात्रार्थक्रियाकारित्वमवगम्यते ॥ संभव[illegible]त्वमितीति ॥ ननु संभावनापि तत्केनापि स्वभावेन भवति मानात्तज्जातीयस्या
र्थक्रियायां दृष्टायामिति चेत् ॥ तत्रापि तुल्यः पर्यनुयोगः तस्यापि तत्तज्जातीयार्थक्रिया[illegible]त्वकारित्वावगमेन च क्षणिकः भवद्दर्शने चार्थानामत्यन्तभेदात्तस-
जातीयत्वावगतिरपि दुर्लभा ॥ इत्युक्तं सामान्यपरीक्षाप्रघट्टके नार्थक्रियाकारित्वमसिद्धमेव च विरुद्धं च क्षणिकस्यार्थक्रमाक्रमाभ्यां तत्कारित्वस्यायु
क्तत्वात् ॥ नहि क्षणिकोऽर्थः क्रमेणार्थक्रियां कर्तुं क्षमो देशकालस्वभावकृतक्रमासंभवात् । एक एव हि पदार्थः किंचित्कार्यं विधाय पुनरपेक्षितसह
कारिसंनिधेरुत्तानसामर्थ्यो निरोदेशकालभेदेन कार्यान्तरं कुर्वाणः क्रमेण करोतीति युक्तं ॥ क्षणमात्रस्थायित्वे चार्थस्यैवंविधं क्रमकारित्वम
युक्तं निरंशत्वेन युगपदनेकशक्त्यात्मकत्वाभावतस्तस्यानेककार्याणां युगपत्करणमप्यतिदुर्लभं स्वतन्त्रसंतानभङ्गावसरे प्रपञ्चितं ॥ तथा नोऽर्थ-
क्रियाव्यापकयोः क्रमयौगपद्ययोः क्षणिके विरोधानुपलम्भयोगपद्याभ्यामर्थक्रियाकारित्वं क्षणिकमेवेति सिद्धमस्य विरुद्धत्वं ॥ नैकान्तिकत्वं चाक्ष
णिकेष्वर्थेन तत्सहकारिसंनिधानेन क्रमाक्रमाभ्यामर्थक्रियाकारित्वोपपत्तेः यदुक्तं ॥ सहकारिणस्तस्योपकारं कुर्वन्ति नवेत्यादि न दसदुपकार
काणामेव सहकारित्वाभ्युपगमाद्धेतोऽन्यसंनिधानेन तेषामतिशयोत्पत्तेः ॥ न च तदसंजातातिशयानां पूर्वमुत्तरं वा विशेषात् कार्यजनकत्वं युक्तं ॥ धर्मध १२६
र्मिणं तथा चोपकारकतद्धतो भेदेन कर्मभेदेन तस्यैव जनकत्वान्तद्धतोऽजनकत्वाभ्युपगमं न भेदासिद्धेर्धर्मधर्मिणोर्याहि तयोर्भेदोऽवाकुविवेचनत्वे न चाभे
देऽपि हि तद्द्वारेणान्यपोपदर्थमेवकस्मिन् सतस्यैवाधाराको उदेशर्थग्राहकत्वाभावप्रसंगात्तत्कारस्यैवार्थग्राहकत्वानुषंगात् ॥ ननु यन्न्येकं नेषां

सामर्थ्ये किमन्यापेक्षयेत्युपपन्नं यावतां सद्भावे कार्यमुपलभ्यते॥ अभावे चानोपलभ्यते तेनावनेनां न च कारणत्वावधारणात्कारणानां सामग्री-
ष्यौ सामर्थ्ययोः कार्यभावाभावेनैवैकत्वात्मकं पंचैत्यं क्षणिकस्याधिक्रियाकारित्वं घटते॥ स हि सहकारिसापेक्षो निरपेक्षो वा तत्र सामर्थ्ये यदि
निरपेक्षः सर्हि कुशूलस्थोपि बीजक्षणोंकुरं जनयेत्॥ अथ पश्चाद्वृद्धिस्यादिरूपापरंपरस्यादिनातिशयोत्पत्त एव बीजक्षणस्तज्जनकत्व-
मिति सहकारिसापेक्षस्यापि जनकत्वं तद्वन्नित्यस्याप्यस्त्वविशेषात्॥ अथ स्वोत्पन्नानेवासौ सहकारिणोपेक्षते॥ स्वकार्ये तत्स्वोत्पत्तेरन्यत्र न
यां कार्यतानन्तेस्तेरप्यनापेक्षैः स्वकार्ये भावितव्यं एवमन्यैरपि रनिकुशूलस्थस्यापि बीजस्याकुरजनकत्वप्रसंगः॥ भूतिरूपस्य स्वशक्तित्व-
स्वनिरपेक्षत्वेनोत्पादप्रसंगात्सकलसंतानोच्छेदः स्यात्॥ कारणोविनष्टे कार्यस्योत्पत्तिरस्तु चेदिति चेत्॥ ननु चैवं कथं न ज्ञ स्वकारणं स्यात्।
यत्सद्भावे यन्नोत्पद्यते तस्य न तत्कारणत्वायोगात् तस्मात्तत्सहकारिसंनिधाने कारणं न तत्कार्यं करोतीति पे रुद्धैः प्रतिपत्तव्यं॥ यदुदितो
परूपसाध्यकार्यस्य प्रथमरूपेणैवोत्पादः स्यादित्याद्युक्तं तदप्ययुक्तं सामग्रीभेदात्। न हि द्वितीयरूपादिसामग्री प्रथमरूपसाम-
ग्री भवति। एकस्वभावेन च कार्यकारित्वमसिद्धं कारणस्वभावभेदमन्तरेण कार्याणां भेदासंभवात्॥ नैवं प्रतिनिस्वभावं तद्भूतो भेदप्रसंगात्क्षणिकत्वं स्यादि-
त्यभिधातव्यं॥ वस्तुतस्त्वेकस्यानेकस्वभावात्मकत्वे विरोधासंभवात्॥ न च विरुद्धधर्माध्यास एवैकस्यानेकस्वभावात्मकत्वं विरुणद्धि तत्रो विरोधानुपलंभसाध्यो।
न चैकस्मिन्नानैकात्म्यकत्वानुपलंभोस्ति चित्रज्ञानस्यैकस्याप्यनेकात्मकत्वोपलंभात्॥ सहकारितत्स्वभावेनैवैकस्यापि रूपस्यानेकस्वभावत्वाविभावनात्॥
न हि रूपं येनैव स्वभावेन स्वचक्षुः रूपं जनयति। तेनैव सह रूपालोकस्यापि रूपत्वप्रसंगाद्रूपस्य वा रसत्वानुषंगात्। स्वभावान्तरेण तु जनने चेत्सिद्धं विरुद्धधर्माध्या-
सेप्येकस्यानेकस्वभावात्मकत्वं॥ अपेक्ष्यमाणाभेदात्तन्न विरोधोऽक्षणिकस्याप्यत एव सोप्युक्तप्रसंगपर्येकस्यानेकस्वभावत्वाविरोधः क्रमेणापि न दविरोधो
स्त्वविच्छिन्नप्रतीतेरविरोधात्। तथा चाथ हेतुः कालात्ययापदिष्टः क्षणिकपक्षस्य प्रत्यक्षबाधितत्वात्॥ अश्रावणः शब्द इति पक्षवत्॥ अनिमेषलोचनोत्प-
न्नानाम क्षणिकत्वमेव प्रतिपद्यते॥ न चानेनापि क्षणस्यानुभूयते॥ पूर्वापररूपविवेकाभाव तस्य चाक्षणिकत्वप्रतीतिरित्यभिधानव्यं॥ तस्यानुभव

न्या·कु·चं· विच्छेदानुपलक्षणात्त्वनेकक्षणस्थायी हि तस्यार्थाध्यवसायो। विच्छिन्नरूपोनुभूयते॥ न खलु ज्ञानेनैकक्षणस्थायिनैव भवितव्यमिति नियमोस्ति
१३६ सहितथा प्रतीतेर्नान्यथा भवितुमर्हति स चानेकक्षणस्थायित्वेपि तस्मान्नैतद्भिन्नकालसंबंधितयात्मनस्तावदभेदसंभवात्स्थायित्वानुपपत्तिरित्यभि
धानव्यमेकानुभवसंबंधिनो यावदनुभवानुवृत्तेः कालेस्थैर्यकत्वात्॥ तथा प्रत्यभिज्ञानेनापि क्षणिकपक्षबाधास्फुटतरैवानुभूयते॥ स एवायमि
त्याकारेण पूर्ववर्तमानस्यास्यातीतवर्तमानकालपरिगतत्वेनार्थविषयत्वकत्वात्॥ ननु चातीतदेशकालयोरतींद्रियत्वेनेंद्रियसंबंधाभावात्कथं तद्वि
शिष्टत्वमनेनार्थस्य प्रतीतिरित्यप्ययुक्तं॥ प्रत्यभिज्ञानस्येंद्रियजत्वासंभवात् स्मृतिप्रत्यक्षरूपत्वात्तस्यातोतीतग्रहणसमर्थकस्मरणास्य
विद्यमानत्वादयुक्तमेवातीतविषयतया स्मरणनियतत्वं। वर्तमानग्रहणार्थकस्य प्रत्यक्षस्य सद्भावाच्चेतितवर्तमानतयातीतत्वेपि देशकालयोस्तत्संबं
धिनो देवदत्तस्येदानीं तत्पदेशकालसंबंधितया ग्रहणमविरुद्धं। प्राचीनसांप्रतिककालविशिष्टतया भेदोपि न सर्वथा देवदत्तस्वरूपभेदकोय
एवमयापूर्वपर्यायनिपन्नो देवदत्तः स एवेदानीं प्रतीयत इति न तत्त्वरूपैकत्वप्रतीतेः॥ किंच प्रत्यभिज्ञानरूपतात्प्रत्यभिज्ञारूपं यावदर्थस्यास्थायित्वेप्यस
भिज्ञानस्याप्रवृत्तिरेव स्यात्॥ नहि नीलाभावे नीलज्ञानस्य प्रवृत्तिरस्ति प्रवर्तते चेत्तदर्थानां स्थायित्वसिद्धिः अन्यथा नीलज्ञानान्नीलादेर
पि सिद्धिर्न स्यात्॥ नहि नीलाभावे नीलज्ञानस्य प्रवृत्तिरस्ति प्रवर्तते चेत्तदर्थानां स्थायित्वसिद्धिरन्यथा नीलज्ञानान्नीलादेरपि सिद्धिर्न
स्यात्। प्रामाण्यं चास्याग्रे प्रसाधयिष्यते। पश्चात्कालव्यापित्वं देशव्यापित्वं चार्थस्य न प्रतीयते॥ किं तेनावनानस्याभावः सर्वदर्शिनो हि दर्शनेन नि
र्हानि भावाभावं प्रसाधयति॥ नार्वाग्दृशोतिप्रसंगात्॥ अर्थो हि स्वात्मना भवन्न ज्ञानेनान्यथा कर्तुं पार्यते॥ न हि ज्ञानानामर्थान्यथात्वकरणे १३६
त्वयालकरणे वा सामर्थ्यं तत्स्वरूपप्रकाशनमात्रे तेषां व्यापारात्॥ नियतसामग्रीतः समुत्पद्यमानानि हि ज्ञानानि यथार्थमर्थं सर्वात्मना परिच्छेत्तु
मसमर्थानि तद्यानेषामेवं परापेक्षार्थस्य न खलु प्रदीपो रसनप्रकाशनप्रतीतिरस्यापरपर्यायालोचना। यदि वार्थक्रियातोर्थानां सत्त्वं स्या
त्तदार्थक्रियायाः कथं सत्त्वं स्यात्॥ अर्थक्रियान्तरात्स्वतो वा अर्थक्रियान्तराच्चेदनवस्था स्वतश्चेदर्थानामपि स्वत एवास्तु। किं तत्सत्त्वकल्पनया।

किंचार्थक्रियाकारित्वं सत्त्वमर्थक्रियाकारित्वेन वा प्रथमपक्षे भेदाभावात् यदेवार्थक्रियाकारि तदेव परमार्थसदिति सत्त्वार्थक्रियाकारि
त्वयोर्लक्ष्यलक्षणभावो न स्यात् द्वितीये सत्त्वेवा स्यासंभवात् ॥ अर्थक्रियाकारित्वेन सत्त्वे येहि तानः करोति तस्य सत्त्वमिति ॥ तर्ह्यन्यदर्थक्रियाकारि
त्वमन्यत्सत्त्वमित्यायातं तथा च सत्त्वैक्यस्यार्थक्रियाकारित्वमित्युक्तं विरुध्यते ॥ साध्यपि कल्पस्य दृष्टांतो घटादीनां क्षणमात्रस्थायित्वासिद्धेः
माभूद्दृष्टांतः ॥ किं तेन साध्यं हेतोर्विपक्षे बाधकप्रमाणबलेनोपपन्नं तत्र बाधकप्रमाणं किं विपक्षाभाव एवावधीयते हेतोस्ततो व्यतिरे
कं प्रतिबंधात् साधयति प्रथमपक्षे संतो क्षणिकाः पदार्थाः क्रमयौगपद्याभ्यामर्थक्रियाकारित्वविरोधित्वात् खपुष्पवदिति बाधकप्रमा
णे हेतोराश्रयासिद्धत्वं विकल्पारूढस्याप्यसत्त्वेन कस्यचिद्धेतुराश्रयासिद्धः स्यात् सर्वत्र तथात्वसिद्धिसंभवात् ॥ नापि विपक्षाद्व्यतिरेकस्तेन प्रसा
धयितुं शक्यो प्रतिपन्ने धर्मिणि तदाश्रयव्यतिरेकस्य ग्रहीतुमशक्यत्वात् ॥ यदि व्यतिरेकः कदाचित्कुतश्चित्प्रमाणात्प्रतिपन्नः स्यात्तदा तदवि
नाभाविलिंगदर्शनाद्देशोत्र साधयितुं शक्योग्निधूमवत् ॥ न च तत्प्रतिपत्तिः कुतश्चिदस्ति साहि प्रत्यक्षतो अनुमानतो वा स्यात् ॥ न तावत्प्रत्यक्षतो
व्यतिरेकस्य व्यावृत्तिरूपतया वस्तुत्वेन तद्धेतुत्वेन तत्समगोचरत्वात् ॥ तद्गोचरत्वे वा तद्धेतुत्वेन वस्तुतापत्तावर्थक्रियाकारित्वलक्षणस्य
तदाहूतविकेयिगतत्वादैकांतिकत्वं ॥ न खलु व्याप्तेर्भावनापि क्षणिकत्वमिदं स्वलक्षणस्यैव तत्प्रतिपत्तेः ॥ अनुमानतस्तत्प्रतिपत्तावप्य
नवस्थादूषणं नापि बाधकाद्व्यतिबंधसिद्धिः ॥ सत्त्वक्षणिकत्वयोः प्रतिबंधो हि व्यतिरेकग्रहणपूर्वक एव न चाग्रहीते विपक्षे व्यतिरेको ग्रहीतुं श
क्यते तेनिष्पसंगात् ॥ गृहीते च प्रतिबंधस्तयोर्दुर्लभः स्यात् ॥ किंच क्षणिकत्वस्यानुमानगम्यत्वे वस्तुत्वं स्यात् अनुमानस्य व्याप्तिविषयता तस्याश्चा
वस्तुत्वात् ॥ किंचेदं क्षणिकत्वं नीलादन्यद्वार्थांतरं वर्तते न वा यदि न वर्तते ॥ कथं तस्य क्षणिकत्वं वर्तते चेत् तद्गृहीतमनुदर्शने न वा तान्न वर्तते चेत्
यं नीलादस्याभेदः अनुवर्तते चेत्तर्हि नरपि नीलमेव स्यादिति वस्तुव्यवस्थाविलोपः न च व्यक्तिः क्षणिकं बाह्य वा प्यपंरोपवस्तुल्पत्रिज्ञानवस्तुवादिनः
केनचिद्रूपेण नित्यत्वादिनोरक्षादेरवत्तनेशोपपद्यमानत्वात् ॥ किंच क्षणलवमुहूर्तादयः कालविशेषास्तच्चोदेः कालोभ्युपगम्यते ॥ इति विशेषणा॰

न्या॰ कु॰ चं॰ स्वासिद्धत्वात् कथं क्षणिकोऽर्थः स्यात्॥ परिकल्पितेन च क्षणिकत्वेन वा सत्त्वं स्यात्। क्षणिकत्वस्य वा सत्त्वे क्षणिकत्वमेव वास्तवं स्यात् प्र-
१२८ कारांतरासंभवात्॥ किंचेदं क्षणिकत्वं क्षणस्थायित्वं क्षणानंतराभावो वा यदि क्षणस्थायित्वं तदक्षणिकेप्यस्त्येव तदर्थक्रियाक्षणापालेन्यथास्य क्षणि-
कत्वेन न स्यात्॥ अथ क्षणानंतराभावस्तदा तदा स्त्वेन विनहि क्षणानंतराभावः क्षणशब्दवाच्योवस्तेन तत् इतस्यात् क्षणानंतराभावस्यार्थानां
प्रत्यक्षादिविरुद्धमित्युक्तं परस्तुक्तं। उत्पादितानेककार्य्ययावत्स्थित्यादिनोत्पादितकार्येण तु स्यात्कस्य भावो स्याद्यावन्नैनएवापरकार्योत्पादस्व-
भावत्वोकाणत्वं चैवमक्षणिकत्वप्रसंगः स्वभावभेदेपि चैकत्वेऽभेदस्यैव विषयत्वेनाक्षणिकत्वमविरुद्धत्वात्॥ एतेन परेणोक्तं कुर्वतीत्यादि
प्रत्युक्तं। पक्षकृतकत्वं क्षणिकत्वे साधनमुक्तं तत्रापि पक्षादिदोषः। एवं च कृतकत्वं च कार्य्यत्वमुच्यते क्षणक्षये कांते च कार्य्यकारणभाव
स्यसंतानविशेषाभावसेरभयात् क्रियात्वात् कथं तत्सिद्धो तत्॥ अथ युगपत्तत्तद्धावस्था प्रत्ययकिमेकस्मात्कारणादेकं कार्य्यमुत्पद्यते॥ किंचानेकस्मादेकमु-
तनैवैकस्मादनेकमाहोस्विदनेकस्मादेकमिति॥ न तावत्प्रथमोनुपपन्नः एकस्मात्प्रदीपादिकारणाद्वर्त्तिकादाहतैलशोषणादिकार्यप्रसवद्यने-
ककार्यस्य दर्शनात्॥ द्वितीयपक्षोप्ययुक्तो भवन्मतेन कालपदार्थनिर्म्मिताव्यवस्थितरूपैककार्य्यासंभवात्॥ रूपालोकादनेककारणकलापा-
त्तानादिलक्षणैककार्य्यसंभवतीत्यप्यपेशलं॥ कारणभेदेऽपनीतस्वभावनानात्वायोगतस्तस्यैकत्वानुपपत्तेः अर्थेन द्वितीयाद्याकारः समनं-
तरत्वपेन स्वसंविद्रूपता आलोकेन स्पष्टता चक्षुरादिना रूपादिनियतताज्ञाने समर्प्यतेऽस्तीति॥ तदुपनीतविविधविरुद्धधर्माध्यासे प्यास्ये-
कत्वेनानाकालयोगेप्येकत्वं किं न स्याद्विशेषात्॥ एतेन तृतीयपक्षोपि प्रत्युक्तः अनेकं कार्य्यं सहकारितरस्वभावैरेकस्योत्पादयतो विरुद्ध १२९
धर्म्माध्यासेनैकत्वानुपपत्तेः तदुपपत्तौ वानेकक्षणयोगेप्येकत्वमुपपद्यतां विशेषाभावात्॥ अथ चतुर्थः पक्षः समाश्रीयते रूपादिक्षण-
प्रचयरूपापि सैव सामग्री संतानवस्थाप्रवर्त्तमाना स्वरूपानुत्तरोत्तरसामग्रीमारभते॥ विजातीयकारणानुप्रवेशेनु विरूपामितितदप्यसुं-
दरं। यतः समग्रेभ्योभिन्नासामग्री भिन्नावास्यात्॥ न तावदभिन्नाप्रसिद्धांतप्रसंगात्॥ अथाभिन्ना तर्हि सामग्र्यास्तत्सामग्रीतत्तच्चैकत्वसदृशा

१ वेनोत्तरसमुदायारंभेनवांतर्गतं समुदायिन एकैकमेकैकैश्च एव उत्पादश्चेत्सर्वं संभूयवा॥ नचाद्यपक्षो संगत एकस्मादेकोत्पत्तेः प्रतिषिद्ध
त्वात्॥ अनेकस्मादनेकोत्पत्तिप्रतिज्ञा रूपनियमसंगावश्व॥ द्वितीयपक्षोप्ययुक्तोयतएकैकसमुदायिन्निष्पन्नोसर्वसमुदायिनांक्रमेण व्यापारः
स्यायुगपद्वा॥ क्रमपक्षे क्षणिकत्वहानिः पौर्वापर्यं चैषां समुदायिनः क्षणवर्तिने॥ न एकतमं समुत्पादयन्नपरं समुत्पादयंति तदुत्तरस्यापि
तितावत्कालमवस्थानात्कथं क्षणिकाः॥ अथ युगपदेव सहनिष्पन्नो सर्वैर्व्यापियैते॥ न तर्हि निर्विकल्परूपं कार्यं निकुरुंबरूपात्कारणादुत्पन्नमि
ति कारणप्रविभागनियमाभावात्॥ इदं रूपमेवरसस्तैवं रूपादिकार्यप्रविभागो न स्यात्। सर्वं रूपं रसो वा स्यादेकस्मान्निकुरुंबविशेषादुत्प
न्नत्वात्॥ अथ निकुरुंबान्निकुरुंबस्योत्पत्तावपि नरूपादीनां स्वरूपसंकरप्रसंगः पूर्वसामग्रीभूतैरूपादिक्षणैरुपादानसहकारिभावेनोत्सा तत्
मग्रीभूतरूपादिक्षणानामुत्पादनादिति रूपक्षणेन रूपवद्रसादिविषयेणांतरमुत्पादानं स्यात्तदास्यादुत्तरस्यापि रूपस्येतिनरयचारः॥ उ
पादानसहकारिभावे सो पारापेतरशक्तिभेदे सत्येवोपपत्तेः॥ न इदं च निरंकुशमत्यल्पं क्षणेन संभवति इत्युक्तं॥ ततः क्षणिकपक्षे कानेकार्यकार
णाभावादनुपपन्नेयं सिद्धं। तत्र क्षणिकत्वं तु चक्षुरेकेन सत्ता स्वपणांतरमेव नचव्यमितिनियमः क्षणिकं अवस्थाकालांतरेन च स्याद्धि रोपाभाव
दिति संदिग्धानैकांतिकत्वं तानैकांतिकत्वं क्षणिकत्वानित्यत्वयो स्तादात्म्यात्कानित्यत्वाव्यभिचारित्वात् सेत्यपक्षं रमनित्यत्वाव्यभिचारित्वे पि कालां
तरभाव्यनित्यत्वाव्यभिचारित्वं भविष्यति॥ ननु सत्त्वस्यानंतरभाव्यनित्यत्वाभिचारित्वं क्षणिकत्वस्यानित्यत्वकालांतरेणा विनाभावदर्शनाभावात्॥ तथा
च क्षणिकानित्यत्वयोस्तादात्म्यासिद्धिरित्यादि इत्युक्तं॥ कुतश्चानयोस्तादात्म्यप्रतिबंधसिद्धिः॥ नतावत्प्रत्यक्षानुपलब्ध्याविचारकत्वसंनिहि
तार्थविषयत्वतः सार्वत्रिकप्रतिबंधग्रहणे सामर्थ्यासंभवात्। नाप्यनुमानात्प्रतिबंधसाधकानुमानस्यैवासंभवात्। विपक्षेबाधकप्रमा
णान्तसिद्धिश्च प्रागेव क्षणेनो न एष प्राच्या अप्युक्तं॥ कारणसामर्थ्याभेदादित्यादिन इत्युक्तिमात्रं यतः कारणानां सामर्थ्यभेदेऽपि किं विनश्वरमात्र
स्वभावभावजनने उदयानंतरस्थायिनशीलार्थोत्पादनमात्रेवा॥ प्रथमपक्षोसिद्धसाधनं यः कश्चित्कारणैर्जन्यते तस्यानित्यतामात्रस्वभावनये

स्या·कु·चं·
१२८

त्त्वात् द्वितीयपक्षस्तु युक्तः कारणव्यापारसहितात्मलाभकस्योदयानंतरमस्थानशीलत्वाप्रतीतेः॥ विचित्रा हि कारणसामग्री काचिदुद
यानंतरमेवापन्नसाध्या विनाशात् लिंगिनं विद्युदादिभावमाविर्भावयति॥ काचित्पुनः कालांतरेऽपन्नसाध्यभावकोऽङ्कुरं पर्यादिरूपं द्व्य
णुकत्र्यणुकादिकालेऽप्रयत्नसहस्रेणाप्यसमर्थादिभ्यो नाशादिनविनाशे पेतं पर्यंतादिकं॥ विद्युदादेः खलूदयानंतरमभावेन प्रतीतेर्न्यायतः। ति
सिद्धानि॥ सा चान्यत्रापि भवंती किं न तत्सद्भावं प्रसाधयेत्॥ न खलु मुद्गरादिव्यापारान्याकुलशादेरभावः प्रतीयेतेऽ॥ वरसुकमनेनेवि
त्यादी नाशोपलंभादितरद्युक्तमनेनेह धर्म्मस्यादावभ्युपगमेऽन्यत्रेने संतानोच्छेदोपलंभादावपि न पृच्छेदः स्यात्॥ अविद्यानस्याप्रकृदास्या
चांते दर्शनादावपि तत्सिद्धिप्रसंगतः सुगतस्य मार्गाभ्यासो व्यर्थः स्यात्॥ यदि च स्वहेतोर्विनाशसद्भावभावः समुत्पन्नस्तर्हि मुद्गरादिपरा
न निरपेक्षत्वयाऽभ्यासेन नहि प्रदीपादिः प्रकाशात्मकतयोत्पन्नः परमपेक्षतेऽनद्रूपतयापारभ्यते॥ न च मुद्गरादिव्यापाराभावे घटादिप्रध्वं
सः स्वप्नेऽपि प्रतीयते। अतः कादाचित्कः सन्नन्वयव्यतिरेकाभ्यां मुद्गरादिहेतुक एवासौ व्यवतिष्ठते॥ न हि कादाचित्को निर्हेतुको युक्तः उत्पा
दवत्॥ नापि योयस्माद्भवति सोऽन्ते हेतुः प्रतिनियतहेतुफलव्यवस्थाभावप्रसंगात्॥ न च विसदृशसंतानोत्पादनएव तद्व्यापारस्य चरितार्थत्व
मित्यभिधातव्यं। घटादिनाशोकपालसंततेरप्युपपत्तिर्न हि विद्यमाने घटे कपालसंततिरुपलभ्यते॥ अनंतरहितनाशद्वारेण वसोत्पद्यनरस्तु
(धानाद्युत्पादेन) भयोरन्वयव्यतिरेकानुविधाननाशोऽपि तज्जन्यघातस्तुकतत्कानांभुवभाविच्चाद्विनाशस्यन हेतुत्वं न एपे हेतुपिकपालसंतानैकांतिकं स हि मु नैका
द्भावीनच मुद्गरादिहेतुत्वं न एनपेक्षः निर्हेतुकत्वे वास्य क्रिमाकाशादिवत्सदा सत्त्वमेव स्यात्॥ वंध्यास्तनंधयादिवदसत्त्वमेव वात्रयमप्रसे १२८
भावाभावयोर्युगपदुपलंभः स्यात् तयोर्विरोधाभावतः सहावस्थानसंभवात्। विरोधे वा भावदर्शनमपरतरमेव प्राप्नोति। न हि विरोधिनो भावस्य सत्त्वा
सत्त्वात्॥ द्वितीयपक्षे तु घटादेर्नित्यत्वमेव स्यात्तध्वंसस्याहेतुकत्वेन सदासत्त्वात्। द्वितीयपक्षे तु घटादेर्नित्यत्वमेव स्यात्तन्ध्वंसस्याहेतुक
त्वेनसदासत्त्वात्॥ न च भावकारणकत्वमभावस्योपपद्यते॥ तत्कारणभेदप्रतीतेरन्यदेव हि मुद्गरादिकं घटविनाशे कारणं॥ अन्यदेव तत्त्वंसादि

न्या॰ कु॰ चं॰ नभवत्येव केवलमिति एवंविधानं च विशेषणं सत्वान्निरिरिक्तिरणं कमप्यर्थमभिदध्युरित्येषामुत्तरं कारणेनैव पर्यंकं सत्वे विश्रान्ति पत्यभावात्॥ तस्माद्भाव
२६० स्वयमेव स्वकारणादेवात्मजन्मनः प्रमाणेन परिच्छेद्यासद्रूपतानया सद्रूपतापि कीदृशस्य भावस्य विनाशो निर्हेतुकत्वेनाभिमतः किं विनश्यतीति विनाशो भावका
त्वं स्वरूपप्रतिषेधरूपं विनश्यतीति वा विनाशो न वस्त्वादिभावस्वरूपं पर्युदासप्रतिषेधरूपं प्रसज्यप्रतिषेधरूपस्यास्याहेतुकत्वं न दूषणाभावस्यैव भवतान
भ्युपगमात्॥ नापि पर्युदासप्रतिषेधरूपस्यान वस्त्वादिभावस्वरूपस्याहेतुकत्वेन कैश्चिदप्यनभ्युपगमात् ततो विनाशं प्रत्यनपेक्षत्वमसिद्धं भावानां मुद्गरा
देरपेक्षणात्। यो यद्भावं प्रत्यनपेक्षः स तन्नियतः [illegible] स मानः किं चाश्वस्तिनपेक्षित्वमात्रे हेतुः स्वभावत्वे सत्यन्यानपेक्षत्वं वा॥ प्रथमपक्षे यवबी
जादिभिरनेकान्तः शाल्यंकुरोत्पादनसामर्थ्यसंनिधानावस्थायां ननु स्यादनेनान्यानपेक्षाणामप्येषां तत्स्वभावनियतत्वाद्भावात्॥ द्वितीयपक्षे तु विशेष्या
सिद्धो हेतुस्तत्स्वभावत्वे सत्यप्यर्थानां विनाशं प्रत्यन्यानपेक्षत्वाभावप्रतिपादनात्। भावे विशेषणासिद्धं च तत्स्वभावत्वे सत्यन्यानपेक्षत्वं मुद्गरादीनां विनाश
स्वभावाभावात्। दृष्टान्तश्च साधनविकलो अन्त्या कारणसामग्र्याः स्वकार्योत्पादने द्वितीयक्षणापेक्षया अनपेक्षत्वासंभवात्॥ न त्वन्त्या कारणसामग्री स्वका
र्योत्पादनस्वभावोपि द्वितीयक्षणमपेक्ष्य तदुत्पादयतीति विरोधात्॥ यदपि शान्तरक्षितेनोक्तम् [illegible]॥ यतः स्वकारणकलापतः प्र
भवतः क्षणस्य रूपं यावत् [illegible] यो द्वितीयादिक्षणेष्वपि तत्स्वभावं न परित्यजत्यतः क्षणिकं प्रत्यभिहितं यद्यथावभासते इत्यादि तद
प्यभिधानमात्रं हेतोरसिद्धेः नहि नीलमवभासमानं क्षणिकत्वेनावभासते। अन्यथा नीलवत् क्षणिकोपि [illegible] स्यात्॥ यदेव सविकल्पेन प्रत्यक्ष
तेनैव देशसगोचरत्वाभ्युपगमात्॥ न च नीलावभास एव क्षणिकावभासः प्रत्यक्षेण [illegible] क्षणिकत्वावभासस्वभावत्वेन क्षणिक
त्वभासस्वभावत्वमप्यस्तु विशेषाभावात्। न तस्यान्याकारत्व्यपरिच्छेदसमर्थमतिप्रसंगात्। न च वर्तमानतामात्रग्रहणमेव निश्चयत्वोऽचनस्य क्षणिकतायाम १६७
पि वर्तमानतायाहरणात्प्रतिपादनात्॥ ततेदं क्षणिकत्वस्य विचार्यमाणस्यानुपपत्तेः प्रतिक्षणविशरारवो रूपरसगंधस्पर्शशब्दपरमाणवो स्तानैवे
ति सौगतानिकमतमपास्तं॥ ज्ञानमात्रमेव [illegible] धर्मिकं तत्त्वमिति योगाचार माध्यमिकमतं च बहिरर्थसिद्धात्मादितत्वान्तरसिद्धावप्यनेकान्त

कंतद्भुत्पादेऽभावकारणकत्वे चाभावस्य भावकाल एव भावोऽपि स्यात् तथा च प्रागिव भावोपलंभो दुर्लभः स्यात् रभावे वा न भावकारणको
ऽसौ स्यात्। न चैककारणोत्पन्नानां कालक्रमेणोत्पत्तिः प्रतीयते॥ अथ द्वितीयक्षणमपेक्ष्यास्याभावो दुर्भावात्तु नरे वोत्पत्तिः कथमेव
महेतुकत्वमेव क्षणस्यैवेहेतुत्वात्॥ अहेतुको हि न किंचिदपेक्षते। अथ भावकारणेऽत्र यावत् स भाव एवावादि गोऽसौ यो न भावसतानंतरं भ
वतीति न तु तत्तत्ताकिं क्षणांतरध्वंसिनो क्षणांतरस्य का। न त्वाघपस्वेपत्य क्षणादिवा प्राद्वितीयादिक्षणेऽपि भावसतायाः प्रस्य क्षणादिप्रमाणतः
प्रतीयमानत्वात्। द्वितीयपक्षे तु कपमर्थानां क्षणिकतानेकक्षणस्थायिसत्तानंतरभाविनोऽत्रास्या क्षणिकत्वमेवोपपद्यते; न चापरं सत्ता
मात्रं किंचिदस्ति परं तंतरभावोऽसत् स्यात्॥ अहेतुकत्वं चास्यापेक्षितायानंतरभावित्वादन्वयव्यतिरेकाव्यतिरेकविकल्पाभ्यां न ज्जन्यत्वासंभवाद्वा
नन्तावद्भुदयानंतरभावित्वाद्भुकरोत्पादत्वं गात्। व्यतिरेकाव्यतिरेकविकल्पाभ्यां चास्य मुद्गराघहेतुनासिद्धेन। अनन्त्यादानंतरभावित्वाद्भु
दायपेक्षा दृश्यते। तदेवाहेतुकोऽभ्युपगंतुयुक्तो न च मुद्गरादिव्यापारान्वयानुपलब्धो घटादीनां विनाशोऽर्न च न यात्रुपलभ्यमानोऽसौ स्वभिधा
तुं युक्तमुपलंभनिबंधनत्वाद्वस्तुव्यवस्थायाः प्रतीयमानं च कालांतरे हेतुकत्वमभ्युपगच्छतोऽस्य मतनैश्चेष्टाः शुद्धकारितास्यात्॥ कथं
चोत्पादोऽप्येवमहेतुको न स्यात्॥ न हि सोऽपि कार्यस्वरूपमनुत्पद्यमानस्यानुत्पद्यमानस्य वा नवानेनो भिन्नोऽभिन्नो वा कारणैर्विधातुं पा
र्यते॥ यथा मुद्गरादिभ्यो घटादेर्भावो नोपपद्यते न यास्वरूपो नोऽपि सहि स्वरूपतो भवत्स्वयंन श्वरस्य वाव्यतिरिक्तोऽवेत्यादिविकल्पा
न्नातिक्रामति॥ न तु नास्माकं दर्शने भावस्य किंचिद्भवति केवलमेकक्षणस्थितिधर्म्मा स्वकारणाज्जातः क्षणांतरे न भवतीति व्यपदि
श्यते॥ तदुक्तं॥ न तस्य किंचिद्भवति न भवत्येव केवलमेकक्षणस्थितिधर्म्मा स्वकारणाज्जातः क्षणांतरे न भवतीति व्यपदिश्यते॥ तदुक्तं॥
न तस्य किंचिद्भवति न भवत्येव केवलमिति। नन्वेवं न घटाद्यस्य कश्चिद्धर्मोऽस्ति न वा नास्ति चेत् किं तेनोक्तेन अस्ति चेत् किं सत्वाद्भिन्नोऽभि
न्नो वा पयमिच तत्वादास्तिनास्तिशब्दयोः सत्वनोस्तो प्यपर्य्यायता स्यात्॥ तथा च क्षणक्षयिणो भावानिरन्वयविनाशान्न तस्य किंचिद्भवति

न्तनिराकरणं प्रागेव विचार्यतेो विहितमिति नेह पुनरभिधीयते॥ ६॥ वैभाषिकमतं तु दूषणभंगनिराकरणान्निराकृतमपि तन्मतप्रक्रियां प्रद
र्शयितुं निरूप्यते तथाहि विभाषां सद्धर्मप्रतिपादकग्रंथविशेषं येऽधीयते ते वैभाषिकास्ते च प्रतीत्यसमुत्पादमंगीकृत्य विश्ववैचित्र्यमाचक्ष
ते॥ तथाहि प्रतीत्यान्योन्यं हेतूकृत्य तत्तन्नानासामग्रीमाश्रित्य हेतुप्रत्ययभावेन यस्मिन्संघातेभ्यः संघाताः प्रभवंति प्रधानेश्वरादिकारकनिरपेक्षाः
स प्रतीत्यसमुत्पादः तस्य च द्वादशांगानि हेतुप्रत्ययभावेन यस्मिन्संघातेभ्यः संघाताः प्रभवंति॥ प्रधानेश्वरादिकारकनिरपेक्षाः स प्रतीत्यस
मुत्पादः तस्य च द्वादशांगानि हेतुफलभावेन व्यवस्थितानि॥ तथाहि॥ अविद्यात्र अविद्याप्रत्ययः संस्काराः संस्कारप्रत्ययं विज्ञानं विज्ञानप्रत्ययं नाम
रूपं नामरूपप्रत्ययं षडायतनं षडायतनप्रत्ययः स्पर्शः स्पर्शप्रत्यया वेदना वेदनाप्रत्यया तृष्णा॥ तृष्णाप्रत्ययमुपादानं उपादानप्रत्ययो भवः भव
प्रत्यया जातिः जातिप्रत्ययं जरामरणमिति॥ तत्र क्षणिकानात्मकाशुचिदुःखरूपेषु भावेषु नित्यादिविपरीतज्ञानमविद्या। संस्काराः पुण्यापुण्यानुभय
प्रकाराः शुभाशुभमिश्राचरणहेतवोऽनेकप्रकाराः रागादयः वस्तुप्रतिज्ञप्तिर्विज्ञानं॥ तच्च षट्प्रकारं पंचेंद्रियविज्ञानसविकल्पभेदात्। रूपवे
दनासंज्ञासंस्कारलक्षणस्कंधचतुष्टयं नामरूपं तत्र रूपस्कंधः पंचेंद्रियाणि पंच तदर्थाः अविज्ञप्तिश्चेत्येकादश धातवः विज्ञप्तिः प्राणिनां श
रीरोपादानभूताः शुभाशुभाचरणज्ञानाकर्तृकप्रख्या सा चायोगिनामप्रत्यक्षत्वादविज्ञप्तिर्विज्ञानं॥ तच्च षट्प्रकारं पंचेंद्रियविज्ञानसवि
कल्पभेदात् रूपवेदनासंज्ञासंस्कारलक्षणस्कंधचतुष्टयं नामरूपं तत्र रूपस्कंधः पंचेंद्रियाणि पंच तदर्थाः॥ अविज्ञप्तिश्चेत्येकादशधातवस्त्रा
विज्ञप्तिः प्राणिनां शरीरोपादानभूताः शुभाशुभाचरणज्ञानाकर्तृकप्रख्या सा चायोगिनामप्रत्यक्षत्वादविज्ञप्तिरित्यपरत्वेनोच्यते। तदर्थाः
पृथिव्यादिस्थूलानि भवंति भावपंक्तिधारणरोधपतनापरूपतयेति भूतानि। आकाशं चक्षुर्द्वंद्वं न चालोकतमः परमाणुभ्यो नान्यदिति तदर्थकपरिसरण
ते॥ तानि च पृथिवी धातुरित्यादिसंज्ञां तत्तन्मिश्रप्रतिपद्यंते॥ उत्पन्नस्यानन्तानां ज्ञानादिधातुनां सुखदुःखानुभवो वेदना चित्तप्रकाराः पदार्थानां निमित्तोद्ग्र
हणं संज्ञा विमर्शो वा यथा रूपादर्शात्तद्रूपावधारणाद्दृष्टान्तः अर्थक्रियायां घटनात् घट इत्यादिरनेकप्रकारः संस्कारोऽपि रागादिभेदादनेकधा विज्ञानं तु भा

न्या.कु.चं. महत्त्वशब्दवाच्यमपि स्कंधशब्देनोच्यते। राशीभूतत्वस्य पंचानामप्यविशेषात्। तथाहि। रूपेऽमेकादशात्मको राशिः, वेदनात्मकः, संज्ञासंस्कार
१०१ श्चानेकात्मकः; विज्ञानं षडात्मकमिति। तत एव च दुःखशब्दवाच्याः सास्रवास्त एव कारणभूताः॥ आस्रवति संसारो येभ्यस्ते आस्रवाः अविद्या
गादयस्तैः सहवर्तन्त इति सास्रवाः। निरास्रवास्त एव मार्गाः॥ निरोधो द्विप्रकारः प्रतिसंख्यानिरोधोऽप्रतिसंख्यानिरोधश्चेति। तत्र दुःखादीन्यार्यस
त्यानि प्रतिसंख्याय यथायथावन्निश्चित्य महाविशेषेणानेन यः प्राप्यो निरोधः अविद्याद्युच्छेदः स प्रतिसंख्यानिरोधः। रागादिसमुत्पादे त्वन
विघ्नभूतः समाधिसमापत्तिरूपोऽप्रतिसंख्यानिरोधः। चक्षुरादीन्द्रियाणि षडायतनानि निष्पन्नानि तानि त्वायतनानि सर्वस्यागच्छतः उपायस्पर्शः
चक्षुषा रूपं पश्यामीत्यादि विषयेन्द्रियविज्ञानसन्निपातः समूहः स्पर्शः॥ सर्वोऽस्य सुखस्य दुःखस्य वा वेदनालोभस्तृष्णा, तस्याः पापे उपादानं उपादानं
तर्भवजनककर्मलक्षणो भवः। आयतिस्कंधप्रादुर्भावो जातिः स्कंधपरिपाकप्रध्वंसलक्षणं जरामरणमिति नीत्यं भवति। भवश्च कामभवादिभेदेन त्रा
कामरूपारूप्यसंज्ञकाश्चयो धातवोऽभिधीयन्ते॥ तत्र कामधातुर्नरकादिस्थानः; रूपधातुर्ध्यानरूपः, आरूप्यधातुश्चतुर्विधसंततिरूप इति॥ कृ॥
अत्र प्रतिविधीयते। यत्तावदुक्तं प्रतीत्यसमुत्पादमित्यादि तदसमीचीनं। यतः प्रतीत्यसमुत्पादेऽविद्यादिद्वादशांगानि तल्लक्षणानुपयोगित्वात्प्रद
र्शितानि किं वा एतावन्त्येव संभवन्तीति। तत्राविद्यां त्वेवं तत्त्वधारयितुं शक्यं जगत्यर्थो येवे वैचित्र्यस्यानंत्येन व्याप्तत्वात्। नापि सुगतलक्षणमेतावंतो वा
यथास्वं ते। मिथ्याज्ञानलक्षणाविद्यावद्विपरीतश्रद्धाचरणस्वरूपयोर्मिथ्यादर्शनचारित्रयोरपि संसारहेतोर्दर्शनात्। यथा सम्यग्ज्ञानादित्रयात्मोक्षहेतो
रुपादेयत्वाद्युपायभूतरत्नत्रयोगात्प्रसाधयिष्यते च ज्ञानादित्रयस्यैवात्मस्वरूपस्य संसारहेतुता, सम्यग्रूपस्य च मोक्षहेतुता मोक्षविचारप्रस्तावे प्रपं
चेन। न चाविद्याया एवैतेषामन्तर्भावः प्रतिपत्तव्यः। तत्त्वं तत्त्वविलक्षणत्वात्तेषामन्तर्भावासंभवात्॥ यदप्युक्तं तत्त्वविलक्षणं ज्ञानं तत्रान्तर्भवति १०१
यथा तत्तेऽस्मन्नंलोत्यते न विलक्षणान्याविद्यातो मिथ्यादर्शनादयस्ते॥ तदेषामन्तर्भावेऽपरिगणितद्वादशांगोपदेशोऽनुपपन्नः चतुर्णामप्यसत्त्वे
वा तेषामन्तर्भावात् तदुपदेशोऽप्यवक्तव्य लक्षणानुपपत्तेः। यच्चाविद्यायाः क्लिष्टकेत्यादिलक्षणमुक्तं तदयुक्तं क्लिष्टादिज्ञानस्यैवाविद्यारूपत्वात्॥ अ

नन्वेनतज्ज्ञानं सविषयकं यथा स्फटिकत्वं चेरत्वं चार्थस्यास्वरूपं प्रमाणानुपपन्नत्वात् सर्वथानित्यत्ववत्॥ नस्त्वनुपपन्नत्वं चाऽस्वसंतानभंगे
रूपणभंगपक्षेचत्वदर्शितं यदपि संस्कारणमारयत्युक्तं॥ तदनीवासंगतं पक्षेतद्वादीनां संस्कारकल्पनालौकिकेत एषोप्यद्भूतनयाप्रसिद्धत्वादति
धीपने॥ क्षणसंततिमात्रेणावान्तराध्यक्षोनुपपन्नो लोके शास्त्रे चवेगादिस्वभावस्यैवसंस्कारस्य प्रसिद्धेः॥ द्वितीयपक्षोप्ययं शलः संस्कृयंतेऽनेन
संस्कारः एतत्क्षणसंततिमात्रेण रागादिवन्निखिलार्थानां संस्कारत्वप्रसंगात् तथाविधानस्वभाविना र्थानां तद्रूपत्वपोत्पत्तिप्रसंगात् दर्शितं नन
त्कारणभेदप्रक्रियाविशिष्टैर्यत्न। पुण्यापि प्रकारेणैवैषा मतिः बहुर्घटा तद्धि रागादीनां पुण्यादिव्यपदेशो लोके शास्त्रे वा कदचित्प्रसिद्धः॥ पुण्यादि
साधनस्य धर्माधर्मेवनत्वततत्प्रसिद्धेः॥ तत्कार्यत्वात्तेषामपि न तद्व्यपदेशः तत्त्यस्य साधनं पुण्योरागादिकारणत्वसंभवात्॥ आचार्यविशेषविनि
बंधनत्वान्नस्यात्तदपदेशोविधाने [illegible] तद्व्यपदेशप्रसंगात् अतिनियतव्यवस्थाविलोपः स्यात्॥ यदपि संस्कारप्रत्ययं विज्ञानमित्युक्तं॥ तदप्यनल
नमोविलसितं रागादीनां विज्ञा[illegible]त्वस्य लक्षणसंस्कारेभ्यः प्रादुर्भावासंभवात्॥ तत्र निपत्तिभूतननापेक्षामन्येयुक्ता॥ शुद्धो
॥ अथ बाह्यमर्थं [illegible] यांधीकृतः सत्त्वः॥ च सुषुप्तोन नात्यांतिकिर्मवान कथं चित्॥ १॥ इति षट्प्रकारेणावास्यसत्त्वप्रत्ययव्याभवत्यारिकास्य
नस्यंद्विप्रभवज्ञानस्यविकल्पज्ञानस्यचसविकल्पकसिद्धो यत्प्राप्त्यानत्वात्॥ तदपि विज्ञानप्रत्ययं नाम रूपाद्युक्तं नदपि महाकुत्तरूपादि
स्कंधचतुष्टयलक्षणनामरूपस्य विज्ञानप्रभवत्वासंभवात्॥ विज्ञानास्यैव नत्वप्रभवोपपत्तेः निरुपादानभावे तज्जन्यते॥ सहकारिभावेन वा न
तावदुपादानभावेनेह पतदर्थानामत्यंतविलक्षणानयातदुपादानत्वासंभवात्। यच्चतोत्यंतविलक्षणं तत्स्य न तदुपादानं यथा जलस्यानलो त्यंत
विलक्षणं च विज्ञाना[illegible]रूपादिकं विनि॥ नापि सहकारिभावेनेंद्रियादिभ्यो विज्ञानस्यैव तत्पोत्पत्तिप्रत्ययेनैः सर्वैरिष्टत्वाच्च सर्वथापि चांगानां स
हकारिभावेन विज्ञाना[illegible]त्पत्तिसंभवात् नन्नामरूपमेव विज्ञानप्रत्ययं स्यात्। यावाविज्ञप्तिः कंचुकप्रख्याप्रतिपादिता सा किंचिद्रूपा वा स्यान्ननाव
स्थिद्रूपानभ्युपगमात्॥ अथवा विद्रूपात्वे किंचिदनिर्दिष्टकर्म्माणं शरीरस्य तथानामानरक्षणात्। यदपि नामरूपप्रत्ययं षडायतनमित्यभिहितं तस्य

न्या·कु·चं· र्पोसोचिनाभिधानं।रूपस्कंधत्वव्यवस्थानं।ननु तेन पश्यपरिभाषेनेप्रयोजनाभावात्।नचांतर्भूतस्याप्यस्य पृथक्करणमिपादनेप्रतिपादयितुरपेक्षा।पृथक्कारित्वप्र
१६२ संगः।प्रतिपाद्यानां संक्षेपविस्तररुचित्वात्तथात्वानियमात्।नैकांतिकमेतत्।रूपवेदनानुमीनां।आनंत्यसद्भावात्।विषयेंद्रियविज्ञानसंमुखः स्पर्शो रत्यादि गुणकर्मा
यामात्रेण स्वप्रक्रियाप्रदर्शनमात्रं न किंचिदुपयुक्तमनेन।रूपसंज्ञेयत्ववृत्तिरूपवृत्त्यादिधातुचतुष्टयं प्रतिपादितं।।तदप्ययुक्तं विचारासहत्वात्।प्रतीतिसिद्ध पृथिव्यादेरने
कप्रकारत्वोत्पत्तिस्थानस्य पाप्तस्वपदेशेवियारसंभवात्।।पानुतदुत्पत्तौ शक्तिर्यापरमाणुरूपस्वभावो एकद्रव्यकउत्पद्यते।अथ द्वे द्व्यणुकानि चत्वारि महाभूता
नि चत्वारि वा तानि रूपरसगंधस्पर्शात्मकानि।यद्यद्यि।सांख्यैः एकस्मादाकाशादिः सात्त्विकरूपतोऽप्यवगम्यते।एवं समस्त्यात्मकं द्व्यणुकं परमाणु
रिति।तत्र संगता।परमाणुना मैकैकद्रव्यत्वादिसंभवेऽपि पृथिव्यादिमहाभूतासंभवात्।।नानाहि तच्चशक्तिरूपतया परिकल्प्यते।।एकं परमाणु
वापदिशक्तिरूपतया तदानंतद्व्यकोऽपि परमाणुः किं न स्यात्।।नचानंतद्रव्यारंभकशक्तीनामपि संभवात्।।अथ स्कंधरूपतया नैके कन्नाः परमाणू
नां स्कंधपरिणामासंभवात्तस्य स्थूलत्वाप्रत्यक्षत्वादिनानुपपद्यते।।सवितर्कसविचारादिरूपं च विज्ञानधातवे वितर्को हि चित्तस्य स्थूलो विमर्शो वि
इतीतिगृहीतत्वं २।५ चारः सूक्ष्मः।नचेंद्रियार्थज्ञानानां वितर्कविचारसंभवे निर्विकल्पकत्वं विरुध्यते।निरूपणानुस्मरणाविकल्परहितत्वेन निर्विकल्पकत्वाभ्युपगमेनेयुक्तं।।नि
हेर्वा २ रूपणानुस्मरणविकल्पेनाविकल्पकाः।निरूप्यमनेनेति निरूपणा वाचकः।अनुस्मरणं विकल्पः।स च प्रधानतोऽपि षट्विज्ञानाभिमतः सहितानुत्पन्ने।।
मनश्चाविज्ञानान्यत्।यथामनंतरातीतं विज्ञानं यद्धि तन्मनः इत्यभिधानात्।एतदेव सरूपस्कंधधातवे मैकारदेशोऽन्यथाऽसर्वोऽप्यस्कंधस्येत्या
दित एष्यविकारिनरमणीयं।।मवत्कल्पितविज्ञानधातूनां सविकल्पकत्वसिद्धेः प्रत्याख्यातत्वात्।रूपस्कंधस्य च क्षणिकत्वाविचारात्।परमाणूनां अंग प्रसा
द्धस्य धनोरेवत्वप्रतिषेधात्।।ततो वैभाषिकोपकल्पितं द्वादशांगात्मकप्रतीत्यसमुत्पादस्वरूपं पर्यालोचितस्वरूपतया विचार्यमाणस्य व्यवस्थितेः।नास्य तत्त्वस्त्र १६४२
पंचकस्य क्षणिकार्थक्रियाकारित्वं घटते।।न खलु सौगतमतस्य चतुर्विधस्यापि क्षणिकत्वभावस्य विचार्यमाणस्यानुपपत्तेर्न क्षणिकैकार्थक्रिया घट
ते।।नचतरभावे भावानां तत्त्वमुपपद्यते इत्युपदर्शयति।।भावानामित्यादि भावानां परमार्थभूतानामर्थानां सार्थक्रियालक्षणात्मया मनासौगतस्य तदभावे

१ अर्थान्तरभूतानि स्या·र· २ निरूपणे स्या·र·

तेषां परमार्थसत्कमेव न भवेदित्यर्थः॥ कारिकायाः सुगमत्वाद्व्याख्यानमकृत्वा परेणपहसनव्याजेन भावानामित्यादि समर्थयमानोऽर्थक्रियेत्या
ह॥ अर्थस्य स्वज्ञानस्याप्यस्य वा दोहादेः क्रियानिष्पत्तिलक्षणा समर्था योऽसौ परमार्थसन्॥ यदेवार्थक्रियाकारि तदेव परमार्थसदित्यभिधाना
त्॥ अङ्गीकृत्यापरीकृत्य स्वयमेव पुनः पश्चात्तेनैवाशक्यं सर्वमिति वचनात् स्वार्थक्रियां स्वयमेवात्मनैव नियतां कुर्वन् सौगतः कथमनुन्मत्तः स्यात्॥
स्वार्थपरविरुद्धवचनत्वान्मदिराघूर्णमानवत्॥ अत्राचार्य आह॥ नोत्तरकार्योत्पत्तिलक्षणार्थक्रियाभावलक्षणं विधानात्॥ न त्वन्यस्य लक्षणं भवत्व
तिप्रसङ्गात्॥ तस्मात्संवित्तेः स्वसंविदितात्मतयात्मलाभोऽर्थक्रियेत्याह॥ स्वप्नादिष्वर्थेन स्वसंवेदनमस्त्येव परमार्थस्वप्ने॥ तस्य परिणत्यला
भः सैव तन्मात्रं नोत्तरकार्यं तेनैवार्थक्रियाविषयेऽपि पुरुषादेरनन्यतेऽपि कथं निरपेक्षता हि तेन गवाद्याद्यादिभिर्व्यवहारः कथं संवित्तेरपि कथमपि-
तिसमानं॥ तत्रायं मिथ्येति चेन्नेतरत्र समानमित्याह॥ मिथ्येत्यादि मिथ्याभ्रान्तो योऽनगत्वाभासिव्यवहारसंवादविषये कथं तु स्यात्॥ तत्त्व
नित्यक्षणिकपक्षयोः कापि रर्थक्रियेति कुतः साकारमन्यदात्मानं न तथाभावस्यान्॥ अत्युक्तं तत्र न च प्यपि दूषणमाह॥ संवित्तिरित्यादि संवित्ते
रर्थाकारतानयाभेदेऽपि निरंशत्वेऽपि विषयाकारस्यैव नीलाद्याकारस्यैव विषयसाधनत्वं नीलादिविषयाकारस्यैव तत्साधनत्वात्॥ नाभेदेऽपि द
येतोविकल्पोऽर्थक्रियैव वा स्वप्रकाशो भिन्नप्रकमो नेत्यस्यानन्तरं दूष्यः॥ वा शब्दश्चार्थस्तनो वा नार्थः संपन्नो भेदश्चेकत्वेऽपि नैव विरुध्येत कारोऽपि॥
क्रियानिकायः पूर्वाकारवारित्या गाजतद्दृनोन एकारगमनांके वेत्यादिविक्रियैवाविधान [illegible] क्रिया कारणं सैव अविक्रियेवैति क्वचिद्
रूपायमर्थोऽविकारोऽपि न विरुध्येतेति॥ परमार्थैकत्वेऽपीत्यादिना विक्रियैवेत्येतद्दर्शयति [illegible] सुगमत्वात् परमार्थैकत्वेऽप्यभिन्नस्वभावत्वे
पि कल्पितं कथं भवत्यानेकार्थक्रियाकारित्वं भिन्नकार्यैर्नीलादिलक्षणक्रियापरिच्छित्तिलक्षणकारणं कुतोऽपि मिथ्याव्यवहारभेदात्॥ मिथ्या कल्प-
नाकल्पितोऽव्यवहारो नीलाद्याकारव्यावृत्त्या नीलाद्याकारसामान्यपरिकल्पनलक्षणस्य भेदान्नानात्वात्॥ एतदुक्तं भवति यदेव तत्त्वार्थसमी
नव्यावृत्त्या नीलाकारं स तत्परिच्छेदकं तदेव पीताद्व्यावृत्त्या पीताद्याकारं सत्पीतादेः परिच्छेदकमिति तत्त्वैकं किं कुर्वदित्याह॥ पनिभासानी

न्या·कु·चं· लाद्याकारः। नन्वं जीवादिभेदाभेदात्मकं साधयंति। कथं भ्रांताः परस्परं पर्यायविविदिनोन्योन्यार्थग्राहिणः तथा हि पटस्य प्रतिभासो नीलं संवेदनिय
१६३ रूपपीतं रक्तं शुक्लं तथा यस्य पीतं स एव नीलं रक्तं शुक्लमेव तत्रान्यत्रापि योज्यं॥ अन्यथा युगपद्ग्रहणं नीलादिकवैचित्र्यप्रतीते रूपपत्तेरेव संवेदना
नेकार्थक्रियाकारित्वप्रसक्तं॥ अतः सिद्धो वर्तमानार्थग्राही प्रतिभासोऽतीतानागतार्थग्राही ॥ तत्र वर्तमानार्थग्राहकः स्वव्यापकत्वा
नोपलब्धः परिवर्तमानग्रहणया प्रतीतमनागतं च नोर्द्दिनदर्शनमेव स्यात्॥ न ग्रहणयात्वत्वात्प्रसिद्धवर्तमानवर्तितत्वनिरस्तं॥
नीलादिग्रहणयात्वस्य पीतादेरपि नीलादित्वप्रसंगात्॥ तथा हि पीतादिकं नीलं नीलग्रहणयात्वात् अभिमतनीलवत्॥ प्रमाणबाधन
मुभयत्र तुल्यं एवं तावद्भेदात्मकमनुमेयं कांताचांतरीयकं दर्शयित्वा प्रमाणं योगाचारमतं न चांतरीयकं दर्शयन्नाह॥ श्लोकः॥ मिथ्येतरात्मकं
दृश्याद्दृश्यमेवेत्तदात्मकं। चित्तं सदसदात्मैकं तत्त्वं साधयति स्वतः॥१॥ बहिर्घटाद्याकारतया हि ज्ञानं मिथ्या तदेव स्वाकारतया तु सत्यमित्य
वेतावता नीरस्तु नरं मिथ्येतरात्मकमिति मिथ्याचेतरच्च स्वात्मा यस्य तत्तथोक्तं ग्राह्याकारतया तु सत्यमित्येवं तावन्नु मिथ्येतरं मिथ्येतरात्मक
मिति मिथ्याचेतरच्च स्वात्मा यस्य तत्तथोक्तं ग्राह्याकारतया विवेकः पश्चात्तु नास्ति अन्यनिभासमानेऽपि न प्रतिभासते॥ भ्रांतं भ्रांतमित्यपरे
ग्राह्यग्राहकसंवेदनात्मकत्वादेकात्मकं तदित्यपि नान्वनीदमाह॥ दृश्यादृश्यभेदेन नानात्मकं किं न चित्तं ज्ञानं कर्तृ एवं तत्त्वं जीवादिसदसदा
त्मकं भावेन रूपं साधयति॥ स्वतः स्वात्मनैव निकारिकां ग्रहणं ये न्याहुः चित्तं निर्भासित्वद्वत्यादि चित्तः ज्ञानवतो मिथ्येतरादिस्वभावापत्तयो नि
र्भासः स यस्यास्ति तस्य नन्वं स्वरूपं कस्यापि भागज्ञानस्य रूपं उपलभ्यं परिकल्पितापि न केवलमक्रमेणास्य सदसदात्मकं विवर्तनं तत्त्व
मिति संबंधः उक्तार्थोपसंहारमाह॥ नन्वित्यादि यत एवं तत्तस्मात् सिद्धं निश्चितं द्रव्यपर्यायात्मकं वस्तुतत्त्वं प्रमेयं पुनः किं विशिष्टं उत्पाद १६३
व्ययध्रौव्ययुक्तं कथं नर्वादिस्वान्तरूपाद्व्ययध्रौव्ययुक्तत्वे न जीवादिवस्तुनः सत्त्वप्रसंगः स्यात् खरविषाणादिवत् तत्त्वेन भवितव्यमेवं वा
नवस्यास्तु तत्त्वसत्त्वे वस्तुनोऽपि सत्त्वमेव सत्त्वमस्तु अवलंबनाद्योगात्सत्त्वकल्पनेऽपि त्यप्यसमीचीनं॥ यतः सकलशून्यतावस्तुनोऽन्यतः सत्त्वं वाच्यमिवे

त्यैवं पर्य्यनुयुज्येत। तत्राद्यः पक्षोऽयुक्तः सकलशून्यतायाः प्रागेव प्रपंचतो निरस्तत्वात्॥ द्वितीयपक्षेप्यनुत्पादादेरन्यतः सत्तासंबंधादर्थक्रियात

त्त्वकारित्वात्तत्करणयोग्यतातः प्रमाणसंबंधाद्वा वस्तुनः सत्त्वं स्यात्। तत्र न तावत्सत्तासंबंधाद्व्यापकत्वात् तस्य सामान्यविशेषसमवायेष्वसत्ता स्थिता_स॰पु

संबंधाभावेपि सत्त्वं संभवत्येवानवस्थाभावेपि प्रसज्यतेनव्याप्यं॥ प्रयासत्ताभावेपि भवत्सत्त्वाभावेनव्याप्यः सत्तासंबंधाभावेपि भवति वस्तु सामान्यादिवत्

त्त्वमिति। न च साधनविकलो दृष्टांतस्तत्संबंधाभावेपि परैस्तत्र सत्त्वस्याभ्युपगमात्। न खलु संबंधायोगेः सामान्यादीनां सत्त्वमिष्टं किं तु पदार्थेषु सत्करी सत्ता

सनेकत्वेनव्यापीतानुषंगात्। न च तत्सत्त्वाद्द्रव्यादिसत्त्वं विलक्षणमतत्स्वेदवसत्तासंबंधनिबंधनं नान्यदित्यभिधातव्यं। यतः किमिदं तत्सत्त्वस्य वैल

क्षण्यं नाम विलक्षणप्रत्ययत्वं न यावता द्वयोरपि प्रतीत्यभावात्॥ न खलु यथागवादिभ्यो महिष्यादेर्विलक्षणप्रत्ययस्तथा प्रतिप्राणिप्रतिपत्तिः प्रतीतिः स॰पु

प्रसिद्धा तथा द्रव्यादिसत्त्वात् सामान्यादिसत्त्वस्यापि भवतस्तु तथा प्रतीतिः स्वसिद्धांताभिनिवेशनिबंधना न वस्तुदर्शनबलप्रभवा, प्रधानादेः पुरु

षाद्वैतरूपताप्रतीतिवत्॥ द्वितीयविकल्पोप्ययुक्तःप्यबाधितत्वस्योभयत्राप्यविशेषात्। न हि सामान्यादिसत्त्ववद् द्रव्यादिसत्त्वं केनचित्प्रमाणेन बा

ध्यते तस्यासत्त्वप्रसंगात्॥ अथ गौणत्वं सामान्यादिसत्त्वस्य द्रव्यादिसत्त्वान्न वैलक्षण्यं; न गौणत्वमेवास्य कुतः सिद्धं? भिन्नविशेषणत्वाभावाद्वे

न्नहि यथा द्रव्यादौ सत्तालक्षणभिन्नविशेषणनिमित्तं सत्त्वं न तथा सामान्यादौ न चाभिन्नविशेषणस्य मुख्यत्वं युक्तं सत्ताविशेषणानां मुख्यत्वं भिन्न भिन्न॰ स॰पु

विशेषणानां गौणत्वमित्यभिधानादित्यसदन्योन्याश्रयप्रसंगात्॥ सिद्धे हि सामान्यादिसत्त्वस्य सत्तालक्षणभिन्नविशेषणनिबंधनत्वाभावे गौणत्व

सिद्धिस्तत्सिद्धौ च तन्निबंधनत्वाभावसिद्धिरिति। एतेन द्रव्यादौ सत्त्वस्य मुख्यत्वमपि चिंतितमितरेतराश्रयाविशेषात्। तथाहि। सिद्धे द्रव्यादौ सत्त्व-

स्य मुख्यत्वे सत्तालक्षणभिन्नविशेषणनिबंधनत्वसिद्धिस्तत्सिद्धौ च तन्मुख्यत्वसिद्धिरिति॥ न च कश्चिद्वादिनः स्वरूपनिबंधनं सत्त्वमुपचरि

तमपरोपाधिभूतसत्तानिबंधनं तु मुख्यमिति मन्यते। नहि यदेवोपचरितं तदपेक्षं तु मुख्यमिति विपरीतं वान्यमन्यते॥ किंच सत्ता स्वयं सती अन्यस्य

सत्त्वहेतुः स्यादसती वा। यद्यसती कथं स्वसंबंधेनान्यस्य सत्त्वहेतुः? प्रदसत्त्व तत्त्वसंबंधेनान्यस्य सत्त्वहेतुर्यथा खरविषाणमसतीवत्त्वेनेति। अथ सती

१ विलक्षणप्रत्ययविषयत्वं, अबाधितत्वं, गौणत्वं वा। २ प्रथमविकल्पो ह्ययुक्तः।

न्विस्वतः सत्तांतरसंबंधाद्वा।। यदि स्वतस्तर्हि वस्तुनोपि स्वत एव सत्त्वमस्तु किं तत्संबंधात्सत्त्वकल्पनाप्रयासेनापत्सत्त्वात्मभूतेनैव सत्त्वेन यथा
सामान्यविशेषसमवायाः संति चद्रव्यादौ नैति।। अथ सत्तांतरसंबंधात्तदानवस्था।। ननु चानवस्था या बाधिकायाः सदृशा चेद्वसामान्यविशेषव
समवायेषु स्वतः सत्त्वमिष्यते।। द्रव्यादौ तु परतस्तत्रेतरभावात् न च खलु द्रव्यादौ परतः सत्त्वेनैवस्थावतरति। एतेनोक्तौ हि द्रव्यादीनां सत्त्वं सत्तायास्तु
स्वतः इति निरस्तं व्यभिचारितरकणीयं द्रव्यादीनामपि परतः सत्त्वे यत्सत्त्वात्मभूतेनैव सत्त्वेनेत्याद्यनुमानबाधस्य प्रतिपादितत्वात्।। अनिष्टसं-
गेवैयर्थ्यबाधकप्रकोत्केश्च।। तथाहि। स्वरूपेण सतः सत्तासंबंधात्सत्त्वं स्यादसतो वा तु नावदसतो निषेधं गात्। यत्स्वरूपेण सन्न तत्र सत्तासंबं
धत्वसंबंधात्सत्त्वं वा प्रयागमने दीवरे स्वरूपेण सत्कोपैरिदं द्रव्यादिस्यादनुमानबाधप्रसंगात्।। अथ स्वरूपेण सतस्तर्हि सत्तासंबंधवैयर्थ्यं
पत्त्वर्यं सन्नत असत्तासंबंधात्सत्त्वं। यथा सन्नयां। स्वयं सकलं सत्तासंबंधात्प्रागपि सकलं वस्त्विति। स्वयं सतोपि तत्संबंधात्सत्त्वकल्पने सत्तायाः
मपि तत्कल्पनप्रसंगात्त्वेवानवस्था।। अथ न तत्र स्वयं सत्त्वं किंतु सत्तासंबंधे एव ननु किं तयैव सत्तायाः संबंधात्स्वसत्त्वं स्यात्तदंतरेण वा यदि तन
यैव तदान्योन्याश्रयः सिद्धे हि तस्याः सत्त्वे सतया संबंधसिद्धिस्तत्सिद्धौ च सत्त्वसिद्धिरिति तदंतरेण तत्सत्त्वसिद्धौ वानवस्था।। तथाहि सत्तांतरेणापि सं
बंधो वस्तुनः सत्त्वसिद्धसिद्धेन।। तत्सत्त्वसिद्धिश्चापरसत्तांतरेण संबंधादिति।। तन्नार्थांतरभूतसत्तासंबंधात्सत्त्वमर्थानां घटतेनाप्यर्थक्रियात
स्तेभ्योभिन्नत्वात्तस्याः। यदर्थोभिन्नं तन्न तेषां सत्त्वं सिद्धाति।। यथा घटात्सद्रस्यार्थेभ्योभिन्नाचार्थक्रियेति।। तथार्थेभ्यो सा भिन्नत्वमसिद्धं द्रव्यो-
त्तरकालभाविवेनासात्तन्तोभेदप्रसिद्धेः।। इदं वै सिद्धस्य हि भावो घटस्य कुविदर्थक्रियायां व्याप्रियते।। अन्यो ना अपसिद्धे हि पूर्वं तेन यत्स्य सत्त्वे उत्तर-
कालभाविन्याः सत्याः सिद्धिस्तत्सिद्धौ च तथाविधस्यार्थस्य सत्त्वसिद्धिरिति।। एतेनार्थक्रियाकारित्वात्सत्त्वं चेत् यावस्थानं यतोर्थक्रियाकारित्वमर्थक्रि १४४
याहेतुत्वमुच्यते।। न च सत्ता एवं युक्तमित्यन्योन्याश्रयः सिद्धे हि सत्त्वे अर्थक्रियाकारित्वसिद्धिस्तस्याश्च सत्त्वसिद्धिरिति।। निरन्वयविनाशित्वे चार्थानामर्थ
क्रियाकारित्वं प्रपंचतः प्राक्षेव प्रत्युक्तं।। तत्करणयोग्यताप्येतेन प्रतिव्यूढा प्रतिक्षणविनाशिन्यार्थक्रियाकारित्वासंभवे करणयोग्यतायानिराकृतम

संभवान्। किंचार्थक्रियादिकं स्वयं स्तरन्यस्य सत्वहेतुरसद्वा प्रसद्ध्येपि सत्वासत्वयोर्नैकदेशाद्यस्याः तन्नार्थक्रियादेरप्यसत्वसिद्धिः नापि
प्रमाणसंबंधात्। भाववदभावेपि प्रतियोगित्वात्। ततस्तस्याभावस्यापि
संबंधेन सत्वं चोच्यते॥ स एव सत्ताख्यः कथमेवं प्रमाणसंबंधः सत्वलक्षणं॥ किंच प्रतिरिक्तसंबंधा स्यात् तदासावनवस्थितं तत्संबंधेनैवार्थानां
सत्वकल्पनावैयर्थ्यप्रसंगात्। परस्परमपि अप्रमाणसंबंधात् तत्वं सत्वं च प्रमाणसंबंधरति॥ किंच तत्संबंधः स्वयं सन्नसन्वा यद्यसन् कथं
तत्संबंधात्कस्यचित्सत्वमतिप्रसंगात्। अथ सन् स्वयं किं स्वतः अपरप्रमाणसंबंधादन्यतो वा कुतश्चित्॥ यदि स्वतः पदार्थैः किमपराद्धं येन तेषां स्व
तः सत्वं नेष्यते॥ अपरप्रमाणसंबंधात् तत्सत्वे तत्रैवस्यात्। अन्यतोपि प्रमेयसंबंधान्निमित्तात् तद्वा तत्सत्वं स्यात्॥ यदि प्रमेयसंबंधादितरेतराश्रयः॥
अथ निमित्तांतरात् तर्हि सर्वत्र तस्यैवाव्यभिचारिणः सत्वहेतुत्वमस्तु॥ किं प्रमाणसंबंधकल्पनया तत्तोन्यपादत्वे किंकार्यकोन्यान्यद्भवितुमर्ह
ति। किंच सिद्धे प्रमातारि सत्वे प्रमाणेन तत्संबंधेनार्थानां सत्वसिद्धिपूर्विका॥ तत्सिद्धिश्चेद्धि प्रार्थसंबंधादिसामग्रीतो भविष्यति। एवं चक्रकप्रसंगः त
था हि। सिद्धे प्रमात्रादिप्रमाणेन तत्संबंधेनार्थानां सत्वसिद्धिः तत्सिद्धौ च सत्यां तत्संबंधादिप्रमाणसामग्रीसिद्धिः तस्यां सत्यां प्रमात्रादिप्र
माणसिद्धिरिति। किंच प्रमाणसंबंधेनार्थानां सत्वं क्रियते। ज्ञाप्यते वा तन्न तावत् क्रियते तेन तत्रागप्यर्थानां लब्धात्मलाभत्वात्। पुनः प्रागपि यल्लब्धा
त्मलाभं न तस्य सत्वं तेन क्रियते। यथा पुत्रात् प्रागपि लब्धात्मलाभस्य पितुः पुत्रेण प्रमाणात्प्रागपि लब्धात्मलाभाश्चार्थाः स्वतो भवन्तीति। अथ ज्ञा
प्यते न किंचिदनिवृत्तप्रमाणसाध्यत्वात् प्रमेयव्यवस्थायाः। नहि प्रमाणमंतरेण प्रमेयव्यवस्था युक्तातिप्रसंगात्। तदेवमन्येनैव स्तुनः सत्ता ज्ञाप्यते तस्मादर्थापत्तौ स्युर्नैवा
स्य सत्वं प्रतिपत्तव्यं। न तोमात्रादयोपि वस्तु ज्ञानानि च्चामानें नेतेषामध्यक्षत्वात् दिवोनः सत्वेन भवितव्यमिति स्वन च सत्यास्यात्। तत्ताद्रात्म्येन तेषां सर्वव स्थितत्वात्॥ कुतः
पुनरस्मादायेककांतात्मकमेव वस्तु प्रमेयमित्याह॥ एकांतस्यानुपलब्धेः यतस्तेवं तत्स्यादनेकांतात्मकं दर्शयति। परिच्छेद्यार्थोपसंहारइति॥ शार्दूलविक्रीडितवृत्त
येनाशेषकुतर्कविभ्रमतमो निर्मूलमुन्मूलितं स्फारागाधकुनीतिसार्थसरितो निःशेषतः शोषिताः॥ स्याद्वादाप्रतिमप्रभूतकिरणैर्व्याप्तं जगत्सर्वतः॥ सश्री-

न्या॰कु॰चं॰ मानकलंकभानुरुदयो जीयाज्जिनेन्द्रप्रभुः ॥२॥ ॥इतिश्रीमत्प्रभाचन्द्राचार्यविरचिते न्यायकुमुदचंद्रे लघीयस्त्रयालंकारे द्वितीयः परिच्छे
दः समाप्तः ॥२॥ ॥शार्दूलविक्रीडितछन्दः॥ प्रत्यक्षं प्रतिपाद्य फलरूपफलाख्यार्थान्वितं तत्त्वतः ॥ स्पष्टार्थप्रतिपत्तिमूलमधुनाव्याख्यायते नैव कु
१५५ तं ॥ प्रामाण्यं पुनरस्य येन कुमतिध्वांतापनुत्तेः स्फुटौ निश्चेतेन तु विप्रकृष्टविषयज्ञानाय दृष्टं जलम् ॥१॥ अथेदानीं परोक्षस्वरूपप्ररूपणायाह ॥ ॥
श्लोक ॥ ज्ञानमाद्यं मतिः संज्ञा चिंता चाभिनिबोधिकं ॥ प्राङ्नामयोजनाच्छेषं श्रुतं शब्दानुयोजनात् ॥१॥ यत्प्रत्यक्षकारिकायां शेषमविशदं ज्ञानमि
त्युक्तं तत्किं श्रुतमविशदं तर्केणैव श्रुतमविशदं तर्केणेत्यभिधानात् ॥ किं पूर्वा नामयोजना ज्ञायते विचारं ज्ञानं तदेव श्रुतमुतान्यदपीत्याह ॥ प्राङ्ना
मयोजनात् नाम्नोऽभिधानस्य योजनात् पूर्वं यदुत्पद्यते वस्तुस्वरूपं ज्ञानं तच्छ्रुतं ॥ नामयोजनाजनितार्थादस्पष्टज्ञानसाधर्म्यादित्यभिप्रायः ॥ चिंताचेत्यत्र
चशब्दोऽभिप्रायक्रमः ज्ञानं शब्दानुयोजनादित्यस्यानंतरं द्रष्टव्यः ॥ तेन न केवलं नामयोजनात् पूर्वं यदस्पष्टं ज्ञानमुपजायते तदेव श्रुतं किंतु शब्दानुयोजना
दप्युत्पद्यते ॥ तदपि श्रुतमिति निरस्तं ग्रहीतं भवति ॥ किं तदित्याह संज्ञेत्यादि चिंतेत्यपर्यंतं चाद्यन्तर्भिन्नक्रमोऽभिनिबोधमतिरित्यस्यानंतरं स्यादिति स्मृत्यपार्थो
द्रष्टव्यः ॥ तेन स्मृत्यादि विचारं ज्ञानं श्रुतमित्युक्तं भवति ॥ इंद्रियप्रभवमतिज्ञानं तु देशतो विशदत्वसंभवात् सांव्यवहारिकं प्रत्यक्षमित्युक्तं ॥ तस्य श्रुत
स्य किं कारणमित्याह ॥ ज्ञानमाद्यं कारणं किं नामेत्याह मतिरिति तत्रागमविरोधात् मतिपूर्वं श्रुतमित्यभिधानात् ॥ प्रत्यक्षप्रमाणेन फलं स्यादनंत
रमित्यनेनाधिकां कारिकां व्याख्यातुं चेष्टे ॥ अविसंवादेत्यादिना अविसंवादित्वेन विसंवादोऽस्याः सा चासौ स्मृतिश्च तस्याः कथंभूताया फलप्रकारभूता
या हेतुत्वात् प्रमाणं धारणासंस्कारः ॥ ननु स्मृतेः स्वरूपतो विषयतश्च विचार्यमाणायाः संभवत्यनुपपत्तेः कस्याविसंवादः प्राप्येत ॥ तथाहि ॥ स्मृतिज्ञान २७७
वाच्यार्थस्वरूपं ज्ञानान्तरं ज्ञानमात्रं वा तत्रापि प्रथमपक्षोऽनुपपन्नः ज्ञानान्तरज्ञानव्यतिरिक्तस्य ज्ञातुः कस्यचिदप्यसंभवात् द्वितीयपक्षेपि ज्ञानमात्रमनुभूतविष १४५
यं वा ज्ञानं तच्छब्दवाच्यं स्यात् ॥ प्रथमविकल्पे प्रत्यक्षादेरपि स्मृतिरूपतापत्तेस्तद्व्यतिरिक्तप्रमाणाभावात् प्रमाणभेदवार्तोच्छेदः स्यात् ॥ द्वितीयविकल्पेपि
देवदत्तानुभूते यज्ञदत्तस्य स्मृतिज्ञानस्य स्मृतित्वप्रसक्तिः ॥ अथ येनैव पुरुषेण पूर्वमनुभूतं वस्तु पुनः कालांतरे तस्यैव तत्रैवोपजायमानं ज्ञानं स

निरित्युच्यते॥ तद्युक्तिमात्रं प्रायेणाहियमाणस्यापि स्मृतित्वप्रसंगादुक्तक्रियायाश्च बाध्यविकलत्वात्॥ किंचानुभूते ज्ञाते यथार्थमित्येतत्
तर्केण यत्स्वयमेवानुभवेन स्मृत्योर्भाव्यं वा ननु तावदनुभवैस्तत्काले स्मृतेरेवासंभवात्॥ न चासौ विषयीकर्तुं शक्या निष्प्रसंगात्। यदसन्न तद्वि
षयीकर्तुं शक्यं॥ यथा खपुष्पविषाणमसती चानुभवकाले स्मृतिरिति॥ न चाविषयीकृतेनार्थेनोपस्थापनं रतिप्रत्येतुं शक्यमिति प्रशक्तेरेव॥ यद्यत्र येन
न विषयीक्रियते तेन तस्य न तु न चोपस्थापनं रतिप्रतीतिर्युक्ता॥ यथा सुखेनाविषयीकृतेन नीलसुखादिविषये ज्ञायस्य सुखरूपस्य स्वयं तु भवेनाविषयीकृता
चातीतार्थस्मृतिरिति तेनानुभवेन तथा प्रतीतिः। नापि स्मृतेरनुभवार्थयोरविषयीकरणेऽनुभूतेऽस्मृतत्वेन तथात्वे तु भवात्वात्॥ यदि चानुभूतता
यत्तद्रूपत्वात् तदा स्मृतिरसिद्धा नैव यदनुभूतेऽनुभवात्मकेऽनुभवानुसारित्वात् तस्याः न चासौ तत्संगत्यानुभूयमानतामात्र एवास्य पर्यवसानात्।
तन्न स्मृत्यापि तत्प्रतीतिर्नाप्यनुभवानुभवे सति सिद्धरूपत्वप्रसंगात्॥ तन्न स्मृतिः स्वरूपतो विचार्यमाणा नष्टेनापि विषयतः स्वाश्रिविष
योर्थमात्र अनुभूततावििशेषार्थीनता वर्थमात्रं सकलप्रमाणानां स्मृतित्वप्रसंगात्॥ नाप्यनुभूततावििशेषेन तदनुभूतेर्थेषु तत्र तज्ज्ञानस्य प्रा
माण्यहिविज्ञानस्य च स्मृतित्वप्रसंगापातत्वात्। अनुभूतार्थविषयत्वे चास्याः प्रामाण्यं न स्यात् विद्यमानविषयत्वात्। यदर्थिमान न विद्यमानविषयं न द
तत्प्रमाणं यथा केशाकाशज्ञानं भविष्यमानविषयं चानुभूतार्थविषयं तथाभिधेयं स्मरणमात्रमिति॥ तथापि धर्म्यास्य प्रामाण्येऽतिप्रसंगो।
किंचार्थक्रियार्थिनामर्थक्रियासमर्थार्थप्रापकं प्रमाणं प्रसिद्धं न च स्मृतावतदर्थविषयत्वेनेतत् संभवत्यतः कथमसौ प्रमाणमिति॥ अत्र प्रतिवि
धीयते यत्तावदुक्तं ज्ञानान्तरं चेत्यादि॥ तदसमीचीनं॥ ज्ञानं स्मृतिवन्मिति शाब्दवाच्यत्वप्रतिज्ञानात्। न चैवं संदिग्धस्य स्मृतित्वमनुपपत्तेनात्। न
त्वस्य ज्ञानमात्रप्रयुक्तत्वाभावात्॥ ज्ञानविशेषस्य कारणविशेषसंस्कारविशेषप्रभवत्वादित्यात्कारणेनानुभूतार्थविषयः स्मृतिरित्युच्यते॥ स चेतरज्ञानेभ्यः
कारणस्वरूपविषयभेदाद्भिद्यते॥ तत्र कारणभेदः स्मृतेः पूर्वानुभवसंस्कारकारणकत्वात्॥ प्रत्यक्षादीनां च चक्षुरादिहेतुकत्वात् स्वरूपभेदः स्मृते
स्तदित्युल्लेखित्वात् प्रत्यक्षादीनां चेदमित्याद्युल्लेखित्वात् विषयभेदोपि स्मृतेरनुभूतार्थगोचरत्वात् प्रत्यक्षादीनां चावर्तमानाद्यर्थविषयत्वात्। पिरप्यु

न्या॰ कु॰ चं॰
१७६

कमनुभूते स्मृतिरित्येतन्नानुभवेन स्मृतो गौणं वा प्रमेयतया इति ॥ न वाप्यनन्तलनयो विलक्षितं ॥ त्रिकालानुयायि नाप्रमातानवसीतेर्कर्तु
१७६ शक्यत्वात् ॥ एवं नैर ज्ञानव्यतिरिक्तो न कश्चित्प्रमाता स्यात् युक्तं तद्व्यतिरिक्तस्यास्य संतानेननिषेधावसेयप्रपंचतः प्रत्ताधिनत्वात् ॥ नन्वेवं प्रमाणत्वप्रस
ङ्गोऽर्थेऽनुभूयमानतानुभवेनुभूतत्वानुभवेऽपि स्यात् तस्य च्छाविशेषानपाय गृहीतग्राहित्वात् स्मृतेर्न्न प्रामाण्यमित्यप्यसङ्गीतकालनिबंधनत
यानुभूयमानताकाले नुभूततायाः संभवाभावान्न मानत्व सद्भावमात्रस्य नत्वानि पतिं प्रत्यचंगा त्वस्मृतीन सहायोऽप्यमानार्थोऽनुभूतांश्च तिपद्येत ॥
प्रमरूपत्वादपर्वात्तुभूयमानतापिति ॥ एवं कारणस्वरूपविषयभेदेनाध्यक्षादिभ्यः स्मृतेर्भेदसंभवेऽप्यप्रामाण्ये कारणं नकथ्यं ॥ नच गृहीतार्थग्रा
हित्वं परिच्छित्तिविशेषाभावोऽस्त्यमितेर्थ प्रवर्तमानत्वात् अर्थाद्यनुल्पयमानत्वं विसंवादकत्वं समारोपाव्यवच्छेदकत्वं प्रयोजनासाधकत्वं वा
स्यात् ॥ प्रथमपक्षे कस्य गृहीतस्यार्थस्य स्मृत्या ग्रहणं ज्ञानस्य ज्ञेयस्य ज्ञानविशिष्टस्य ज्ञेयस्य न हि विशेषस्य वा ज्ञानस्यानानाव ज्ञानस्य तत्त्वानि रि
क्तेष स्य स्मृतौ प्रतिभासनात् ॥ अथ ज्ञेयस्य अनुमानेन तथाप्यधिगतार्थाधिगममात्रेण स्मृतेर्न्नैवाप्रामाण्यमनुमानेनाधिगतेऽग्नौ नदुत्तरकाल
भाविनोऽप्यध्यक्षस्याप्रामाण्यप्रसंगात् ॥ प्रत्यभिज्ञानानुमानयोरपि केनचिद्विशेषेणाधिगतार्थाधिगमसंभवेन प्रामाण्यानुषंगाच्च ॥ अथाधिगतार्था
धिगमेऽप्यनाहृत्य विस्मृतप्रयोशस्याधिगमसंभवात्प्रामाण्यं कथमेवं स्मृतेरप्रामाण्यं तत्रापि हि वर्तमानकालावच्छेदेनाधिगतस्यार्थस्यातीतका
लावच्छेदेनाधिगतेरपूर्वार्थाधिगमोपपत्तेः प्रयोगः स्मृतिः प्रमाणं प्रमाणांतरप्रतिपन्नेऽप्यर्थे केनचिदंशेनापूर्वार्थपरिच्छेदकत्वादापुमानवा
विधंतत्प्रमाणं यथानुमानाद्यधिगतार्थे प्रत्यक्षादिस्तथा च स्मरणं तस्मात्प्रमाणमिति ॥ एतेन ज्ञानविशिष्टस्य ज्ञेयस्यापि पक्षः प्रत्युक्तः प्रामाण्यस्याद्य
व्युपपत्तेः ॥ किं चेदं ज्ञेयस्य ज्ञानविशिष्टत्वं तत्र संयोगः समवायो विशेषणीभावो वा ॥ न तावदाद्यद्वयमनुपपन्नं ज्ञेये ज्ञानस्याद्रव्यतया संयोगाभावेन ॥ आत्म १७६
निसमवेतनतयाच समवायस्यानुपपत्तेः ॥ न तृतीयो विशेषणीभावोऽपि द्वयोः सम्बन्धतन्त्र प्रवृत्तेरन्यत्र खलु दंडपुरुषयोः संयोगादिसंबंधानेषस्य तदभावो द्वयोः
तेषविशिष्टज्ञानपरूपस्तुपुनस्तदर्थविभासस्य स्मृतौ स्वप्नेऽप्यसंभवात् नहि ज्ञानं निर्विशेषणं वास्मृतौ प्रतिभासमानं केनचिदिष्टं ॥ नहि चैतदनुवर्ततं तन्त

प्रयोजन ख॰ पु॰
अगृहीतार्था ख॰ पु॰
त्वात्,
यार्थस्यायं

२

१ प्रत्यक्षादि ख॰ पु॰ । २ अविकल्पात् ख॰ पु॰ ।

ज्ञेयत्वम् ...

तिभासप्रतीतेः। तन्नगृहीतग्राहित्वात्स्मृतेरप्रामाण्यं प्रमाणान्तरेपि परिच्छिन्नविशेषाभावात्॥ निश्चितमवनिनाधीतार्थे तस्याः सद्भावेपि सद्भावात्। नाप्य
सत्यर्थे प्रवर्तमानत्वात्। यतोऽतीतस्यार्थस्य काले सत्त्वं स्मृतिकाले वा॥ न तावत्तत्काले तदा तस्य विद्यमानत्वात्। स्मृतिकाले तु नष्टात्तस्यासत्त्वं
नाप्रामाण्यं प्रसंगे प्रसक्तस्याप्यप्रामाण्यप्रसक्तेः स्वकालेनार्थस्यापि सत्ताविशेषात्॥ नहि प्रत्यक्षस्याप्यर्थः प्रत्यक्षकाले सोऽस्ति गतेः सत्तेनाभ्यु
पगम्यते भिन्नकालं कथं ग्राह्यमिति चेद्ग्राह्यतां विदुः॥ हेतुत्वमेव युक्तिज्ञास्तदाकारार्पणक्षमं॥ इत्यस्याविरोधानुषंगात्। अतः प्रत्यक्षस्यापि
सति प्रवर्तनादप्रामाण्यं स्यात्॥ अर्थादनुत्पद्यमानत्वं चाप्यदेशविशिष्टं ज्ञानं प्रत्यक्षेऽर्थकारणत्वस्यानिराकरिष्यमाणत्वात्। विसंवादकत्वं च
स्मृतेरसिद्धं स्वयमतिपन्ने वस्तुवि संवादकत्वात्तस्याः। यत्र त्वविसंवादकं तत्र न प्रामाण्यं॥ यथा प्रत्यक्षाद्यर्थे प्रत्यक्षादिरविसंवादिका च स्वयमनिपन्ने
र्थे स्मृतिरिति॥ अविसंवादो हि गृहीतार्थप्राप्तिः प्रमाणान्तरप्रवृत्तिर्वा स्यात्॥ सा हि द्विविधापि स्मृतिप्रतिपन्ने स्वयं प्रतिबन्ध्याद्यर्थे स्त्येव॥ यत्र तु
विसंवादः सा स्मृत्याभासा प्रत्यक्षाभासवत्॥ समारोपव्यवच्छेदकत्वान्न स्मृतेः प्रामाण्यमित्यप्यसमीचीनं॥ तद्दृष्टेऽर्थे विपरीतारोपान
नुप्रवेशात्तस्य तद्व्यवच्छेदासंभवात्॥ यत्र समारोपव्यवच्छेदकं तत्प्रमाणं यथानुमानं समारोपव्यवच्छेदिका च स्वप्रतिपन्नेऽर्थे स्मृतिरिति॥ प्रयो
जनाप्रसाधकत्वात्स्मृतेरप्रामाण्यमित्यप्यसंदर्शं अनुमानप्रवर्तनलक्षणस्य तत्साध्यप्रयोजनस्य सद्भावात्। न हि साध्यप्रतिबद्धाद्धेतोः प्र
वर्तितोसाध्यप्रतिबंधश्च संबंधमात्रेण तत्प्रवर्तते संबंधपरिज्ञानः सन् स्मृति क्रोडीकृते वा॥ प्रथमपक्षे नालिकेरद्वीपायातस्यापि प्रत्यग्निधूमसं
बंधस्यापि धूमदर्शनादग्निप्रतिपत्तिः स्यात्। द्वितीयपक्षे तु बालावस्थायां प्रतिपन्नाग्निधूमसंबंधस्य पुनर्वृद्धावस्थायां विस्मृततत्संबंधस्यापि
धूमदर्शनादग्निप्रतिपत्तिप्रसंगः। तृतीयपक्षे तु कथं स्मृतेः प्रामाण्यप्रतिषेधोऽनुमानप्रवर्तकत्वात्॥ यद्ज्ञानमनुमानप्रवर्तकं तत्प्रमाणं यथा
प्रत्यक्षं तथा च स्मरणं तस्मात्प्रमाणमिति॥ तदेवं स्मृतेः कारणस्वरूपविषयभेदात्प्रत्यक्षादिभ्यो भेदप्रसिद्धेः॥ स्वविषयेऽविसंवादप्रसिद्धेश्च स
कर्माविसंवादस्मृतेः फलस्य हेतुत्वात्प्रमाणं पारोक्ष्येति॥ छ॥ तथा स्मृतेः प्रमाणमविसंवादकत्वाद्धेतुत्वात्॥ अस्याः पर्यायमाह॥ प्रत्यवमर्शी

स्यात्स एवायमनेन सदृशो ऽयमिति। एवमेकत्वसादृश्याभ्यां पदार्थानां संकलनं प्रत्यवमर्शः॥ ननु प्रमाणस्वरूपायास्तस्याः प्रत्यभिज्ञायाः स्वरूपम-
नुपपन्नं। विरुद्धधर्म्माध्यासतः कारणाभावाच्चास्याः स्वरूपस्यैवासंभवात्॥ विषयाभावतः प्रमाणत्वानुपपत्तेश्च॥ तथा हि। पूर्वं ज्ञातस्य पुनः
कालान्तरे स एवायमित्यादिज्ञानं प्रत्यभिज्ञानं। न चास्या एकत्वं युक्तं विरुद्धधर्म्माध्यासात्॥ यत्र विरुद्धधर्म्माध्यासो न तन्नैकं॥ यथा जलानला-
दौ विरुद्धधर्म्माध्यासश्च प्रत्यभिज्ञायामिति न चायमसिद्धः॥ स्पष्टेतररूपाकारानन्यप्रतिभासनात्तत्सिद्धेः॥ तथा हि॥ स इत्याकारः स्मरणरूप-
तया प्रत्यभिज्ञायाः अस्पष्टो ऽयमिति बोध्य स्पष्टरूपत्वात्स्पष्टः; न चास्पष्टेतररूपविरुद्धधर्म्माध्यासे ऽप्यभेदो युक्तः प्रत्यक्षानुमानयोर-
प्यभेदप्रसक्तेः। किंच स एवायमित्याकारद्वयं किं तत्परस्परानुप्रवेशेन, आहोस्विदननुप्रवेशेन? प्रथमपक्षे ऽन्यतराकारस्यैव प्रतिभासः स्यात्, द्वितीयाकारस्य त-
नोविविक्तस्वरूपत्वात्, यतो ऽविविक्तस्वरूपं न तत्केनाप्यभेदेन प्रतिभासते॥ यथा तस्यैव स्वरूपमेकस्मादाकारादविविक्तस्वरूपं च द्वितीया-
कारस्वरूपमिति। द्वितीयपक्षे तु परस्परविभिन्नप्रतिभासद्वयप्रसंगो ऽन्योन्याननुप्रवेशेनाकारद्वयस्यावस्थानात्॥ ययोरन्योन्याननुप्रवे-
शेनावस्थानं तयोः परस्परविभिन्नप्रतिभासो यथा घटपटयोः अन्योन्याननुप्रवेशेनावस्थानं च स एवायमित्याकारद्वयस्येति न च प्रतिभा-
सद्वयमेकाधिकरणमेवमस्त्विति अभिधातव्यं॥ घटे ऽस्ति पटे ऽस्त्याकारयोः प्रतिभासयोरेकाधिकरणत्वानुपपत्तेरन्यथा सर्वत्र विसंवादानामेकाधिकरण-
त्वप्रसक्तेः पुरुषाद्वैतसिद्धिः स्यात्॥ ततो विरुद्धधर्म्माध्यासान्नैकमिदं ज्ञानमभ्युपगन्तव्यम्। अतः कथं प्रत्यभिज्ञानं संभवः कारणाभावाच्च। तथा
हि। न तत्कारणमिन्द्रियं पूर्वानुभवजनितसंस्कारस्तदुभयं वा। न तावदिन्द्रियं तस्य वर्तमानार्थविषयज्ञानजनकत्वात्॥ नापि संस्कारस्तस्य स्मरण-
कारणत्वात्। नाप्युभयमुभयपक्षदोषानुषंगात्। न च कारणान्तरमुपलभ्यते॥ तन्न प्रत्यभिज्ञानसंभवः। अस्तु वा तथापि न तत्प्रमाणं विषयाभावात्।
तस्य हि विषयः पूर्वज्ञाने प्रतिभातमेव वस्तु तदतिरिक्तं वा? तत्राद्यविकल्पे न तत्प्रमाणं गृहीतग्राहित्वात् स्मरणवत्। द्वितीयविकल्पे ऽपि
किं तत्तस्यातिरिक्तस्वरूपभेदः कालद्वयसंबन्धकृतस्तत्संबन्धे ऽप्येकप्रतिपत्तिकृतो वा यदि स्वसंबन्धकृतस्तदा ज्ञानवद्वयस्यापि प्रतिरूपणं स्व

रूपभेदप्रसिद्धेः सौगतमतप्रवेशोऽथ कालद्वयसंबंधकृतस्तदप्ययुक्तं । तत्संबंधस्यार्थभेदेप्युपपद्यमानत्वात् ॥ नहि लूनपुनर्जातन
खकेशाद्यर्थभेदे कालद्वयसंबंधोऽसिद्धः ॥ अथ कालद्वयसंबंधिदेवदत्तस्यैकस्य प्रतीयतेऽतः पूर्वज्ञाने प्रतिभातस्य वस्तुनः प्रत्यभिज्ञानेना
धिकार्थग्रहणान्न गृहीतग्राहित्वेनाप्रामाण्यमित्यभिधीयते ॥ तदप्यभिधानमात्रं यतः किमिदमेकत्वं नाम एकत्वसंख्या स्थायित्वं वा यद्ये
कत्वसंख्या तदा सा पूर्वमेव प्रतिपन्नत्वात्कथमाधिक्यपरिच्छेदः प्रत्यभिज्ञया ॥ अथ स्थायित्वं तत्किं देवदत्तस्वरूपाद्भिन्नमभिन्नं वा य
द्यभिन्नं तदा तत्स्वरूपवत्तदपि पूर्वज्ञानेनैव प्रतिपन्नं ॥ यद्यतोभिन्नं तस्मिन्प्रतीयमानेन तदपि प्रतीयते ॥ यथा तस्यैव स्वरूपमभिन्नं च तत्र
त्प्रत्यभिज्ञाविषयत्वेनाभिप्रेतं वस्तुनः स्थायित्वमिति ॥ अथ भिन्नं तत्किं पूर्वमप्युत्पन्नमथ प्रत्यभिज्ञानसमयएवोत्पद्यते ॥ यदि पूर्वमप्यु
त्पन्नं तदा पूर्वज्ञानेनैवास्यापरिच्छेदात्कथं प्रत्यभिज्ञानेनाधिक्यपरिच्छेदः ॥ केनचिदंशेनाधिक्यपरिच्छेदाभ्युपगमेन वस्तुनोनप्रकृतत प्रकृत सम...
त्वसिद्धिः ॥ अथ प्रत्यभिज्ञानसमयएवोत्पद्यते तर्हि तस्य पूर्वमप्रतिपन्नात्कथं प्रत्यभिज्ञाविषयत्वं पूर्वं प्रतिपन्नस्यार्थस्य पुनः कालांतरे
गृह्यमाणस्य प्रत्यभिज्ञाविषयत्वाभ्युपगमात् ॥ पूर्वज्ञानाप्रतिपन्नार्थनिर्णयवबाधकज्ञानस्य प्रतिज्ञात्वे च घटज्ञानानंतरमाविर्भूत-
पटज्ञानस्यापि तत्त्वप्रसंगः ॥ तत्त्वमेवं स्थायित्वस्योत्पत्तौ च क्षणिकत्वानुषंगात्कथं न हि क्षणिकार्थानामक्षणिकत्वं स्यादिति ॥ यत्तत्र
विधीयते यत्तावदुक्तं ॥ विरुद्धधर्माध्यासत इत्यादि तत्र किं धर्माणां धर्मिणा सह विरोधः परस्परं वा न तावद्धर्मिणा तेषां प्रतीयमानत्वा तत्
त्पयच्च प्रतीयते ॥ न न तत्र विरुद्धं ॥ तथा चित्रज्ञानेन नीलाद्याकाराः प्रतीयंते च प्रत्यभिज्ञाने तदेवायमित्याकारद्वयं तस्मान्न तत्र विरुद्धमिति ॥
यस्तु नर्यत्र विरुद्धमिति । यत्तु नर्यत्र विरुद्धं न तत्तत्र कदाचिदप्युपलभ्यते ॥ यथा तुरंगमोत्तमांगे शृंगमुपलभ्यते च प्रत्यभिज्ञाने प्रागुक्तमा
कारद्वयमिति ॥ नच धर्मिणा सह धर्माणां विरोधो युक्तः परस्परं विरोधे तु धर्मिणः किमायातं येनास्य विरुद्धधर्माध्यासो दूषणं प्रार्थ्यते ॥ ध
विरोध र्माणां हि परस्परपरिहारस्थितिलक्षणः संभवेत्तेषामन्योन्यं भेदो युक्तः । किंच विरुद्धधर्माध्यासतकारणभूताभ्यां दर्शनस्मरणाकाराभ्यां प्र

त्यभिज्ञानस्याभेदः साध्येत॥ स्वभावभूताभ्यां चानयोः पक्षे सिद्धसाधनं न खलु कारणस्वरूपमेव सद्वितीयाकार्य्यस्वरूपमिति॥ स्याद्वादिनो मन्य
ते॥ द्वितीयपक्षे पि कथंचिदभेदः साध्येत॥ सर्वथा वा यदि कथंचित्तदा सिद्धसाधनमेवाकारद्वयोः कथंचिदभेदाभ्युपगमात्॥ सर्वथाभेद
स्त्वनुपपन्नस्तयोस्तत्स्वभावत्वाप्रसंगात्॥ यो यत्स्वभावो न तस्य तद्वतः सर्वथाभेदो यथा चित्रज्ञानान्नीलाद्याकारस्य स्वभावस्य प्रत्यभि
ज्ञानस्य च प्रत्यभिज्ञानस्य स एवायमित्याकारद्वयमिति॥ तद्भिन्नस्वरूपस्य कारणसामग्रीतः समुपजायमानं कोडीकृताकारद्वयमेवोपजाय
ते चित्रपटादिसामग्रीतश्चित्राकारैकज्ञानवत्॥ शस्त्रादिसामग्रीतो निर्विकल्पेतराकारैकविकल्पवद्वा॥ परस्परं कथमाकारद्वयं किं परस्प
रानुप्रवेशेन प्रतिभासते इत्यादि॥ तत्र को स्याकारस्यानुप्रवेशो नाम परस्परं स्वरूपसांकर्य्यमेकस्मिन्नाधारे वृत्तिर्वा प्रथमविकल्पोनुपपन्नः प्रती
तिविरोधात्। नहि प्रयोकमाकारद्वयमन्योन्यसंकीर्णस्वरूपं संप्रतिपद्यते॥ द्वितीयविकल्पे तु न किंचिदनिष्टमेकस्मिन्प्रत्यभिज्ञाख्ये ज्ञाने तदाकारद्वय
स्य निर्बाधप्रतीतौ प्रतिभासमानत्वात्॥ यथा निर्बाधायां प्रतीतौ प्रतिभासते तथैवाभ्युपगन्तव्यं। यथा नीलं नीलतया प्रतिभासते न्यत्र यथाविधायां प्र
तीतौ वाकारद्वयान्वितत्वेनैकज्ञानमिति॥ न च प्रमाणप्रसिद्धे वस्तुस्वरूपे मिथ्याविकल्पसंहतिः किंचित्कर्त्तुं समर्थाः सकलशून्यतादेरपि सिद्धिप्रसं
गात्॥ कथं चैवंवादिनश्चित्रज्ञानादेः सिद्धिर्नीलादिप्रतिभासानां हि परस्परानुप्रवेशे सर्वेषामेकरूपताप्रसंगात् कुतश्चित्रैकनीलाकारज्ञानवत्।
तेषां तत्रानुप्रवेशे भिन्नसंतानवन्नीलादिप्रतिभासानामिवात्यंतभेदसिद्धेर्नितरामचित्रता एकज्ञानाधिकरणतयाप्येषां प्रत्यक्षतः प्रतीतेः प्रतिपा
दितदोषानवकाशः प्रत्यभिज्ञानेप्यविशिष्टः॥ नन्वविरुद्धधर्माध्यासतः प्रत्यभिज्ञानस्याभावो युक्तस्तथापि कारणाभावात् दर्शनस्मरणलक्षणस्य
तत्कारणस्य सद्भावात्॥ कथं विभिन्नविषयाभ्यां भिन्नाकाराभ्यां तत्कारणेनेति चेन्न अन्वयव्यतिरेकानुविधायित्वात् अन्वयव्यतिरेका १७८
नुविधायित्वात्तत्कारणं यथा बीजाद्यन्वयव्यतिरेकानुविधायी अंकुरस्तत्कारणको दर्शनस्मरणान्वयव्यतिरेकानुविधायिनी च प्रत्यभिज्ञेति॥ न
च तु बीजादेरंकुरकारणतायां चित्रपटादेश्चित्रज्ञानकारणतायां वान्वयव्यतिरेकानुविधानादन्यन्निबंधनमस्तीति न चास्य कारणाभावात्प्र

भावोपुक्तः॥ किंचेदं प्रत्यभिज्ञानं कार्यं कार्यं च प्रतीयमानं कारणसद्भावमवबोधयत्यन॥ कथमस्य कारणाभावो ज्ञायात् न वा दि॥ पत्का
र्येन तत्कारणाद्वैकं यथा घटादिकार्यं चेदं प्रत्यभिज्ञानमिति॥ यदप्युक्तं॥ ततोपि प्रत्यभिज्ञानस्य प्रामाण्यमित्यादि तदप्यसमीक्षिताभिधानं॥ य
तोविषयाभावाद्गृहीतग्राहित्वाद्बाध्यमानत्वाद्वाप्रामाण्यं स्यात्॥ न तावद्विषयाभावात् पूर्वोत्तरविवर्तवर्त्येकद्रव्यस्य तद्विषयस्य सद्भावात्॥ प्र
त्यक्षादितः प्रत्यभिज्ञानस्य स्वरूपेण लक्षणं संभवात्॥ विषयैकत्वलक्षणमवश्यमभ्युपगंतव्यं॥ यस्य यत्र स्वरूपेण रूपं तस्य ततो विषयैकत्वलक्षण
मप्यस्ति॥ यथा प्रत्यक्षात्स्मरणस्यास्ति च स्वरूपेण लक्षणं प्रत्यभिज्ञानस्येति॥ पूर्वोत्तरदृष्टिप्रत्यक्षस्मरणयोः स्पष्टेतररूपतया तीतवर्त्तमान
विषयपरामर्शिरूपतया स्वरूपेण लक्षणमतीतवर्त्तमानकालावच्छेदेन विषयैकलक्षणमेव मतापि प्रत्यक्षस्य हि वर्त्तमानकालावच्छिन्नो
विषयः स्मरणस्यातीतकालावच्छिन्नः॥ प्रत्यभिज्ञानस्य तूभयकालावच्छिन्नो द्रव्यविशेषो विषयः॥ न चात्रोपायो नानाक्षणिकत्व
तोद्रव्यविशेषस्यैकस्य चिरस्थस्यासंभवात्कस्य तद्विषयताप्रत्यभिज्ञानस्याभिधातव्यं॥ क्षणभंगप्रतिषेधेन द्रव्यसिद्धेः प्रागेव प्रपंचतो विहितत्वात्॥ नाप्यवि
षयाभावात्प्रामाण्यं नापि गृहीतग्राहित्वात्॥ तद्विषयस्य प्रमाणान्तरेणाग्रहीतुमशक्यत्वात्॥ स हि प्रत्यक्षरूपेण गृहीतेन स्मरणेन प्रमाणान्तरे
णवा तत्तावत्प्रत्यक्षेण तस्य वर्त्तमानविवर्त्तमात्रगोचरचारित्वात् अतीतवर्त्तमानविवर्त्तिनो द्रव्यस्य ग्रहणासामर्थ्यासंभवात्॥ नापि स्मरणेन त
स्यातीतपर्यायविषयतया तद्ग्रहणेऽसमर्थत्वात्॥ नापि प्रमाणान्तरेणोभयविवर्त्तवर्त्तिद्रव्यविषयस्य प्रत्यभिज्ञानतोन्यप्रमाणस्यासंभवा
मानं॥ यथा शब्दादाकाशस्यैककार्यसमवायिनोनुमानं॥ यथा रूपात्स्पर्शस्य॥ विरोधिदर्शनाद्विरोध्यंतरमनुमानं॥ यथा विस्फूर्जि
तनकुलदर्शनात्तिरोहितसर्पज्ञानमिति॥ ॥ अत्र प्रतिविधीयते यथावदुक्तं॥ सत्त्वोपाता एव पंचहेतवो लैंगिकांगमित्यादिना दर्स-
शितानभिधानं॥ तदव्यतिरिक्तानां कृत्तिकोदयादिहेतूनां नांतरंगत्वप्रतिपादनात्॥ अविनाभाववशाद्धि हेतोरनुमानांगत्वं न कारण
त्वसत्तामात्रेणास्याव्यापकत्वादतिप्रसंगाच्च॥ न हि तद्व्यतिरेकेण कश्चिदपि हेतोर्गमकत्वं प्रतीयते॥ सर्वत्र गमकत्वस्याविनाभावे स
त्येवोपपत्तेः कार्यकारणभावस्य च वस्तुपदार्थपरीक्षायां प्रपंचेन प्रतिपादितत्वात् समनेकार्यकारणलिंगयोः प्रसिद्धिः॥ संयोगसमवायि
लिंगयोरप्यसिद्धिः॥ विरोधिनोप्यविनाभावादेव विरोध्यंतरानुमापकत्वं नान्यथातिप्रसंगात्॥ ॥ यदपि सांख्यैरभिहितं मात्रामात्रि
ककार्यविरोधिसहचारिस्वस्वामिवध्यघातादिः सप्तधानुमेति॥ तत्र मात्रामात्रिकानुमानं यथा चक्षुषो विज्ञानानुमानं कार्यात्कारणा
नुमानं॥ यथा विद्युद्दर्शनात्कारणविज्ञानं॥ प्रकृतिविरोधिदर्शनात्प्रतिरोध्यं रूपानुमानं॥ यथा न वर्षिष्यति बलाहकः प्रत्यनीकपव
नयोगित्वात्सहचरानुमानं॥ यथा चक्रवाकयोरन्यतरदर्शनाद्द्वितीयज्ञानं॥ ॥ स्वदर्शनात्स्वामिनोनुमानं यथा छत्रविशेषदर्शना
द्राज्ञोनुमानं॥ वध्यघातानुमानं यथा सदर्पनकुलदर्शनाद्घातितोनेन सर्प इति ज्ञानं॥ आदिग्रहणात्संयोग्यनुमानं॥ यथा समुदायप्रा
प्ते वर्णिनि परिव्राजके कपरिव्राजकदर्शनात्संशये त्रिदंडदर्शनात्परिव्राजकोयमिति ज्ञानमिति॥ तदप्येतेनैव प्रत्याख्यातं कृत्तिकोदयादि
हेतूनां नैयायिकोपकल्पितहेतुष्वप्रस्थानोप्यर्थानस्थानाविशेषात् तथेदानीं दृश्यानुपलब्धिरेव गमिकानान्या संशयहेतुत्वादिति निय

न्या.कु.चं.

९६।

संनिकर्षस्याभावात्॥ श्लोकः॥ अदृश्यपरचित्तादेरभावं लौकिका विदुः। तदाकारविकारादेरन्यथानुपपत्तितः॥२॥ अदृश्यस्याप्यसौ परचित्तादिः स्यादिशब्देन भूतग्र
हव्याधिपरिग्रहः। तस्याभावं लौकिकाः विदुः कुतस्त्वत्राह॥ तदाकारेत्यादि। तेनादृश्यपरचित्तादिना सद्भावे शरीरगतउष्मस्पर्शादिलक्षणाकारस्तदाका
रस्तस्य विकारोऽन्यथाभावः व्याहारादिर्व्यपवचनविशेषस्तस्यान्यथानुपपत्तितः। ननु सर्वत्राभावपरिच्छेदे भावप्रमाणस्यैव व्यापारः॥ परचित्ताभावस्याभा
वस्तस्याभावस्यैव परिच्छेद्यत्वात्तत्राभावप्रमाणं प्रत्यक्षादिभ्यो भिन्नं तद्भिन्नसामग्रीप्रभवत्वात्॥ भिन्नफलसाधकत्वाद्यद्यदभिन्नसामग्रीप्रभवत्वा
द्विशेषणविशिष्टं तत्ततोऽभिन्नं यथा प्रत्यक्षानुमानादि न तथा भूतं चेदं तस्मात्प्रत्यक्षादिभ्यो भिन्नमिति॥ न चास्य तद्भिन्नसामग्रीप्रभवत्वमसि
द्धं। तथाहीन्द्रियार्थसंनिकर्षरूपायाः प्रत्यक्षसामग्रीतस्तावदभावप्रमाणं नोत्पत्तुमर्हति॥ अभावेन सहेन्द्रियाणां संनिकर्षाभावात्॥ नहि
तत्रैतेषां संयोगलक्षणः संनिकर्षः संभवत्यभावस्याद्रव्यत्वात्॥ नापि समवायलक्षणो द्रव्यगुणकर्मसामान्येभ्योऽन्यत्वात्॥ तयोरभावे च न तत्प्र
भेदः संयुक्तसमवायादिर्दूरापास्त एव संयुक्तविशेषणभावोऽप्यसंभाव्योऽयथाभावस्य क्वापि देशविशेषणत्वाभावात्॥ विशेषणं हि संयुक्तं समवेतं वाऽभ
वति। यथा दण्डो गुणादिश्च न चाभावं क्वचित्संयुक्तः समवेतो वेत्युक्तं। उक्तं च श्लोकः॥ न तावदिन्द्रियेणैषा नास्तीत्युत्पाद्यते मतिः॥ भावांशेनैव संबं
धो योग्यत्वादिन्द्रियस्य हि॥३॥ यदीन्द्रियादिसामग्रीतस्तदुत्पद्येत कुतस्तर्हि तदुत्पद्येतेति चेत्॥ उपलब्धिलक्षणप्राप्तप्रतियोग्यनुपलब्धिभू
तलाद्याश्रयोपलब्धिप्रतियोगिघटादिस्मरणलक्षणसामग्रीविशेषात्॥ तदुक्तं श्लोकः॥ गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनं॥ मानसं नास्ति
ताज्ञानं जायतेऽक्षानपेक्षया॥४॥ प्रत्यक्षादेरनुत्पत्तिः प्रमाणाभाव उच्यते॥ सात्मनोऽपरिणामो वा विज्ञानं वान्यवस्तुनि॥५॥ इति तल्लक्षणसामग्री
तस्तदुत्पत्तिश्चैतदन्यतमस्याप्यपायेन तदनुपपत्तेः सुप्रसिद्धा यदि दृश्योपलब्धिलक्षणप्राप्तस्यानुपलब्धिर्न स्यात्तदा भूतलाद्याश्रयोपलब्धावप्यभा ९६।
वप्रतीतिर्न स्याच्च॥ यदि च भूतलाद्याश्रयप्रतीतिर्न स्यात्तदा भूतलाद्यवच्छेदेन घटाद्यभावप्रतीतिर्न स्यात्॥ न तज्ज्ञानस्य विशेषणत्वं युक्तमतिप्र
संगात्॥ न च सामान्येन घटाद्यभावप्रतीतिरुत्पद्यते॥ किंतु भूतले तथा यदि प्रतियोगिस्मरणं न स्यात्तर्हि नास्तीत्येवंरूपा प्रतीतिः स्यान्न तु

घटो नास्तीति॥ अतः सिद्धं अभावस्य सामग्र्यन्तराभिन्नसामग्रीप्रभवत्वमभावप्रमाणस्य तथाऽनुमानसामग्र्यानोपितत्वाहि सामग्र्यां लिंगादि
लक्षणानवाभावेनाविनाभूतं किंचिल्लिंगमस्त्यनुपलब्धिरस्तीति चेत्॥ नन्वसौ गृहीतव्याप्तिका नाभावमनुमापयेत्॥ न तावदगृहीतव्याप्ति [illegible]
कत्वं तत्प्रसंगात्॥ नापि गृहीतव्याप्तिकाऽस्तो व्याप्तिग्रहणं धर्मधर्म्युभयधर्मग्रहणपूर्वकं व्याप्तिग्रहणवेलायां चक्षुर्वोऽभावाख्यधर्मग्रहणाद्
भा धर्म्युभयधर्मग्रहणपूर्वकं व्याप्तिग्रहणवेलायां च कुतोऽभावाख्यधर्मग्रहणमत एवानुमानानन्तरं प्राह॥ यद्यत एवान्योन्याश्रयप्रसं
[illegible] ङ्गाहि॥ अतोऽनुमानादभावसिद्धावनुपलब्धिरूपावेनाविनाभाविनाऽभावित्वसिद्धिस्तत्सिद्धौ चानेनानुमानादभावसिद्धिरिति॥ अनुमानान्त
रान्तरसिद्धौ चानवस्था किं चानुपलब्ध्याख्यं लिंगमप्यनुपलब्ध्यभावस्वभावमनन्तत्वरूपश्च निपत्ताव प्युक्तदोषानुषंगः॥ अनुपलब्धिरभाव
योश्चाभावानुपलब्ध्योरविनाभावप्रतिपत्तिरतिदुर्घटा॥ अतो नाभावप्रमाणस्यानुमानसामग्रीप्रभवत्वं नाप्यर्थापत्त्युपमानागमसामग्री
समुत्थत्वं प्राकट्यतिपादितापाभावप्रमाणसामग्र्याः॥ अर्थापत्त्यादिसामग्र्यां तोऽन्यथानुपपद्यमानार्थोपमानेनाथ यथागृहीतसादृश्य
ग्रहणाशब्दादिलक्षणायाः सर्वथा भिन्नत्वात्॥ नन्वाभावप्रमाणस्य साध्यसाधनादिभ्योऽभिन्नसामग्रीप्रभवत्वमसिद्धं नापि भिन्नविषयत्वं न
चाहीत्भूतले घटो नास्तीति प्रमेयानन्तावद्भावविषयत्वं तद्देवलरूपेण प्रतिप्राणिसंवेद्यमानत्वात्॥ भावविषयत्वे चास्य घटो विषयो भूतलं
तत्संसर्गो वा प्रथमपक्षे सति घटसत्ताग्रहणप्रसंगाद्भावप्रत्ययोऽपि स्यादालंबनस्य विद्यमानत्वात्॥ द्वितीयपक्षेऽपि घटेऽपि भूतलेऽभावप्रत्य
भूतलम्‸ यप्रसंगो विषयस्य भूतलस्य विद्यमानत्वात्॥ नापि तत्संसर्गो घटसंयुक्तेऽपि भूतले घटो नास्तीति प्रत्ययप्रसंगात्॥ अथ घटविविक्तं भूतलमस्या
विषयो न तु नवैपि तत्किं भूतलं स्वरूपमात्रं तदतिरिक्तं वा यदि स्वरूपमात्रं तर्हि विद्यमानेऽपि घटे तत्प्रत्ययप्रसंगः अथ तदतिरिक्तं तर्हि नाम भूतल‸
[illegible]‸ मात्रं भिद्यते॥ नाप्यनेनोऽविविक्तताशब्देनाभाव एवाभिधानात्॥ अतः सिद्धोऽभावादर्थान्तरमभावप्रमाणस्यैव परिच्छेद्योऽभावः प्रत्यक्षादीनां भा
वविषयत्वाभावगोचरत्वाभावात्॥ यदि चाभावः प्रत्यक्षपरिच्छेद्यः स्यात्॥ कथमिन्द्रियेणासंनिकृष्टः परिच्छिद्येत॥ यदा हि केनचित्पर

१ [illegible] मंथि। २ [illegible]

न्या॰कु॰चं॰ रूपः सद्रूपेण प्रतीतो जिज्ञासाभावादेवं वदेत्स्तु नास्तीति न निश्चितं॥ पश्चाद्दूरदेशगतो वा गतो या केनचित्पृष्टः किं तत्र देवदत्त आसीत् नवेति तत्र
१६२ निर्वचनं चासौ तदैव न देवदत्तस्तत्रेत्यवदत्तदाभावं तु तथापि च स्मृतिश्चासीदिति। नहि तत्रेन्द्रियसन्निकर्षोऽस्तीति कथं तत्र प्रत्यक्षसंभवः॥
न तोऽवश्यं तस्य परिच्छेद्यो भावो नाप्यनुमानादिपरिच्छेद्यः तदविनाभाविनो लिंगादेरसंभवात्॥ अनुपलब्धेस्तु न लिंगोत्थत्वं तदनन्तरमेव ज्ञ
नोत्पत्तेर्नात्॥ अतः पारिशेष्यादभावप्रमाणगोचरत्वमभावस्येति नासिद्धं भिन्नविषयत्वं॥ उक्तं च श्लोके॥ प्रमाणपंचकं यत्र॥ वस्तुरूपे न
जायते॥ वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता॥१॥ नापि भिन्नफलसाधकत्वमभावे गतिलक्षणफलस्याभावप्रमाणप्रत्यादेव प्रसिद्धेः।
अतः शब्दादिभ्यो विलक्षणस्य प्रतीतेरभावगम्यत्वाद्भावाग्रहणादिसामग्र्या प्रभवस्य नर्थविषयस्य नास्तिसंवेदितफलस्याभावप्रमाणस्य प्र
माणान्तरमभ्युपगन्तव्यं॥ न चावस्तुविषयत्वादस्याप्रामाण्यमभावस्य प्रमाणेन परिच्छिद्यमानत्वादवस्तुत्वानुपपत्तेः। यत्प्रमाणेन यत्परि
च्छिद्यते तद्वस्तु यथा भावः प्रमाणेन परिच्छिद्यते चाभाव इति॥ अवस्तुत्वे चास्य भेदो दुर्घटः परं वस्तुनस्तस्य भेदो यथा खपुष्पादिष्विति च प्रा
गभावादिभेदोऽभावस्येति॥ तदवस्तुत्वे कार्याणां सांकर्यं स्यात् दध्यादेः क्षीराद्यवस्थायां प्रागभावादेरवस्तुत्वेन पासांकर्यहेतुत्वात्॥ तथा च प्र
तिनियतव्यवहारलोपोच्छेदः स्यादिति॥ तदुक्तं श्लोके॥ न च स्याद्व्यवहारोऽयं कारणादिविभागतः॥ प्रागभावादिभेदेन नाभावो यदि भिद्यते॥१॥
यद्वानुवृत्तिव्यावृत्तिबुद्धिग्राह्यो यतस्त्वयं॥ तस्माद्गवादिवद्वस्तु प्रमेयत्वाच्च गम्यतां॥२॥ न चावस्तुन एते स्युर्भेदास्तेनास्य वस्तुता॥ कार्यादी
नामभावः को भवेद्यः कारणादिति॥३॥ वस्तुसंकरसिद्धिश्च तत्प्रामाण्यसमाश्रिता॥ क्षीरे दध्यादि यन्नास्ति प्रागभावः स उच्यते॥४॥ १६२
नास्तिता पयसो दध्नि प्रध्वंसाभावलक्षणं॥ गवि योऽश्वाद्यभावस्तु सोऽन्योन्याभाव उच्यते॥५॥ शिरसोऽवयवा निम्ना वृद्धिकाठिन्यवर्जिताः॥
शशशृंगादिरूपेण सोऽत्यन्ताभाव उच्यते॥६॥ क्षीरे दध्यादि भवेदेवं दध्नि क्षीरं घटे पटः॥६॥ शशे शृंगं पृथिव्यादौ चैतन्यं मूर्तिरात्मनि। अप्सु
गंधो रसश्चाग्नौ वायौ रूपेण तौ सह॥७॥ व्योम्नि संस्पर्शिता ते च न चेदस्य प्रमाणता॥८॥ अयमत्र विधौपनेयताबद्धुक्तं॥ अभावप्रमाणं
गन्ध रस

प्रत्यक्षादिभ्यो भिन्नमित्यादि॥ तदसमीक्षिताभिधानं इन्द्रियव्यापारस्य प्रत्यक्षादिभिः परिछिद्यमानत्वात् तस्य न तेभ्यो भेदानुपपत्तेरिंद्रियेणाभावो
विप्रकृष्टेर्थे संबंधो चेति॥ तत्र योदेशादिविप्रकृष्टार्थसंबंधाभावः स प्रत्यक्षेणैव परिछिद्यते॥ इंद्रियव्यापारादनंतरमिह घटं भूतलमित्यादिप्रत्य
यप्रतीतेः॥ अभावस्य ग्रहणं चाक्षुषेंद्रियेणासंबद्धत्वादिदूषणाद्॥ नत्वाभावस्यासंबद्धत्वादुपस्थाप्यप्रत्यक्षत्वप्रसंगात्॥ अप्राप्यकारित्वाद्धि चक्षुषोऽप्
याप्तस्यासंबद्धस्याग्रहणं तथाभावस्यापि। ननु असंबद्धस्याप्यभावस्य चाक्षुषग्रहणे देशांतरवर्तिनोपि ग्रहणप्रसंगो विशेषादित्यपि रूपेण
युक्तेनत्वंहि तस्यासंबद्धस्य ग्रहणेपि सकलदेशकालवर्तिनो ग्रहणं स्यात्॥ चक्षुषः संयुक्तसमवायसंबंधसद्भावात्संबद्धमसिद्धं॥ न
न्वचक्षुषोऽप्राप्यकारित्वस्य प्रागेव प्रतिपादनात् तत्संबंधानन्तं ग्रहणेऽचरसोरपिग्रहणप्रसक्तिरविशेषात्॥ अयोग्यत्वान्न तद्ग्रहणे दे
शांतरादिस्थस्याभावस्याप्यत एव अग्रहणमस्तु विशेषात्॥ किं चाभावग्रहणसापेक्षमभावग्रहणमाश्रयस्य चातीन्द्रियस्य गृह्यते। तत्कथं दे-
शांतरादिस्थस्याभावस्य ग्रहणसंभावनापि तन्नेन्द्रियेणासंबद्धत्वादभावस्याप्रत्यक्षतानुपपत्तिः अरूपित्वात्॥ तस्य प्रत्यक्षतां प्रत्यंगत्वात्॥
नहि रूपित्वं प्रत्यक्षतां प्रत्यंगं परमाणूनां रूपित्वेप्यप्रत्यक्षत्वात्॥ गुणकर्मसामान्यानामनेकांतात्॥ न खलु रूपादिगुणस्य गमनादिकर्मणो
गोत्वादिसामान्यस्य च रूपित्वमस्ति अथ च प्रत्यक्षत्वं तत्र विद्यते॥ असद्रूपत्वमपि न प्रत्यक्षतां प्रतिहन्ति॥ असद्रूपस्य हि सद्रूपतया प्रत्यक्षत्वम
नुपपन्नं न तु असद्रूपतया स्वस्वभावेनार्थानां प्रत्यक्षत्वाविरोधात्॥ नहि परस्य परात्मना कात्मना प्रत्यक्षत्वविरोधे स्वात्मनापि न विरोधो युक्तः॥
सर्वत्र प्रसक्तव्यवहारोच्छेदप्रसंगात्ततः तत्र कुमिकता भाववदभावस्यापि स्वस्वभावेन प्रत्यक्षत्वमभ्युपगंतव्यं॥ ननु तथाप्यभावस्य कथं प्रत्यक्षता
विरोधादिति चेत्॥ भावस्य कथं प्रत्यक्षता तुल्यत्वाद्विदिति तत्र समानं॥ तथाहि। उन्मीलिते चक्षुषि भूतलं घटाभावश्च प्रतिभासतेऽन्यत्र निमीलिते
तु न। समानेऽत्र द्वयोरभावित्वे कथं प्रत्यक्षं भूतलज्ञानमेव प्रत्यक्षं न घटाभावज्ञानमिति नियमविभागो युक्तः॥ प्रयोगोपयुक्तश्चक्षुर्घटाभावानुविधायि तज्ज्ञान
ं॥ यथा भूतलादिज्ञानं तस्तु विधायि च घटाभावज्ञानमिति॥ अप्रत्यक्षत्वे चास्यालोकापेक्षाप्यति दुर्घटा। आलोको हि चक्षुषस्योपकारकत्वेन प्रति

सिद्धः॥ ननु प्रकाशत्वक्षकः प्रत्यक्षत्वानभ्युपगमे च घटाद्यभावज्ञानं स्यात्कस्य पितृदुर्लभतः स्यात् ॥ अनुपलब्ध्यभावज्ञाने लोचनालोकयोरन्वयव्यतिरेकानुविधानमन्यथासिद्धं
न्या·कु·चं· रूपज्ञानानन्तरभाविस्पर्शाविरत्नापद्येव हि दूरे देशस्थितप्रज्वलज्ज्वालनज्वालारूपोपलम्भानन्तरभाविनि तदनोलस्पर्शसंवेदने लोचनालोकयोरन्वयव्यतिरेकानु
१६३ विधानमन्यथासिद्धं तथा भूतलोपलम्भानन्तरभाविघटाद्यभावज्ञानेऽपि अन्यथासिद्धमिति भूतले घटो नास्तीति ज्ञानस्य मेरासिद्धेः सिद्धे हि ज्ञाने भेदेऽन्वय
व्यतिरेकानुविधानस्यान्यथासिद्धत्वं वक्तुं युक्तं रूपस्पर्शज्ञानवत् । न चात्र तदस्ति ॥ इहकुण्डे दधीत्यादिज्ञानवदिह भूतले घटो नास्तीत्यादि ज्ञानस्यापि एक
स्याभयांशालम्बिनोऽनुपरतनयनव्यापारजनितप्रतीतिरिव नीतेः ॥ अस्तु वा न द्रव्यस्य पार्थिवादिवान्वयव्यतिरेकानुविधायित्वेनोभयस्योपलम्भविशेषकथ
मेकस्य प्रत्यक्षत्वमन्यस्याप्रत्यक्षत्वं वक्तुं युक्तं स्वैकाकारित्वप्रसंगात् ॥ प्रतियोगिस्मरणानन्तरमाविस्यात् घटाद्यभावधीनिरपत्यं च सविकल्पकप्रत्य-
क्षायदत्तो जलाञ्जलिः न हि निर्विकल्पकप्रत्यक्षानन्तरं शब्दार्थसंबंधस्मरणे सति घटोऽयमित्याद्याकारमुपजायते ॥ तथाविधस्याप्येवं द्विवान्वयव्यति
रेकानुविधायितया प्रत्यक्षत्वे घटाद्यभावप्रत्ययस्यापि नतत्स्वविशेषात् ॥ नैवं रूपोपलम्भानन्तरभाविस्पर्शालम्बने प्रत्यक्षत्वप्रसंगरत्वमित्य
तत्वं ॥ स्पर्शग्रहणयोग्यताभूत्वा चक्षुषः स्पर्शेऽस्मिन्नपि तद्भूलयोग्यताऽसद्भावात् ॥ अन्यथोपनतलिंगिद्रियस्यापि स्पर्शसंविज्जित्यात् ॥ तस्मादानु
मानिकमेवेदं विज्ञानं यत्रूपवत्तत् स्पर्शवत् ॥ यदि वा पर्वतं विधरूपवन्न रेवं विधस्पर्शवदिति । सामान्यतो विशेषतस्तु प्रतिपन्नाविनाभावहेतुसाम
र्थ्येनास्तेः प्रतीयमानस्य यत्तेन रघुमानमेव यथा यद्धूमवत्तदग्निमत् ॥ पर्वतो वायमेवंविधधूमवान रेवंविधाग्निमदित्याद्यवगताविनाभावहेतुप्रभवम्
नां भूमिपन्नाविनाभावहेतुसामर्थ्येनोत्पन्नं च रूपोपलम्भानन्तरभाविस्पर्शविज्ञानमिति ॥ ततः स्थितमेतद्देशाद्यविप्रकृष्टार्थसंबंधाभावमत्यद्
नवसपरिच्छेद्यं तद्रीत ॥ यस्तु देशादिविप्रकृष्टार्थसंबंध्यभावस्तेऽनुमानादेः ॥ तत्रैवं विप्रकृष्टसंकल्पनाकरणमनादेः संबंधीविकाशाद्यभावादिनक १६३
रोरवाद्यभावादवसीयते ॥ कालविप्रकृष्टस्य च वाकयादेर्मुहूर्तानेदयाभावोऽप्यिन्युपपादीनीयते ॥ स्वभावविप्रकृष्टस्य चेतन्यस्य शरीरेत्वा
भावो व्याहारकार्यविशेषाभावादनुमीयेते ॥ न खल्वेवं विधाभावस्य संविधलिंगादन्यतः कुतश्चिन्निपत्ते वाक्यः ॥ एतेन यदुक्तं यथाभावः प्रत्यक्षपरि

केचित्तु स्थालकयमपवरकादाविंद्रियेणासंनिकृष्टोपेक्षत्वाद्घटाभावः परीक्षितेत्यादि तदपि न नियुक्तं नासीदपवरके देवदत्त इत्यादिकेनो
नेः॥ स्मृतित्वादासीत्तत्र घट इत्यादिप्रतीतिनिवदपवरकस्थादिग्रहणादिप्रत्यक्षविषयत्वे रानन्ताशंभिहितार्थानामभावो युगपत्प्रतिपत्तेस्तत्र संनिहिता
र्थसद्भाववत्॥ तदुत्तरकालं च संस्कारप्रबोधवशात्तद्भावाभावविषया प्रतीतिरुदयमासादयन्ती स्मृतित्वं न जहातीति। नैवं महत्त्वाभावादनु
भूतेषु सकलपदार्थाभावेषु सत्स्वेव स्मृतिस्यादिति। अनुभूतत्वमात्रस्य स्मृतिकारणत्वात्। अनुभूतेष्वपि हि भावाभावस्वभावेषु नियता
र्थेषु कस्यचिदेव संस्कारोद्बोधनिमित्तादिसामग्री संपद्यते। तस्य तस्यैव स्मृतिः प्रादुर्भवति॥ इदं तत्रासीदिदं नासीदिति॥ पदार्थभावप्र
माणोऽनेनोपलब्धिमात्रात्मप्रत्यक्षरूपात्तामयोत्सर्गयुक्तं॥ तदप्यसारमात्मप्रत्यक्षस्य प्रमेयाद्वैविध्याभ्युपगमान्न खलु भूतलेऽपि घटो नास्तीति प्रत्य
क्षं भूतलग्रहणानन्तरे घटते। न चात्मग्रहणपूर्वकमेवाभावग्रहणमिति नियमोऽस्ति॥ अंधकारे दीपाभावप्रतिपत्तेरात्मग्रहणाप्युपलब्धेः
नवांधकारे वात्मग्रहणे निभधानत्वं॥ प्रकाशाभावमात्रत्वात्तस्य तत्तावत्सेदृशैव चक्षुर्नीदीपाभावदर्शनात्मग्रहणादिति रिक्तस्य कस्यचिदनव्य
हणं॥ तथा गंधो नास्तीत्यादावपि प्रतीतिरात्मग्रहणनिरपेक्षैवोपपद्यते॥ निमीलितात्तस्यापि हि घ्राणेन्द्रियव्यापारादनंतरं गंधाभावप्रतीतिरुत्प
द्यते॥ न च तत्र घ्राणेन्द्रियेणात्मप्रत्यक्षस्य ग्रहणं संभवति॥ दर्शनस्पर्शनाभ्यां वेद्यस्य ग्रहणासंभवात्॥ तथा नास्ति शब्द इति श्रोत्रव्या
पारेणात्मग्रहणनिरपेक्षाद्वस्यभावप्रतीतिः॥ न हि श्रोत्रेन्द्रियेण शब्दस्याश्रयो ग्रहीतुं शक्यस्तस्यात्मनः परोक्षस्यानुमानेनैवावसायात्॥ त
न्नाश्रयग्रहणमभावप्रमाणसामग्र्यामनुप्रविशति॥ अनुप्रति अनुप्रवि शद्धानथाप्याश्रयस्य ग्रहणं किं निषेध्याभावसहितस्य केवलस्य वा।
प्रतियोगिनोऽपि स्मरणं किमभावाक्रान्तस्य न हि परेण स्ववचनत्वाभाववैशेषिततयोरात्मप्रतियोगिनोर्ग्रहणस्मरणपर्यवसयोरभावकारणत्वा
भ्युपगमेऽभावज्ञानादेवाभावज्ञानमित्युक्तं स्यान्नाशस्कानात्मप्रतियोगिनोऽपि केवलस्य कस्यचित्सिद्धिः ... प्रसंगात्॥ चक्रकप्रसंगश्चाभावप्रमाणे स्यात्तो
हि बाति योग्याभावप्रतिपत्तिस्तत्प्रतिपत्तौ तदविशेषिततया आश्रयप्रतियोगिनोः प्रतिपत्तिस्तयोश्च सत्यामभावप्रमाणोत्पत्तिरिति। अभावनिरपे

तुभा।

१ हि० मन० पु० मात्री।

स्तथा वा श्र्येव प्रतियोगिनि घटस्य भावोऽर्थेष्व भावप्रतीतिः स्यात्॥ तदा सघटेऽपि भूतले घटो नास्तीति स्याद्विशेषाभावान्न तेनोपयोगरूपसाम्या
विचार्यमाणाया अनुपपत्तेश्च तदुपदिष्टा मर्थान्तरस्वभावप्रमाणस्योत्पत्तिः स्वपरात्मना सदसद्रूपघटाद्यर्थविषयतयाभ्युपगन्तव्या॥ ननु
परात्मना घटादेरसत्त्वं प्रतीयमानं न स्यात् तथा तत्प्रसंगात्॥ यच्चास्यान्यत्र यत्प्रतीयते कथं तत्तस्य रूपं अतिप्रसंगादित्यप्यसुंदरं। य
त्परात्मनापि प्रतीयमानमसत्त्वं घटादेरेव प्रतीयते॥ ननु घटः पटस्य घटो हि पटो न भवतीत्येवं नञ्युक्तप्रतीयते ननु पटो न भवतीत्येवं॥ अ
तः परात्मनाप्रतीयमानोऽपि तत्स्वार्थो घटादेरेव प्रतीयते॥ इति मतं सैव न दूषणं सत्त्वमित्येवं व्यपदिश्यतेऽयं यत्त्वन्यवृत्तं परविविक्तत्वं किं भू
तलस्वरूपमात्रं तद्व्यतिरिक्तं वेत्यादि तदप्ययुक्तं॥ यतस्तद्धि विविक्तत्वं न तद्धर्म्माधारतया ततः कथंचिद्व्यतिरिक्तं स्वरूपेऽपरार्थान्तरतया तात्त्वत
द्धर्म्मतयैव तत्कथंचिद्भिन्नमुपपन्नं॥ न पुनः पदार्थान्तरतया स्वहेतुतो हि भावाः परस्परसंकीर्णस्वभावविविक्ताः स्वस्वभावास्तद्विपरीतावाप्र
यान्ति विकल्पे सिद्धेषां स्वकारणकलापादेवान्यासंसृष्टस्वभावत्वमतोऽवैयर्थ्यमर्थान्तरभूताभावपरिकल्पनेऽस्मिन्। यत्स्वरूपेणातो विविक्तस्वभा
वं न तत्रार्थान्तरभूताभावपरिकल्पनाफलवत्ता यथा प्रागभावादेः स्वरूपतो विविक्तस्वभावस्याभावस्यैव हेतुनः समुपलब्धारेति॥ द्वितीयविकल्पस्त्वनु
पपन्नः स्वरूपतोऽपि विविक्तानामर्थानां व्यतिरिक्ताभावेन विविक्तस्य कर्तुमशक्यत्वात्॥ यत्स्वभावतो विविक्तस्वरूपं न तत्रार्थान्तरभूताभावेन वि
वेकः कर्तुं शक्यो यथैकस्य कोऽस्वभावतोऽविविक्तस्वरूपाश्च परमतेऽपरार्था इति॥ किंचाभावं विना भावानां विवेकासंभवे कथमभावानामन्योन्यं भा
वान्तरेण च विवेकः स्यात्। न चापि तद्धेतोरभावान्तरस्याभ्युपगमेऽनवस्थाप्रसंगः॥ अथाभावान्तरमन्तरेणाप्यस्य विलक्षणस्वभावत्वादेवान्यतो वि
वेकः॥ तर्हि वैयर्थ्यमर्थान्तराभावपरिकल्पनायाः घटादेरपि विलक्षणस्वभावत्वेनैवान्यतो व्यावृत्तिप्रसिद्धेः॥ तथा हि॥ घटादेरन्यतो व्यावृत्तिर्विलक्ष
णस्वभावनिबंधनैवान्यतो व्यावृत्तित्वात्॥ योऽन्यतो व्यावृत्तिः सा विलक्षणस्वभावनिबंधनैव यथाभावस्यान्यतो व्यावृत्तिस्तथा च घटादेरिति॥ किंचा
स्य भेदेनेतरेतराभावस्यावच्छिद्यते॥ सर्वथैव वा सैकत्वेनाभ्युपगमात् तन्नाश्च घटस्येतरेतराभावाद्यावृत्तिर्नाभावनिबंधनात्तत्त्वहीनेतरेतराभावे॥

भावांतरं वा निबंधनं स्यात्॥ इतरेतराभावश्चेत् किं स्वाकारान्यो वाऽन्यो वा यत्तस्य घटात् पटादेर्व्यावर्तमानत्वाद् घटो व्यावर्तते॥ न तस्मादेव घटस्य
व्यावृत्तिर्यथा घटादौ वर्तमानस्य घटस्य न पटादेर्व्यावृत्तिः व्यावर्तते नैवेतरेतराभावादुद्भवति॥ इतरेतराभावानभ्युपगमे चास्य एकत्वप्रसक्तिः अनवस्था
च स्यात्॥ अथ भावांतरं तस्य तन्तोर्व्यावृत्तेर्निबंधनं तदेतरेतरस्माद् इतरेतराभावांतरनिबंधनत्वानुपपत्तेः॥ उपपत्तौ वा भाववस्तु एकत्वानर्थक्याने
कस्मादेव भावादिदमनतःप्रासीदितस्त्र नास्तीत्यादिप्रतीतेरुपपत्तेः॥ अथ घटस्येतरेतराभावाद् व्यावृत्तिरेवेष्यते॥ तथा सर्वदोषोक्तौ इतरेतराभावो
पि न स्यात्॥ यस्य यतो व्यावृत्तिर्नास्ति॥ न तस्य ततो भेदो यथा घटस्य स्वरूपाद् घटस्य नास्ति चेतरेतराभावाद् व्यावृत्तिर्घटस्येति॥ यद्यप्यभावस्य वस्तु
त्वमभिहितं तदपि स्वधर्म्मस्येवोपपन्नं॥ न पुनः सर्वथा तुच्छस्वभावस्य तथाविधस्यास्य वस्तुत्वाद्यनुपपत्तेः यत्सर्वथा तुच्छस्वभावं न तद्वस्तु॥ यथा
गगनेंदीवरं सर्वथा तुच्छस्वभावश्चापरैरभ्युपगतो भाव इति॥ अवस्तुत्वस्य वस्तुत्वं तथापि नेत्येकेन गृह्यतां॥ किमभावाख्येन प्रमाणेन प्रमाणांतरे
ण वा प्रमाणांतरेणावाप्यप्रमपत्ते किं तद्वस्तुत्वं भावोऽस्य भावो यदि भावः प्रकर्षणाभावप्रमात्वस्य तद्विषयत्वानभ्युपगमात्॥ तुच्छाभावाभावस्वभाव
स्वरूपवस्तुताभ्युपगत्वादिरोधाद्वा यत् तुच्छस्वभावं न तद्भावस्वभाववस्तुत्वाभ्युपगताविषयाणां तुच्छस्वभावस्य परिकल्पितेनाभाव इति॥ अथाभावस्य
वस्तुत्वस्याभावरूपत्वे नीलादावपि तस्याभावरूपत्वप्रसंगाद् भाववार्त्तोच्छेदः स्यात्॥ अथ प्रमाणांतरेणाग्रहणेन॥ तत्र प्रमाणांतरेणाभावग्राह
कत्वाभ्युपगमे तत्र वस्तुत्वग्राहकत्वाभ्युपगमविरोधात्॥ तत्राभावप्रमाणस्य सामग्री बौद्धैरपि विचार्यमाणा न व्यवतिष्ठते॥ नापि फलं
अभावावगतिलक्षणफलस्य प्रत्यक्षादितोऽपि सद्भावप्रतिपादनात्॥ किंच सिद्धस्वरूपे कारणविषये फलत्वमस्याव कुंठितेनवास्य तत्सिद्धं न तु सदु
पलंभकप्रमाणपंचकानुत्पत्तिलक्षणमभावप्रमाणस्वरूपं प्रतीतप्राणिप्रसिद्धत्वात् कथमपह्नोतुं शक्यमित्यप्यनुपपन्नं॥ यतः केयं तदनुत्पत्तिः किं
निषेध्यविषयज्ञानतयात्मनोऽपरिणामोऽन्यवस्तुविज्ञानं वा॥ तत्रापरिणामस्याभावस्वभावत्वात् कथं तथाविधज्ञानजनने सामर्थ्यं स्यात्॥ कथं वा प्र
माणं प्रमेयपरिच्छेदकस्य हि प्रामाण्यं प्रसिद्धं॥ यत्र स्वरूपेण न किंचित्तत्कथं कस्यचित्परिच्छेदकमतिप्रसंगात्॥ यत्स्वरूपेण किंचिद्रूपं चेदन्यत

त्कस्य चित्परिच्छेदकं ॥ यथा दंष्ट्रा तत्तद्भयः स्वरूपेणाकिंचिद्रूपं च परपरिकल्पितमभावप्रमाणमिति ॥ परिच्छेदकत्वं हि ज्ञानधर्मः सोऽस्य विषयाणा
णाम्रवत्स्याध्यसाधभावस्यातिदुर्घटः ॥ तत्र च प्रमाणाभावः प्रमाणं चेति ज्ञापदयोर्विरोधो यथा ॥ इदं च नास्ति वेति अस्त्यवस्तु विज्ञानपक्षे पि किम
स्मिन् वस्तुमात्रे घटाभावा स्ये वा ज्ञानमभावपरिच्छेदकं स्यात् ॥ तत्राद्यपक्षे त्र कुत्र चिद्यस्य कस्यचित् भावस्य ज्ञानं स्यात् ॥ अथ भाव भावा
पस्य तद्वत् घटाभावो सोऽपि सिद्धो न्न तु चासो भवत्यसि सिद्धो प्रतियोगितापेक्षितप्रत्याख्याना सिद्ध हि घटाभावे यस्य स्याश्च प्रतियोगि
तिसिद्धेः ॥ ततोऽभावप्रामाण्यपक्ष यथा स्तुप गत स्वरूपसामग्रीविषयफलानामव्यवस्थितेर्वस्तुधर्म एवाभावः ॥ प्रत्यक्षादिप्रमाणसिद्धव
भाववदभ्युपगन्तव्य इति ॥ छ ॥ अत्र गुरुमतमनावलंबिनः प्राहुः ॥ नतावत्स्वरूपव्यतिरिक्तः कश्चिदभावः प्रत्यक्षेणानुमानेन वा प्रतीयते । प्रत्यक्ष
स्य हि स विषयो भवति ॥ यो जनकत्वे सत्याकारसमर्पकः ॥ अभावस्य च जनकत्वमाकारसमर्पकत्वं चाति दुर्घटं ॥ यदभावरूपं न तत्कस्य चिज्ज
नकं स्वाकारसमर्पकं च यथा खपुष्पमभाव प्रश्न्याभावो भवद्भिरिष्टइति ॥ स्वाकारसमर्पयतो ज्ञानजनकत्वे चास्य भावरूपत्वं स्यात् ॥ यत्स्वा
कारसमर्पयज्ज्ञानं जनयति तद्भावरूपमेव यथा घटादि स्वाकारमर्पयज्ज्ञानं जनयति चाभावइति ॥ यत्खलु कुतश्चिदुत्पन्नं केन चिद्रूपेण प्रतिभास
मानं कां चिदर्थक्रियां करोति तद्भावस्वरूपमुच्यते ॥ किं वा भावाकारस्य ज्ञाने प्रतिभासमाने तस्याप्यसत्त्वप्रसंगात्कुतः किं प्रतीयते ॥ नचेहभूतले घटो
नास्तीत्येवंरूपं प्रत्यक्षं तद्ग्राहकप्रमाणमित्यभिधातव्यं । शब्दसंसर्गयोग्यप्रतिभासस्यास्य विकल्परूपतया प्रत्यक्षत्वानुपपत्तेः ॥ विकल्पानां चार्थग्रहणानुपप
त्तेर्यथा तत्र विकल्पानेषां तन्न प्रत्यक्षतोऽभावसिद्धिः ॥ नाप्यनुमानतः । नह्यसाध्यमति बहलिंगबलादुदयमासादयति ॥ प्रतिबंधश्च साध्यसाधनयोः प्रत्यक्षतोऽनुमा
नतो वा प्रतीयेत । नतावत्प्रत्यक्षतो । भावस्योक्तप्रकारेण प्रत्यक्षागोचरत्वेन तोऽभ्यकेन चिल्लिंगेन सह प्रतिबंधप्रतिपत्तेरनुपपत्तेरनुपपत्तेः ॥ अनुमानतस्त
त्प्रतीतावनवस्थानत्रापि अनुमानांतरानयनीतिप्रसंगात् ॥ तन्न कुत श्चित्प्रतिबंधसिद्धिर्न चासिद्धप्रतिबंधलिंगं साध्यसाधनायप्रभवत्यतिप्रसंगादिति ॥ १६५
॥ छ ॥ अत्र प्रतिविधीयते । यत्तावदुक्तं न भाव स्वरूपव्यतिरिक्तो भावः प्रत्यक्षेण प्रत्यक्षेतर सम्मीलितामिधानं भावस्वरूपातिरिक्तस्याभावस्य प्रतीतिभेदात्स्वरूपभेदा

१ तत्र मु· नाम्ती ।

स्वरूपभेदात्सामग्रीभेदादर्थक्रियाभेदाच्च भेदसिद्धेः यस्य यतः प्रतीत्यादिभेदस्य ततो भेदो यथा घटात्पटस्य प्रतीत्यादिभेदस्याभावाद्भावस्ये
ति॥ न चायमसिद्धस्तथा हि भावाभावयोस्तावत्प्रतीतिभेदः सुप्रसिद्ध एवेदमत्रास्तीदं नास्तीति॥ न हि प्रतीयमानापीयं भेदेनाभावप्रतीतिर
न्यहेतुकाभावप्रतीतिरप्युपपन्नेव प्रसंगात्॥ ननु निर्विकल्पकसामर्थ्येनेदमिहास्ति नास्तीति विकल्पद्वयमुत्पद्यते॥ न च तत्सामर्थ्येन व्य
विकल्पानामर्थप्रामाण्याभावादित्यपि युक्तम् एवं सविकल्पकसिद्धौ निर्विकल्पस्य प्रामाण्यप्रतिषेधतः॥ सविकल्पकस्यैवार्थवस्तु
व्यवस्थापकत्वेन प्रामाण्योपपत्तेः प्रतिपादितत्वात्॥ तत्सामर्थ्येनोत्पन्नाभावविकल्पाद्भावसिद्धौ भावसिद्धिरप्यनेनातिदुर्लभा॥ अथ यत्र स
स्येदंभावसिद्धिरभावसिद्धौ तत्किं काकैर्भक्षितं प्रथमं हीन्द्रियादिसामग्रीतः समुत्पन्नं प्रत्यक्षमनेकधा भावाभावरोपाधिश्रुतिनत्वपाधिमत्तं
प्रतिपद्यते॥ ततः शब्दार्थयोः प्रतिपन्नसंबन्धः॥ प्रतिपन्नार्थदर्शनोत्तरकालं यस्य यस्य विषयस्यैव संज्ञा भवति॥ तत्र हि वाचकं शब्दं स्मृत्वा इदमि
हास्तीदं नास्तीति विकल्पव्यापारं रचयति॥ यदि च तत्र भावविशेषाः प्रत्यक्षेण प्रतिपन्नास्तदा प्रतियोगिस्मरणमप्युपपन्नमेव स्यात्॥ न च प्रति
पन्ने पराभावे घटस्य प्रतियोगिनः स्मृतिर्युक्ता अतिप्रसंगात्॥ अतः प्रतिनियतप्रतियोगिस्मरणान्यथानुपपत्त्या प्रतिनियताभावप्रतिपत्तिः प्रत्य
क्षे प्रतिपत्तव्येति न चेह भूतले घटो नास्तीति विशिष्टा प्रतीतिर्विशेषणमन्तरेणानुपपत्तिरुक्ता प्रविशिष्टप्रतीतिर्नासौ विशेषणमन्तरेणोपप
द्यते॥ यथा दण्डीत्यादिप्रतीतिर्विशिष्टा चेह भूतले घटो नास्तीत्यादिप्रतीतिरिति॥ अथ भावस्याभावप्रतीतेर्निबन्धनमतः स एवास्या विशेषणं भ
विष्यत्येवं च ततो न किंचिदिष्टं सिद्धमित्यपसारितं यतः किं निषिध्यमानो घटादिभावोऽस्या निबन्धनमभ्युपगम्यते नन्वसौ यो भूतलादिर्विषयमपेक्षे
युक्तो भावाभावप्रतीत्योर्निर्बाधतया प्रतीयमानयोर्वैलक्षण्यस्य विषयवैलक्षण्यव्यतिरेकेणानुपपत्तेः॥ यन्निर्बाधतया प्रतीयमानयोः प्रतीत्योर्वैल
क्षण्यं तद्विषयवैलक्षण्यपूर्वकं यथा रूपादिप्रतीतिवैलक्षण्यं॥ वैलक्षण्यं च निर्बाधतया प्रतीयमानयोर्भावाभावप्रतीत्योरिति न च तत्प्रतीत्योर्निर्बा
धतो वैलक्षण्ये च प्रतीयमानत्वं वासिद्धं॥ न ह्येकस्य कस्यचिदभावात्॥ परस्परसंकीर्णस्वभावतयानुभूयमानत्वात्॥ न हि कश्चिद्बालिशो भावमे

न्या० कु० चं० बाभाववत्याप्रतियोगिकोऽन्याहि भावप्रतीतिरेवाभावप्रतीतिः॥ यदि भावस्य बाभावः स्यात्तर्हि तत्तत्रास्त्येव नेह तेनाभावप्रतीतिः स्यात्॥ न
१६६ चैवं तर्हि स्वदेशकालनियतोऽभावसत्तोऽपवाभाववत्याकश्चिन्नाप्ति पतुमर्हति। अनिषिध्यमानघटादौ अप्रतियोगिनो भूतलादिषु तदभाव
प्रतीतेर्निर्विषयत्वं संप्रतीतिकिं भूतलमात्रं घटाभावप्रतीतेर्निर्विषयत्वं विशिष्टं वा॥ आद्ये मध्ये विकल्पे सघटेऽपि भूतले घटाभावव्यवहारः स्यात् तदविशेषात्।
द्वितीयपक्षेऽपि किं तत्तस्य वैशिष्ट्यं स्वरूपत्वं घटसंसर्गरहितत्वं वा॥ नाद्यः स्वरूपत्वं सघटेऽपि भूतले भावप्रतीतिप्रसंगात् स्वरूपस्य तत्र
तत्रापि विशिष्टत्वात्॥ घटसंसर्गरहितत्वमिति चेत् न तेनाप्यस्मिन्विवादे घटाभावस्य घटसंसर्गरहितत्वशब्देनाभिधानात्॥ नैवं तर्हि रूप्यमभि
मानमेवापन्नास्तीति व्यवहारः सव्यवहारानुदयप्रसंगवदसंभवादिति। यतः प्रतीयमानस्य बाधारहितस्यास्याभिमानिकत्वे लौप्यादिव्यवहारस्या
प्याभिमानिकत्वप्रसंगतः॥ अथ यदि स व्यवहारानुदयस्वरूपो नास्तीति व्यवहारः स्यात् तदा सुषुप्त्यादावपि नास्तीति व्यवहारः स्यात्॥ स व्यवहा
रानुदयस्य तत्राप्यविशेषात्॥ ततो निर्बाधयोर्भावाभावप्रतीत्योर्वैलक्षण्यप्रसिद्धेः सिद्धो भावयोर्वास्तवो भेदः स्वरूपभेदात्॥ अभावस्य हि भावप्र
तिषेधकत्वं स्वरूपं भावस्य तु स्वरूपभेदेऽप्यनयोरभेदे भेदप्रवादो दृष्टः सर्वथाऽपरस्परतो भेदस्य सर्वत्र पटपटादेः स्वरूपभेदादन्यतोऽप्रसिद्धेः॥ सा
मग्रीभेदाद्वानयोर्भेदः सुप्रसिद्ध एव तथा तद्वस्तुतया हि घटादिभावस्तु सामग्रीतः॥ कामलादुमारनानुकूलामयविमर्दिना सदशादिना दन्यो युपादेन वि
नाशोऽपि तु कामलुनहितैतलक्षणोऽमुद्गरादिसामग्रीमिति तत्तु मुद्गरादिसामग्रीपरस्परासंस्पृष्टकपालोत्पादएवमभिधीयते॥ नाभावे न च लघुत्वादे
वतदभावोऽप्यनयस्त्वभविष्यतीति त्वभिधानव्यं यतः सर्वोऽपि कार्यभेदः कारणभेदप्रयोज्यो न चाभावकपालत्वरूपकार्यभेदे कारणभेदोऽस्ति
मुद्गरस्य तदा स्वैकस्य कारणस्य प्रतीतेः॥ न च तत्स्यैकस्यैवान्योन्यविरुद्धकार्यद्वयजनकत्वं पुनर्विरोधोऽदिनाप्यसमीचीनं प्रतीतिविरोधात् यं गा १६६
ता तथा हि मुद्गरादिव्यापारानन्तरं लोकिकेन रयोर्भेदेन विद्यासिता घटध्वंसप्रतीतेः॥ न तु नः कापालान्युत्पादितानीति॥ नापि घटविनाशकस्य
कपालानुत्पादकत्वमित्यनुसंधानं स्वप्नेऽप्यनुभूयते॥ न खलु विषादिनाशत्रुवधे कृत्वा दिना च घटवाघेऽपि न स्यात् शत्रुघटाविना वा दृष्टे तस्य किंचित्तन्नोत्पा

१ रत्न० पु० भारती।

द्यमानेति हेतुः पटविनाशकस्य वानुसंधानमस्ति ॥ नापि पौर्वापर्यस्थानामन्यत् किंचिदनेनोत्पादितमिति प्रतीतिः किंतु नहि नाश एवोत्पन्नः तत्
खिलजनानां प्रतीतिः नहि नाश एव वासौ परितुष्यति ॥ नष्टस्य च निष्पन्नत्वात् तस्य किं विसर्पोजनं ॥ ननु भावानां स्वभावतो विनाशः तस्य भावनियत
त्वाद्विनाशस्याहेतुकत्वान्मुद्गरादेस्तद्धेतुत्वमित्यप्यपेशलं तेषां तत्स्वभावनियतत्वस्याप्रामाणिकत्वसिद्धेर्निराकृतत्वात् । यदप्युक्तं कार्यभेदका
रणाभेदेन व्यापारत्वादित्यत्र किमात्रमेककारणस्य कार्योत्पादकत्वेन भावात् प्रदीपादेरेकस्याप्यनेककार्योत्पादकत्वप्रतीतेः ततः सिद्ध
स्य सहेतुको विनाशः तथा च घटादिभावोत्पादकसामग्रीतो भावोत्पादकसामग्रीभेदसिद्धेर्भावाभावयोर्भेदः ॥ अर्थक्रियाभेदाच्च तत्प्रसिद्धिः
भावाभावयोः अर्थनिर्वृत्तिलक्षणार्थक्रियाभेदः जलाद्यर्थिनस्तत्सद्भावस्य प्रवृत्तिहेतुत्वात् तदभावस्य च निवृत्तिहेतुत्वात् प्रसिद्धमेतदर्थक्रिया
कारित्वाद्भावाभावयोर्भेदः ॥ तथा हि शत्रुविनाशः कृतः स्वभावापरं प्रमोदं साधयेत् तत्सद्भावस्तु विषादं तत्र भावाभावाभ्यामन्यस्य प्रमोदविषादहे
तुत्वं शोभते ॥ यदप्युक्तमभावोपि यदि कुतश्चिदुत्पद्येत कांचिदर्थक्रियां कुर्यात्तदा भाव एव स्यादित्यादि तदप्यसांप्रतं प्रतोभावप्रतीतिविष
यत्वं भावत्वं ॥ न पुनरर्थक्रियाकारित्वादि अभावोपि हि अस्तित्वेन स्वकारणकलापात् प्रादुर्भवल्लक्षणमयोन्योर्थक्रियां च कुर्वाणः पदार्थः तथाप्रतीय
ते न पुनर्भावतया प्रतीयते ॥ यदप्युक्तं यद्यभावः स्वाकारं ज्ञाने समर्पयेत् तदा ज्ञानस्याप्यभावरूपता स्यादित्यादि तदप्ययुक्तं घटाकारतया ज्ञानस्यापि
प्रकाराकत्वप्रतिषेधात् निराकारमेव हि ज्ञानं योग्यतया प्रवेशाद्यं योग्यं चार्थं प्रकाशयतीत्युक्तं । प्रत्यक्षरूपस्वरूपत्वात् वस्तुत्वादभावस्य
किं प्रसाधनप्रयासेनेत्यभिधातव्यं । प्रमाणतः प्रतीयमानत्वादिसाधनात् तस्य वस्तुत्वप्रसिद्धेः तथाहि अभावो वस्तु प्रमाणतः प्रतीयमानत्वात् प्र
माणतः प्रतीयमानं तद्वस्तु यथा भावः प्रमाणतः प्रतीयमानश्चाभाव इति ॥ तथा स्वकारणात् उत्पद्यते ॥ तद्वस्तु यथा घटादिकारणादुत्पद्यते चाभाव
इति ॥ तथार्थक्रियाकारित्वात् तद्वस्तु यथा प्रदीपादिः अर्थक्रियाकारी चाभाव इति ॥ तथार्थक्रियाकारित्वं तद्वस्तु यथा प्रदीपः तथा च स्वांतरभेदेन भि
द्यते ॥ तद्वस्तु यथा रूपरसादि प्रागभावादयश्चांतरभेदेन भिद्यते चाभाव इति ॥ तदेवं सिद्धो भाववदभावोपि वास्तवो वस्तुधर्मः प्रमेय इति ॥ प्रमाणं तु तत्

न्याकु चं॰ रिच्छेदकप्रमाणाभावाच्चं प्रमत्तादिभ्यो भिन्नां ज्ञातस्तं च न प्रसिद्धं प्रत्यक्षस्य परिच्छेदेपि नष्टत्वरिच्छेदसिद्धेः॥ यत्र प्रमाणानां नरैरपि परिच्छिद्यते न तत्र प्रमाणानिय-
१६७ मोपि यथावन्ध्यादेः प्रमाणानरैरपि परिच्छिद्यते चा भावः शविषस्तु न प्रकारप्रमाणानां परिच्छिद्यते प्रमत्त आकारप्रमाणानियमो॥ पत्तो यथा कूपर
सारादिनि॥ क॥ ततः स्वलक्षणस्यापि परचित्तविशेषस्याभावस्तदाकारविकारादेरन्यथानुपपत्तितः॥ इति सर्वत्रोहेतुमकल्पमन्यथानुपपत्तिश्र
सारादेवसाधादन्यानुपलम्भावप्यतीति कथंना प्रमाणं भवेत्स्त्र दृष्टेत्यादिना व्यतिरेकमुखेन कारिकां व्याचष्टे अदृश्यानुपलब्धेः ज्ञाकारोत्तं श
यैकान्ते गोक्रियमाणो न केवलं परचित्ताभावो न सिद्ध्यति किं सोपि न स्यापितु स्वचित्तभावश्च न सिद्ध्यति। कुत एतदित्यत्राह॥ अन्यत्रस्वचित्तस्य च
नं कृतत्वं सजातीयव्यावर्त्तं भव्य स्वरूपस्वरूपं तस्यादृश्यात्मकत्वात्॥ ततः किं जातमित्यत्राह॥ तथा चेत्यादि तथा चेन तत्र स्वचित्तभावासिद्धिप्रकार
रा कुतो न कुतश्चित्परमाविरतो भावाद्भावस्य न। स्वलक्षणभंगसिद्धिः॥ धर्म्मिहेतुदृष्टान्तादेरसिद्धेः॥ न च खलु वहिरंतर्वाऽनं श्रावतत्वस्यादृश्यात्मकत्वोक्त्वि
तेऽधर्म्मादेः सिद्धिर्युक्ता न च सिद्धौ च कुतः स्वलक्षणभंगादेः सिद्धिः स्यात्॥ कस्य वहिः स्वलक्षणभंगसिद्धिः स्यादित्यत्राह॥ नहि स्वादितत्स्याद्दर्शनत्वाहिपरी
स्वार्थं तसंस्संनत्वं न स्यात्कथं भूतेदेलक्षणस्य युगपत्क्रमेण भावस्यावास्यलक्षणभंगसिद्धिः धर्म्मिहेतुदृष्टान्तादेरसिद्धेः॥ न च खलु वहिरं न वह्निं श्रानत्वस्यादृश्यात्म
नयापसिद्धेर्धर्म्मादेः सिद्धिर्युक्ता। न च सिद्धौ च कुतः स्वलक्षणभंगादेः सिद्धिः स्यात्। कस्य नहि स्वलक्षणभंगसिद्धिः स्यादित्यत्राह॥ तदित्यादि तस्यादर्शनत्वाहि
परीतं स्वांशानत्वं तस्य कथं भूतस्य भेदलक्षणस्य युगपत्क्रमेणानेकस्वभावात्मकस्यास्यादृष्टत्वात् स्वलक्षणभंगसिद्धिर्नान्यस्येत्येकाकारार्थः॥ ननुवाभे
दलक्षणानन्तस्य सविकल्पकप्रत्यक्षेण सर्वात्मना प्रतिपन्नत्वात्किं न स्वलक्षणभंगाद्यनुमानेनेत्याशंकापनोदार्थमाह॥ क॥ श्लोक॥ वीक्ष्याणु पारि १६७
मंडल्यं स्वलक्षणभंगप्रवीक्ष्य यत्॥ स्वसंविदिद्विषयाकारविवेकानुपलंभवत्॥ वीक्ष्य यदनुपलब्धिः स्वलक्षणानां स्थूलमेकं यात्तं॥ न सर्वेषु गुणेनिरुक्त्याभागा
सेषां पारिमंडल्यं वर्तुलत्वं यच्च स्वलक्षणभंगादि प्राहेन कार्यकारणसामर्थ्यादि परीक्ष्य तत्स्याचीक्षणमग्रहणमत्र दृष्टान्तमाह॥ स्वेत्यादि॥ स्वसं
विदो वेद्यकल्पितनिरंशबुद्धेर्यो विषयाकारस्य स्वलाद्याकारस्य विवेकेन रहितस्यानुपलंभवत्॥ नहि तस्यां प्रतिभासमानायां विषयाकारविवेकस्य

निभासते॥ स्थूलाद्याकाराभावेनाभावप्रसंगात्। पत्र परावास्तवो यदाकारः प्रतीयते तेन बहिर्वा तद्विपरीताकारस्य प्रतीतिरस्ति॥ यथा नीलमनी-
यमानेन पीतस्य प्रतीयते। चित्रपाकारविवेकः। सौगतकल्पितायां संविदीति विवरणमाह॥ स्थूलत्वादि स्थूलस्य महत एकस्य क्रमाक्रमाने कविवर्त्ति-
व्यापिनः प्रतिपादितप्रकारेण दृश्यात्मन एवोपलभ्यस्वभावस्यैवानित्यत्वं सिद्धमिति॥ नान्यस्येति संबंधः कुत इत्यत्र आह अनुपलंभादिति। नोपलंभे एवाद्दृश्यपरको-
योरभावसिद्धेः। तथा च यदुक्तं परेण। यथाद्योपलब्धिलक्षणप्राप्तस्यानुपलम्भेनाभावस्तथा विप्रकृष्टस्वभावस्याप्यदेशकालस्वभावविप्रकृष्टोपलम्भेन। नोपलब्धि-
लक्षणप्राप्तो मध्यस्थः। दृश्यापरकोरस्येति तदयुक्तं। यतः कथंचित्तस्याभावसाधने सिद्धसाधनं सर्वथा तत्साधने पक्षस्य प्रत्यक्षबाधनं हेतो-
श्चासिद्धिस्तथा च तदनुपलंभासिद्धिरिति॥ ननु वास्तु स्थूलादि स्वभावस्यार्थस्यानित्यत्वं न तु परमार्थसत्त्वं मरीचिकाजलादिवदसत्त्वादित्याशं-
क्याह तदेवेत्यादि॥ यथोक्तस्यैवार्थस्य परमार्थसत्त्वं तु दृश्यादृश्ययोरेकाकारे अभेदस्यैव॥ प्रयोगो यदनेकस्वभावं न तदेव परमार्थसत् यथा बाह्याख्येयस्वकादीने-
कस्वभावा संविदनेकस्वभावं चान्यद्बहिर्वादिभिरभ्युपगतं वस्त्विति॥ न चापि मरीचिकोत्तोयनिदर्शनेनास्यासत्त्वं युक्तं दृश्यत्वे। सत्त्वप्रसंगो विशेषा-
भावात्॥ ननु नानेकस्वभावस्यार्थस्यानित्यत्वं परमार्थसत्त्वं वापि तु परमाण्वादेरित्याह॥ नचेत्यादि॥ न च नैव परिमंडलसंबंधात्परिमंडलाः
परमाणुरादिर्यस्य यौगकल्पितावयवादेः स तथोक्तस्तस्यानित्यत्वं च निदर्शनमाह॥ विज्ञानेत्यादि॥ विज्ञानस्य यदनंशस्तत्त्वं स्वरूपं तस्यैव न
दृष्टिः॥ ननु बहिरनंशस्यैव तत्त्वस्योपलंभो न तत्स्यैव परमार्थसत्त्वं॥ अनुपलंभाच्च दृश्यापरकोत्योरसत्त्वं सिद्धमिति यौगसौगता। तत्राह
नापीत्यादि॥ नापि नैव रूपादिकः परिमंडलाः परमाणव आदयो यस्यावयव्यादेः स तथोक्तस्तस्य स्वविभागविज्ञानतत्त्वस्य वा जातु कदाचि-
दपि स्वयमात्मनोपलब्धिः॥ कुत एतदित्याह॥ तथैवेत्यादि॥ तथैव यत्परिकल्पिताकारेणाप्रतिभासनात्॥ अथ बहिरनंशस्य रूपादिकानंशादि-
स्वभावतया प्रतिभासेनापि सत्त्वेन नादिरूपतया प्रतिभासनादयमदोषस्तत्राह॥ तत्कथं विदित्यादि॥ तस्य बहिरनंशस्य कथंचिन्न सर्वात्मना त-
त्स्वभावप्रतिभासे सत्त्वेन नादिरूपप्रतिभासने गृह्यमाणे गनेकांशसिद्धिरेकस्य दृश्येतरस्वभावादिसिद्धेरेवं परमाण्वाद्यनुपलब्धिर्निराकृता

१ तदनुपलंभासिद्धेरिति रव.पु.। २ बाह्य रव. पुस्तके।

न्या·कु·चं·
१६८

पुनःस्वभावादिहेतुंनिराकुर्वन्नाह। छ॥ श्लोकः॥ अनंतरहर्शनंतस्मात्प्रत्यक्षंतदभावसनात्।कस्तत्स्वभावोहेतुःस्यात्किंनकार्यंयतोनुमा॥२॥
योगक्षेमगतकल्पितंपरदर्शनतत्त्वंकथमिरंतरमनन्तरं।किमुत्पद्यतत्तथासंनभवतिकुतएतदित्यत्राह॥तदप्रतिभासवात्॥तस्यानंशतत्त्वस्याप्र
तीतेः॥ततःकिंजातमित्यत्राह।सकलदित्यादि।कोनकश्चित्स्यानंशस्यस्वभावोहेतुःस्यात्॥किंतुकिंचित्स्यानंशस्यकार्यंहेतुःकार्यग्रहणानुपल
ब्धांतेनसाध्याद्भिन्नानांसंयोगिसमवाय्यादीनांनिरासःसिद्धोभवत्यतोनपरमतेकिंचिल्लिंगंघटते॥यतोनुमास्यात्कारिकांविवृण्वन्नाह।सा
क्षादित्यादि॥साक्षात्कृभावस्वरूपदर्शनेनोभावस्ययन्निर्दर्शनंतत्सहदर्शनंतस्यानुमितेःकिंप्रमाणायांस्वभावहेतोरसंभवंकुतइत्याह॥स्वभावे
त्यादि॥स्वभावस्यस्वरूपस्यविप्रकर्षादर्शनत्वात्।नसदनहिप्रकर्षादेवकार्यहेतोरप्रतिपत्तिःकुतएतदित्याह॥कार्येत्यादि।कार्यकारणयोः
संबंधिरंतदीनुपलब्धिरदर्शनात्॥किंचसिद्धकार्यकारणभावेकार्यहेतोःप्रतिपत्तिर्युक्तानचात्रसास्तीत्याह॥नचेत्यादि॥नचैवेवाद्ययोगक्षे
गतकल्पितेनएकांतेनप्रत्यक्षानुपलंभौसाधनंयुक्ततस्तथोक्तःप्रभवःकार्यकारणभावप्रभवत्यस्मादितिव्युत्पत्तेःयथाचनकल्पितेनैकांतेनप्रभवो
नपरतेअनयाविषयपरिच्छेदेप्रत्यचिरतेः।ननुसर्वत्रप्रत्यक्षानुपलंभसाधनःप्रभवःकिंतुक्वचिदिंद्रियशक्तिवत्कार्यव्यतिरेकसाधनोपिसंभवत्या
दित्याशंक्याह।॥कार्येत्यादि॥कार्यस्यव्यतिरेकोविवक्षितःकारणव्यतिरिक्तकारणसाकल्येप्यनुत्पादस्तेनोपलक्षितांशपरूपंनरस्त्वकोवावाच्यः
कारणशक्तिर्नचात्रेतिसंबंधःनिरंशयोःकार्यकारणयोर्मूलतोप्यदर्शनेकारणव्यतिरेकतःकार्यव्यतिरेकासिद्धिरित्यभिप्रायः।नचप्रमाणांतरमं
तरेणकारणशक्त्यंगीकरणंयुक्तमित्याह॥नह्यंगीकरणमित्यादि।तस्याःकारणशक्तेरंगीकरणंकार्यव्यतिरेकतःसद्भावस्वीकरणंप्रमाणांतरमं
तरेणोहारप्रमाणांविनानुपपन्नं।प्रसिद्धेहिकार्यकारणभावेकार्यव्यतिरेकात्ःकारणशक्तिपरिकल्पनास्यात्॥नचप्रत्यक्षानुमानयोःकार्य १६८
कारणभावादिसंबंधप्रतिपत्तौसामर्थ्यमित्युक्तमविकल्पधियालिंगंनकिंचित्संप्रतीयतइत्यत्रांतरेणःकुतःपुनस्तदंगीकरणंतदंतरेणानुपपन्न
मित्याह।स्वयमित्यादि।स्वयमात्मनोपलब्धस्यमध्यदशायांदृष्टस्यप्राग्ऊर्ध्वंचपातस्यैवानुपलब्धिःस्वयमेवादर्शनंतस्यापलसिद्धंतत्कर्त्वंकार्य

त्वंतस्मादनित्यत्वंशब्दादेःसिद्धेन्नान्यथानप्रकारांतरेणानवयस्यस्वभावानुमानंवातथापत्येतुंसमर्थमित्याह।भस्यैवा।अस्यापारंतिनन्वतोऽकृत
कत्वानित्यत्वग्रहणमुपलक्षणं।सकलहेतुसाध्यानां।निर्दोषं।कार्यकारणभावोनुमानानुमेयभावोवाकल्पनाशिल्पितोनपारमार्थिक
स्तत्कथंप्रमाणंप्रमाणांतरप्रसक्तिरित्यप्यनुपपन्नं॥यतोविकल्पबुद्धेःसिद्धायांतत्कल्पितोपिव्यवहारःस्यात्॥नचतत्सिद्धिःस्वतःपरतो
वापरतस्त्वानवस्थेत्युक्तं॥श्लोकः॥धीर्विकल्पाविकल्पात्माबहिरर्थव्यपेक्षयाकिंपुनःनिश्चयात्मास्वतःसिद्धेत्यतोप्यनवस्थितेः।धीर्बुद्धिःकथंभ
नानिश्चयात्माविकल्पबुद्धिरित्यर्थः॥पुनरपिकथंभूतेत्याह।विकल्पेत्यादि।विकल्पोध्यवसायोविकल्पोऽविकल्पस्ताबात्मैवात्मायस्याःसातथोक्ता।
कबहिरर्थव्यपेक्षया।विकल्पात्मकाचाविकल्पात्माविशेष्यैवकिमित्याह॥किंपुनःसिद्धेत्येवसिद्धेन।कुतःस्वतःसंवेदनान्निर्विकल्पकात्॥
न्निर्विकल्पकेनग्रह्यतेचविकल्पस्वरूपमिति॥नहिविकल्पांतरात्तत्सिद्धिरित्याह।परतइत्यादिनकेवलंस्वतोपितुपरतोविकल्पांतरादपिकथंपुनः
सिद्धेत्यतिनेतिसिद्धेरितिसंबंधःकुतइत्याह।अनवस्थितेरनवस्थानात्विकल्पांतरस्यापितरंतरात्सिद्धिप्रसंगात्।कारिकांविवृण्वन्नाह॥सर्वेत्या
दि॥सर्वविज्ञानानांविकल्पेतरज्ञानानांस्वसंवेदनमात्मस्यतत्तापत्तरूपमविकल्पंनिर्विकल्पकंप्रतिदिश्यते॥अतदूषणंनिश्चयेत्यादि॥निश्चय
स्यापिकेवलमनिश्चयस्वरूपस्वविदनुमानानुमेयव्यवहारतोहेतोःस्वतएवस्वसंवेदनादेवास्मिन्निश्चयात्मनिश्चयाभावादयान्यतोनिश्चयः
स्यादत्राह॥निश्चयेत्यादिपरतंत्रनिश्चयादेन्योन्यनिश्चयतत्त्वेनतत्त्वनस्यकल्पनामपामनवस्थाभावात्कुतोनकुतश्चित्तस्मात्संव्यवहारस्य
कार्यकारणभावादिलक्षणस्यसिद्धिस्तस्येवासिद्धेरित्यभिप्रायःखलुनहिधीर्निश्चयात्माबहिरितांनरेपीत्याह॥ननइत्यादि॥नतस्मादुक्तदोषा
त्तार्थोपिस्वरूपतुदर्शनोपरुद्धंबहिःस्वलक्षणंनचापिनकेवलंसामान्यंकथंचिन्नशब्दोत्मनाभिलप्यतेनेनाभिलप्यतइतिवाभिलापोऽशब्दजात्या
दीनयोःसंगोसेरंवाचकमसेरंवाचमितियोजनं॥तस्मैयोगेनिर्भासोनयोरकंसाधारणंज्ञानंप्रतिपत्तव्यं॥सोगतेः॥अत्रदृष्टांतमाह।स्वरूप
वदितिस्वरूपवदितिनिरंशंपरंपरितत्कारिकंप्रमाणांतरंमत्यमिपाचेदानींउपमाम्नस्वप्रमाणेनैवोक्तिकल्पितंचयं।विधुरयन्नाह॥उपमानंप्रसि

१ त्थैकं स कुः

न्या॰कु॰च॰ द्धर्मसाधर्म्यात्साध्यसाधनं॥ तर्हि धर्मात्वमाणं किंस्यात्संज्ञिप्रतिपादनं॥ प्रसिद्धोर्थो गौस्तेन साधर्म्यं सादृश्यं यद्गवयस्य तस्मात्साध्यस्य गवादृश्य

१६०) ॥ विशिष्टस्य विशेषणत्वेन वा विशिष्टस्य सादृश्यप्रसाधनं सिद्धिरुपमानं प्रमाणं अतिदेशवाक्यात् इह भव्यः॥ अत्रदूषणमाह॥ नोदित्यादि॥ तेन प्रसिद्धार्थेन वे

सादृश्यं यन्न सिद्ध्यादेतस्मात्साध्यसाधनम् गोविलक्षणा एते महिष्यादय इति प्रतीतेः तत्किं प्रमाणं किमभिधानं अन्यप्रमाणं किंचिन्नाम कर्तव्यं यन्न

सत्तादिगुणसंभवति॥ तथा च सत्प्रमाणप्रसंगात् षडेव प्रमाणानीति संख्याव्याघातः॥ नन्वपमानप्रमाणमभ्युपगमे तु नो गवये दर्शनादस

न्निकृष्टेर्थे बुद्धेरुत्पत्तिः येनाहि प्रतिपत्ता गोरुपलब्धो न गवये न वातिदेशवाक्यं श्रुतं गौरिव गवय इति॥ तस्यारण्ये पर्यटतो गवयदर्शनानंतरम

नेन सदृशो गौरित्येवमाकारं परोक्षे गवि यत्सादृश्यज्ञानमुत्पद्यते तदुपमानं॥ अत्र च विप्रकृष्टस्यार्थस्य प्रतीतौ संनिकृष्टे सादृश्यं करणं॥ उक्तं च॥

श्लोकः॥ दृश्यमानाद्यदन्यत्र॥ विज्ञानमुपजायते॥ सादृश्योपाधि तत्तैरुपमानमिति स्मृतं॥१॥ अस्य चानधिगतार्थाधिगंतृत्वात्प्रामाण्यं यदापि

गौस्तेन प्रागेवोपलब्धः सादृश्यं चेदानीं प्रत्यक्षेन एव गवये दृश्यते॥ न यापि गवयसदृशो गौरिति प्राग् गृहीतमिति परतो रधिगतार्थाधिगंतृत्वमन्तर्हितं तानी

मेव गौः स्मृत्या सादृश्यस्य चाध्यक्षतोधिगमादपि कथमेया भावात्प्राप्तिगतार्थाधिगंतृत्वमसेत्यप्ययुक्तं॥ नहि विशिष्टत्वस्य तत्स्यानधिगतेः

यद्यपि प्रत्यक्षेण सादृश्यं प्रतिपन्नं गौश्च स्मृतस्तथापि सादृश्यविशिष्टस्य गौपिंडस्य स्मृत्या प्रत्यक्षेण भाभ्यां वाप्रतीतेन तद्विषयत्वेनोपमान

स्यानधिगतार्थाधिगंतृत्वात्प्रामाण्यं॥ न चानुमानेप्यन्यप्रामाण्यनिबंधनं यत्स्वप्नोपि हि प्रदेशादौ धर्मिणिस्मृत्यादौ प्रतिपन्नेप्यपि विशिष्ट

प्रदेशादिविषयत्वेनानुमानस्य प्रामाण्यं तद्वदुपमानस्यापि॥ तदुक्तं श्लोके॥ तस्माद्यत्स्मर्यते तत्स्यात्सादृश्येन विशेषितं॥ प्रमेयमुपमानस्य सादृ २६८

श्यं वा तदन्वितं॥१॥ प्रत्यक्षेणावबुद्धेपि॥ सादृश्ये गवि च स्मृते॥ विशिष्टस्यान्यतो सिद्धेरुपमानप्रमाणता॥२॥ प्रत्यक्षेपि यथा देशे स्मर्यमाणे

च पावके॥ विशिष्टविषयत्वेन नानुमानप्रमाणता॥३॥ इति नन्वेतदुपमानं प्रमाणं न तु प्रत्यक्षादिभ्यो भिन्नं तदन्यतमस्वभावत्वात् तत्स्येत्यप्यनुपपन्नं

तदन्यतमस्वभावत्वस्य तत्रासंभवात् तथाहि॥ न तावत्प्रत्यक्षरूपं तत्परोक्षे गवीन्द्रियार्थसंप्रयोगाभावे प्रमाणत्वात्॥ नापि स्मरणमेवेदमित्यभिधान

त्वं ॥ अत एवातिपन्न एवार्थे स्मरणस्याविर्भावात् अथ गोअस्य एकाले न तत्स्यदेशागवयाप्रतिपत्तौ तत्सादृश्यं प्रत्येतुं शक्यं ॥ भूयोवयवसामान्ययोगो य
द्यमन्यते ॥ सादृश्यं तस्य तद्भूयिर्गृहीते प्रत्ययोगिनि ॥ इति अभिधानान्नाप्यनुमानरूपतास्या लिंगादनुमानेः अत्रहि लिंगं सादृश्यं परिकल्प्येत
परिकल्प्यमानो गवयो वा परिसादृश्यं तन्निर्गौणत्वं गवयगतं वा लिंगं स्यात् न तावद्गोगतं गवयदर्शनात् प्राक् तस्यासिद्धत्वात् ॥ न चासिद्धस्य लिंग
त्वं अतिप्रसंगात् प्रतिज्ञार्थैकदेशत्वप्रसंगात् ॥ गोगतत्वे न हि सादृश्यं गवयेन देवदत्तलिंगमिति गवयगते न त्वं हि लिंगम [illegible] दोपदुपालंभवादि
त्येव न ॥ नापि व्यधिकरणसिद्धत्वप्रसक्तेः ॥ न च व्यधिकरणासिद्धस्य गमकत्वं काकः कार्ष्ण्यादिवत् ॥ एतेन गवयस्यापि लिंगता प्रत्याख्याता
व्यधिकरणत्वाविशेषात् ॥ उक्तं च श्लोकः ॥ नैवेतस्यानुमानत्वं पक्षधर्माद्यसंभवात् ॥ प्राक्प्रमेयस्य सादृश्यं धर्मित्वेन न रूप्यते ॥१॥ गवयेगृ
ह्यमाणं च नगवार्थानुमापकं ॥ प्रतिज्ञार्थैकदेशत्वा ॥ [illegible]गतस्य न लिंगता ॥२॥ गवयश्चाप्यसंबंधान्न गोलिंगत्वमिष्यते ॥ सादृश्यं न च सर्वैर्गो
पूर्वदृष्टं तदन्वयि ॥३॥ एकस्मिन्नपि दृष्टेर्थे द्वितीयं पश्यतो वने सादृश्येन तदेकत्वं [illegible] ततो मतिः ॥४॥ इति नाप्येतच्छब्दे श्रुतातिदेश
वाक्यस्य प्रतिपत्तुरुत्तरकालसंभवात् ॥ नाप्यर्थापत्तिरन्यथानुपपद्यमानदृष्टश्रुतार्थानुपलंभात् ॥ नाप्यभावप्रमाणं प्रमेयनिर्दिष्टस्यानेपक्षणादिति ॥
तत्वं [illegible] प्रतिविधीयते प्रतावदुक्तमनेन सदृशो गौरित्यादि तदसमीचीनाभिधानं ॥ तथाविधायाः प्रतीतेरवासंभवत्वात् यथास्मृतातिदेशवा-
क्यो नागरिकस्य तान्नेपर्य्यटन्न दृष्टपूर्वो गोसदृशं पशुं पश्यन्न वेत्यनुधानत्वं वीति च गवा सदृश एव कश्चित् पशुरिति न त्वनेन तु सदृशो गौरित्येवं विधस्ता
नमभिधानं वाक्यस्य चितदानीमस्तीति ॥ अनुवानदृष्यस्य अस्याभिज्ञारूपत्वात् प्रमाणांतरत्वं ॥ नन्वनुभूतेर्थे प्रत्यभिज्ञा प्रवर्त्तते नदर्शनस्मरणनिबंध
नत्वात् ॥ न च पूर्वमेव लिंगवयावच्छिन्नसादृश्योपाधिना पूर्वं गोपिंडेनुभूतो गवयाग्रहणेन तदवच्छिन्नसादृश्यविशेषितस्य गोपिंडस्य गृहीतुमशक्य
त्वे इति ॥ तदयुक्तं ॥ यतः कस्यानुभवाभावो गवयावच्छेदस्य सादृश्यस्य [illegible] मम पदेगवयवाय मित्यादिप्रतीतेरपि प्रत्यभिज्ञात्वापत्तेः तस्मात् उत्त
रपर्यायावच्छेदस्य पूर्वं मनुभवात् ॥ अथात्रावच्छेदकस्योत्तरपर्यायस्य पूर्वमहाननुभवेप्य [illegible] अवच्छेदस्यानतिदृश्यस्यानुभवात् प्रत्यभिज्ञानता ॥ तद

न्या·कु·चं· न्यत्रापि समानन्वच्छेदकस्य गवयस्य तदानधिगमेपि सादृश्यस्यावच्छेदस्याधिगमात्॥ कथमप्रतीतस्यावयवसादृश्यविशेषणत्वेन
१०० वेशकमेतदप्रतीतिर्गोदर्शनसमयेऽनन्तरकालं वा प्रथमविकल्पेऽनन्तरपर्यायस्यापि द्रव्यविशेषणत्वाभावप्रसंगः स्वपर्यायप्रतीतिसमये
तस्याप्यप्रतीतेः॥ अथोत्तरकालं हेतुणा प्रतीतस्य तत्तस्य तद्विशेषणत्वं तदेतदन्यत्राप्यविशिष्टं तं तु गवयावच्छेदस्यानुभवाभावः॥ नापिस
दृश्यस्य तत्रासंनिहितत्वात्तत्तुल्यत्वे प्रतिबंधकसद्भावाद्वा॥ तदावदसंनिहितत्वात्संनिहितपदार्थवृत्तित्वेनासंनिहितत्वासिद्धेः॥ नापिप्र
तिबंधकसद्भावात्तस्यानुपलंभो गोपिंडोपलंभवत्सादृश्योपलंभेपि प्रतिबंधकस्य कस्यचिदप्यनुपलंभात्॥ ननूभयवृत्तित्वात्सादृश्य
स्य कथमेकपिंडोपलंभसमये प्रतियोगिग्रहणमंतरेणोपलंभः स्यादित्यप्यसुंदरमेकैकत्र चास्य समाप्ततया प्रतियोगिग्रहणमंतरेणा
प्युपलंभोपपत्तेः कथमन्यथा देशो भेनासामान्यवत्सादृश्यस्यैकैकत्र समाप्त्येत्॥ प्रतियोगिन्यदृष्टेपि तत्तस्मादुपलभ्यते।९॥ इतीदमनेनस
दृशमिति सादृश्यव्यवहारस्तर्हि प्रतियोगिग्रहणापेक्षो न पुनस्तत्स्वरूपप्रतिपत्तिः प्रतिपन्नाहि गवयमुपलभ्य पूर्वानुभूतगोपिंडसंस्थानवि
शेषमेवाहितेनेनसा परिभाव्यतयोः सादृश्यव्यवहारं प्रवर्त्तयति॥ संकलयति हि एवं यथा पूर्वमेव गौरनेन प्राणिना तुल्यसंस्थानः प्रतिपन्न
स्तत्तस्तत्तुल्यसंस्थानतां तस्य तस्मात्सादृश्यं व्यवहरामीति॥ नत्वेयः संकलनात्मकः प्रत्ययः प्रत्यभिज्ञानमेव यथा स एवायमिति प्रत्ययः संक
लनात्मकत्वात्तेन सदृशो गौरिति प्रत्ययवत्॥ संकलनं हि पूर्वोत्तरसमयसमधिगतयोर्वस्तुरूपयोरेकधर्मयोगितया ग्राह्यत्वप्रदर्शनं॥ तदात्म
कत्वं चात्र लिंगे गवययोस्तद्धर्मान्वितत्वेन प्रत्यवमर्शसंभवात्॥ ननु वास्य प्रत्यभिज्ञानत्वे स्मृतिप्रत्यक्षप्रभवत्वप्रसंगस्तत्राभावे च वास्याविर्भावात्॥ न
न्वीवानस्तालिंगवपश्यत्तदिशामर्थीमात्रा नतुल्यतेः न च विलक्षणसाधर्म्यप्रभवं ज्ञानं प्रत्यभिज्ञानं युक्तमतिप्रसंगादितिप्रत्यक्षत्वनमज्ञापितत्ता प्रत्यभिज्ञाविष
मानत्वात्॥ तथाहि स्मरणापेक्षं गवयप्रत्यक्षमेवंविधज्ञानमुपजनयत्यनपेक्षं वा तत्रानपेक्षस्य मनकतेः प्रसिद्धगोपिंडस्याप्यत्वस्यात्॥ अथ स्मरणा
पेक्षं तत्कृतं चापि किं स्मरणमात्रापेक्षं गोपिंडस्मरणापेक्षं वा तत्र तु च पेन्यादि स्मरणमात्रापेक्षं तदा सादिस्मरणेपि तत्त्वज्जनयेत्॥ अथ गोपिंडस्मरणा

येषां तत्रापि गोपिंडस्मृतिमात्रापेक्षं गवयसादृश्यावच्छिन्नगोपिंडस्मरणापेक्षं वा प्रथमपक्षे न सहिष्णु। पिंडस्मरणेऽपि तस्य तज्जनकत्वप्रसंगः॥ सादृ
श्यप्रतिपत्तेरुपमायाः विशेषात्॥ गवयसादृश्यावच्छिन्नगोपिंडस्मरणापेक्षत्वे तु सिद्धः प्रागुपमेन सादृश्यानुभवस्तदसिद्धौ संस्कारविरोधाभा
वे तत्स्मरणस्यैवानुपपत्तेः। पूर्वं तदनुभवे च गोपिंडसंस्थानविशेषविषयं निरूपणं निरूपणानर्थकमेव स्यात्। पिंडमात्रस्मरणेऽपि संनिकृष्ट-
सादृश्यदर्शनबलेन विप्रकृष्टसादृश्यप्रतीतेरुपादप्रसंगात्॥ न च पिंडमात्रमनुस्मरतः संस्थानविशेषमनिरूपयतः सादृश्यप्रतीतिरुपपद्यते नो
मन्यामहे। गवयसादृश्यावच्छिन्नगोपिंडानुभवप्रभावितेयं स्मृतिरिति॥ तथाविधस्मृतिसहायं च गवयप्रत्यक्षं यत्तेन सदृशो गौरिति ज्ञानं तुल्या
रूपमीतिसिद्धमस्य स्मृतिप्रत्यक्षप्रभवत्वमतो नोपमानं प्रत्यभिज्ञानादि द्विधेन॥ अभिन्नसामग्रीप्रभवं [illegible] भिन्नसामग्रीप्रभवं च प्रत्यभिज्ञानो
पमानलक्षणं ज्ञानद्वयमिति॥ यदप्युक्तं विप्रकृष्टसादृश्यप्रतीतौ संनिकृष्टसादृश्यं करणमिति। तत्र किमिदं संनिकृष्टसादृश्यं [illegible] साध्य
स्य तज्ज्ञाप्तिसंबंधस्य साधनं बाधमनुपपन्नं॥ अनतिदेशवाक्यस्य हि प्रमातुरप्रसिद्धपिंडे प्रसिद्धपिंडसादृश्यज्ञानं प्रति विप्रकृष्टसादृश्यस्य करण
त्वं ज्ञापकत्वं तत्स्मारकत्वं तदुपकत्वं वा॥ प्रथमपक्षे पूर्वापरविरोधः पूर्वं तस्य तदनुमापकत्वप्रतिषेधादित्वाभ्युपगमात्। द्वितीयपक्षे तु संनिकृ
ष्टसादृश्यस्य स्मृतिहेतुत्वादुपमानहेतुत्वानुपपत्तिः स्मृतेः सापमानत्वासंभवात्॥ तत्स्मृतिसहायं तु न तद्धेतुः स्यात् केवलं तथा च दृश्यमानाद्य
स्य चेत्यादि तु घटं। एतेन तृतीयपक्षोऽपि प्रत्याख्यातः केवलस्य तत्सादृश्यस्य तदुपमापकत्वासंभवत्वात्॥ न च सादृश्यस्य ज्ञानजनकत्वं संभवति
अर्थत्वान जनकत्वस्यापेक्षिणि करिष्यमाणत्वात्। अतः सदृशावस्तुविषयाभ्यां दर्शनस्मरणाभ्यां गोगवयोः॥ सादृश्यपरामर्शि प्रत्यभिज्ञानत
स्त्रपर्यायमुपमानं तन्मतरत्यभ्युपगंतव्यं॥ तस्मादुपमानस्य प्रत्यभिज्ञानस्वभावत्वान्न प्रमाणान्तरत्वं युक्तमनुमानत्वाद्यपरेवं अतत्पायासं
न्निहितो गवयपिंडरूपश्चार्यं तस्मात्सदृशेति। परिशेषविलक्षणाविशेषाद्यवयोगित्वादिति हेतुः साध्यदृष्टान्तौ तादेव। एवं ननु मा भूत्सीमांस
काभ्युपगतमुपमानं प्रत्यभिज्ञानादेः प्रमाणांतरत्वे नैयायिकैरभ्युपगतं तर्हि भविष्यतीति। अत्र प्रसिद्धसाधर्म्यात्साध्यसाधनमुपमानलक्षणं वर्णयं

तथाहि

न्या·कु·चं· वि॥ तत्र प्रसिद्धं च तत्साधर्म्यं चेति प्रसिद्धेन वा गवा साधर्म्यं गवयस्य प्रसिद्धं तत्साधर्म्यं यस्य तु प्रसिद्धसाधर्म्यो गवयस्तस्मान्न भाविनः साध्य
१०१ स्य संज्ञासंज्ञिसंबंधस्य साधनं बोधनमुपमानं श्रुतातिदेशवाक्यार्थस्मरणसहकृतं प्रसिद्धे पिंडे प्रसिद्धपिंडसारूप्यज्ञानं यदि द्विवचनं
संज्ञासंज्ञिसंबंधप्रतिपत्तिफलं तदुपमानं प्रतिपत्तव्यं॥ न हीन्द्रियजनितमपि भूयस्त्वानमिव तद्गोचरप्रमेयप्रमितिप्रसाधनात् प्रमाणांतरं
श्रुतातिदेशवाक्यो हि नागरकः कानने पर्यटन्॥ गोसदृशमरण्ये तदनंतरमाटविककथितो यादृशो गौस्तादृशो गवय इति स्मृत्वा प्रतिपद्यते॥ वाक्य
यं स गवयशब्दवाच्य इति तदनेन तत्संज्ञासंज्ञिसंबंधज्ञानं प्रत्यक्षादिजन्यत्वादुपमानफलं न हि प्रत्यक्षस्य तत्फलं वाक्यस्य गवयाकारानुप
स्थितेः फलत्वात् तस्यानाप्यनुमानस्य पक्षधर्मान्वयव्यतिरेकादिसामग्रीमंतरेणापि संज्ञासंज्ञिसंबंधप्रतिपत्तेरुत्पत्तेः॥ नाप्यागमस्य तत्फलं उत्पाद प्रतीते स·पु·
न च तेन नागरकः प्रतिपन्नारण्यकथाकथारेवारण्यस्थं प्राणिनं गवयशब्दवाच्यतया प्रतिपद्यते किंतु सारूप्यं प्रसिद्धेन गवा तस्य प्रज्ञानं न हि गव
यादर्शनेऽयं स गवयशब्दवाच्य इति संज्ञासंज्ञिसंबंधप्रतीतिर्युक्ता निष्प्रसंगात्॥ न दर्शनेन तु न देवश्रुतातिदेशवाक्यो हीत्यागुक्तप्रकारेण तत्प्रतीति
फलमुपमानमुच्यत इति हृदयं यायिकाः प्रसिद्धेन रथ्यासारूप्यप्रतिपादकमतिदेशवाक्यमेवोपमानं वर्णयंति॥ गवयो यदि नागरकेण न
गत गवयस्वरूपस्तदभिज्ञमारण्यकं पृच्छति कीदृशो गवय इति॥ स तं प्रत्याह यादृशो गौस्तादृशो गवय इति॥ तेषां तद्वाक्यं प्रसिद्धस्य गवयस्य प्र अप्रसिद्धस्य स·पु·
सिद्धेन गवा सारूप्यमभिदधत् द्वारकं प्रसिद्धस्य परोक्षगवयसंज्ञाभिधेयत्वं ज्ञापयतीत्युपमानमुच्यत इति॥ अत्र प्रतिविधीयते यदाद्यभि
न्नैर्नैयायिकैरभिहितं श्रुतातिदेशवाक्यस्येत्यादि॥ तत्र किं साक्षात्संज्ञासंज्ञिसंबंधप्रतिपत्तिरागमस्योपमानतोच्यते परंपरया वा यथा पद्धेन ऽ
मीमांसकोपकल्पितेन उपमानादस्य कश्चिद्विशेषो तत्र तत्रोक्तदूषणगणप्रसंगो प्राप्नोति नागरिकस्य सादृश्यप्रतिपत्तौ तत्स्मृतेः प्रतिपत्तव्यः न १०१
स्य तु भवत्कल्पितमसिद्धे पिंडे प्रसिद्धपिंडसारूप्यज्ञानं मिंद्रियप्रभवं साक्षात् प्रतिपत्तेरंगं भवितुमर्हति॥ तद्धि केवलं तदंगं भवेत् संज्ञासंज्ञिसंबंध
स्मृतिसहायं वा यदि केवलं तदा श्रुतातिदेशवाक्यस्यापि हदृष्टगोर्नागरकस्यारण्ये गवयं पश्यतः प्रसिद्धपिंडसारूप्यज्ञानं तत्संबंधप्रतिपत्तिं विद

५८

ध्यात्॥ अथ न दृष्टान्तश्रवणसहायस्यैवास्य न प्रतिपत्तिजनने सामर्थ्यं न केवलस्येति नायं दोषः॥ तर्हि श्रुतविस्मृतातिदेशवाक्यस्यापि
प्रतिपत्तुः तत्प्रतिपत्तिर्विरुध्येत्॥ अथ तत्स्मृतिसहायं स तत्प्रतिपत्तेरंगं तर्हि प्रत्यभिज्ञानं सा सादेवस्य स्यादतत्त्विनिरंगीकृतास्यात्।
नस्यैव गोगवययोः सादृश्यपरामर्शात्मकेन संज्ञासंज्ञिसंबंधप्रतिपत्तिहेतुत्वोपपत्तेः॥ तत्स्मृतिसहायेन तर्हि गवयदर्शनेनैव [illegible] उपलभ्यमानयोर्गोगव
ययोः सारूप्यपरामर्शि प्रत्यभिज्ञानं संज्ञानं जन्यते [illegible] अन्यतरस्य स्मर्यमाणत्वयोगात्॥ नहि गवयपाश्चात्ये गोः स्मरणमनुभवं वा तत्र [illegible] समर्थमित्युक्तं मी
मांसकोपकल्पितोपमानविचारावसरे॥ तेन वनस्य एव मर्दिकुट्टिता संज्ञासंज्ञिसंबंधप्रतिपत्तिः गवयप्रत्यभिज्ञानजनकेन प्रसिद्धसारूप्यज्ञानादेरपु
पचारेणोपमानताभ्युपगमे सिद्धसाध्यताप्रसंगात्। चक्षुरादीनामपि प्रसंगाच्च तस्यापि परंपरया तज्जनकत्वसंभवात्॥ तत्र तद्वीन्द्रियजनकम
पीत्यादि [illegible] प्रत्यभिज्ञानस्यैवेन्द्रियेभ्यो गवयसंज्ञासंज्ञिसंबंधप्रतिपत्तिप्रसाधनात्प्रमाणान्तरत्वोपपत्तेः॥ यदप्युक्तं॥ नाप्यागमस्य तत्फल
मित्यादि तत्र सिद्धसाधनमेव तत्संबंधज्ञानस्य प्रत्यभिज्ञानफलत्वात्॥ किंच शब्दानुबुध्यमानत्वादस्यागमफलत्वं तदनतीतानुपायस्याप
रस्योपदेशाद्यत्वसंभिन्नलक्षणाद्॥ तत्रापि पक्षे किं सामान्यतोतिदेशवाक्यात्संज्ञासंज्ञिसंबंधज्ञानानुत्पत्तिः विशेषणे वा यदि सामान्यात्त
त्पत्तिरत्र असौ गवयो यस्समया [illegible] संज्ञा दृष्टे स्वयमाकारप्रतिपत्तिरिति दुर्धरा स्यादीति [illegible] विशेष्यै [illegible] प्रतिपत्त्यर्थिनस्त
द्विषयां प्रतिपत्तिं मन्यमानस्य पिनोस्तारयति धनतत्त्वं प्रतिप्रेक्षावद्भिः प्रयुज्यते॥ यथा जलवृत्त्यर्थिनो नलवाक्येनोत्तारयति च गवयप्रतिपत्त्यर्थिन
स्तत्प्रतिपत्तिं नागम्यातिदेशवाक्यमिति॥ अथ विशेषतस्तदागमस्य प्रमाणापरतो जलांजलिस्तत्र [illegible] वदेशकालाकारविशेषतः कस्यचिदपि विष
येविज्ञानजनकत्वासंभवात्॥ सामान्यत एवागमात्सर्वत्र संवित्तिसंभवात्॥ अथ तत्प्रतीत्युपायस्यापरस्योपदेशान्नास्यागमत्वं। यत्र
हि शब्दप्रत्ययादेवार्थतत्त्वमुपायान्तरनिरपेक्षमवधार्यते॥ स आगमो [illegible] पुरुषोर्थस्ततोना उपायान्तरमपरमुपदिशति॥ तत्र तत एवोपा
यीत्वसिद्धसाधर्म्यादिलक्षणात्संज्ञासंज्ञिसंबंधावधारणमुपायमात्राविगम एव तु शब्दव्यापारहीन॥ तदर्शात्तं शब्दव्यापारप्रभवस्याप्य

न्या० कु० प्र०

१३२

ऽसेनावगतविशेषेणप्रयोगमात्रप्रमाणांतरत्वमिष्यते॥ तदा यमाणानामानंत्यप्रसंगात्॥ नैयायिकस्य चत्वारि प्रमाणानीति संख्याव्याघातः स्यात्॥ न
चाहि॥ यः सिंहासनाधिरूढः स एव आपणोंबु भेरी हंसः स एव पदे देवम्मि धुपः सप्तपर्णोविषिमरूदस्तैव माद्विवाक्ये जनितसंस्कारस्य पश्चात्
विशेषणविनिर्दिष्ट॥ एवमादिकं पश्यतो यमसौ एवेत्यवमानिकापार संज्ञासंज्ञिसंबंधप्रतिपत्तिरुत्पद्यते॥ तावद्वन्मते ब्रवाणा चतुष्ट्यान्
तर्भूतत्वात्प्रमाणांतरं स्यात्॥ नच सारूप्यमात्रं प्रसिद्धसाधर्म्यात्तेऽपेक्षणात्॥ नाप्यागमस्तत्कालीनो सिंहासनादिरूढत्वादेरुपायांतर
स्योपदेशात्॥ तथाप्यस्यागमेंतर्भावेऽप्युपमानस्यापि तत्रांतर्भावो ऽस्तु विशेषात्॥ एतेन वाच्य संविन्नेस्वरूपादित्यपि प्रत्युक्तमिति
स्तदपेक्षणेऽप्यागमेंतर्भावात्॥ अभ्युपगमात्॥ ननूपायांतरस्य प्रतीतावप्युपमानस्यागमेंतर्भावाभ्युपगमेऽस्थिमानं यथा वह्निधूमवत्त्वा
ल्लहानसवदित्यादौ परार्थानुमानस्य कुतस्तत्रांतर्भावो नस्यादिति चेत्॥ अनुमानकारणकार्यत्वादिति ब्रूमः॥ न चाहि॥ प्रतिपादकस्य
र्थानुमानकार्यत्वात्प्रतिपाद्यस्यार्थानुमानकारणत्वाद्वचनरूपस्यापि परार्थानुमानस्यानुमानतानाविरुध्यते॥ न चैतद्वक्कल्पितोपमा
नेसंभवति॥ न खलु उपदिष्टप्रसिद्धसाधर्म्यलक्षणोपायार्थप्रतीतिं विहायान्यदुपमानं किंचिद्भवतः प्रसिद्धमस्ति॥ यत्कारणेकार्यतया सोपदेश
प्रपत्रस्याप्युपमानतास्यादिति॥ एतेन वृद्धनैयायिकैर्यदुक्तमुपमानलक्षणप्रसिद्धेन रूपेणाप्रतिपादकमभिदेशवाक्यमेवोपमानमिति
तदपि प्रत्याख्यातमतिदेशवाक्यात्मनः स्यागमस्वभावतयोपमानत्वायोगात्॥ तदा किंचिद्विशेषमादाय प्रमाणानामागमस्वभावत्वाभ्युपगमे प्रत्यक्षा
प्रतिपादितारोषदोषप्रसंगः स्यात्॥ ततो गोगवययोः सारूप्यप्रसक्तशीलकं ज्ञानमेव प्रत्यभिज्ञारूपं तुरुत्वतः प्रमाणांतरं नान्यदिति॥ प्रयोगादृष्टै १३२
तिपत्तव्यमनेकदोषाणां तेशतोऽप्य वकाशासंभवादिति कारिकायामनुक्तमपि दूषणं प्रसिद्धेत्यादिना दर्शयन्नाह॥ प्रसिद्धार्थसाधर्म्यमन्यथानुप
पन्नत्वेन साध्याभावप्रकारेणानिर्दीतं चेत्॥ यदितर्हि लिंगमेव तल्लक्षणत्वादिति लिंगस्य पक्षधर्मत्वेनेति निर्णीतं तद्दूषणमाह॥ ततस्त्वादिना प्रसिद्ध
र्थसाधर्म्यात्प्रतिपत्तिः साध्यसंवित्तिरन्यथा ऽन्यथानुपपन्नत्वनिश्चयाभावप्रकारेणागृहीतेन॥ प्रत्यक्षइत्यादिना प्रथमं कारिकार्द्धमाचष्टे॥ प्रत्य

युज्यते

सेदर्शनेनविषयीकृतेर्थे गवयपलक्षणे गवयशब्दइतिसंज्ञा तस्यागवयस्यसणोर्थःसंज्ञी तयोर्वाच्यवाचकलक्षणःसंबंधः तस्यप्रतिपत्तेःगवयोय
मितिसंविज्ञेःप्रमाणांतरत्वेनोक्तिकृपमाणेदूषणमाह॥शब्दादि॥अर्थंइदमुपमानोभावोवृद्धशब्दनियज्ञानेनप्रमाणांतरंस्यादित्यध्याहारः॥
कस्यतद्ज्ञानमित्याह॥वृत्तदर्शिनःअवनिरर्चीनमाह॥गवयोयमित्यादि॥अयंगवयइतिज्ञानंपश्यागवयपादिदर्शिनःउपमानात्वंप्रमाणां
तरंतथापारार्थ्यकृतमपितरंतरंस्यात्॥उपमानंकस्मात्तत्तभवतीतिचेदत्राह॥प्रसिद्धेत्यादि॥प्रसिद्धार्थसाधर्म्यात्साध्यसाधनमितिलक्षणस्य
अभावात्प्रमाणांतरंरूपंतद्ज्ञानंशुल्वयनइतिचेद्वच्यते॥वृत्तोयुक्तोयदाकश्चित्कंचित्पश्यतिकीदृशो॥वृद्धइतिसतंप्रत्याह॥शास्त्रादि
मान्त्वदृशनिलद्ज्ञाकाञ्चाहितसंस्कारःयदापुनःशास्त्रादिनंतंपदार्थंपश्यन्पंचयस्तइतिप्रतिपद्यते॥प्रोक्तवचनंहिधर्म्यातस्यानिपतिर्विलक्ष-
णापरित्यपमर्योव्याख्यायते॥तथापरमपिप्रमाणांतरंपरस्यापादयितुंगौरिवेत्यादिमाह॥अस्यायमर्थोयदाकश्चिदाटविकोनगरस्थेनकी
दृशोगवयइतिपृष्टःगौरिवगवयइति।तदानस्यनागरिकस्यगौरिवगवयइत्येवंवाक्यंश्रुत्वापर्यटतोगवयदर्शिनःतत्वाक्यार्थप्रतिपत्तिवत्॥तच्छब्दे
नदृष्टोगवयःपरामृश्यतेऽनेनस्यगवयइतिनामनस्यप्रतिपत्तिःसेवनद्वारेति॥प्रत्यक्षेणतुदर्शनविषयीकृतेपिंडेतेषुप्रसिद्धार्थविलक्षणेषुतिर्यक्षु
महिष्यादिषुतस्यैवगौरिवगवयइतिवाक्यंश्रुतवतःश्रुतःपश्चाद्गवयोयमितिनिश्चयःकाठिंनामकिमभिधानंप्रमाणंस्यात्।सामान्येनतन्नि
श्चयवचनमस्यासदृशमीमांसकसंबंधःसादृश्यंचनैयायिकसंबंधिनोनिश्चयस्यसंग्रहार्थंतेनमीमांसकंप्रतिव्याख्यानं॥तदपिसंगृहीतमि-
तरथागवयपनामनिश्चयइतिब्रूयात्॥अथागवयज्ञानंप्रमाणांतरंभवतीत्युच्यतेऽत्रोत्तरमाह॥हानोपादानेत्यादि॥हानोपादानोपेक्षाफलं
यस्यागवयज्ञानस्यतत्प्रमाणंभवितुमर्हति।किंतुप्रमाणाभेदलरिनिप्रमाणोयनाव्याघातः॥तथापूर्वमपिपरस्यानिष्टप्रमाणांतरदोषमाह॥
प्रसक्तान्तरेणप्रक्षासंबंधप्रतिपत्तिःतत्प्रमाणांतरंचेत्सर्वमनुमानंकृतस्तथा॥प्रसक्तंचनदर्शनंचतस्यापेक्षायस्यांसातथोक्तास्येत्याह॥सं
बंधप्रतिपत्तिःवाच्यवाचकयोर्यःसंबंधस्तस्यप्रतिपत्तिःयतोयस्माज्जायतेइत्यध्याहारेचेत्यादिनाचेत्प्रमाणांसर्वमीमांसकनैयायिककल्पितं

न्या॰ कु॰ चं॰ १७२ कुतो प्रकृतस्त्रित्वप्रमाणमितिसंबंधः ॥ तथा तेन तदप्रमाणप्रकारेण दर्शिनस्त्वागमार्थदर्शिनस्तस्मात्प्रतिपत्तिरागमार्थाभिधानप्रतिपत्तिः सा
कल्येनानवयवेन यावाचितदर्थदर्शिनस्तस्मात्प्रतिपत्तिः सा प्रमाणमप्रमाणं वा स्यादित्यध्याहारः ॥ यदि प्रमाणं प्रमाणसंख्याव्याघातः स्या
त्प्रमाणांतर्भूतमानस्याप्रमाणं स्यादविशेषात्ततः सत्यवतत्संख्याव्याघातः नत्तुतस्यतत्प्रतिपत्तिरूपमानमेव ॥ तच्च प्रमाणमिति प्रमेयेत्तु
तदेवानवकाशास्त्वाशंक्याह ॥ नपुनरित्यादि ॥ नपुनरेवोपमानमेवतत्प्रतिरित्युत्तुवर्तते ॥ किंतु ततोऽन्यापि विद्यत इत्यभिप्रायः अत्रोदाह
रणमाह ॥ यथेत्यादि ॥ यथेत्युदाहरणाप्रदर्शनेऽप्येतस्मान्नगरादेः पूर्वपश्चिमयुत्तरंदक्षिणं वा ग्रामप्रधानकंग्रामविशेषस्येयं संज्ञा एतन्नाम
कंएतदनिर्दिष्टं नाथमेस्यनतथोक्तं ॥ इत्येवमाहितसंस्कारस्य पुंसस्तत्सदर्शिनोपनदेतस्मादित्यनेन ग्रामप्रधानकमित्यनेनाचोक्तं तस्य तुलो-
त्येवंशीलस्य ॥ तन्नामप्रतिपत्तिः ग्रामप्रधानकनामप्रतिपत्तिः च शब्दोत्र दृष्टव्यः ॥ स्वतस्मादित्यनेनापेक्षं प्रमत्तार्थो तस्मुकष्टं मित्यादिना च तदपेक्षं ग्रा
मधानकं ॥ अत एवास्य विशेषः ॥ अतोऽन्यप्रमाणं दोषरनिचेत् ॥ अत्राह कश्चिदित्यादि कश्चित्तुनकश्चिदर्थं परेणोच्यमानोविश्वयोऽन्वयभाक्कोसावित्याह
संज्ञासंज्ञिसंबंधप्रतिपत्तिसापनमेव समरसोपि प्रमाणांतरं न पुनः संख्यादिप्रतिपत्तिसाधनमिति किंतु तदपि स्यादितिभावः एतदेव दर्शयन्नाह ॥ इ
दमल्पंमहद्दूरमासन्नंप्रांशुनेतिवा व्यपेक्षावशात्प्रामाण्येपि विकल्पः साधनांतरं विकल्पव्यपेक्षकमितिसंबंधः तेदमल्पमितिविकल्पः इदंमहदिति-
विकल्पः ॥ इदंदूरमितिविकल्पः ॥ इदमासन्नमितिविकल्पः इदंप्रांशुमितिविकल्पः तथाल्पं नेतिविकल्पो महन्नेति दूरन्नेत्यासन्नं नेति प्रांशुनेति ॥ वा
य शब्दः पक्षांतरसूचकः कुतो सोविकल्पो जात इत्याह ॥ व्यपेक्षातइति ॥ आमलकापेक्षया बिल्वं महत् ॥ देवदत्तसमीपसस्यापेक्षया पर्वतादिकं दूरमे १७३
वमन्यत्रापि योज्यं ॥ इदमल्पमित्यादिग्रहणामुपलक्षणं तेनान्यदेव तत्प्रादिविकल्पस्यापि त्वादिविकल्पस्य च ग्रहणं कासौ जात इत्याह ॥ समन्वेषत
किमित्यत्राह ॥ साधनांतरं प्रमाणांतरं कारिकां विवृण्वन्नाह ॥ इत्येतादि ॥ इत्येवं प्रमसैव्यर्थमुपलक्षणमन्योन्यं विवसालकरणं यस्यनत्तयोक्तं ॥ किंत
रत्नमहत्वादि तानं प्रादिशब्देन दूरादिग्रहः तत्तो अव्याधरेणतरादित्वानमध्यादि शब्देन मध्यादित्वानमध्यपरिग्रहः ॥ दिव्यादिसंख्याज्ञानमिहाप्या

द्वित्वादेर्न विलक्षणादि संख्याज्ञानपरिप्लवः। प्रत्यक्षादौ परादिज्ञानं न त्विकिमित्यत आह। प्रमाणं तु नैते विसंवादकत्वात् किमिति चेत्तत्राह॥ उपमानादि
ति॥ एवं नैयायिकमीमांसकयोः प्रमाणान्तरसंख्यावंशरभिमतप्रमाणसंख्यानियमनाशक्यं निरूप्येदानीं मीमांसकाभिमतार्थापत्तिं विचिंतयन्ना
ह॥ अर्थापत्तिरित्यादि प्रमाणषट्कविज्ञातो यत्रार्थो नान्यथा भवन्॥ अदृष्टं कल्पयेदन्यं सार्थापत्तिरुदाहृता॥ इत्येवं लक्षणलक्षिता मी-
मांसकपरिकल्पिता अर्थापत्तिः सानुमानात्प्रमाणान्तरं न भवतीति किं न चिंतया॥ अयमभिप्रायो अर्थापत्तौ प्रकारार्थस्य साध्याभावेऽनियमेनानुपप
द्यमानस्याविनाभावस्वभावलिंगलक्षणत्वादिनत्वाल्लिंगत्वमेवोपपन्नं तस्य भवं ज्ञानमनुमानमेवेति॥ अतः प्रत्यक्षमनुमानं च शाब्दं चोप
मानतः॥ अर्थापत्तिरभावश्च षट् प्रमाणानि जैमिनेः॥ इति कुमारिलस्य वदतः प्रमाणसंख्याव्याघातः प्रभाकरस्य च पूर्वं यत्तद्विरो
धं वदतः पंच प्रमाणानीति ध्रुवं॥ ननु वार्थापत्तेः स्वरूपादिभेदात्प्रत्यक्षादिभ्यो भेदप्रसिद्धेः कथं प्रमाणसंख्याव्याघातस्तथा च प्रयोगः अर्थापत्तिः
प्रत्यक्षादिभ्यः प्रमाणान्तरं विभिन्नस्वरूपत्वात् यतो विभिन्नस्वरूपं तत्ततः प्रमाणान्तरं यथा प्रत्यक्षादनुमानं प्रत्यक्षादिभ्यो विभिन्नस्वरूपा चार्था
पत्तिरिति॥ न चाविभिन्नस्वरूपत्वमसिद्धं॥ तथाहि तस्याः स्वरूपं॥ श्रुतो दृष्टो वार्थोऽन्यथा नोपपद्यत इत्यदृष्टार्थकल्पनात्र दृष्टः प्रत्यक्षादिभिः
पंचभिः प्रमाणैरुपलब्धः॥ श्रुतो लौकिकाद्वैदिकाद्वा वाक्यादवगतस्तस्मादनुपपद्यमानादर्थान्तरकल्पना सार्थापत्तिः सा च षट्प्रकारा भवति॥
प्रत्यक्षादिनिमित्तभेदात्॥ तत्र प्रत्यक्षात्प्रतिपन्नं दाहाख्यकार्यान्यथानुपपत्त्या वह्नेर्दाहशक्तिकल्पना प्रत्यक्षपूर्विकार्थापत्तिर्देशान्तरप्राप्तेर्लि
गादनुमितादित्यगत्यन्यथानुपपत्त्यादित्ये गमनशक्तिकल्पनानुमानपूर्विकार्थापत्तिः॥ उपमानोपमेयावगतगवयसारूप्यविशिष्टगोपिंडान्य
थानुपपत्त्या तस्य तज्ज्ञानग्राह्यशक्तिकल्पनोपमानपूर्विकार्थापत्तिः॥ एवमर्थापत्तयः प्रमाणान्तरमतीन्द्रियशक्तिविषयत्वात्॥ न खलु शक्तयः प्रत्य
क्षपरिच्छेद्या अतींद्रियत्वात्॥ नाप्यनुमानपरिच्छेद्याः प्रत्यक्षाविषयेऽनुमानस्याप्रवृत्तेस्तत्पूर्वकत्वात्तस्या अप्रत्यक्षेण हि प्रतिबन्धे प्रतिबन्धेन
मानं प्रवर्तते॥ न च शक्तेरतींद्रियत्वेन प्रत्यक्षागोचरत्वे तत्केनचिल्लिंगेन सहास्याः प्रतिबन्धग्रहणोपनिपुणका नाप्यन्वयव्यतिरेकाभ्यां तन्निय

न्या·कु·चं· नि:प्रसक्ताविषयेन तस्य वर्तेरेवासंभवात्॥ नाप्यनुमानान्तरनिबंधप्रतिपत्तिस्तदीदमेवान्यत्र तत्प्रतिपत्तौ प्रवर्तेतेनानवस्थितत्वं चक्रकप्रसंगात्॥
१३७ सर्वत्र निबंधग्रहणेऽनुमानप्रवृत्तिस्तद्ग्रहणं च व्याप्तिपूर्वकमेवेति तस्य निश्चितस्यानुमानप्रवृत्तौ तत्प्रतिपत्तिरन्यप्रतिबंधग्रहणमिति॥ अथवान्
नोऽनुमानान्तरप्रतिबंधप्रतिपत्तिर्न तु तदपि प्रतिबंधप्रतिपत्तौ सत्यां प्रवर्तते॥ तत्र च प्रतिबंधप्रतिपत्तिः प्रथमानानुमानान्तरप्रतिबंधप्रतिपत्तिर्न
तु तदपि प्रतिबंधप्रतिपत्तौ सत्यां प्रवर्तते॥ तत्र च प्रतिबंधप्रतिपत्तिः प्रथमानुमानात्तदंतरं वास्यात्॥ प्रथमपक्षेऽन्योन्याश्रयः सिद्धे हि द्वितीयानु
मानेन तत्प्रसिद्धप्रतिबंधाल्लिंगात्प्रथमानुमानस्य सिद्धिस्तत्सिद्धौ चातः प्रसिद्धप्रतिबंधाल्लिंगाद्द्वितीयानुमानसिद्धिरिति॥ द्वितीयपक्षे तु तदनवस्थानुमानांत
रेऽपि प्रतिबंधप्रतिपत्तेरनुमानान्तरादेव प्रसिद्धेः॥ न हि प्रतिबंधप्रतिपत्तिं विना कोऽप्यसिद्धस्यास्य सिद्धये प्रभवति शब्दोऽयमानयोस्तु शक्तिप्रतीतौ संभावनैव
नास्ति व्यवसायस्याभ्यां विनैव तत्प्रतिपत्तिप्रतीतेरलोचपत्तेरेव शक्तिविषयत्वं युक्तं॥ तथा शब्दसाधनार्थप्रतीत्यन्यथानुपपत्त्या कल्पनस्य पाचकस्य
किमवगमस्यातदन्यथानुपपत्त्यानवगतस्य नित्यत्वकल्पनार्थापत्तिरर्थकार्यापत्तेः पीनो देवदत्तो दिवा न भुंक्ते इति वाक्यश्रवणादुक्तो भोजनकल्पनानुप
पत्तिः न हि तत्र प्रमाणांतरवाक्यमेव तस्य प्रतिपत्तिनिबंधनं॥ पीनादिपदानां स्वार्थप्रतिपादनपरत्वाद्रात्रिभोजनलक्षणार्थप्रतिपादनसामर्थ्या
नुपपत्तेः अथ पदसमुदायात्तत्प्रतिपत्तिस्तन्नास्याः पदार्थप्रतिपादनपरत्वात्॥ उक्तप्रमाणेन हि पदसमुदायेन देवदत्तस्य पीनत्वस्य सोपपत्त्या अथ
दिवाभोजननिषेधप्रतिपादनपरत्वेन॥ न तु रात्रिभोजनविधिर्विधिप्रतिषेधयोः परस्परपरिहारस्थितिलक्षणविरोधतो मिथः संसर्गाभावात्॥ [illegible]
[illegible]ऽन्यत्र स्वपदार्थसमुदायस्य वाक्यार्थतादृष्टे वाप्रतीतिविरोधात्॥ नापि तत्पदाविषयपदसमुदायेनाभिधात्री नाऽस्य पदशक्तिर्वास्तीति॥ अतोऽर्था
पत्तिरस्य रात्रिभोजनलक्षणोऽर्थः प्रतीयत इति प्रमाणान्तरं तार्थापत्तिसिद्धा तदुक्तं॥ न च प्रत्यक्षतो ज्ञाना दृष्टेर्हेतुवाक्यना [illegible] रनुमितान्तरार्था
पानात्तच्छक्तिः [illegible] अभिधानप्रसिद्धमर्थापत्त्यादितो विनान्तं शब्दे च तद्वाचकसामर्थ्यात्
नित्यत्वप्रवेशपत्ता॥ अभिधानान्यथासिद्धिरिति वाचकत्वान्यथार्थापत्त्या गम्यैव तदन्यत्वगतेः पुनः अर्थापत्त्यन्तरेणैव शब्दनित्यत्वनिश्च

१ प्रतिपत्त्य [illegible]

च॥ दर्शनस्य परार्थत्वादित्यस्मिन्नभिधास्यते। पीनो दिवा न भुंक्ते चेत्येवमादिवचःश्रुतेः रात्रिभोजनविज्ञानं श्रुतार्थापत्तिरुच्यते। इति
अभावार्थापत्तेश्च लक्षणं प्रमाणाभावनिर्णीतचैत्राभावविशेषितात् गेहाच्चैत्रबहिर्भावसिद्धिर्याभिहदर्शिता तामभावोत्थां मन्यामर्थाप
त्तिमुदाहरेदिति॥ जीवतो हि चैत्रस्य गृहेऽभावस्य तदन्यथानुपपत्त्या बहिर्भावकल्पनमभावपूर्विकार्थापत्तिः॥ अथ इदं तावत् प्रसिद्धमनुमानमेवे
यमित्युच्यते। तन्न तस्य सामग्र्यभावात् रूपस्मृतौ दि सामग्र्या लिङ्गिज्ञानं जन्यते। तच्चानुमानं प्रसिद्धं सा चेह नास्ति॥ तथाहि। बहिर्भावविशि
ष्टश्चैत्रो विशिष्टो वा बहिर्भावोऽनुमेयः। किं गृहाभावविशिष्टस्य चैत्रस्य चैत्राभावविशिष्टस्य वा गृहस्य गृहे चैत्राभावस्य वा गृहे चै
त्रादर्शनस्य वा लिङ्गत्वमिति। नैषां मध्ये अन्यतमोऽपि हेतुः पक्षधर्मत्वाभावात्। नहि चैत्रधर्मात् बहिर्भावधर्मवान् किं च प्रमेयानुप्रवेश
संगात् प्रमानुमानं तथा योगमा... जीवतश्चैत्रस्य गृहाभावेन बहिर्भावः कल्प्यते अन्यथा ... नानैकान्तः स्यात्। अभावस्य ... सर्व
बहिर्भावप्रसंगमयानि नागृहीतो धूमवत्। अभावग्रहणं च सदुपलंभकप्रमाणपंचकाभावपूर्वकं ... सदुपलंभकत्वे ... ज्ञानीदृश्या
त्यागमात् स्वयं प्रमाणं प्रतीति। तस्मिन् कथमभावग्रहणं प्रवर्त्तते इति प्रवर्त्तमानमेवैतत् सदुपलंभकप्रमाणं स्वयं गृहे च अप्रमेयस्यापत्तिः॥ जी
वनं प्रतिपत्त्यागमात् तस्मात् अन्यतो यत् तत्त्वप्रतिपन्नं न दृष्टं भावं परिच्छिंद्यत्प्रमाणेन स्वविषयादन्यत्र संकोच्यते॥ बहिस्त्वभावो गृहे त्वभाव
विज्ञानेन जीवतो गृहेऽभावलक्षणसाधनप्रतिपत्ते बहिर्भावस्य साध्यप्रतिपत्तिः प्रवृत्तिसिद्धासिद्धप्रमेयानुप्रवेशो नोपपत्तेनुमानं तदि
त्युक्तात् अनुमाने धूमादिलिङ्गग्रहणसमये अनुमेयप्रतिपत्तिः प्रतीतौ धूमादिग्रहणे न रकालं तस्य प्रतिपत्तिः प्रतीतेः॥ तत्त्वर्थापत्तावपि प्रमेया
नुप्रवेशो दोषः समान एवास्त्विति। अत्र पाणिप्रमाणद्वयसमर्पितैकवस्तु विषयभावाभावसमर्थकार्थप्रवर्त्तमानार्थापत्तिः प्रमाणमन्य
प्रमेयप्रदद्वयमन्यथा तत्संघटनायोगात् प्रतिवेषयन् आगमादनियतदेशतया क्वचित् अस्तीति संवित्तिरभूत्। क्वचिद्गृहाभावेऽग्रहीते च
हिरस्तीति संवित्संवनात् तरनो चैत्रलक्षणपान्नानुमानम् अर्थापत्तिः संबन्धग्रहणाभावाच्च भावाभावो हि निपुणपदच्छिद्रसमवेतकोऽदिप्रभव

न्या.कु.चं. प्रत्यये प्रतिबद्धत्वं यादृशो ज्ञातुं सर्वोत्र गृहाभावस्य हि व्याप्यत्वे बहिःसद्भावो व्यापकः । स चाप्रत्यक्षेणार्वाग्दर्शिभिः साक्षात्कर्तुमशक्यो ऽनंतदेशवर्ति
१०५ त्वात् ॥ ननु कश्चिद्दूरस्थितः कश्चिद्देवदत्तादेर्भावाभावो गृह्णाति यदि तत्र गृहे भावस्तदा तत्र सद्भावस्तस्य व्याप्तिग्रहणे ऽनरकाले चेत्रादे
र्निश्चितनिश्चयस्य गृहे ऽभावाद्बहिः सद्भावो निश्चीयतेऽसत्यं न च तत्प्रमाणात् तस्याविलक्षणं न बहिः सामान्येनानियतदेशेन व्यापकेन सं
बंधग्रहे ऽसत्युनरकाले वस्तुधर्मतानिश्चयसमपेक्षात्वकस्यानियतदेशतया प्रतिपत्तिः । अत्र तु वेपरीत्यं नहि गृहे ऽभावान्नियतदेशतया बहिः
प्रतीयते । यादृशस्य कस्यचिद्व्याप्तिकाले तादृशस्यैव प्रयोगकाले ऽप्यनियतदेशसोऽप्रतीयते । किं च गृहद्वारवर्तिनाऽगतो ऽभावस्य बहिः प्रभावस्य बहिः
सद्भावेन संबंधग्रहे गृहे चैत्रसद्भावेन बहिस्तदभावसाधने कथं संबंधग्रहः स्यात् ॥ उक्तं च श्लोके ॥ नष्टः प्राप्य च गृहद्वारवर्तिनः संगतिग्रहः ॥
भावेनाभावसिद्धौ तु कथं सेवं भविष्यति ॥ १ ॥ न खलु गृहे चैत्रस्य सद्भावान्यथानुपपत्त्या देशांतरेषु न दृष्टिप्रवासः सोऽन्यगृहेऽन्तद्भावस्य देशां
तरेऽभावासिद्धेनाध्यक्षतः संबंधग्रहो यदेशो देशांतरानुमानं स्यात् ॥ कथमेवं धूमस्याग्निव्यतिरेकनिश्चयदर्शनेऽपि न ॥ किं नागृहीतेन च धूमाज
न्यधूमज्वलनयोरन्वयग्रहणासंभवे व्यतिरेकग्रहणेनान्वयसंभवात् । न हि भूयोदर्शनसुलभनियमज्ञानं तत्पादार्थसाध्याधिगमविरहे च न
साध्यनियव्यतिरेकनिश्चयेन किंचित्प्रयोजनं साध्याधिगमस्य संपन्नत्वात् ॥ इह पुनरन्यथा वस्तुसमयवन्ध्यधर्म्मस्य दुरधिगमत्वमनुक्रमनं
तदेशवर्त्तित्वात् । अथानुपलब्धानन्निश्चीयते तत्र गृहव्यतिरिक्तसकलदेशवर्तित्वं तदभावस्यानियतदेशतया नुपलब्धानिश्चेतुमशक्यत्वात् ।
तेषु तेषु देशांतरेषु गत्वानुपलब्धाभावस्याप्युदयनगत्वा पिता समानाख्यज्ञानासिनान्तनां ॥ कौतूहलाद्विनिष्क्रांतेन तत्र चेत्राभि
शंकया ॥ २ ॥ न तस्मादभिधेयस्य सर्वज्ञानान्यतो नियतदेशोपलभ्यमानपरिमितपरिमाणगुरुत्वशरीरस्यान्यथानुपपत्त्यैव अत्तदिनस्सकलदेशना
सिसाधारणं ॥ न स्त्रैक्याविचारितनचनाद्गृहाभावनिश्चयः ॥ अत्र प्रतिविधीयते यत्ताबदुक्तं चैत्रसत्त्वे वेत्यादि तत्र देशः श्रुतो वार्थः स साधनी
संकल्पितस्य कल्पनाधिपत्यं ॥ कथं न कल्पनाकारणं जडस्य किंचिद्गृह्णाः कश्चिदर्थः कल्पयितुं शक्यो नित्यसंशयात् ॥ अथ संबद्धलक्षितो जाय

१ अधिगम ख. पु.

२ मानाश्रतीतिरनुमानमेव॥ तथा हि। इदं कुतो दार्थीरर्थीनरेश्वतीतिरनुमानमेवाविनाभावबलेनोपजायमानत्वादर्थापत्तिरविनाभावबलेनो
पजायते॥ ततदनुमानमेव यथा धूमादग्निविज्ञानमविनाभावबलेनोपजायते चार्थापत्त्यभिमतं ज्ञानमिति॥ किं वासौ तत्संबंधोपित
द्रूपतयाज्ञातो ज्ञातो वा तत्कल्पनानिमित्तं स्यात्॥ न तावदज्ञातो बालादेरप्यतो दृष्टार्थकल्पनाप्रसंगात्॥ अथ ज्ञातस्तत्रापि किं साध्यप्रतिप
त्तिकालेन तत्संबंधतयासौ ज्ञातः पूर्वं वा तत्र प्रथमपक्षे किं प्रमाणांतरेण तत्संबंधतयासौ ज्ञातस्तत एव वा॥ न तावदाद्यविकल्पो युक्तस्तत्प्रतिपत्तिका
लेन तत्संबंधग्राहिणः प्रमाणांतरस्यासंभवात्संभवे वा साध्यस्याप्यत एव सिद्धेः॥ किमर्थापत्त्या॥ न खल्वसौ तथाप्यनुमानान्नभिद्यते॥ तथा त्वर्था
पत्तिरनुमानात्प्रमाणांतरमेव गतसाध्यसंबंधाद्धेतोरुपजायमानत्वात्प्रमाणांतर एवं गतसाध्यसंबंधाद्धेतोरुपजायते॥ ततदनुमान
मेव यथा धूमादग्निविज्ञानं प्रमाणांतर एवं गतसाध्यसंबंधाद्धेतोरुपजायते चार्थापत्त्यभिमतं ज्ञानमिति॥ अथ तत एव साध्यसंबंधतयासौ ज्ञा
तस्तदान्योन्याश्रयः सिद्धायां ह्यर्थापत्तौ तदुपकारकस्य तत्संबंधतयावसितिः सिद्धेश्च तस्यां तत्सिद्धिरिति॥ अथ पूर्वं तत्संबंधतयासौ ज्ञात
किं साध्यधर्मिणि दृष्टांतधर्मिणि वा प्रथमविकल्पे योपपत्तेर्वैयर्थ्यं तत्साध्यस्य प्रागेव प्रसिद्धत्वात् दृष्टांतधर्मिण्यप्यनभ्युपगमान्नासौ
तत्संबंधतया ज्ञायते॥ किं च तत्रासौ संबंधतया भूयोदर्शनाद्विपक्षेनुपलंभाद्वार्थापत्त्यंतराद्वा प्रतीयेत॥ न तावद्भूयोदर्शनात्॥ शक्तेरतींद्रिय
तया भूयोदर्शनासंभवात् नापि विपक्षेनुपलंभात्तस्याप्युपलंभयोग्येष्वर्थेषु संबंधप्रतिपत्तिहेतुत्वात्॥ नाप्यर्थापत्त्यंतरादनवस्था
प्रसंगात्॥ कथं तर्हि साध्यसाधनयोः संबंधप्रतिपत्तिर्भवतोपीति चेत् तर्काख्यप्रमाणांतरत्वात्। अस्माकं तदभ्युपगमे कोशपदनिक्षेपमाण
संख्याव्याघातः॥ तथा यत्र देशादिप्रतिपन्ने प्रतिबंधेनुमानं प्रवर्तते तत्र स्यादियं व्यवस्था॥ सर्वो हि तर्कप्रमाणादेव संबंधप्रतिपत्तिप्रसिद्धेः।
न चानुमानस्य विदग्धो चरोस्ति॥ येन शक्तेरतींद्रियतया केनचिल्लिंगेन सह संबंधाप्रतिपत्तेरनुमानेनोपपत्तिप्रतिपत्तिः स्यात्॥ यदपि मत्यत्रप्रतिपन्न वा
हारस्य कार्यान्यथानुपपत्त्येत्यादि प्रत्यक्षपूर्वकार्थापत्तेर्लक्षणमुक्तं तत्राप्युपपत्तिस्वरूपं वक्तव्यं॥ किं साध्येनाविनाभावो तदनुपपत्ति

प्रमाणविरोधो वा प्रथमपक्षे तेन विना नोपपद्यत इत्यनेन व्यतिरेकः प्रतीयमानस्तस्मिन् सत्युपपत्तिरित्यनेनान्वय इत्यन्वयमवसीयते ॥ अ
न्वयव्यतिरेकौ च लिंगस्य गमकत्वे धर्माविति कथमर्थापत्तिरनुमानादतिरिच्येत ॥ प्रमाणविरोधेऽपि बाध्यबाधकभावाभावान्नान्यथानुपपत्तिका
र्यं जगतस्तस्मान्न ह्यहिरोगविज्ञानयोर्बाध्यबाधकभावे सति रज्जुतान्यथानुपपत्त्यार्थीमवकल्पनानुषंगात् ॥ न तत्र लक्षणान्यथानुपपत्तेरवाप्यविरो
धात् ॥ किंच प्रमाणयोः परस्परं प्रतिबंधकत्वे सत्यर्थापत्तिः प्रवर्तते न च तत् कल्प्यं स प्रसिद्धत्वान्न हि स्फोटस्वरूपसंज्ञानादयः प्रत्यक्षं प्रतिरुद्धं न हि ॥ न च तत्स्वरू
पं कारणं संभवति प्रकारांतरं च नोपलभ्यते कारणाभावे च कार्याभावो दृष्टोऽतः कारणाभावाख्यलिंगेन प्रभवानुमानान्नयाभावः प्रमाणद्वये
चं प्रमाणद्वयविघटनापादनं तत्त्वं घटनान्यथानुपपत्तिकातयोर्विषयभेदं दर्शयंती त्वर्थापत्तिः प्रवर्तते ॥ स्फोटज्ञानं हि स्फोटविषयं कारणाभावानुमानं च प
रिदृश्यमानकारणनिबंधनकं कार्याभावविषयमिति ॥ तस्य समो दोषः ॥ यतः कारणाभावो न कार्याभावनिश्चये लिंगं स च निश्चितो निश्चि
तापन्नलिंगं स्यात् ॥ न तावदनिश्चितो वाप्यादिरपि धूमादिना संदिग्धस्य लिंगत्वाप्रसंगात् ॥ अथ निश्चितः कुतस्तन्निश्चयः कारणानुप
लब्धेश्चेत्ता किं दृश्यानुपलब्धिरदृश्यानुपलब्धिर्वा ॥ दृश्यानुपलब्धिः प्रथमतो भावसिद्धिः परमाण्वादिना नेकांतात् ॥ अथ दृश्यानुपल
ब्धिः तर्हि न कारणाभावसिद्धिः कथमर्थापत्तेः कारणसद्भावाद्विकार्यायाः प्रामाण्यं स्यात् ॥ न च कथं संगाद्यनकारणाभावस्य लिंगत्वान्न पाहि कार्यका
रणयोः संबंधग्रहणे सति कारणाभावात्प्रमानुमानं प्रवर्तते ॥ संबंधग्रहणे सति कारणग्रहणं वार्थापत्तितोऽर्थापत्तिश्च कारणाभावानुमाने सति
न च संबंधग्रहणे सति तेन चार्थापत्तिर्न तत्र स्फोटाद्यैः कारणसद्भावसिद्धिरनुमानतोऽपि नास्ति सिद्धा ॥ तथा हि ॥ स्फोटादिकारणशब्दकं कार्यत्वात्प्रत्यक्ष
मितकारणशब्दकं घटादिकार्यवदेवं स्फोटादि तस्मात्कारणशब्दकमिति ॥ एतेनानोपमानशब्दकार्थापत्तिद्वयमपि प्रत्याख्यातं तत्रापि ह्यकिवि
षयकृतप्रत्यक्षशब्दकार्थापत्तिप्रकृतिसिमान्येषदोषानुषंगात् ॥ योपि शब्दनित्यत्वसिद्धावर्थापत्तिरुद्भाविताकृत्कासाध्यमुक्ता इह शब्दस्यानित्य
त्वे पिवाचकत्वस्यानुपपत्तेस्तदनित्यत्वं चार्थे प्रसाधयिष्यामः ॥ योपि पीनो देवदत्तो दिवा न भुंक्त इत्यादिषु वार्थापत्तिरुक्ता साप्यनुमानमेव कार्यतः कार्य

तत्कारणप्रतिपत्तेः असति हि रसायनाद्युपयोगेपि पीनत्वं स्यादित्यत्र भोजनकार्यत्वेनावगतं ॥ तत्र देवदत्तस्य धर्म्मिणः पाकवाक्कालविशेषे भोजन
निषेधेन निश्चीयमानं प्रतिषिध्यमानकालव्यतिरिक्तकाले प्रतिषिद्धस्योदकस्यकाससहाव्यवगमयति । न हि कारणं विना कार्यस्योदयो घटते दैवं
तेन सदा सत्वस्यासत्वस्य वा प्रसंगात् । अथ योगिन एव भुक्तिमान् । देवदत्तो रसायनाद्युपयोगाभावे दिवाभुक्तिरहितत्वे च सति पीनत्वात् । रसायना
द्युपयोगाभावे दिवाभुक्तिरहितत्वे च सति पीनत्वस्य रात्रिभुक्तिमान् यथा नक्तंचरः । रसायनाद्युपयोगाभावे दिवाभुक्तिरहितत्वे च सति पीनश्चायं देवदत्त
स्तस्माद्रात्रिभुक्तिमानिति ॥ ततोन्नीतो ह्येवं वाक्यमेव तत्र प्रतिपत्तिनिबंधनमित्याद्युपकप्रत्युक्तं । यथा कविशेषणविशिष्टस्य पीनत्वस्य रूपाणि
गसंबंधेनोपाकल्पत्वप्रतिपत्तेः तत्र निपन्नाल्लिंगाद्रात्रिभोजनप्रतिपत्तिसिद्धेरितिसामर्थ्यभावश्चार्थकार्यापत्तिः साप्यनुमानमेव जीवनस्थिते स
गृहाभावेन लिंगेन बहिर्भावावगमात् तथा हि ॥ जीवत्स्तोत्रकाले भावोबहिर्भावेन न हानं जीवन्नतुप्यगृहाभाववत्वात्स्वरोपलब्धेर्वैविधगृहाभा
वस्तु ॥ यथा धूमोपि न्यान्धूमलिंगात्स्वैरोपलब्धि धूमवत् । तत्र गृहादीनां लिंगत्वनिराकरणां शब्दादेरमात्रमस्थान्मतां शास्यार्शिनावान् । य
त्तुनः प्रमेयानुप्रवेशोदूषणमुक्तं तदपि नायुक्तं ॥ यतः किं प्रमेयमभ्यर्थ्याभिप्रेतं किंतन्नामार्थं बहिर्देशाविशेषितं वा सत्वं न चतन्नामार्थं वानतत्रागृ
मोवेलगतमिति न प्रमाणान्तरं प्रमेयता भवत्वेवमतो बहिर्देशविशेषितं तुल्यं वनिष्प्रमेयं न च न तस्य नदानीमनुप्रवेशो गृहेषु चाभावयाहकंहि प्रमा
णांतरेवेनत्सद्भावोवरकंप्रमाणमथाकरोति । न तु न बहिस्तत्सदसत्वविंनां करोति । न तत्स्य जीवनो बहिरतिषत्वतः पांगणोपि वा गृहाभावपरिच्छेदेन १
विशेषोक्तिः ॥ कस्य तां जीवनविशिष्टस्योसौ यस्य भावोलिंगत्वमेवप्रतिपद्येत ॥ व्यभिचाराभावान्नच विशेषणाय्यहणमेव प्रमेयग्रहणं यतो
जीवनमप्यत्ववहिर्भावाल्पंप्रमेयमिति ॥ अथ मतं जीवनविशिष्टगृहाभावप्रतीतिरेव बहिर्भावप्रतीतिः किंतु बहिर्भावप्रतीतिरिति ॥ तदपि वि
चारितरमणीयं ॥ यतो जीवनविशिष्टगृहाभावप्रतीतिर्बहिर्भावप्रतीतिर्भवति ॥ न तु न वृत्तीतिरेव बहिर्भावप्रतीतिर्भिन्नहि दृष्टाधिकरणप्रमप्रती
तिरेवदहन प्रतीतिर्दृष्टा ॥ अथ धूमादस्योदहनस्येनात्र तत्प्रतीतिर्भेदो युक्तः । तदेतदन्यत्रापि समानं गृहाभावजीवनाभ्यां नर्दहिर्भावस्याप्यन

न्या.कु.चं. त्वात्॥ यदि तु नदधिकं प्रमेयमिह नेष्यते॥ न हि गृहाभावलिङ्गयोः स्वप्रमाणाभ्यामवधारणादानर्थक्यमेवार्थापत्तेः तस्मात्प्रमेयान्तरसद्भावात्स्वतन्त्रं तु प्रवे
१०५ शान्न कश्चिद्दोषो यथा विनाऽपि वस्तु तुल्य एवार्थे दोषस्तत्राप्यर्थापत्तेर्नोपरकल्पनाभ्युपगमात्तु स्यात्तस्मात्प्रतीतिरिति पक्षद्वयव्यवहारस्तत्रावश्यं तत्प्रतीतो नद
१०७ नुप्रवेशाद्दोषो नुषज्यते। स्वभावहेतावविवन्तदुद्धिसिद्धानतिसिद्धेः प्रमाणान्तरवैकल्यात्॥ ननु वाभावे निश्चितो लिङ्गं भविष्यति॥ सदसत्त्वं यद्यपि गृहाणां स्वप्रमा
णायोर्विरोधे कथं तन्निश्चयेति ताव गृहगमस्य बहिर्भावविषयत्वानुपपत्तेः॥ तावत्सगृहत्वाभावनिश्चयपक्षे इति॥ तस्य निश्चये प्रमेयानुप्रवेशदोषानुषं
गोर्थापत्तिस्तु प्रमाणद्वयविरोधे समेव प्रवर्तते॥ इति कथं तदनुप्रवेश स्वदसमीक्षितामिधानं॥ सदसत्त्वज्ञानयोरसमानविषयतया विरोधासिद्धेः गृहे
न हि देशाविशेषानवच्छिन्नस्य सत्त्वाप्रतिपादने गृहे वहिर्भावप्रसक्तेर्गृहावच्छिन्नस्यैवासत्त्वाभाव इति॥ समानविषयत्वे तु नयोरन्यथासिद्धाप्यस
बाध्यत्वेनागमजन्यज्ञानस्य मिथ्याज्ञानस्येव नार्थान्तरकल्पनाकारणत्वं॥ अथ मतं अनुमाने गमकविशेषणमन्यथानुपपन्नत्वं वह्निं विना धूमो नोपपद्य
त इति॥ अर्थापत्तौ तु विपर्ययो गमकं विना गम्यो नोपपद्यते। गम्यो हि बहिर्भावः स जीवतो गृहाभावं विनोपपद्यते गृहाद्विर्गतो जीवन्बहिरस्तीति। ए
वं गम्यगमकयोरनुपपद्यमानत्वविपर्ययात्प्रमाणान्तरमनुमानादर्थापत्तिरिति न दृष्टसङ्गतं॥ यतः साध्याविनाभाविनो लिङ्गाल्लिङ्गिनि ज्ञानमनु
मानमित्यनुमानलक्षणं॥ तच्चार्थापत्तावप्यस्त्येव नहि तदुत्थापककार्यस्य साध्येनाविनाभावो सिद्धस्तत्र लिङ्गाभावप्रसंगात्॥ स चाविनाभावोऽन्यथा
नुपपन्नत्वापरपर्यायत्वे भवविनिष्टत्वाद्गमकविशेषणं वास्तु गम्यविशेषणं वानोनादर्थान्तरपर्यायस्यभयविनिष्टत्वाद्गमकविशेषणं वास्तु गम्यवि
शेषणं वा नेतावता र्थापत्त्यनुमानयोर्भेदो न्यथा सूर्यस्य गमनं शक्तिर्निर्गतिमत्वान्यथानुपपत्तेरिति पक्षधर्म्मत्वसहितायाश्चार्थापत्तेः वह्नेरिव १०७
क्रियासिद्धौ दान्यथानुपपत्तेरिति न इहितार्थापत्तिः प्रमाणान्तरं स्यात्॥ तथा च प्रमाणं व्याप्ताभावात्॥ नियमवतोऽर्थस्यार्थान्तरप्रतिपत्तेरविशेषात्तयोर
भेदे स्वसाध्याविनाभाविनो दृष्टान्तरप्रतिपत्तेरन्यथाविशेषात्कथमनुमानादर्थापत्तेर्भेदः स्यात्॥ प्रसिद्धं चात्राविनाभावस्य गम्यविशेषणत्वं। गृहे चै
त्राभावएव बहिःसत्त्वद्भावगमकेनस्याविशेषणत्वसंभवात्॥ न हि तस्य तद्विशेषणत्वे कश्चिद्दोषः संभवति। येन गम्यविशेषणतानुरूप्येनानेन च यदुक्तंप्रसा

मर्थापत्तेरन्यविशेषणताविनाभावस्य संभवति। प्रत्यक्षादिप्रभवार्थापत्तेरागमकस्येव स्फोटादेर्विनाभावविशेषणत्वसंभवात्। यच्चान्यदुक्तं। प
रूपधर्मता निश्चयसमये साध्यस्य नियतदेशतया प्रतीतेरनुमानादेरन्त्यरूपमित्यादि तदप्युक्तिमात्रं। गृहीतेऽपि ह्यथ धर्म्मिविशेषेण बहिर्भा
वस्य प्रतीते धर्म्मिबहिर्देशाद्विशेषेऽनेनैव तद्वत् दृष्टान्तधर्म्मिणि तत्साध्यसाधनयोः संबंधग्रहणाभावात्। यदप्युक्तं यतः सर्वत्र संबं
धग्रहणस्योहाख्यप्रमाणप्रसादादेव प्रसिद्धिरित्युक्तं। अतएव देशान्तराणां मानं स्यादन्तर्व्याप्तिस्तेन संबंधग्रहणं। इत्याद्युक्तं। अनियतसा
ध्यसाधनव्याप्तिसंबंधग्रहणस्वभावत्वात्तर्कस्य कथमन्यथा धूमस्याग्निव्यतिरेकनिश्चयस्तत्राप्यस्य दोषस्याविशेषात्। न च भूयोदर्शनावग-
म्यमानान्वयमात्रेणागमकोऽपि युक्तो निश्चितव्यतिरेकस्य साध्यनिश्चयहेतुत्वात् न च सत्तामात्रेण सोऽनन्तहेतुरेव तत्र व्यतिरेकस्यापि निश्चित
त्वेवानुमानांगतोपपत्तेः। किंचासर्वगतद्रव्यस्य चैत्रादिनियतदेशवत्तेस्तदन्यदेशप्रतिनियमेनानुमानेनाभावसिद्धेः कथमुक्तदोषानुषंगः।
न चानुमानं देशान्तराणि चैत्रमूर्त्यानि चैत्राधिष्ठितदेशव्यतिरिक्तत्वात्तत्समीपदेशवत्। न च देशान्तराणि चैत्रयुक्तानि तत्समीपदेशव्यतिरिक्तत्वा
च्चैत्राधिष्ठितदेशवदिति प्रत्यनुमानोपहतमेतदित्यभिधातव्यं। तस्य तत्स्वरूपप्रतिबन्धित्वान्न तदेव तत्समर्थापनेऽनुमानादर्शनत्वासिद्धेः सिद्धः
परेषां प्रमाणसंख्याव्याघातः। ननु भवतामप्येवं प्रमाणसंख्यानियमविरोधस्तुल्य उपमानादेः प्रतिपादितप्रमाणप्रपंचस्य प्रत्यक्षपरोक्षाभ्या-
मर्थान्तरत्वाविशेषादित्याशंकापनोदार्थमाह। सर्वस्येत्यादि। सर्वस्यानन्तरोक्तस्योपमानादिप्रमाणपंचकस्य परोक्षेऽन्तर्भावान्नास्माकं कश्चिद्विरोधः
कस्मात्तस्य तत्रान्तर्भवति निर्भयवर्तनि। तल्लक्षणलक्षितत्वात् यस्य यल्लक्षणलक्षितत्वं तस्य तत्रान्तर्भावो यथा चक्षुरादिसंवेदनस्य प्रत्यक्षे परो
क्षलक्षणलक्षितत्वं चोपमानादेरिति। यथैव हि रूपादिसंवेदनस्य सुखादिसंवेदनस्य च विषयभेदात्सामग्रीभेदाच्चान्योन्यं वैलक्षण्येऽपि वैश-
द्यलक्षणप्रत्यक्षलक्षितत्वान्नस्य तल्लक्षणेऽपि उपमानादेरप्यवैशद्यस्वभावपरोक्षलक्षणलक्षितत्वात्परोक्षत्वमिति। न चैवमपि परोक्षस्य स्मृ-
तिप्रत्यभिज्ञानतर्कानुमानागमभेदैः परिगणितत्वात्कथमुपमानादेस्तत्रान्तर्भावस्तदन्तर्भावे वा। परिगणितत्वात्कथमुपमानागमभेदैः स

न्या·कु·चं· त्वगिणगानविरोधस्ततः समीचीनमुपमानादेः प्रत्यभिज्ञानादिरूपतयानतरिगणनाविरोधकत्वात्। दर्शनस्मरणकारणकं हि संकलनं प्र
१७८ त्यभिज्ञानमुच्यते। इदमप्युपमानादिज्ञानं दर्शनस्मरणकारणकं सादृश्यादिसंकलनस्वभावं चेत् कथं प्रत्यभिज्ञानाद्भिन्नं निषिध्येत। यद्दर्श
नस्मरणकारणकं संकलनस्वभावं तत्प्रत्यभिज्ञानमेव। यथा प्रसिद्धप्रसिद्धप्रत्यभिज्ञानं तत्कारणं सादृश्यादिसंकलनस्वभावं चोपमान-
मिति॥ नदित्यादिना प्रकृतोपसंहारमाह॥ यस्मादुपमानादेः परोक्षान्तर्भावस्तस्मात्समंजसमुपपन्नं परोक्षं परोक्षं च॥ इत्येवं द्वैविध्य
मात्रेऽवेति। कुतश्चैतदित्यत्राह प्रमाणान्तरेत्यादि॥ अन्यथा अन्येन प्रकारेण तेषां प्रमाणानां संख्यायाश्च व्यवस्थानादिति॥ छ॥ शार्दूलविक्रीडित
छंदः॥ मिथ्यायुक्तिपलालकूटनिचयं प्रज्वाल्य निःशेषतः॥ सम्यग्युक्तिमहामुनिः पुनरियं व्याख्यापरोक्षे कृता॥ येनासौ निखिलप्रमाणक
मलप्राज्यप्रबोधप्रदो॥ भास्वानेष जयत्यशेषसमहिमा शास्त्रकलंकोऽजिनः॥१॥ ॥ इति श्रीप्रभाचंद्रविरचिते न्यायकुमुदचंद्रे लघीयस्त्रयालंकारे तृतीयः परिच्छेदः समाप्तः॥३॥ छ ॥ शार्दूलविक्रीडितछंदः॥ प्रत्यक्षेतररूपमीनमखिलं व्याख्याय सामासतः॥ तत्प्रस्तावपरिं
कथं विरुध्यमानारभ्यते क्रमः॥ मिथ्यैकान्तमलंघकूपपतनव्यामुग्धबुद्धेः स्फुटं॥ कस्सन्मार्गनिरूपणे न कुशलः स्याद्वादभानोः परः॥१॥ अथ प्रमाणाभा
सत्वेन सिद्धविज्ञानं कथं चिदेव न तदाभासं न तथैवेति प्रदर्शयन्नाह॥ प्रत्यक्षाभं कथंचित्स्यात्प्रमाणं तैमिरादिकं॥ यद्यथैवाविसंवादि प्रमाणं तत्तथा मतं॥१॥
प्रत्यक्षाभमपि उपलक्षणं तेन परोक्षाभमपि यदेकान्तेन तदाभासं दिग्लोकानां प्रसिद्धं तत्कथं चित्स्यात् प्रमाणं नैकान्तेन तदाभासमित्यभिप्रायः किंत
दित्यत्राह॥ तैमिरादिकमिति तिमिरं तदागतं तैमिरं तादिर्यस्य भ्रमणादि ज्ञानस्य तत्तथोक्तं॥ कुत एतदित्याह॥ यद्यथैवादिज्ञानोपरि ईदृग्ज्ञानं येन प्रका १७८
रेणाविसंवादि तद्धि ज्ञानं तेनैव प्रकारेण प्रमाणमभिप्रेतं॥ तथा च कल्पनापोढमभ्रांतमित्यत्र द्विचन्द्रादिपार्श्वसन्निकर्षे मल्लव्यभिचारित्वप्रत्ययोगेद
त्याशेषपदभ्रांतादिपदरूपत्वं न निरूप्य येन च द्विसर्वथा प्रत्यक्षतत्वान्तेन यत्साधितं तदा प्रमाणविरोधः॥ अथ कथं चित्तदेकान्ततानिरित्युक्तं भवति॥ का
रिकांत्याचरणं तिमिरेत्यादिना॥ तैमिरादीनां कार्यभूतं यदुपप्लवज्ञानं हि चन्द्रादिविषयं तद्विसंवादि बाह्यावलम्ब्यवस्तुत्वापरिग्रहेण तत्प्रमाणं कु

तदनंतरं विसंवादकं पनस्तत्रांशोप्यत्र दर्शनं माह॥ यथेत्यादि॥ यथानतिमिराद्युपप्लवज्ञानं संख्यादौ द्विचंद्रादिविसंवादकत्वादप्रमाणं॥
यदि नाम न तथाविधं किमेतावता प्रमाणेन रूपं भविष्यतीत्याशंक्याह॥ प्रमाणेत्यादि॥ प्रमाणेनेन रूपं प्रमाणांतर्भावस्य पालनलक्षणत्वात्
संवादविसंवादलक्षणत्वात् तन्नानुकथं नैवं प्रमाणमिन कथमुक्तं विरोधादिति चेत् अत्राह॥ नहीत्यादि॥ हि यस्मात् तज्ज्ञाना नंभवत्कारित्वं निर्वि
कल्पकं चेत्॥ यदपीत्यपि शब्दोऽभ्युपगमे परमार्थतोऽर्थाकारतया ज्ञानं संभवति तदसंभवश्च पंचतः प्रागेव प्रतिषेधात्सिद्धेनाभ्युपगम्याभ्यु
च्चयेन॥ यथोक्तं ज्ञानं यदपि वस्त्वनुकरोति॥ परकारं भवतीति तत्र वस्तुनि प्रमाणमेव न हीत्यभिसंबंधः किंतु प्रमाणमपीत्येवकारार्थः॥ कुत एतदित्यत्रा
ह॥ समारोपेत्यादि॥ क्षणिकेक्षणिकज्ञानं समारोपव्यवच्छेदे निरस्य तस्याकांक्षणात्॥ तदनभ्युपगमे दूषणमाह॥ कथमित्यादि॥ कथमन्य
क्ष थानदाकांक्षणाभावप्रकारेण दर्शनविषयीते क्षणभंगादौ प्रमाणांतरस्यानुमानस्य वृत्तिर्नैकथमपीत्यर्थः॥ न हि समारोपव्यवच्छेदार्थत्वं कृत
सफलं॥ अथ न समारोपनिषेधार्थं नाप्यतो व्यवहृतिः किं तर्हि गृहीतग्रहणायेत्यत्राह॥ शि॥ कृतस्यानुभवेनानुभूतस्य क्षणभंगादेरनुमानेन करण
ग्रहण स्यायोगात्॥ अन्यथानवस्था स्यात् गृहीतेऽप्यस्मिन्ननुमानं नैराथ्यहणप्रसंगात्॥ यथार्थदर्शनेन नीलादिकमेव गृहीतं न क्षणभंगादिकं तेना
कृते नमरापोवाह॥ तदित्यादि॥ तदेकांतक्षणिकांत एकस्यार्थस्वभावस्येत्यादि वचनात् तस्य हानिप्रसंगात् कथं प्रमाणांतरवृत्तिः न हानिः तत्कृत
नी कृतस्यत्राह॥ कथंचिदित्यादि॥ कथंचित् नीलादिरूपेण न क्षणभंगादिरूपेणाप्य वस्तुनो ग्रहणं न स्यान्निषेधः॥ अन्यथा गृहीतेन न रूपेणैक
स्य स्यात्॥ उपसंहारव्याजेन दूषणांतरमाह॥ तदित्यादि॥ पन एवं न च अर्थाकारदर्शनस्याविसंवादेपि न केवलं कथंचित् प्रामाण्यमेवाकृत एतन्निरस तथा विकल्पोऽपि
नाद्यवस्तुनिर्भासात् अवस्तुनो भवत्यनेन बाह्येतराद्यर्थसत्त्वस्य स्थूलाकारस्य निर्भासादनुकरणाद् दर्शनं प्रमाणं न स्यादिति भावः॥ व्यवहारेणाप्रमाणेप
पिन र्यदि सोगतस्यैतन्न सिद्धिः॥ अथ निरस्य परिनम्यारादिवस्तुस्वरूपानुकरोऽपि नीलादिस्त न तु नादि वस्तुस्वरूपानुकरणात् तत्र प्रामाण्यमित्यत्राह
चंद्रादीत्यादि॥ चंद्रादिवत्तत्वदत्तानुत्तस्य निर्भासानामुपप्लवज्ञानसंबंधि प्रतिभासानां प्रामाण्यं स्यात्॥ प्रमाणमित्येतदनुमानं लभ्यमानप्रत्यपमिहसंबध्य कृते

न्या॰ कु॰ चं॰ तेकुतस्तदित्याह। अविसंवादकत्वात्। नरवस्तु चंद्रादिविषयज्ञानं प्रावल्यवर्तुलत्वादेरविसंवादकमिति। एतावदयत्नेरणावस्तुरूपं भेनैमित्तिकं द्विपतामनु
१७८ कलंतदपिरूपं विस्तरत्य रूपमिति। अन्यवस्थापितं संश्रुतं कल्पनायदेनयत्नेरणविकल्पज्ञानं नरवभस्तुकं। नरपिप्रत्यक्षं साधयन्नाह। श्लोक॥ स्वसंवे
द्यमविकल्पानां विशदार्थावभासनात्। संहृतनाशेषचिंतायां सविकल्पावभासनात्॥ स्वसंवेद्यं स्वसंवेदनाध्यक्षं प्रत्यक्षं केषामित्याह। विकल्पानामपि
नदित्याह। विशदार्थावभासनं। कुतस्तदित्याह। संहृतेत्यादि॥ संहृतनाशेषचिंतानतस्यामवस्थायां तस्यामपि सविकल्पकस्यैव ज्ञानस्यावभासना
त्॥ ततो यदुक्तं परेणतानि विकल्पानुविद्धस्य स्पष्टार्थप्रतिभासतेत्यादि॥ नन्वनुकल्पनापोढमप्रत्यक्षं दृश्यते विकल्पितमीत्यादि तन्निरस्तं प्रत्यक्षबाधि
तत्वात्॥ इदमपरं व्याख्यानं॥ स्वसंवेद्यं स्वसंवेदनप्रत्यक्षं यद्रूपं केषां विकल्पानां वस्तुमानादिमात्राविद्यानीत्याह॥ संहृतस्य सकलाकांक्षिंतां पश्यन्नेव
हिंस्थितोपि नरसज्ञानानां तत्किं विशदार्थावभासनं निर्विकल्पकमभ्रांतमित्यर्थः॥ कदासं हृतनाशेषचिंतायां केन विहितेन स्वसंवेदनेन निर्विकल्पकपरि
णामेन संबंधः किंकृत्वा सविकल्पावस्थासनानरवभासनयास्तस्येत्यर्थः। ततस्ते विकल्पाः कथंचिन्नपलक्षणं तीरनिभावः कारिकां विहरएवत्वात्। सर्वतर
त्यादि॥ सर्वतः सजातीयाद्विजातीयादिकसंहृत्य च कांकाचिंतानपरामर्षतु हिंस्थितोपि प्रतिपत्ताञनेकेन रूपेण तेत्यादृक्ति मितेत्यादि स्तिमितः स्थिरो भू
तोपरिस्पंदो भगवत्पासमनतिनसर्विकरूपेणेत्याह। चक्षुषेत्यादि। चक्षुर्ग्रहणमुपलक्षणं श्रोत्रेंद्रियेन रूपमपश्यतिरूपग्रहणमपि रसादीनामुपलक्षणं
वयं मृतसंस्थानात्मकं वर्तुलत्वादिधर्म्मस्वभावं तन्नरपि॥ कथंभूतं स्थूलात्मकं स्थूलात्मकं स्थूलस्वभावमेकं॥ पुनरपि किंविशिष्टं स्थूलानेकस्वभावं
स्थूलमनेकस्वभावोपलक्षणकयोर्कं॥ नैतुसंख्यानादिकं गुणत्वाद्द्रव्यस्य न रूपस्यासंगुणत्वेन निर्गुणत्वादिस्वप्यसमीक्षितानभिधानमनेकांतेद्रव्यगुण
योरभेदार्पणाय। रूपस्यापि तु व्ययधर्म्मा विरोधात्॥ ननुचरूपादिरूपसंदर्शयमानमन्यान्यविलक्षणानेकांतं परमाणुस्वभावं स्थूलरूपं एकरूपमेव वद १७९
श्यते। ननु स्थूलादिस्वरूपमित्याह। चक्षुषेत्यादि। पुनरीतिभावना याणं स्थूलरूपां पश्यति॥ कथं तन्न मनसा धारणाः सजातीयविजातीयपलक्ष
णाभावः प्रतिसंहारः॥ युक्तोऽसहायोबाधम्मीयस्य न च योक्तमकुतस्तदित्याह॥ प्रतिसंहारेत्यादि। संहारोऽशेषविकल्पाभावः प्रतिसंहारः पुनर्विकल्पश्च

तस्मादित्यादिशेषसंग्रहमाह - ... विकल्पानां ... 

त्तिः॥ न माभूदित्य बुद्धिभेदं प्रतिपत्तुर्विनं यस्य स्वलक्षणयोः तस्य नैव साधारणैकान्तप्रकारेण स्मरणात् स्मरणाभावात् स्वलक्षणस्यानोन्तनस्य कदा
चिद्दर्शनं॥ स्थूलादिस्वभावस्यैवानुस्मरणात् सदा दर्शनमिति॥ निर्व्याकुलविकल्पसंततानं यस्य प्रत्यक्षत्वेनाभिप्रेतं॥ न कदाचिद्विशदस्वरूपतया
प्रतिभातितत्स्यादविशदत्वे च विकल्पकं मन्यसाम्यं॥ ननु विशदेतरज्ञानानां विभिन्नप्रतिभासतया विभिन्नविषयत्वात् स्थूलादिस्वभावं रूपं प्रत्य
नीत्यादिरुक्तं॥ ययोर्विभिन्नप्रतिभासत्वं तयोर्विभिन्नविषयत्वं यथा रूपरसज्ञानयोर्विभिन्नप्रतिभासत्वं च प्रत्यक्षेतरज्ञानयोरिति॥ तथा च वि
शदस्वभावस्याध्यक्षस्य स्वलक्षणविषयत्वं सिद्धं॥ अविशदस्वभावस्य तु विकल्पस्य स्थूलादिविषयत्वमित्याशंक्याह॥ नचेत्यादि न वत्वान्तः स्थू
लादिस्वभावं रूपं प्रत्यनीत्यादि युक्तं॥ ययोर्विभिन्नप्रतिभासत्वं तयोर्विभिन्नविषयत्वं॥ यथा रूपरसज्ञानयोर्विभिन्नप्रतिभासत्वं च प्रत्यक्षेतरज्ञान
योरिति॥ तथा च विशदस्वभावस्याध्यक्षस्य स्वलक्षणविषयत्वं सिद्धं॥ अविशदस्वभावस्य तु विकल्पस्य स्थूलादिविषयत्वमित्याशंक्याह॥ नचेत्यादि
नचैवं विशदेतरविकल्पयोरवग्रहादिस्मरणयोर्विषयभेदैकान्तः परमार्थवस्तुनि विशदविकल्पः प्रवर्तते॥ कल्पितेऽविशदविकल्प इति किं तु विशदाविश
दयोरविशदविकल्पस्य विषयः येन भिन्नप्रतिभासत्वादित्युक्तं॥ तदप्यनैकान्तिकमित्युपदर्शयन्नाह॥ प्रत्यासन्नेत्यादि॥ प्रत्यासन्नात् पुनः स्थाप्रत्यास
न्नोर्थोपेक्ष्यानानि च नानि प्रत्यक्षाणि तेषां विशदेतररूपप्रतिभासभेदसंभवेप्येकार्थविषयत्वोपपत्तेः न हि दूरासन्नपुरुषाणां पादपादिस्वरूपे प्रति
भासभेदेऽपि सिद्धो नापि विषयाभेदः॥ पादपादेरेकस्यैव तद्विषयत्वात्॥ यदप्युच्यते प्रत्यक्षेऽसंति कल्पना उपलब्धिलक्षणप्राप्ता नानुपलब्धेः यत्रोप
लब्धिलक्षणप्राप्तस्यानुपलम्भेन॥ न तत्र नास्ति यथा क्वचित्प्रदेशविशेषे घटो नोपलभ्यते च प्रत्यक्षे तथाविधाः सत्यः कल्पना इति॥ न चोपलब्धि
लक्षणप्राप्तत्वं तासामसिद्धं न हीमाः कल्पना अप्रतिसंविदिता एव प्रवर्तन्ते प्रवर्तते च यतः सत्त्वेऽप्यनुपलक्षिताः स्युरिति दर्शयन्नाह॥ २१॥ प्रतिसंविदितोत्पत्ति
व्ययाः सत्योपि कल्पनाः॥ प्रत्यक्षेऽनुपलक्ष्येरंतत्स्वलक्षणभेदवत्॥ २॥ प्रतिप्राणि संविदिता उत्पत्तिव्ययौ यासां तास्तथोक्ताः नीरूपा विविधाः सत्योपि वि
षमानापि न केवलमसत्यः प्रत्यक्षे बहुवचनं चतुर्विधस्यापि प्रत्यक्षस्य संग्रहार्थं कल्पना नलक्ष्येरन्॥ न च सतः प्रतिसंविदितानिर्भासविनाशवतोनुपलक्ष

न्या·कु·वं· णां विरुद्धमित्यस्यार्थस्य समर्थनार्थं न त्वसिद्धमेव निदर्शनं प्रदर्शयन्नाह ॥ न त्वित्यादि ॥ तासां कल्पनानां स्वलक्षणानां स्वरूपं तस्य भेदः सजातीयाद्वि
१८० जातीयाच्च व्यावृत्तिः स एव न दृष्ट इति ॥ तदुक्तं भवति । यथा प्रतिसंविदितोप्यनिश्चयः सन्नपि कल्पनासु नेदृष्टोनलक्ष्येनान्यथा लक्षणस्य कल्पनमानमनर्थकं स्यात् ॥
तथा भूत्येष्वपि कल्पनाः सत्योपि न लक्ष्यन्ते इति । न दृष्टानुपलक्षणोपरकीयां युक्तिं स दूषयंस्तां स दृष्टेत्यादिना व्यवस्था कारिकार्थं प्रति संहारैकान्त इत्यादि दृष्ट्वे
त्वात् ख·पु· नादर्शयति ॥ तद्यथा सामान्यस्य परस्य परस्मात् मतिस्वरूपा विमलंभोलानचक्रवचसुषो भ्रमः तस्मात् दृशो यद्विविधैः तं यत्नं सजातीयव्यावृत्तिलक्षणं
विशेषमलानच कथं न पश्यति इत्येवं शीलस्य सैगत स्यान्यथा भ्रान्तायं पदृष्टानुपलक्षणं न दर्शयतो विनाभिधानं कुत एतदित्यत आह ॥ सर्वथेत्यादि सर्वथा-
भेदाभेदाभ्यामुभयप्रकारेण तासां कल्पनानां सादृश्यानिष्टेः न तत्स्वदृष्टोपलक्षणमेव स्यादित्यभिप्रायः न चैतदस्ति । अतो यथा न दृष्टः सन्नपि नोपलक्ष्य
ते ॥ तथा स्वलक्षणेषु सत्योपि कल्पना इति भावः प्रतिसंहारैकान्तः प्रतिसंहारैकान्तः स्वलक्षणेषु सत्कल्पनाविरहैकान्तः संभवति ॥ न चैतन्निश्चित्यानेन स्वर्णालोच्य
मेतन्न संभवतीत्यर्थः तत्स्वलक्षणभेदवत्तासां तत्त्वानुपलब्धितानां संभवात् । न तु यद्यपि तासां तद्दृष्टोपलक्षणेन तथाप्यभिलापसंसर्गयोग्यप्रतिभा
सो विद्यमानो लक्ष्येत न चोपलक्ष्यते । तेनोक्तानुपलक्षणादभावसिद्धेः सिद्धः प्रतिसंहारैकान्त इत्यत आह ॥ कथं चेदित्यादि कथं चन कथंचिदपि अन्यरूप
रूपः ॥ २ ॥ बहुवचनमशेषाध्यक्षबुद्धिसंग्रहार्थं सर्वथाक्षरूपवहिरस्याविकल्पाः पुनरिति कल्पे विकल्प्यत्वाद्वैलक्षण्यकल्पात्मिका भवेयुस्तरनेकां
तप्रसंगादिति मन्यते ॥ अथ वा न तु यदि सर्वथाविकल्पाः सन्त्यः कथं च तद्गुणः पश्चाद्विकल्पे स्तं विकल्पाः कुर्युः ॥ न त्वविकल्पादनुभवादर्थादिव विकल्पः
संभवतीत्युक्तं असविकल्पकसिद्धिमप्यक्षेण नत्वित्यनर्थमुपदर्शयन्नाह ॥ श्लोक ॥ अरूपोः स्तीतसंज्ञाभिष्वित्तयाभिनिवेशयत्केः ॥ व्यवहारा भिसंवार
त्वदाभासस्ततोन्यथा ॥ ३ ॥ अक्षाणां चक्षुरादीनां कार्यभूता धीर्बुद्धिरव्युत्पन्नात्मिका मतिः सा च स्मृतिः संज्ञा च ताभिश्चिन्तया निर्णयेनाभिनि १८ वै
वेशितैरनुमानैः व्यवहारे तं बहुवचनं तेः समस्तैर्व्यस्तैश्च व्यवहारादिसंवादोत्थेकपक्षसिद्धः कारिकां विवरणेनाह ॥ अनतेते यथा भावान्यपेक्षान्त
वाचिपरिकल्पितप्रकारेण तदाभासः प्रमाणाभासः ॥ तदेकान्तवादिपरिकल्पितस्यानिमत्यभिज्ञानं तर्कप्रामाण्यप्रकारेणाविकल्पाः सत्तानकार्य

४ अतो ख·पु· १ सादृश्यस्यानिष्टेः ख·पु· । २ तद्भेदो ख·पु· । ३ ख·पु· नास्ति । ४ नहि ख·पु· ।

दृष्टिरगणितलिंगप्रभवानुमानप्रकारेण च प्रवृत्त्यादिव्यवहाराविसंवादो लोके प्रसिद्धः कारिकां विचार्यन्नाह। प्रत्यक्षेत्यादि।।१।।प्रत्यक्षस्मिविष
त्यभिन्नोनुमानादिभिरविसंवादसिद्धेः कारणादर्थेषु घटादिषु तेषां प्रसरसारीनां प्रामाण्यं।।कृत्स्नपेक्षांतवादिपरिकल्पितप्रकारेणानदाभास
व्यवस्थाप्रामाण्याभासव्यवस्था।।एतेनैव शाब्दे श्रुतेर्निर्दिशन्नाह।।तथैवेत्यादि स्मरणादिनान्यस्य तस्योक्तत्वात् शाब्दं श्रुतं श्रुतस्तानशब्देनेदगतोन
तथैव व्यावहारसंवादविसंवादप्रकारेणैव श्रुतज्ञानं प्रमाणतदाभासव्यवस्था।। ननु श्रुतज्ञानं प्रमाणमेव न भवति।। इत्यत्र यं न ह्यवस्येत्याशंक्या
ह।।प्रमाणं श्रुतमर्थेषु सिद्धं द्वीपांतरादिषु।।अनाश्वासं न कुर्वीरन् क्वचित्तद्व्यभिचारतः।।२।।श्रुतं धर्मी प्रमाणमिति साध्यो धर्मः अविसंवादसिद्धेः
इत्येतदनुवर्तमानं साधनं तेनाविसंवादकं श्रुतं प्रमाणं न तद्विभिन्नप्रत्यक्षं भवति।।तदिति स्वयं भूतं श्रुतं कथं प्रमाणमित्याह।।अर्थेषु न पुनरभिप्रायमात्रे कीदृशेष्वि
पुवेषित्याह।।द्वीपांतरादिषु प्रसिद्धं शास्त्रांतरे लोके वा प्रसिद्धं।।तत्वथ्याभावेपि शब्दानां प्रवृत्तिदर्शनात् कथं नातत्वप्रमाणमित्याह।।अनाश्वासमित्यादि।।
अनाश्वासमप्रामाण्यं न कुर्वीरन्।।क्वचिदंगुल्यग्रे हस्तियूथशतमास्त इत्यादौ न तद्व्यभिचारतो व्यभिचारमात्रमित्यर्थः।दिग्ज्ञानेष्वप्यनुरक्तद्विपर्ययैरिव
भिप्रायस्य तु श्रुतस्यानुमानाद्व्यतिरेकाप्रसिद्धिः तत्प्रामाण्यप्रसिद्धेः प्रमाणं श्रुतमर्थे इति यदुक्तं।।तथा हि श्राव्येनानुमानान्न
व्यतिरिच्यते।।तदभिन्नसामग्रीसमन्वितत्वाद्यथा विधूमादनुमानान्न व्यतिरिच्यते।।यथा कृतकत्वादनुमानादनुमानांतरं तथाविधश्चायं शब्द इ
ति।।नचास्य तदभिन्नविषयत्वमसिद्धं शब्दानुमानयोरविशेषतः सामान्यगोचरत्वात् संबद्धार्थप्रतिपत्तिहेतुत्वात्।।नहि शब्दोऽसंबद्धमर्थं प्रतिपा
दयत्यतिप्रसंगात्।।असंबद्धं चेत्तं प्रतिपादयन् सोऽलिंगतां नातिवर्तेत।।नापि तदभिन्नसामग्रीसमन्वितत्वमसिद्धं धूमादिवच्छब्दस्यार्थप्रतीतौ सं
बंधस्मरणापेक्षत्वात्।।अन्वयव्यतिरेकत्वाद्यो हि शब्दो यत्रार्थे लोके दृश्यते।।स तस्य वाचको यत्र तु ना दृश्यते स तस्यावाचको यत्र तु न दृश्यते न तस्य वाच
कः पक्षधर्मतोपेतत्वाच्च।।तथाहि।।विवक्षितः शब्दोऽर्थवान् शब्दत्वात् पूर्वोपलब्धशब्दवत्।।यथायं धूमोग्निमान् धूमत्वात् पूर्वोपलब्धधूमवत्।। य
था च प्रयत्नतो धूमं वह्निः प्रतीयते।।तथा शब्दः श्रुतात् नदर्थोपि दृष्टांतनिरपेक्षत्वं चाप्यत्र विपर्ययेद्धमोऽप्यनयोरविशिष्टं किंच शब्दो विवक्षायामेव प्र

२ प्र ख पु नास्ति। ३ तत्रलिंगं ख पु। १ ख पु नास्ति।

न्या·कु·चं· माणांनवाखेव्यभिचारात्॥ नत्वंगुल्यग्रे हस्तियूथशतमास्त इत्यादिशब्दानां वासेवेंद्रियाणामप्रमाणप्रसंगतेप्रतीतिविरोधात्॥ तस्माचैनस्यातिंगेने
१८१ वेति॥छ॥ अत्र प्रतिविधीयते यत्तावदुक्तं शाब्दानुमानाभ्यामतिरिक्तमक्षसमीचीनमभिन्नविषयत्वस्यानयोरसिद्धेः॥ अर्थमात्रं हि शा
ब्दस्य विषयो नुमानस्य तु साध्यधर्मविशिष्टो धर्मीति॥ किंचानयोर्विषयाभेदः सामान्यमात्रगोचरत्वादितयातद्भावाद्विषयतयाऽसंबद्धार्थप्र
तिपत्तिहेतुतया वा स्यात् प्रथमपक्षे किमिदं सामान्यं नाम सकलव्यक्त्यनुगतं॥ नित्यैकत्वादिधर्मोपेतं॥ अन्यव्यावृत्तिलक्षणं वा प्रत्यक्षप्रमयेनस्तु
पपन्नमुभयरूपस्यापि सामान्यपरीक्षावसरे प्रतिक्षिप्तत्वात्॥ अन्यापोहमात्रविषयत्वस्यानयोः प्रतिषेत्स्यमानत्वात्॥ नित्यादिस्वभावसामान्य
विषयत्वे चानयोर्म्मीमांसकमतानुप्रवेशः सौगतस्य स्यात् स चानुपपन्नः तद्विषयत्वस्याप्यशेषनिराकरिष्यमाणत्वात्॥ अथ तद्भावाद्विषयत
यातयोर्विषयाभेदोभिधीयते तर्हि व्यक्षस्याप्यनुमानत्वप्रसंगः तत्राप्यविशेषात्॥ सकलप्रमाणानां सामान्यविशेषात्मकार्थवि
षयत्वप्रतिपादनात्॥ एतेन संबद्धार्थप्रतिपत्तिहेतुतयाप्यनुमानत्वं शब्दस्य प्रत्याख्यातं प्रत्यक्षस्यापि संबद्धार्थप्रतिपत्तिहेतुतयानुषंगात्॥ न
दृष्टिहस्तविषये संबद्धस्तत्प्रतिपत्तिहेतुर्नान्यथातिप्रसंगात्॥ अथ तत्संबद्धस्य प्रतिपत्तिहेतुत्वाविशेषेपि सामग्रीभेदादनुमानाद्भेदः कथमेवं शाब्द
स्याप्यतो भेदो न स्यात्तदविशेषात्॥ नन्वभिन्नविषयत्वाच्छब्दस्यानुमानत्वमुक्तं नाप्यभिन्नसामग्रीसमन्वितत्वाच्छब्देन तत्संभवात्॥ पक्षधर्म
त्वादिरूपत्रयरूपा ह्यनुमाने सामग्री सा च शब्देन संभवति॥ तथाहि॥ न तावच्छब्दस्य पक्षधर्मत्वं संभवति॥ धर्मिणः एवात्र कस्यचिदसंभवा
त्॥ न तावच्छब्दस्यैव हेतुत्वे हेतोः प्रतिज्ञार्थैकदेशत्वप्रसंगात्॥ अथ शब्दत्वं हेतुरिति न शब्दत्वेकदेशत्वं न शब्दत्वस्य सामान्यस्वभाव १८१
स्य मतमन्यते परमार्थसतोऽसंभवात्॥ कल्पितस्य ज्ञातस्यापि न गमकत्वं अर्थप्रत्यर्थगमकत्वमिति भवद्भिरेवाभ्युपगमात्॥ एतेन शब्दोर्थवानित्या
द्यनुमानं प्रत्याख्यातं॥ अस्तु वा शब्दत्वं हेतुः स तु तः शब्दस्य धर्मिणः किमर्थविशिष्टत्वं साध्यते अर्थवत्त्वा प्रतज्ञाकिंचुक्तत्वं॥ अर्थप्रतीतिविशिष्ट
त्वं वा तत्र प्रपक्षो नुपपन्नो जलानलयोरिव शब्दार्थयोर्द्धर्म्माभावासंभवात्॥ आश्रितो हि धर्मो भवति नैवार्थः शब्दाश्रितो विभिन्नदेशत्वात्

यद्यनयोर्विभिन्नदेशत्वं न तत्संबंधाभावात् यथा सह्यविंध्ययोः शब्दो हि भिन्नदेशः अर्थश्च तत्र वाच्यवाचकभावो नास्ति न च तत्र धर्मधर्मिभावो यथा-

विचक्षुरूपयोरूपयोः अपि भावाभावश्च शब्दार्थयोरिति॥ न चार्थविशिष्टत्वं शब्दस्य कश्चिद्वक्ति शोभन्यते॥ शब्दाश्रयेणैव वार्थस्या-

लंबुधसिद्धत्वात्॥ अथार्थप्रत्यायनशक्तियुक्तत्वमस्य साध्यते॥ तदप्यसत् तदर्थं तथा शब्दप्रयोगासंभवात्॥ नहि तच्छक्तिसिद्धये शब्दः प्रयु-

ज्यते॥ प्रयुक्तश्चवा किं तदर्थसिद्धये अर्थप्रतीति विशिष्टत्वं साध्यते तदप्ययुक्तं सिद्धासिद्धविकल्पानुपपत्तेः॥ असिद्धत्वात्तदर्थप्रतीत्या नहि तत्त्वं श-

ब्दस्यायुक्तमतिप्रसंगात्॥ सिद्धायां तस्यां किमन्यदनेन तथा स्वसंविदितस्वभावापन्नस्याविसंवादाभावादित्यस्यानुमानस्यैव वैफल्यं॥ न च धूमा-

दनुमानेप्ययं दोषस्तुल्य इत्यभिधातव्यं॥ न च कार्यकारणभावाभावात्॥ न खलु धूमेनाग्निर्जन्यते किंतु गम्यते शब्देन त्वर्थप्रतीतिर्जन्यते

नोपलम्भेवं सिद्धासिद्धविकल्पावतारः॥ न च शब्दस्य धर्मित्वं घटते॥ नोप्यर्थस्य तेन सह शब्दस्य प्रवृत्तिः संबंधानभ्युपगमात्॥ नहि शब्दार्थयोस्तादात्म्य-

लक्षणस्तदुत्पत्तिलक्षणो वा संबंधः सौगतैरभ्युपगम्यते॥ न ह्यर्थे शब्दाः संति तदात्मानो वा येनार्थप्रतीतौ विरोधानुषंगात्॥ न चार्थेनासंबद्धोपि शब्दस्तस्य धर्मो इति

प्रसंगात् अर्थप्रतीतिहेतुत्वात् तद्धर्मी सोनेतरेण वैयधिकरण्यानुषंगात्॥ पक्षधर्मत्वसिद्धौ शब्दस्यार्थप्रतीतिहेतुत्वसिद्धिरिति तत्प्रतीतिहेतुत्वेन वा-

सनद्धर्मित्वे चक्षुरादेरपि पक्षधर्मतासिद्धेस्तत्स्वभावत्वेनेति अनुमानिकत्वं स्यात्॥ तत्र पक्षधर्मत्वं शब्दे संभवति नाप्यन्वयव्यतिरेकौ देशे काले च

शब्दार्थयोरनुगमाभावात्॥ नहि यत्र देवो शब्दस्तत्रार्थोप्युपलभ्यते भूमावर्थो रतिभवद्भिरेवाभ्युपगमात्॥ नापि व्यवहारिणां नरस्य-

ध्यवसायोस्ति॥ न खलु यत्र पिंडखर्जूरादिशब्दं शृण्वंति तत्र पिंडखर्जूरादयोर्थाः संतीति व्यवहारिणः प्रतिपद्यंते॥ यत्र हि धूमस्तत्राग्निरुपलब्धो रसिके

न प्रसिद्धो येन तथाविधानान्वयव्यतिरेकाभ्यां वाचकत्वस्यास्याभिरथीप्तत्वात्॥ न चैवं निधानान्वयव्यतिरेकस्यासाधारणत्वादनु-

मानत्वं शब्दस्य प्रसक्तिनाप्यसंगानुमानं भवति॥ धूमस्य तावद्देशतः शब्दस्यार्थेनान्वयोस्ति॥ नापि कालतो न हि यत्र काले शब्दस्तत्रार्थो

व्यं संभवति॥ रावणशंखचक्रवर्त्यादिशब्दा हि वर्तमाना अतीतानागतार्थस्तेभ्यो भविष्यंश्चेति॥ कुतोर्थानां शब्दानुव्यावृत्तत्वं॥ अन्वयाभावे व्यतिरेकस्याप्यभा-

१ तुला॰ ग॰ मु॰ नास्ति / २ अतीत ग॰ मु॰ नास्ति

१९१ वक्तुरुत्कर्षकत्वानवस्थेति चेत्। यदप्युक्तं। योऽपि शब्दोऽयं प्रत्यायितार्थ इत्यादि। तदप्ययुक्तमेवं विधान्वयव्यतिरेकाभ्यां तद्वाचकत्वस्यास्माभिरभीष्टत्वात्। नैवं
विधान्वयव्यतिरेकमात्रेणास्याऽनुमानत्वं वाच्यं। प्रमेयस्यापि तत्संख्यात्वन्मात्रस्य तत्वाध्यविशेषात्। यत्र हि परस्तद्भावोऽस्ति न तत्तत्र स्वयं भव
ति। यत्र तु सन्नास्ति न तत्तत्र भवतीति। यदपि तं वंधस्य चान्यपेक्षत्वादित्युक्तं। तदप्यनुपपन्नं अनुमानेऽपि संज्ञाद्युपमानादावप्यतद्भेदेनानैकांतिक
त्वात्। अननुमानत्वेनोपमानादेः प्रागेव प्रसाधितं। यच्चान्यदुक्तं। शब्दोऽपि व रूपाद्यवेव प्रमाणमित्यादि तदप्यतत्त्वमनोविलसितं। तत्र [illegible]
प्रामाण्यस्य वर्णादिवाक्यानि प्रागुक्तर्यान् वांछितानि त्वच्यपंचतः प्रतिपत्तस्य मानत्वात्। ततः शब्दोनुमानं तद्विभिन्नविषयत्वात् तद्विभिन्नसा
मग्रीसंपेक्षित्वात् प्रत्यक्षवत्। इतोऽप्यननुमानमसौ पुरुषैर्यथैवं नियुज्यमानस्यार्थप्रतीति हेतुत्वात्। यत्तु न तदनुमानं न नतथा हृ न तादिर्वैनथा शब्द
स्तस्मान्नानुमानमिति। न च साधनान्वयव्यतिरेकाविषयं दृष्टं न रत्यभिधानत्वं। तथा नैर्नियुज्यमानस्यास्य साध्यप्रतीत्यजनकत्वात्। नहि कृतकत्वं नित्यत्व
साध्ये व्यथाधूमत्वादिकं वा जलादिसाध्ये व्यथा नियुज्यमानं तत्प्रतीतिहेतुरन्यथा न कश्चिद्विशेषोऽहेतुः स्यात्। तथा शब्दो नानुमानमासो न त्वेनैवाव्य
भिचारित्वात् जनकत्वादस्तु न रत्नुमानं। न न तथा तज्जनकं यथा कृतकत्वादि। तथाजनकं च शब्दः इति। कृतकत्वादिसाधनस्य हि साध्येनाव्यभिचारित्वं ज
न नैविनाभाव एव निमित्तं नाऽसौकत्वं था शब्दस्य त्वासौकत्वमेवेति। छ। सत्यमनुमानस्य भावरुपचार्पं शब्दोऽपि प्रमाणत्वात् प्रमाणत्वे हि तस्यानुमानं
तर्भावयामः फलवान्। न चास्मेन तदर्थि वस्तुनि संबंधासंभवात् संबंधो हि शब्दार्थयोर्वस्तादात्म्यलक्षणो वा तदुत्पत्तिस्वभावो वा भवेत्। न तावत्ता दा
त्म्यलक्षणो भिन्नदेशतया तयोः प्रतीयमानत्वात्। क्षुरेऽपि हि शब्दे प्रतीयमाने भूमावर्थरति। तादात्म्ये चक्षुरमोदकशब्दोच्चारणे मुखस्य पाटन पूर
णप्रसंगः। नापि तदुत्पत्तिस्वभावो गुल्फयेहस्तियूथशतमास्ते इत्यादिशब्दानामर्थाभावेप्युत्पत्तिः प्रतीतेः स्थानकरणाद्युपलम्भभवत्वाच्छब्दानोर्थान् सप १९२
र्शन्तः प्रत्यायितार्थप्रतीतिं जनयितुमलं। तत्कथं प्रामाण्यभाजो भवेयुः। ते हि विकल्पमात्राधीनजन्मानः स्वमहिम्ना तिरस्कृतवात्पार्थान् प्रत्य
पादयन्तीति। यदप्युक्तं। गुल्फयेहस्तियूथमास्ते इति। पुरुषदोषाणामेवयमहिमा न शब्दानामित्यप्ययुक्तं। दोषवतोऽपि सकाशात् पुरुषस्यानुच्चारितश

१ प्रति नास्ति ब पु। २ अतद्रकादेः ब पु

ध्यासैरत्वासत्यत्वयोस्तादन सामर्थ्यासंभवात्॥ असत्यपि तु पुरुषत्वस्य कालुष्ये व्यासप्रभुकाद्यं गुल्यादिवाक्यानि नानुत्पादयन्त्येवातः शब्द
नामेवैवस्वभावेन वक्तृदोषाणामत्वासान्वे हविवाक्यानि प्रयुंजते प्रयुंजानावानासाः स्मृतिप्यपसदेव पापिष्ठि वक्तृदोषाणामयथार्थज्ञानोद
यकारणत्वासिद्धिर्व्यतिरेकासिद्धेः। यदि हि वक्तृदोषाभावेप्यन्यानि वाक्यानि प्रयुंजीरन्नेव यथार्थान्यस्त्य यान्यकुर्युस्तदान्वयव्यतिरेकाभ्यां चतुरो
यजनं वार्थज्ञानस्यस्यात्॥ यदि तु तेषामप्रयोगे किं शब्दाभावादयथार्थज्ञानानुत्पत्तिराहोस्विद्दोषाभावादिति संदिग्धो व्यतिरेकः शब्दस्तु निश्चितः
सत्स्वपि दोषेषु शब्दानुच्चारणे मिथ्याज्ञानानुत्पत्तेः न चामत्त्वमीदृग्वाक्यप्रयोर्जनकत्वेन विवक्षितं तथाविधशब्दोच्चारणास्तत्पात्रयदोषाभावतो
नामत्वायोगात्॥ तथा तथा श्रौत्रिकस्यैव रूपदर्शनात्॥ नन्वसंनानुभूतार्थयावन्न अपाकर्तव्यं। यथा गुल्पयेहस्ति पूर्वशतमास्त इति॥ अतः शाब्दस्यै
वैषमहिमा न वक्तृदोषाणां किं च बाधकमपसदाचार्यमत्राङ्गे मिथ्याज्ञानं जनयत्येव॥ येऽपि च वक्तृदोषास्तेऽर्थासंस्पर्शिनः शब्दाविकल्पमात्राधीनजन्मा
नः सिद्धा लघुक्तं॥ श्लोकः। विकल्पयोनयः शब्दाः विकल्पाः शब्दयोनयः। तेषामन्योन्यसंबंधो नार्थाञ्छब्दाः स्पृशन्त्यमी॥१॥ इति॥ रू॥ अर्थप्रतिनिबंध
नेपनायदुक्तं। तन्तु निसंबंधासंभवादित्यादि तदसमीक्षिताभिधानं न च शब्दस्य तद्भावासंभवात्॥ तथा हि॥ शब्दैर्येन संबद्धस्तमेव प्रकाशयति॥ इति नि
यतत्वस्यप्रहेतुत्वात्। चक्षुर्वत्॥ शब्दस्यस्य योग्यत्वावच्छ्राभ्यां शब्दार्थाभ्यां जन्यत्वे प्रतिनियतप्रत्ययत्वादृष्टीत्यादिप्रत्ययवत्॥ ननु शब्दार्थयोस्तादात्म्य
तदुत्पत्तिलक्षणसंबंधस्याभावात्तत्कथं संबद्धत्वमित्यप्यनुपपन्नं॥ तदभावेप्यनयोर्योग्यतालक्षणसंबंधसंभवात्॥ तदभावे सोपि कथमित्यप्य
वाच्यं॥ चक्षुरूपयोस्तदभावेपि तद्दर्शनात् न खलु चक्षुषा घटादिरूपेणास्तादात्म्यं तदुत्पत्तिः संयोगो वा समवायो वेत्यभ्युपगम्यते॥ प्रतीतिविरोधा
नुषंगाद्वा प्यकारित्वस्य तत्प्रसंगात्। नाप्यतदभावे रूपप्रकाशने योग्यतालक्षणसंबंधस्याप्यसंभवः श्रोत्रादिवत्तस्यापि तत्प्रकाशकत्वप्रसं
गात्॥ ननु योग्यतानाम शब्दस्यार्थवाचकत्वशक्तिः स्यात् सापि शब्दवाचकत्वशक्तिरस्यादित्यप्यसांप्रतं। प्रतिनियतशक्तित्वाद्भावानां न हि शब्दार्थयोः प्रति
पाद्यप्रतिपादकशक्तिः॥ ज्ञानज्ञेययोर्ज्ञाप्यज्ञापकशक्तिवत्। न च ज्ञानज्ञेययोः कार्यकारणभावात्प्रतिनियमो न योग्यतावदित्यभिधातव्यं॥ तत्कार्ये

न्या॰कु॰चं॰ कारणभावस्य चान्वयव्यतिरेकाभ्यामर्थस्येव्कारणाविरहस्य च विकल्परूपतो निराकरिष्यमाणत्वात्॥ कथं चैवं चक्षूरूपयोर्थ(?)प्रदीपयोः प्रकाशकप-
१०३ वप्रतिनियमः स्यात्॥ योग्यतातो शब्दस्य कार्यकारणभावादिसंबंधः स्यात्॥ न त्वनिनियमहेतोरसंभवात्। ननु योग्यतावशाच्छब्दो यथार्थं प्रतिपादयति न
दाभूमवन्न वह्निनोत्थितस्यापि व्यभिचारेत्तु॥ विशेषाभावादित्यप्ययेऽशब्दसंकेतनसंनिवयोग्यता। न तस्य तत्प्रतिपादकत्वाभ्युपगमात्॥ धूमवन्न
वह्निनोत्थितं प्रतिवास्यमयाविधत्वाभावान्नतत्प्रतिपादकप्रसंगः॥ संकेतो हि रमयस्य वाच्यमिदं वाचकमित्येवंविधो वाच्यवाचकयोर्विनियोगः॥ यस्य
स्थितस्येवस्य शब्दस्यार्थं प्रतिपादयति॥ नान्यस्यान्यथा धूमादिसाधनस्य साध्यादिसाध्यं गमयेदविशेषात्॥ अविनाभावो हि सा-
धनस्य साध्यगमकत्वेन तत्र नदाशब्दस्य स्यात्॥ येनैव साध्यं साधनं साध्यस्य गमकमित्यभ्युपगमेऽपि नैव शब्दार्थयोः संकेतोऽदर्शनत्वं प्रत्येव श-
ब्दोऽर्थस्य वाचकत्वाभ्युपगम्यताम् अविशेषात्। ननु संकेतः पुरुषेच्छाकृतो न च नरेच्छया वस्तुव्यवस्था युक्तातिप्रसंगात्॥ अतः योऽपि वाचकः शब्दस्तु वाच्यः किं
न स्यात्तदिच्छायाः निरंकुशत्वादित्यप्यसुंदरं॥ न संकेतस्य सहजयोग्यतानिबंधनत्वात् धूमाग्निवत्॥ यथैव हि धूमाग्न्योः स्वयकृत एवाविनाभावः संबंधः न हि तत्त्वनये
तु संकेतः समापातने॥ सांसिद्धिकार्थशक्तिव्यतिक्रमेव च चक्षुरूपादीनामपि प्रकाशप्रकाश्यशक्तिव्यतिक्रमः स्यात्॥ तथा च चक्षुःप्रदीपादीनां प्रकाश्यत्वं
प्र रूपादीनां तु प्रकाशकत्वं स्यात्। अनीतिनिरोधान्यथापि न कोऽपि भ्रसित। ननु शब्दस्य स्वाभाविकी शक्तिः किमेकार्थप्रत्यायनेऽनेकार्थप्रत्यायने वा एकार्थप्रत्याय-
नेऽन्यथा संकेतशतैरपि ततोऽर्थान्तरे प्रतीतिर्न स्यात् धूमादग्निप्रतीतिवत्॥ अथानेकार्थप्रत्यायनेऽनेन दायुगपत् ततोऽनेकार्थप्रतीतिप्रसंगात्॥ प्रतिनियतेऽर्थे
प्रवृत्तिर्न स्यादित्यप्यचर्चिताभिधानं सर्वशब्दानां सर्वार्थप्रत्यायनशक्तिसंभवात्॥ कथमन्यथा न तद्गत संबंधेनं शब्दस्य संकेतेरहः स्यात् कमर्थप्र-
वृत्ति॰ तिपादयितुमनेन शब्दः प्रयुक्त इति नैवं तस्य सर्वार्थप्रतिपत्तिप्रसक्तेः प्रतिनियतेऽर्थे न तः प्रवृत्तिर्न स्यादित्यप्यभिधातव्यं॥ प्रतिनियतसंकेतवशात्ते- १०३
षां प्रतिनियतप्रतिपादकत्वोपपत्तेः एकस्यापि हि शब्दस्य देशादिभेदेन प्रतिनियतः संकेतो दृश्यते॥ यथा मालवादौ कर्कटिकाशब्दस्य फलवि-
शेषवृत्तिर्दक्षिणे तु योन्या(?)मिति निद्रयमेव च सर्वत्र रूपप्रकाशने योग्यस्यापि चक्षुषः प्रत्यासन्ननिमिरवशादसन्निहितेन दूरनिमित्तवशाच्चासन्निहितेरू-

१ [illegible] स॰ पु॰ ।

१[illegible] तु [illegible]

पेविविशिष्टांजनादिवशादंधकारांतरितेपि ज्ञानजनकत्वं काचकामलादिवशाच्च विवक्षितरूपाभावेपीति ॥ तेनापथानेकरूपप्रकाशनयोग्यस्या
पि चक्षुषो दूरतिमिरादिवतिनियतसहकारिवशात्प्रतिनियतदूररूपादिज्ञानजनकत्वं ॥ तथानेकार्थप्रत्यायनयोग्यस्यापि शब्दस्य प्रतिनियत
संकेतवशात्प्रतिनियतार्थप्रतिपादकत्वमविरुद्धं ॥ अथ मतं चक्षुरादिवच्छब्दस्यार्थयोग्यतालक्षणसंबंधसंभवेन दृष्टेवान्संकेतानपेक्षार्थ
प्रतीतिः स्यात्तदयुक्तं ॥ तस्य ज्ञापकत्वात् ज्ञापकस्य स्वसंबंधेत्वार्थप्रतीत्यंगत्वोपपत्तेः । यद्धि ज्ञापकं तद्ज्ञात्वा प्रतिपन्नप्रतिबंधमेव प्रतीतिमुत्पादयति ॥ य
था धूमादि ज्ञापकस्य शब्दस्येति ॥ चक्षुरादीनां तु कारकत्वात् युक्तं स्वार्थसंबंधग्रहणानपेक्षाणां तद्रूपादकत्वं ॥ स्वयं हि प्रतीयमानः प्रतीतानार्थप्रती
तिहेतुर्ज्ञापक उच्यते ॥ तद्रूपत्वाच्च शब्दो दृष्टे वास्ति न चक्षुरादेरतत्स्वरूपत्वात्प्रतिपन्नप्रतिबंधस्वार्थं गमयति ॥ शक्तिस्तु स्वाभाविकी यया रूपप्रकाशनेच
क्षुरादेरिव शब्दस्यार्थप्रकाशने दृष्टस्य परस्परयुक्तमनोर्थानां संसर्गिनः शब्दा इत्यादिना अभिधानं ॥ यतः किमाप्तप्रणीतस्य शब्दस्यार्थसंसर्गित्वं प्र-
साध्यते ॥ अनाप्तप्रणीतस्य शब्दमात्रस्य वा आप्तप्रणीतानां वाक्यानि तत्प्रतीतिर्वा वाक्यार्थप्रत्ययप्रतीतेः
ततः प्रवृत्तस्य तदर्थप्राप्तेः ॥ अथानाप्तप्रणीतस्य तर्हि न तस्यार्थसंसर्गित्वं युक्तं नान्यथा काचादिदोषदुष्टचक्षुःप्रभवप्रत्ययस्यापि तत्स्यात् ॥ एतेन
तृतीयविकल्पोपि प्रत्याख्यातः आप्तप्रणीत शब्दव्यतिरिक्तस्य शब्दमात्रस्यासंभवात् ॥ नत्वाप्तप्रयुक्तादंगुल्यादिवाक्याद्विपर्ययज्ञानोत्पत्तिप्रतीतेः शब्द
स्यैव महिमा न वक्तुर्दोषाणामित्यप्यचोद्यं नाभिधानमात्रे एवंविधवाक्यप्रयोगात् ॥ यत्नाप्तोपि कश्चिद्विप्रतिपन्नो युक्तं ॥ तत्र निषेधपरत्वेनाप्यथा
पि नैकदेशस्याप्युदाहरणविवक्षायामिति करणावच्छिन्न स्वशब्दपरत्वेनोपादानात्प्रतिषेधकवाक्यतया यथार्थतैव ॥ अथ परत्वे तु निषेधेनैकवा
क्यत्वेन स्यात् ॥ तस्मादाप्तप्रणीत शब्दानामयथार्थत्वाभावात्स्वतो संसर्गिनः शब्दाः किंतु पुरुषदोषवशात् ॥ नत्वाप्तैरेवंविधवाक्यप्रयोगेपि संदि
ग्धा व्यतिरेकः किं शब्दाभावादयथार्थज्ञानानुत्पत्तिर्वक्तृदोषाभावाद्वेत्यव्यभिचारितत्वमणोपमतत्वाद्वित शब्दस्यापि दोषवतः पुरुषस्य हस्तसंज्ञानादिना
प्रतारकत्वप्रतीतेः ॥ न च हलसंज्ञादिना शब्दानुमानं तत्तोवितथत्वप्रसंगस्य विधानत्वं ॥ तथा प्रतीत्यभावात्तथादिवाक्याद्भुत्यन्वेषकचित्तविज्ञानेतरंगिणी

१ - प्रतीमा ख. पु. । ३ प्रतीतात् ख. पु. २ प्रत्यर्थ ख. पु. नास्ति

न्या·कु·चं· नीरमनुसरन्ननासादितफललाभः पुरुषः पुरुषमेवाधिक्षिपति॥ दुरात्मनानेन विप्रलब्धोस्मीति न शब्दं॥ ननु पुरुषस्य गुणवतो दोषवतो वा शब्दोच्चा-
१८७ रणमात्रएव व्यापारोऽर्थप्रतिपत्तिस्तु शब्दान्निबंधनैवेति॥ तदप्ययुक्तं शब्दस्यैव व्यापारेण वक्तृदोषगुणानामिव व्यत्युक्तं पनो गुणवद्वक्तृप्रणीतोर्णतरं गिरा तोर-
फलानि संतीति वाक्यात्सत्यार्थप्रत्ययोस्येप्येवं शब्दस्यैव व्यापारः स्यात्तदकुशलदुच्चारणमात्रे चरितार्थत्वात्॥ अतः कथमेकांततः शब्दस्यार्थासंस्पर्शि-
त्वमेव स्वरूपं स्यात्॥ किंच विपर्ययज्ञानोत्पन्नेप्यर्थे वादिः सहतद्भावभावित्वमन्वयगम्यते न तावतां तद्व्यापारः साचात्र शब्दोच्चारणोत्सत्यप्यना सयोगिनां
विनान दृष्टेति॥ शब्दस्य तदा शब्दत्वमप्यस्यापि तत्र व्यापारः॥ किंच सुरादिवत्प्रकाशकत्वमात्रं शब्दस्य स्वरूपं न तु नर्थपयार्थप्रकाशकत्वं वा तस्य गुणदो-
षनिबंधनत्वात्॥ तिमिरादिनैर्मल्यादिगुणे चक्षुर्यथावद्वस्तु प्रकाशकत्वमयथार्थप्रकाशीति॥ काचादिदोषे तु तस्य यथावत्॥ एवं शब्दोपि वक्तृगुणदोषापेक्षतः
सत्येतररूपं वस्तु प्रकाशयति॥ अतएवांगुलिशिखरे इत्यधिकरणाकोपि गुरुत्वादिवचसि बाध्यमानेपि पुनः पुनरुच्चार्यमाणे भवति॥ निःप्रकाशकत्वस्य तत्स्वरू-
पस्य बाधकज्ञानोत्पत्तिमात्रे निपातेप्यनपायात्॥ उक्तंच काप्युक्तं नेंद्रियवदुदाहरति॥ तदस्त्विति मात्रं बाधकप्रत्ययप्रवृत्तावपींद्रियस्य चंद्रद्वयविषय
मिथ्याज्ञानजनकत्वप्रतीतेः न च तत्स्वरूपं नो न तद्विषयं विज्ञानं चोत्पादयतीत्यभिधानव्याप्रतीतिविरोधात्मपरस्युक्तं॥ विकल्पयोनयः शब्दा इत्यादि
तत्त्वविकल्पकसिद्धौ क्रतोनरत्वादुपेक्ष्यते॥ तत्प्रमाणं शब्दोर्थोपलब्धिनिमित्तत्वात्प्रत्यक्षादिवत्॥ स्वपरपक्षसाधनदूषणासमर्थत्वाच्च सम्यग्ज्ञान
वत्॥ तथा सकलतत्त्वविषयज्ञानप्रतिपत्तिनिमित्तत्वाद्योगिज्ञानवत्॥ न खलु देशकालस्वभावविप्रकृष्टाखिलार्थानां सूक्ष्मतोऽविप्रतिपत्तिनिश्चितिः
संभवति॥ तदुपायांतरासंभवात्॥ लिंगं तदुपायांतरं संभवतीति चेत्॥ न तत्प्रतिबद्धलिंगस्य कस्यचिदप्यप्रतिपत्तेः लाभो योग्यतालक्षणसंबंधाच्छब्द-
स्यैव तत्र प्रामाण्यमभ्युपगंतव्यमिति॥ छ॥ ननु च शब्दस्यार्थसंबंधः सत्यनित्यो नित्यो वा स्यात्॥ तत्राद्यपक्षोनुपपन्नो नित्यस्य संबंधस्यकृतमज्ञ- १८७
स्यत्वात्॥ समयो हि क्रियमाणं श्रोतृप्रत्यर्थं प्रति शब्दः प्रत्यर्थं सर्वत्र सकृदेव वा क्रियेत न प्रकारांतरासंभवात्॥ उक्तं च श्लोकः॥ सर्वतः प्रतिमर्त्यं वा प्रत्यु-
च्चारणमेव वा॥ क्रियेत जगदादौ वा सकृदेकेन केनचित्॥१॥ प्रथमपक्षे तु पुरुषेण प्रतिपुरुषं प्रतिपुरुषं संबंधः क्रियमाणः किमेकोऽनेको वा

पयोकः कथं ह्यनकः पूर्वमप्यस्य सद्भावनोक्तन कत्व प्रसिद्धेः॥ नीरिह सतो वस्तुनः पुरुषाज्जन्म युक्तमभिव्यक्तेरेवातः नस्योपपत्तेः॥ अथा
नेकः कथमेकार्थसंगतिर्यथा गोशब्दस्य सास्नादिमानर्थः॥ केसरादिमानस्ववाद्वस्येति॥ किंच प्रतिपुरुषं संबंधकरणे किमेकस्त्वकर्ता
वहवो वा यद्येकस्तदासौ देशान्तरव्यवस्थितानां कथं समयं विदध्यात्॥ तत्र तत्र गत्वा सो करोतीति चेन्नहि पुरुषायुषेणापि न तत्करणानुपपत्ति-
स्तेषामनंतत्वात्॥ अथोक्तः सन्निहितेषु वहुषु समयं करोतीति नेवहून्तसमयपात्रन्येषां न करिष्यतीति॥ तेष्वन्येषामिति संसर्वत्रव्यवहारस्य पप
स्यते॥ तत्रैनेषां तपो जमाभावतः सर्वत्र गमनानुपपत्तेः अतो येवैव तेन गच्छति तत्र व्यवहारे न प्राप्नोति॥ अथ वहवः समयस्य कर्तारस्तर्हि
सकलदेशकालेषु तना समयस्य न प्राप्नोति॥ अथ बहवः समयस्य कर्तारस्तर्हि सकलदेशकालेषु करूतना समयं न प्राप्नोति॥ न स्यात्रिमिना
तत्संकरणप्रसिद्धेः॥ अतः कथं चिदनवच्छिन्नो ज्ञानसंतानोनैकविधदुर्द्धरतपोनुष्ठाना समुच्छिद्यतेइतिचेत्तादृशैः अनिपतनीयं॥ छ॥ अनवच्छिन्नो
ज्ञानसंतानस्तत्प्रयुक्तं सुषुप्ताद्यवस्थायामपि तत्रवच्छेदप्रतीतेः किंचिदप्यपरिच्छिंदन्नेवहि सुषुप्तस्तत्युच्यते॥ तत्र ज्ञानसद्भावे चतद
परिच्छेदानुपपत्तेः। यदि चतत्र ज्ञानसद्भावः स्यात्तदा जाग्रत्सुप्तावस्थयोर्भेदो न स्यादुभयत्र स्वपरावभासिज्ञानसद्भावाविशेषात्॥ नच
तत्सद्भावेपि निद्रयाभिभवाज्जाग्रदवस्थायां चतदभावान्नानयोरविशेष इति चेत्। नत्वकोयं तया ज्ञानस्याभिभवो नामा नामस्वशक्तिरोभा
वोवाभविनाशोवाः कथं तत्र तत्सद्भावस्तस्य तद्विरोधित्वात्। अथ तिरोभावस्तत्स्वपरप्रकाशरूपज्ञानाभ्युपगमेतस्याप्यनुपपत्तेः अतः सुषुप्ता
द्यवस्थायामनुपलब्धिलक्षणप्रमाणप्रसिद्धस्य ज्ञानस्यानुपलब्धेरभावएवव्यापाराणीति॥ छ॥ अत्र प्रतिविधीयते यत्तावदुक्तं। किंचिदप्यपरिच्छिंदन्नेवही २६७
त्यादि। तदसमीचीनं सुषुप्ताद्यवस्थायां स्वापादिसंवेदनस्य तत्सुखसंवेदनस्य च सद्भावात् तत्र हि ज्ञानानभ्युपगमेसुखमहमस्वाप्समिति
सुप्तोत्थितस्य स्वापसुखस्मरणस्यैतावन्तं कालं निरंतरं सुप्तोहमेतावत्कालं च सांतरमिति स्वापस्मरणस्य चाभावानुषंगात्। तस्य ज्ञानवस्तुवि
षयत्वेन स्वविषयज्ञानांतराविनाभावित्वात्॥ यत्तत्संस्मरणं तत्स्वविषयज्ञानान्तराविनाभावि यथा घटादिस्मरणं स्मरणं च सुप्तोत्थितस्य

१ नैक। २ स्मरणं।

स्वापसुखादिसंवेदनमिति॥अस्यस्त्वविषयज्ञानांतरमंतरेणाप्याविर्भावेघटादिस्मरणस्यापितदंतरेणाविर्भावःस्यादतःकुतस्तदनु
भवादिरपिसिद्ध्येत्॥ नतुसुषुप्त्यवस्थायांयेनानुभवेनस्वापसुखादिस्मरणमाविर्भाव्यते॥सतद्विषयोप्युपगंतव्यं॥एतेनमनसूर्द्धि
नाद्यवस्थायामपिज्ञानसद्भावक्लृप्तसाधितः॥तदवस्थायाःखलुतस्यतदामयानकिंचिदनुभूतमितिस्मरणनिबंधनोयेनानुभवेनतस्या
ज्ञानिखिलानुभवविकलोनुभूयते॥तस्यामवस्थायांसोनुभवोप्युपगंतव्यस्तमंतरेणतत्स्मरणानुपपत्तेः॥नचसुषुप्त्याद्यवस्थायां
स्वापसुखस्यतत्संवेदनस्यवाऽदर्शनादसिद्धमितिनिरूपणाभाववदस्त्यभिधातव्यं॥नदर्जीनवालकस्यसुखप्रसिक्तस्तन्यजनितसुखेन
तत्संवेदनेनवानेकांतात्॥नखलुतस्येदमस्मिन्सुखमितिनिरूप्यतेयथाप्रति॥नचदुःखाभावात्सुखव्यपदेशयोगोत्रगौणोभावस्यप्रतियो-
गिभावांतरत्वभावनयाभावविचारस्य ... त्वात्॥यदप्युक्तंतत्रस्नानसद्भावदस्यादिनदप्यसमीक्षिताभिधानं॥तत्रतान
सद्भावेपिज्ञानस्यसुषुप्त्यवस्थायांभेदोपनतेन ... तानभिभूतत्वादाध्यात्मिकार्थविचारचतुरस्त्वात्मसंसाजन्यदवस्थायतत्तुभिद्दायमिभ
ववज्ञानदृष्टिपरीतंसासुषुप्त्यवस्थायांरपिकोपिनिद्रादिनाज्ञानस्याभिभवत्वानुक्तं॥तत्रास्यतद्वाद्यादाध्यात्मिकार्थविचारविधुर
त्वेयेनाभिभवःस्वपरप्रकाशस्वभावत्वात्तस्यकथंदिधुरत्वमित्यप्यनुपपन्नं॥गच्छत्तृणस्पर्शसंवेदनेनव्यभिचारात्तस्यतत्वभाव
त्वेपितन्निरूपणासामर्थ्यप्रतीतेः॥नहितत्स्वभावत्वमात्रेणैवतज्ज्ञानस्यतन्निरूपणसामर्थ्यंसदृशानभिभूतस्यैवास्यतन्निरूपणसाम
र्थ्यसंभवात्॥यथाचगच्छत्तृणस्पर्शसंवेदनमन्यमनस्कत्वाभिभूतंतथास्वप्नादिसंवेदनंनिद्रादिनेतियुक्तमुत्पश्यामः॥कथंचैवंवारि
तोमणिमंत्रादिनाग्न्यादेःस्फोटादिनाचप्रदीपादेःप्रतिबंधःसिद्ध्येत्॥नहितेनतस्यनाशःसंभवति॰प्रसक्तविरोधात्॥नापितिरोभावःस्व
कार्यजननसमर्थस्यास्यतिरोभावस्याप्यसंभवात्प्रतीत्यनतिक्रमेणतत्स्वरूपसामर्थ्यप्रतिबंधाभ्युपगमोन्यत्रापितस्मात्किंचसुषुप्त्यव
स्थायांज्ञानाभावेसएवात्मात्मप्रतिपद्यते॥मार्गस्थायांयदिसएवकिंतनतएवज्ञानानंतरभावात्तदनुपपन्नंभाज्ञानायतद्बोधदशाभाविज्ञानां

न्या.कु.चं. २६८

तएद्वाननावतनस्यास्यसत्वाद्वस्तत्वानधर्मनयानरभावेसंभवाभावात्॥अन्यथा ज्ञानस्यैवाभावइतिनामकृतंस्यात्॥तदनुपलंभनोपितत्कालभावि
नोऽन्यकालभाविनोवाज्ञानजनरभावप्रतिपत्तिःस्यात्॥प्रथमपक्षेकथंनत्रसर्वथाज्ञानाभावस्तदभावग्राहिणोनुपलंभज्ञानस्यतत्रविद्यमानत्वात्॥ना
प्यन्यकालभाविनस्तस्यतत्प्रतिपत्तिहेतुत्वायोगात्॥नत्वन्यकालोनुपलंभोन्यकालस्यान्यस्यप्रतिपत्तिहेतुरतिप्रसंगात्॥अनुपलंभनेनेत्कालान्तराश्र
यत्वयानत्वप्रथममात्मापरिच्छेद्यत्वः॥प्रतियोगीचस्मर्तव्योनः कथंसुषुप्तावस्थायांसर्वथाज्ञानाभावःसिद्ध्येत्॥तदानुपलंभनोपितत्रतदभा
वसिद्धिः॥नापिजाग्रत्प्रबोधदशाभाविज्ञानान्तरेणतत्रचयासुषुप्तादिज्ञानस्योपलब्धिलक्षणप्राप्तत्वासंभवात्॥तद्दशाभाविनस्तदभाविनस्त
दभावग्राहिणः कस्यचिज्ज्ञानान्तरस्याप्रतीतेश्चानिर्भरस्वप्नेमयानकिंचिज्ज्ञातमितिप्रबोधदशाभाविज्ञानेनतदभावस्याध्यवसायेनप्रतिपत्तिः॥ए
वेत्यप्यपेशलत्वेनतस्मान्तरात्तत्सद्भावस्यैवप्रतिपत्तेस्तन्निरूपणलीयंस्मृतिश्चतद्दशायांतदभावग्राहिज्ञानान्तरमन्तरेणोपपद्यतेतत्स्वरूपमात्रेणस्व
वेदनत्वसुषुप्तावस्थायांसत्वात्प्रत्येकज्ञानाभावंप्रतिपत्तुंसमर्थः॥नापिधर्म्मिस्वभावःकारणस्वभावव्यापकानुपलब्धेर्विरुद्धविधेर्वातदभावा
विनाभाविनोलिंगस्यात्रासंभवात्॥नचतच्चतत्सद्भावाविनाभाविनोप्यस्यासंभवःसमानत्वमभिधातव्यं॥स्वात्मनितदविनाभावित्वेनावभारि
तस्यप्राणादेःसाकारविशेषादेस्तत्सद्भावाव्यभिचारिलिंगस्यात्रोपलब्धेः॥जाग्रद्दशायामप्यन्यथैतेनोत्तेनतद्व्यतिरेकेणान्यतोप्रतिपत्तेः॥
ननुद्विविधेषभृताणामाविर्भावत्वेनत्यप्रभवःप्राणादिप्रभवश्चनत्वेनत्यप्रभवोजाग्रद्दशायांप्राणादिप्रभवश्चसुषुप्तावस्थायामिति॥नचचैतन्यप्र
भवप्राणादेर्जाग्रद्दशायांचैतन्यानुमानंयुक्तंतथाहिप्राणादिप्रभवप्राणादिप्राणादेश्चैतन्यलिंगोपालपरिहारेणधूमप्रभवधूमादग्न्यनुमानंदृष्ट २६८
मग्निप्रभवधूमादेरग्निपतनहीनादिकल्पनावत्सुषुप्तेचैतन्यस्ययोःप्राणादेर्विशेषाप्रतीतेः॥यथैववह्निसुप्रभवःप्राणादिनचैतन्योप्यन्यथासिकिंमयंसुषु
प्तः॥किंवाजाग्रतीतिसंदेहोनस्यात्॥यदिचैवंकुसुमस्यचैतन्यप्रभवात्प्राणादेःतर्हिजाग्रतःपश्वचनाभिप्रायेणसुषुप्तव्याजेनावस्थितस्यतद्द
शायांतेषांसंभवोनस्यात्॥नचयेजाग्रतोधूमःप्रभवत्वातैरपिधूमात्मान्यतोवाजायतेधूमप्रभवोवाग्नेरिति॥इदमपेतत्वयाद्दशायांकुसुमस्यप्राणा

१ कुम. / २ सुसुप्त्य।

[illegible]

स्यत्वादज्ञानत्वास्यापि तैनैनेभिन्नकारणप्रभवाः चैतन्येतरप्रभवांश्चयाणादीनि चेचत्वीतरागेनरप्रभवान् ॥ व्याणादीनपि विवेचयतु ॥
तथा च सरागस्यापि वीतरागवच्चेष्टंते वीतरागाश्च सरागवत् ॥ अतो वीतरागेतरविभागो निश्चेतुमशक्य इति दिक्सवने ॥ सुषुप्तावेव प्रथमः
प्राणादिः कुतो जायमानां प्राणादि[illegible]ज्ञानसहकारिकारिणो ज्ञायत्वाणादेरिति चेत् ॥ नैकस्मात् ज्ञानादिलानादनंतनव प्राणादिकालांतर
भावि च प्रबोधज्ञानमित्यस्यासंभाव्यमानत्वात् न चैकस्मात् प्राणादिविशेषात् क्रमभाविकार्यद्वयस्य संभवो युक्तो न्यायनित्यादप्यक्रमात्
क्रमवत्कार्यद्वयोत्पत्तिः स्यात् ॥ तथा च नाकस्मात् क्रमिणो भावात् इत्यस्य विरोधः ॥ तस्मात् सुषुप्तावस्थाभाविन एव तावतानंतकालभावि
प्राणादिप्रभवोभ्युपगंतव्यो यतः ॥ कथं तत्र ज्ञानाभावसिद्धिः ॥ ततो ज्ञानस्य करणादिरपि न पुनरेकैरासंभवात् इति देवं [illegible] ज्ञानसंतानः ॥
तस्य च मुक्तिकारणानुष्ठानात् विनिबंधककर्मप्रक्षयेनंतचतुष्टयस्वरूपलाभो मोक्ष इति ॥ तथा स्याद्घातिकर्मक्षयसमुत्पन्नकेवलज्ञा
नादेर्भगवतो भुक्तिर्थैरमिष्यते तानै जीवस्य कस्येरतोज्जलांजलिरनंतचतुष्टयासंभवात् ॥ कवलाहारेण हि क्षुद्वेदनादयस्त्वतो ॥ न तु स्येच
क्षुदः स्वसंभवादुद्गतः कथमनंतं सौख्यं यतोनंतचतुष्टयस्वरूपलाभलक्षणा जीवन्मुक्तिः स्यात् ॥ न च तत्र भुक्तावेदकं किंचित्प्रमाण
मस्ति ॥ क ॥ [illegible] रविकलकारणता [illegible] भवन्त्येव यथा [illegible] अस्मदाद्यवस्थायां न [illegible] यौगिकेवल्यावस्थाया
मिति ॥ द्विविधं हि भुक्तेः कारणं बाह्यमाभ्यंतरं च तत्र बाह्यं भाजनादि [illegible] तावदविकलमास्ते [illegible] आभ्यंतरमपि पर्याप्तिवे
दनीयस्य [illegible] भगवत्यविकलमेव यतो हि शरीरेंद्रियादिभिः निष्पन्नः [illegible] पर्याप्तिः ॥ वेदनीयं [illegible] समर्थकं कर्म तैजस
मनंतकः शरीरोष्मा [illegible] भुक्तान्नादिपाको भवतीति विरोधमानुमिश्रे जीवनकारणं कर्म ॥ [illegible]
गवतो भुक्तिसिद्धिः ॥ [illegible] प्रमाण [illegible] तिपतव्यः ॥ [illegible] आगमः ॥ सिद्धत्वेत्ययो
गकेवलिनि [illegible] भावप्रतिपादकस्यागमस्यासंभवात् ॥ प्रमाणांतराच्च निषेधः स्वभावानुपलंभात् [illegible] सामान्ततस्तत्स्वभावानुपलंभात् के

न्या॰कु॰चं॰ केवलिनो विप्रकृष्टस्वभावत्वान्न च विप्रकृष्टस्वभावत्वान्न च विप्रकृष्टस्वभावे भावस्वभावानुपलंभो गमकः एकज्ञानसंसर्गिपदार्थान्तरोपलंभलक्षण-
२६८ त्वात्तस्य॥ अन्यतो विधीयमानान्निषिध्यमानात्त्वान्निषेधः स्यात्। यदि विधीयमानान्तरा तेन विरोधिना भवितव्यम् अविरुद्धविधेरभावासा-
धकत्वात्॥ न च कश्चिद्विरोधि केवलिनि किंचिद्विद्यतोपपन्ने॥ न चाज्ञानादिगुणा एव तद्विरोधिन इत्यभिधातव्यं॥ येनाज्ञानादिमात्रस्य यदुविरोध-
त्वं हि दोषस्य नाशः सिद्धो नाज्ञानादिमात्रस्य तर्हि यथानन्तज्ञानादिकं दृष्टे। तथा तद्धानितारतम्येन भवितव्यं। प्रकारान्तरविरहात्। किंच तस्य नन्वे-
वमस्ति॥ नहि बालादौ ज्ञानापचये कवलाहारस्योपचयस्ततः प्रभृति च ज्ञानाद्युपचये तारतम्येन भवितव्यं॥ प्रकारान्तरविरहात् तस्य न चैवम-
स्ति॥ नहि बालादौ ज्ञानापचये कवलाहारोपचयस्ततः प्रभृति च ज्ञानाद्युपचये तारतम्येन तस्यापचयः प्रतीयते॥ तन्न ज्ञानमात्रस्य तन्नापि वि-
रोधः। तन्न तथापि प्रतिपत्तुमशक्तेः नहि केवलिज्ञानादेः प्रकर्षं विरुद्धं तीव्रं प्रतिपत्तुं शक्यमतीन्द्रियत्वात्तेषां॥ किंचाविकलका-
रणस्य भवतोऽन्यभावे भवद्विरोधगतिः स्यात् तस्य च वाग्निधूमो एव वा तदुष्टं॥ केवलिगुणानामतीन्द्रियत्वात्तन्निमित्तं जन्म भवतीति निषे-
धतीतेरनुपपत्तेः तन्न विधीयमानात्कुतश्चिन्नाहारस्याभावसिद्धिः॥ निषिध्यमानस्याभावस्तस्याः कार्यकारणव्यापको नास्याञ्जय
दिकार्येन दात्मनिर्वर्तनसामर्थ्याविकलकारणस्यैव तन्निवृत्तिनिमवगमयेत्॥ न कारणमात्रस्याकार्याभावे भावाविरोधात् कारणमपि
निर्वर्तमानं कार्यं निवर्तयति यथा वह्निर्धूमं व्यापकं वा निवर्तमानं व्याप्यं॥ यथा वृक्षत्वं शिंशपात्वं धूमजधः॥ कारणस्य व्यापकस्य चाक-
स्य चिन्निवृत्तिरस्ति॥ न च मोहनीयादिकर्मचतुष्टयाभावात्। क्षुधो भावस्तस्यास्तत्कार्यत्वस्य तत्स्वभावत्वस्य वासंभवात्। नहि ज्ञानक-
र्मचतुष्टयकार्यमिच्छाक्षुत्पादितयास्याभ्यंतरकारणप्रभवत्वात्तस्याः प्रतिपक्षभावनानिवर्त्यत्वेन मोहस्वभावत्वेन मोहस्वभावत्वेसं- २६९
भवात्॥ यो हि मोहस्वभावः स प्रतिपक्षभावनया निवर्त्यते॥ यथा स्त्र्यादिभावनया कामादिर्मोहस्वभावश्च क्षुद्दृष्टेति॥ तथा च
यदेतत्साधनीकार्थे शास्त्रप्रतिपत्तभारनैवोवादि सेनतज्ञे ध्यानाध्ययनविधानकारिणी पि जेबलाः शीतोष्णबाधातुल्यत्वा

१ घोरभावा। २ ज्ञानाद्यपचये। ३ ... ४ ... ५ ...

त्व॥ अथो नाम मोहस्वभावत्वमन्यत्रान खाधा यात्रपि मोहस्वभावत्वं स्यादविशेषात्॥ ननु भगवतः ज्ञानरूपोपगमे शेषवत्त्वाद्विरोध
जन्तुरूपेषु स्वरासितिन चक्षुज्ञानदर्शनचेष्टादेः अवसायानंतरसमीचीनं ज्ञानावरणादिवत्स्यैव ज्ञानावायामपि जघिज्ञानादिसवायोगात्॥
तत्तु पोहि ज्ञानावरणादिकर्मोदयनिबंधनो नोस्मरादीनतु स्यार्जितावधान्नु स्यापतिवायोस्तु केवलकोभगवति तु रागरणोदरशेष
स्यापगमात्तस्यामपि जघिनज्ञानादिस्तयोरत्यस्यप्रभावेस्तत्पांधने धूम्रोभवति॥ कर्म्मचतुष्टयप्रभवलेचक्षुजधः एकादशजिने क्षु
त्पिपासादयः परीषहा वेदनीयप्रभवा इत्यागमविरोधः॥ नचोत्कर्षेणदेशोनपूर्वकोटिविहरतः सयोगकेवलिनस्तावत्कालं काय
स्थितिर्भुक्तिं विना घटेत॥ अथानंतवीर्यत्वात्तां विनाप्यनस्यापि तत्स्था सुकर्म्मणापि विनात्तस्थितिप्रसंगात्कदाचिच्छरीरापायः स्या
दितिमोक्षावसरेनो जलांजलिः॥ ननु स्थितेरयुक्तस्यापि सरागस्याहारायेस्तदामप्यत्तुभयस्यापि तत्कारणत्वाविशेषात्॥ किंच प्रदीपज्वालाजल
धारासमानं शरीरंतत्र च यथा तैलतयेन प्रदीपज्वालावतिष्ठते॥ जलागमनमंतरेण जलधारा तथा शरीरमपि भुक्त्यभावेन स्थितिमालि
ष्येते॥ अथ भुक्तिचेष्टावद्भवान् सादिमस्या व्याख्यानं क्रियते॥ निर्देशिच केवलिनि दोषाविरुद्धः॥ नहि नियदागमनं चाहं तिनश्राप्नोति स्यान्नयोगा
दिनानिषधादेः परत्याख्यानात्॥ वचनं च नषाप्नोति मोनकृतिको फलं भात्॥ अथ मतमशेषत्तस्यमांसादिकं पश्यतः कथं भुक्तिरंतरायोप
पतेस्तत्संगतमवधिज्ञानिभिः परममहर्षिभिरमहर्षिभिरनेकांतो हि सकलं त्रैलोक्यं पश्यत्यथ च भुंजते॥ एवं केवल्यपींद्रियविषये स
त्वं न एवा नान्यत्रान्यथा क्व चास्यावस्थापामप्यंतरायः स्यात्॥ भगवता तदाप्यवधिज्ञानेनाशेषवस्तुसाक्षात्करणात्॥ नैच भुक्तौ जिनस्य
सपासेः केवलिनो मतिज्ञानानुषंगायतो नैंद्रियविषयसंबंधमात्रेणामतिज्ञानं भवति किं तर्हि तत्संबंधे मतिज्ञानावरणक्षयोपशमिकेस
ति॥ एतच प्रक्षीणाशेषावरणे केवलिनि नास्तीति न तज्ज्ञानानुषंगः॥ अन्यथा श्रोत्रांशींद्रियाणां दिव्यनृपादिरवेणगणधरदेवादिरूपे
णसुगंधिकुसुमधूमवासादिगंधेन मरुत्सिंहासनस्पर्शेन संबंधेपि मतिज्ञानमनुषज्येत॥ सच भगवान्प्रतीत्येच पारोन पहरंधर्मोपदेशा

१ मालत। २ तत्स्मी। ३ भोग। ४ भक्तो। ५ काम्भोरे। ६ नरकर्मीतित।

न्या·कु·चं· नाकालएवसिंहासनाधिरूढस्तिष्ठत्युपरितंतुदिव्यस्थानेदेवछंदकाभिधानेगणधरदेवान्विहायान्यमनुष्यतिरश्चामगोचरईशानदिश
यांशरणीयद्वितीयप्रकाराभ्यंतरवर्तिनिनिगलापद्मंकेन्द्रासनेध्यापधानुसुखमास्ते॥नचतत्रगणधरदेवैरन्यैर्नमाहारंसकलदोषमुद्दंष्ट्रा
न्यासाहेदर्शनोदयेगरहान्निसंसंपश्यंति॥कथमसौभुंक्तइत्येवनतुनपश्यंति॥मनुष्यतिरश्चांसर्वेषांहारनिहारनिराहाणामगोचरत्वा
त्॥इति॥१॥अत्रप्रतिविधीयते।यत्तावदुक्तमाहारवेदघातिकर्मोदयलक्षणयावत्साभ्यंतरकारणसद्भावात्सुत्पत्तेसत्यविकलकारणम
गवतोभुक्तिर्भवत्येवेत्यादि॥तदसमीचीनं॥यतस्तद्भावात्तदुदयोकेवलिन्याहारमात्रंप्रसाध्येतकवलाहारोवाप्रथमपक्षेसिद्धसाधनमा
सयोगकेवलिनोजीवाश्वाहारिणइत्यभ्युपगमात्॥वद्धिधोत्याहारःप्रवचनेप्रसिद्धः॥गाथा॥णोकम्मकम्महारो।कवलाहारोयलेप्पमा
हारो।उज्झमणोविययकमसो॥आहारोछव्विहोणेयो॥१॥इत्यभिधानात्तत्रचकवलाहाराभावेप्यन्यस्यकर्म्मनोकर्म्मादानलक्षण
स्याहारस्यभावान्नाहारित्वंभगवतोविरुद्धं॥नचकवलाहारेणैवाहारित्वंजीवानामित्यभ्युपगमोयुक्तः॥एकेंद्रियांडजादिदशानामसु
भुंजानतिर्यग्मनुष्याणांचानाहारित्वप्रसंगात्॥द्वितीयपक्षेतुनिद्रादिभिर्व्यभिचारस्तेषांवेदघातिकर्मोदयात्मकत्वेप्यस्यपिकवला
हाराभावात्॥अथोक्तदृष्टसकलमसाधयत्यपिकेवलिनिप्रसाधयति॥तेरेनत्केवलिनोमहत्माहात्म्यपदिहिपविषमध्यहासिभूतप्राणिकवला
हारप्रसाधनासमर्थोपितद्दुरयस्तत्रसमर्थोभवतीति॥किंचनचतदुदयस्तत्साधनसमर्थइत्येतत्कुतःप्रतिपन्नंअभ्युपगममात्रात्प्रमाणतोवा।
अभ्युपगममात्रात्इतिप्रसंगःसर्वस्यसेष्टसिद्धिप्रसंगात्॥अथप्रमाणात्।किमत्यक्षात्।किमत्रप्रमाणंप्रत्यक्षमनुमानमागमोवा
नसंचेत्किमैंद्रियमतींद्रियंवा॥नतावदैंद्रियंतस्यातीतप्रसाहारनिहारागोचरत्वाभ्युपगमात्अन्यथाआहारनिहाराकेवलिणोप्रत्यक्षत्वार
त्यागमविरोधः॥अतींद्रियंतुनप्रवर्तितेत्यत्रकोऽपानंविधेयं॥अथानुमानंकिमत्रलिंगंतदुदयएवमनुष्यत्वंदेहस्थितित्वंवेत्यस्थितित्वं
वा॥नतावत्तदुदयएवास्यनिद्रादिभिर्व्यभिचारप्रदर्शनात्॥नापिमनुष्यत्वमयोगकेवलिनानेकांतात्॥अथास्मन्मनुष्यप्रवृत्तेनिकांतात्॥

१ तेन ग । २ नित्यकालाद् ।

त्यानेकान्तस्तथैव सिद्धो हेतुः सयोगकेवलिनोऽपि न ह्यनरतिक्रान्तत्वात्॥ तदुक्तं॥ मानुषीं प्रकृतिमभ्यतीतवान् देवतास्वपि च देवता यत
इति नाथ देहस्थितिस्तन्नघाति भगवतो देहस्थितिराहारपूर्विका देहस्थितित्वादस्मदादिदेहस्थितिवदित्यत्राप्येते किमाहारमात्रपू
र्वकत्वं तत्स्थितेः प्रसाध्येत॥ कवलाहारपूर्वकत्वं वा प्रथमपक्षे सिद्धसाध्यतेत्युक्तं द्वितीयविकल्पे तु विग्रहादिभिर्व्यभिचारस्तेषां कवलाहारा-
ता भावेऽपि देहस्थितिसंभवात्॥ औदारिकशरीरस्थितित्वाद्विशेषितेऽप्यनेनैव व्यभिचारः॥ तच्च तदीयौदारिकशरीरस्थितेः परमौदा
रिकशरीरस्थितिरूपतयास्मदादौदारिकशरीरस्थितिविलक्षणत्वात्॥ तस्याश्च केवल्यवस्थायां केशादिवृद्ध्यभाववच्च भुक्त्यभावो विलक्ष
णत्वात्॥ यच्च तद्वृद्ध्यभावो दोषापनीतो न घातिक्षयजो येन तद्वत्केवल्यवस्थायां तद्भुक्त्यभावो व्यापद्येत॥ बालोऽप्यादौ तदनन्तरं लौंधवजननस्वकेनो
ता घुभवत्वेनाप्यामयत्वेन तद्वृद्ध्यभाव इति॥ तदप्युक्तं वज्रऋषभावतत्तेषां मूलतो स्युस्त्याना भावप्रसंगात्॥ सर्वतोऽपि षष्ठनामेकादशके शारिवतो
निप्रसंगाच्च॥ न चैवमप्यभावादिनो यिकृतां केचाकतापस्सगुरुलघुभावेन विलक्षणस्योपलब्धेः॥ ततो घातिकर्मक्षयावस्थायां पस्यातंके
नखकेशास्तर्यत तावं न एवावतिष्ठन्त इति॥ केवल्यावस्थायां नूतिसमयतोऽभ्यानच्छरीरस्थितिके शादिरूपभावलक्षणोऽतिशयोऽस्ति॥ तथा तद्भुक्त्य- ज्ञेयो
भावलक्षणोऽप्यस्त्वतिशयो वा भुक्त्॥ छद्मस्थावस्थायां चास्य भुक्त्युपगमेऽपि पक्ष्मनिमेषो नखकेशवृद्ध्यादिश्चाभ्युपगम्यतां॥ तदभावातिशया
भ्युपगमे वा भुक्त्यभावातिशयोऽप्यभ्युपगन्तव्यो विशेषाभावात्॥ तपोमाहात्म्याच्चतुरस्यत्वादिवच्चाभुक्तिप्रकेवलेऽपि शरीरस्थितेर्न कश्चिद्वि-
रोधः॥ दृश्यते हि पंचकृत्वोऽभुंजानस्य यादृशी शरीरस्थितिस्तादृश्येव वर्षमेव पक्षमासभावनेनैतस्य चतुस्त्रिद्व्येकभोजनस्यापि तथा प्रतिदिनं
भोजनं भुंजानस्य यादृशी सा तादृश्यैवैकदारिनानरितभोजिनोऽपि श्रूयते च बाहुबलिप्रभृतीनां संवत्सरप्रमिताहारवैकल्येऽपि विशिष्टा
शरीरस्थितिः॥ आयुःकर्मैव हि प्रधानं तत्स्थितेर्निमित्तं भुक्त्यादिकं तु सहायमात्रं तच्छरीरोपचयोपलाभान्तरायप्रक्षयात्प्रतिसमयं त
दुपचयनिमित्तभूतानां दिव्यपरमाणूनां लाभात्सुघटते॥ ननु मासं संवत्सरं वा तदभावे तत्स्थितावपि नाकालं तत्स्थितिः पुनस्तदाहारेणैव जिनस्ती

१ त्यानेकान्तो। २ विग्रहगत। ३ दोषापनीतो। ४ घातिकर्मक्षय। ५ बालोऽप्यादौ। ६ तत्र पुनानरवे।

न्या.कु.चं. तेऽपि निचेत्। कुतस्तस्थितेरेककालमप्रतीतेः। प्रमाणान्तरतोऽनुमानाद्वा विशिष्टस्य हेतुतः सविज्ञानेनागायत्तोऽजन्तांजलित्तद्वत्तनस्तद्वृत्तीनित्यप्यावि

२७१ शेषात्॥ अनुमानान्नास्तिद्धिरन्यत्राप्यविशिष्टो यथैकहिन्निन्नप्रकर्षादेरावरणापकर्षस्य क्वचित्परमप्रकर्षमापद्यते। प्रकृष्यमाणत्वात्परिमा

णवदित्युच्यते॥ तथा एकप्राद्विदिनान्तरितभोजिनामभुक्तिप्रकर्षको देहस्थितिप्रकर्षः क्वचित्परमकाष्ठामापद्यतेऽन्नत्वान्नरदृष्टत्वेतु यत्ता पवि

शेषात्॥ तन्न शरीरस्थितेरपि भवनादेव धातुर्द्रव्यात्क्षुद्रूपः कवलाहारप्रसाधनसमर्थः प्रत्येतुं शक्यः॥ असिद्धं चाविकलकारणत्वं भुक्तेर्मोहनी

यसहायस्येव वेद्यादिकर्म्मजेरादिकार्यकरणे विकलसामर्थ्यं भवतितान्यथातिप्रसंगात्॥ यथैव हि वर्तिते सैन्यनायके सामर्थ्यं सैन्यस्य तत्रथा मोहनीये

विनष्टे घातिकर्म्मणामिति॥ यथा च निर्विषीकृत्यमन्त्रेण प्रभुज्यमानमपि विषं नरीलमूर्छादिकं तु समर्थं तथा शुक्लध्यानानलनिर्दग्धमोहाद्वेषये वे

दादिक्षुधादिकमिति निःप्रयोगो भवति॥ क्षुधा नास्ति तत्कारणमोहाभावाद्यथा तत्कार्यं यथा नाग्निप्रदेशे धूमो नास्ति वा हेतिमोदर्शनेकैकं च कर्म्मण ।तत्कारणस्याभावो न तत्र

सदयोदयानपेक्षः कार्यमनुसारयेनहि॥ त्रिवेदानां कषायाणां चापमनादिपृष्ठदयोर्लीनित्वेऽपि नं भुकुपादिकं च स्यात्॥ ननन्यमनसः संक्षोभात्क

थंसुक्लध्यानानाशिः सपकश्रेण्यारोहणं वाध्यतः कर्म्मक्षपणं स्यात्। नन्वेवं नामायुरप्योपिनत्रस्य कार्यकारी न स्यादित्यप्ययुक्तं। सुभप्रकृती

नोंतत्राप्रतिबद्धत्वेन कार्यकारित्वोपपत्तेः॥ यथैव हि बलवतारराजा स्वभावानुसारेणालब्धे देशे इष्टाजीवनेोपि नस्व तु प्राचरणाविधानात्

सुजनाश्रमनिस्तनतयास्वकार्यस्यविधाता रलथाप्रकृतमपि॥ कथं तर्हि सुभप्रकृतीनामेवार्हसिप्रतिबद्धसामर्थ्यं न पुनः सुभप्रकृतीनामपि

तिचेत्॥ उच्यते। सुभप्रकृतीनामर्हन्ननुभागं घातयानि॥ ननु शुभप्रकृतीनां यमोऽगणघातितानां दंडोनादोमाणांवदिनप्रतिबद्धसामर्थ्यमप्य

सातावेदनीयं स्वकार्यकारिस्यात्। नाहिदं उपनरादिविधानं भगवतोऽमर्थ्योनत्रियराभूत मासोर्वदनीयादिकमपिकस्थितिकं भवति॥ तदा २७१ पि

तेन कर्म्मणां समासस्थित्यर्थं विधीयते॥ न चाधिकस्थितिकत्वेन फलदानसमर्थं कर्म्मीयाघ्यज्ञानेनाप्यन्यथा कर्तुं शक्यमिति न कश्चित्सुक्तः

स्यात्॥ अथ तपोमाहात्म्यान्निर्जीर्णमधिकस्थितित्वेन फलदानासमर्थमायुः कर्म्म समानं कर्म्म क्रियते॥ तथा वेद्यमपि तद्दानासमर्थं क्रियता

१ तत्र यत्रीते । २ मुक्त । ३ हृद्यधुमें । ४ पप्त । ५ स्वकार्य । ६ नास्ति । ७ कषायादि ।

मविरोधात्। न च कारणमस्तीत्येतावतैव स्वकार्यंत्वमितरन्यथेंद्रियादिकार्यस्याप्यनुषंगाद्भगवतो मतिज्ञानस्य रागादीनां च प्रसंगः ॥
क्षयावरणादावोपशमस्य मोहनीयकर्म्मणश्च सहकारिणो विरहान्नेंद्रियादि स्वकार्यं कुर्यात्॥ अत एव वेदनीयमप्यविरोधात्। न चे
यं बुभुक्षा मोहनीयानपेक्षस्य वेदनीयस्यैव कार्यं येनात्यंतप्रक्षीणमोहेपि स्यात्॥ तथा हि। बुभुक्षा मोहनीयानपेक्षस्य वेदनीयस्य कार्यं न
भवति॥ इच्छात्वाद्रिरंसावत्॥ भोक्तुमिच्छा हि बुभुक्षा सा कथं वेदनीयस्यैव कार्यमन्यथा योन्यादिषु रंतुमिच्छा रिरंसापि तत्कार्यं स्यात्
था च कवलाहारवत्तस्या अपि तत्प्रसंगान्नेश्वरादस्त्यविरोधो यथा च रिरंसा प्रतिपक्षभावनातो निवर्तते। तथा बुभुक्षापि प्रयोगो भो
जनाकांक्षा प्रतिपक्षभावनातो निवर्तते॥ आकांक्षारूपत्वात्स्त्र्याद्याकांक्षावत्॥ नन्वस्तु तद्भावनाकाले तन्निवृत्तिस्तदभावे तु प्रवृत्तिः पुनः
स्यादित्येतत्स्त्र्याद्याकांक्षायामपि समानं यथा चास्याश्च नतः प्रतिपक्षभावनामयत्वादत्यंतनिवृत्तिस्तथा भोजनाकांक्षायाश्चापि।
तथा यथा च निर्मोहत्वेन स्त्र्याद्याकांक्षा विरुद्धा बुभुक्षापि तथा च प्रयोगो न बुभुक्षावान्॥ केवली नहि रोधिनिर्म्मोहस्वभावोपेतत्वात्। प्रोष
ह्विरोधिस्वभावोपेतेनानासेन हानन्यथोष्णस्पर्शस्वभावोपेतः कश्चित्तद्देशो न शीतस्पर्शोवत्॥ यद्विरोधिनिर्मोहस्वभावोपेतश्च
कृपो केवलीति॥ एतेनैतस्मपि प्रत्युक्तं प्रतिपक्षभावनोत्कर्षाज्जघन्योनिवृत्तो दृष्ट्वा तत्प्रतीकारार्थं त्वाहारोपि विशेषतन्नापि विशेषणोत्पाविवृत्तेस्तसो
ह्यप्रतिपक्षभावनामयत्वसिद्धेः। कृपिष्टेपणो पदेवात्॥ नन्वयत्वासिद्धो तु कामवेदनानिवृत्तिवन्निः क्षेपवेदनानिवृत्तिसिद्धेर्न
किंचित्तद्वेदनाप्रतीकारार्थं द्रव्यांतरेश्वरायात्॥ अथ या कांक्षा रूपाद्यन्न भवति तेन वीतमोहेप्यस्याः संभवः। कथमेवं रिरंसा यावत्सापि न।
कांक्षारूपायास्तत्र संभवो न स्यात् तस्मात्॥ अथानाकांक्षारूपतास्याः प्रतीतिविरुद्धा न देवतत् बुभुक्षायामपि समानं॥ अस्तु वानाकां
क्षारूपत्वमस्यास्तथापि दुःखरूपत्वादनंतसुखे भगवत्यसंभवः॥ यद्दुःखरूपं तन्नानंतसंभवति॥ यथा कामपीडादि दुःखरूपा च यदि
ति॥ यत्र त्वनंतं सुखं न तत्र दुःखलेशोप्यस्ति॥ यथा सिद्धेष्वनंतं च सुखं चार्हतीति तच्च सकलबाधानिवृत्त्यात्मकं परतंत्रं सुखं तत्राभि

१ दक्षो। २ द्युपवक्तृतया।

 त्रेनं नदसिद्धं॥ क्षुदाधाभ्युपगमात्मककर्म्मविपक्तानां सिद्धानामेवमर्हित याविधं न दृष्टिनार्हतां॥ न तु वेदनीयोदयसंभवादिति न रसनतदुदय
 स्यनवनहाधाहेतुत्वाभावप्रतिपादनात्॥ किंचार्हत्सनंतं सुखं सर्वप्रदेशाव्यापकमदत्तमात्मेप्रादेशिकत्वात्तत्सुखदुःखयोरेकत्रैकदावि रपाय
स्तां नार्थं। रोधात्तौ संभवात्कथमकं क्षुदुःखलेशोऽपि न वसंभाव्योऽन्यथात्मरागादिसुखवत्प्रादेशिकमेव तन्सुखं स्यात्॥ अनंतत्वाविध सुखं भगवति संनि
धीयमानं स्वविरुद्धदुःखं निवर्त्तयति॥ यथाग्निः शीतं तन्निवृत्तौ च न व्याप्याया क्षुधो निवृत्तिर्व्यापकनिवृत्तौ व्याप्यस्यावश्यं निवृत्तेः॥
वृत्तनिवृत्तौ शिंशपावत्प्रयोगो यत्र यद्विरोधि बलवदस्ति न तत्राभ्युदितकारणमपि तद्भवति॥ यथात्युष्णदेशे शीतं नास्ति च क्षु
दुःखविरोधि बलवत्केवलिन्यनंतं सुखमिति॥ यथा यत्कार्य्यविरोध्यनिवर्त्त्यं चास्ति॥ तत्तद्विकलमपि स्वकार्यं न करोति॥ यथा श्ले
ष्मादिविरुद्धानिवर्त्त्यपित्तविकारक्रान्तेषु रोगेषु नरध्या दिस्त्रैष्यादि करोति वेद्यफलविरुद्धानिवर्त्त्यसुखं च भगवतीति तत्रेतिनिराकृत
मेतन्नन्वहिवाला दौ तानाधुमुखे क्षुद्दुपचयदत्यादि॥ अनंतसुखसहभाविन्मामेव ज्ञानादीनां क्षुद्विरोधित्वं व्यवस्थितेः यदप्युक्तं नहिके
वलित्वान्नास्य क्षुधं विरुध्यते नौत्सर्वार्थग्रहणावज्ञिप्सितुं शक्यमतींद्रियत्वात्तेषामित्यादि॥ तदप्युक्तिमात्रमतींद्रियत्वात्तेषां तद्विरोधित्वा
प्रतिपत्तौ सर्वार्थसाक्षात्कारित्वादेरप्यप्रतिपत्तिप्रसंगात्॥ यथैव ह्यतिन्यामतींद्रियत्वादतत्त्वं निधौ सुन्त्वभवतोत्सर्वार्थग्रहणावधे
तुं न शक्यते॥ तथैते सर्वार्थसाक्षात्कारिणोऽप्यपि प्रमाणानुमानात्तेषां तत्साक्षात्कारित्वं प्रतीयते तथा तद्विरोधित्वेन किमपराद्धं येन
यासनुमानात्तन्न प्रतीयते॥ प्रतिपादितं च क्षुद्वितानुमानं प्रागित्यलमतिप्रसंगेन॥ सर्वे सत्वा च भवावनः क्षुदभावः क्षुदस्तु पग २७२
मेहिनहाधया सर्वज्ञताहीयेत निःशक्तिकत्वं न स्यात् अस्मदादेर्हि क्षुत्संभवपीडाक्रान्ते ज्ञानादेरभावः सुप्रतीतः॥ तुल्यशिनोऽत्यं न
 किंचिज्ज्ञानामिनकिंचिध्यासुत्वात्तुमपि न ज्ञाक्रामोतिप्रतीतेः यदप्युक्तं ज्ञानावरणादिकर्म्मोदयनिबंधनत्वात्तस्य परत्यादि तदप्य
सांप्रतं॥ प्रक्षीणशेषावरणस्य भगवतो ज्ञानादिक्षयाभाववत्क्षीणत्रोषमोहस्य क्षुत्पीडालेशस्याप्यनुपपत्तेः॥ मोहनीयसहा
१ द्विवितोधित्वा।

यंवेदनीयंतुत्कर्षेणप्रभुरितिप्राक्प्रपंचतःसमर्थितत्वात्॥ एकादशजिने इत्यागमोपिक्षुदाद्येकादशपरीषहप्रतीपेयपरः।
प्रतिपत्तव्यः॥ एकेनाधिकानदशएकादशेतिव्युत्पत्तेः मोहनीयसहायस्यकार्यभूताः क्षुदाद्येकादशपरीषहाः यस्यचार्हत्त्वं
नप्रसंगात्वेदनीयोदयभावात् नचैतत्संगतं॥ अन्यथारोगादिपरीषहाणामपितत्सत्त्वप्रसंगात् अस्मदादौतदुदयेक्षुत्पिपासावद्रो
गादीनामप्युपलंभात्॥ कृत्यस्यजिनेषुभोगभूमिजादिषुचतदुदयेपिरोगादीनामभावाद्व्यभिचारः॥ कवलाहारस्यापिव्यभि
चारोस्तुदेवादिषुतदुदयेपितदभावात्॥ पश्चात्पूर्वकसमुत्कर्षेणदेशोनपूर्वकोटिंविहरतइत्यादि। तदप्यचारुस्थीरस्थितेरायुःकर्म
णाएवनिपतननिमित्तत्वात्तत्पादनात्॥ भुक्तिंविनाप्याकालंतत्स्थितेःसमर्थितत्वाच्च॥ यदप्यभिहितंभुक्तेर्दीर्घकालतयाभगवत्यसंभवेवचनादेरप्य
संभवःस्यादित्यादि॥ तदप्यभिधानमात्रंवचनादेस्तीर्थकरत्वकर्मोदयापादितत्वात् दोषोदयत्वासंभवात्चतुर्दशादर्शवाद्यदेवमध्येक्षुदादि
वह्वचनमपिउक्तने॥ भुक्तेरपिवेदनीयोदयापादितत्वात्तत्सत्त्वमस्तीत्यप्यसंगतं॥ मोहसहायस्यैवास्यतत्संपादनेसामर्थ्यप्रतिपादनाच्च॥
यथैवहिमोहप्रशमसहायंतीर्थकरत्वंविशिष्टवचनादिविधानेसमर्थं॥ तथामोहसहायंवेद्यंभुक्त्यादिविधानेइतिपरस्परमुक्तंचभिन्ना
निवृत्तकवलत्वस्यसकलंजगत्स्पष्टतोपसंतर्पणासंभवइत्यादितदप्यनुपपन्नं॥ तद्ज्ञानस्यसोपयोगतयातत्कालएवस्वविषयावबोधार्थसा
क्षात्करणसंभवात्॥ यदेवत्ववधिज्ञानोपयोगमवधिज्ञानीकरोति। तदैवासौतद्विषयभूतमशेषंवस्तुपश्यति॥ नान्यदेवभोजनकाले
यद्यसावुपयोगंकरोति॥ तदान्तरायेभवत्येव। नचायंप्रकारःकेवलज्ञानेसंभवतितस्यसादिपर्युक्तत्वात्॥ यदप्युक्तंनेंद्रियार्थसंबंधमात्रे
णामतिज्ञानंभवतीत्यादि॥ तदप्यसुंदरं॥ विषयविषयिसंबंधेसमुपजायमानस्यज्ञानस्यमतिज्ञानत्वेमतिज्ञानवतोद्वयप्रसंग
त॥ अथमतिज्ञानावरणक्षयोपशमस्यसहकारिणोभावान्नेंद्रियाणिस्वविषयसंबंधेपिस्वकार्यमाविर्भावयंति॥ तर्हिमोहनीयस्या
पिसहकारिणोभावाद्वेद्यमपिस्वकार्यंनकुर्यादित्युक्तं॥ किंचकिमर्थमसौभुंक्तेशरीरोपचयार्थंज्ञानदर्शनवीर्यादितपनिवृत्त्यर्थंवासु

स्वरूप

भुक्ति

दोषे

दोषे

१ भोजनादि।

न्या.कु.चं. दुःखनाशप्रतीकारार्थं मायुर्योसाधितमुक्तिकस्यापवर्गेन निवृत्त्यर्थं रत्नत्रयस्य परमार्थं लोकानुग्रहार्थं वा न तावच्छरीरोपचयार्थं लाभान्तरा
२७३ यप्ररूपात्म्वनित्तमयंविविाशपरमाणुलाभादेवनत्सिद्धेः॥ तदर्थं तत्कुहरणे च कर्मणो निर्यं यस्यानन्तशरीरसंपूर्ण संभवात्प्रकृतिप्रत्यव
त्॥ नापि ज्ञानादिवृद्ध्यर्थं निवृत्त्यर्थं तत्स्य निबंधनाभावादेव तद्रत्नत्रयसिद्धेः॥ ज्ञानादिवृद्ध्यस्पादि निबंधनं ज्ञानावरणादिक्षयोपश
मस्तस्मिन् सति भोजनाद्यभावेनाप्यस्य प्रतीतेः संपन्नक्षीणाशेषावरणो भगवति नास्तीति कथं तदर्थं तदपेक्षा कर्मादिषु तो भुक्तिः स्यात्॥
नापि क्षुद्दुःखप्रतीकारार्थमनन्तसुखवीर्ये भगवत्यस्याः संभवाभावस्योक्तत्वात्॥ नाप्यायुषोऽसाधितमुक्तिकस्यापवर्गेन निवृत्त्यर्थं
रमोन न देहापाममपायात्पर्युक्तत्वादेवनयाविधस्यास्यापवर्गे नानुपपत्तेः॥ नापि रत्नत्रयपरमार्थं वीतमोहस्य रत्नत्रयदेवाद्युप
पत्तेः॥ नापि लोकानुग्रहार्थमनन्तवीर्यस्य वीर्यस्य निबंधनाभावनेभ्यो भुक्तिमन्तरेणापि लोकमनुग्रहीतुं समर्थत्वात्॥ यच्चोक्तं॥ देवच्छं
दकेगत्वा यथासुखमास्ते इत्यादि तदप्ययुक्तिमात्रं यतः समवसरणं विहाय भगवान् किमर्थं तत्र गच्छति॥ मनोविक्षेपपरिहारेण ध्यान
सिद्ध्यर्थं निरोधत्वमनन्तो यथासुखमवस्थानार्थं वा रहस्यकार्यानुष्ठानाद्वा॥ न चाद्यपक्षः युक्तो मनःस्कन्धतया भगवतो मनोविक्षेपासंभवा
त्॥ योगनिरोधसत्त्वेनोपचारतस्तत्र ध्यानाभिधानाच्च॥ द्वितीयपक्षोऽप्यनुपपन्नोऽनन्तवीर्यस्य निरोधात्तत्त्वमत्वानुपपत्तेः॥ अनन्तसुखस्य
दुःखलेशस्याप्यभावे तेयथासुखमित्यस्यापि दुर्घटत्वात्॥ रहस्यकार्यं च निंद्यमनिंद्यं वा तत्र नावन्निंद्यं प्रक्षीणाशेषदोषस्य निंद्यकार्यानुष्ठा
नविरोधात्॥ अथानिंद्यं तत्किं भोजनं कर्म तत्परिणामान्तरं वा तत्राद्यो भोजनं तस्यासौ भगवतो विनिषिद्धत्वात्॥ अप्रतिषेधे वा कस्मादसावेकान्ते गत्वा २७५
भुक्ते दृष्टिप्रभायाधाच कभयादतत्त्वचिन्तानुष्ठानत्वाद्वा॥ तत्राद्यविकल्पोऽनुपपन्नो भगवतो दृष्टिरोषागोचरत्वात्प्रदीपेनदिना वास्यात्वेनारूप
शमो भवति॥ सकथं तद्दोषगोचरः स्यात्॥ द्वितीयविकल्पे तु भगवतो महदौदार्यं तत्त्वं परत्वोपि मनं न खलु महासत्त्वस्य पुरुषो लज्जानुबुद्धत्त्वापीडित
शिष्यान् विहाय पितुस्वित्रमेकान्ते गत्वा भोजनं नं प्रयुक्तं॥ अतत्त्वचिन्तानुष्ठानत्वेनाननतत्कीकल्पना श्रेयसीत्यादिविशेषनपरिकल्पनावन्॥

कर्म्मणामपि रूपणं पूर्वोपार्जितानां भुक्तिकालोपार्जितानां चान्तराहित्यादर्हता विधीयेत॥ पूर्वोपार्जितानां चेत् घातिनामघाति
नां चानन्तावद्धानि नानां तेषां पूर्वमेव क्षपितत्वात्॥ नाप्यघातिनां तेषां यथाकालं क्षपयिष्यमाणत्वात्। सततं शुक्लध्यानानलतः कर्म्मेंधन
निचयनिर्द्दहनसमर्थत्वाच्चास्य न हि भगवतः शुक्लध्यानानलो रैवच्छेदक एव ज्वलति चतुःसमवसरणादौ विषयाभ्युपगमो शुक्लत्वस्य
स्याशुक्लध्यानान्तरध्वंसगात्। भुक्तिकालोपार्जितकर्म्मणां तु कथं क्षपणं प्रतिक्रमणान्यथेरशु॥ यदि च भगवतो निर्द्दोषत्वादुर्द्दिमाय यः प्र
तिक्रमणं करोति नासौ निर्द्दोषो यथास्मदादिः अतिक्रमणं करोति च भगवानिति॥ कृतदोषनिराकरणं हि प्रतिक्रमणं तत्कुर्व्वतः कस्य निर्द्दो
षता स्यात्॥ अथ नांन करोति प्रतिक्रमणं भुजिक्रियातः सकृत्कृत्वं दोषं निराकुर्यात्। आहारकथामात्रेणापि प्रमत्तोपि सन् साधुः प्रमत्तो भवति॥
नार्हन् भुंजानोपीति महच्चित्रं रोचयन्ते चास्य श्रेणीतः पतितत्वान्न केवलभाक्त्वं स्यात्। परस्युक्तं भुंजानो सौगणधरैर्देवैरपि न दृश्यत इत्या
दि॥ तत्रादर्शने किं कारणं वद्दलनमः पटलस्य वा रितत्वं कांडपटयाच्छन्नत्वं विद्याविशेषेण स्वस्य तिरोधानमन्यजनातिशायी माहात्म्यविशे
षो वा न तावदाद्यपक्षोनुपपन्नत्वात्। देशीयानमःपटलस्य निर्मूलोन्मूलितत्वात्। कांडपटाच्छन्नतायं च न तस्यैकत्यं भिक्षादीयते। विद्याविशेषा
भ्युपगमाच्चास्य विद्याधरादिवन्निर्ग्रंथताविरोधः॥ अथान्यजनातिशायी माहात्म्यविशेषः कश्चिदस्येष्यते येन भुंजानो नावालोक्य
नस्य नरैरित्यन्यजनातिशायी भोजनाभावलक्षण एवातिशयोस्येष्यतां तस्यैव चोपपन्नत्वात्॥ ततो भगवतो नंतचतुष्टयस्वरूपत्वा
भलक्षणां जीवन्मुक्तिमिच्छतां नंतसौख्यमेषव्यं॥ नदिष्टे च भुक्त्यभावो भ्युपगंतव्यस्तमंतरेणास्यानंतसौख्यानुपपत्तेः इति पारित
त्वादिति॥ छ॥ न तु स्त्रीणां च मुक्तिः पुंस एव न स्त्रियास्तस्याः नपुंसकवत् तद्योग्यत्वात्॥ तन्मुक्तिप्रसाधकप्रमाणासंभवाच्चन हि निर म
लिनन्मसाधकं प्रमाणं॥ अस्ति स्त्रीणां निर्वाणमविकलकारणत्वात् सकलानिर्वाणस्य हि कारणं रत्नत्रयं॥ सम्यग्दर्शनज्ञानचारित्रा
णि मोक्षमार्ग इत्यभिधानात् तच्च स्त्रीष्वविद्यते॥ नयादि॥ सर्वज्ञोक्तार्थानामिति रुचिमेवेति श्रद्धानं सम्यग्दर्शनं यथार्थावगमः सम्यग्ज्ञा

१ ज्ञा। २ मंतु। ३ दोषे। ४ चेष्टा।

नं॥ तदुक्तं। ज्ञानस्य पर्यावरणस्थानं सम्यक्चारित्रमेतद्रत्नत्रयमेतत्स्त्रीषु सिद्धमतस्तत्कर्मविप्रमोक्षलक्षणं मोक्षं साधयति॥ नहि स्त्रीषु र
त्नत्रयस्यैकेन चिद्विरोधोस्ति। यतोऽविकलकारणत्वासिद्धिः स्यात्॥ अथोच्यते स्त्रियो रत्नत्रयविरुद्धाः पुंसोऽन्यत्वाद्देवादिवत् सुप्रसिद्धो
हि देवनारकतिर्यग्भोगभूमिजानां पुंसोऽन्यत्वे तेषां देवादित्वेन रत्नत्रयस्य विरोधः॥ एवं स्त्रीणां स्त्रीत्वेनैवास्य विरोधः सिद्ध इत्येतत्
दसमीक्षिताभिधानं यतोऽविकलकारणस्य भवतोऽभावे भावाद्विरोधगतिर्भवति॥ स्त्रीत्वस्य सद्भावे चास्य त्रयस्याभावः प्रत्यक्षतोऽनुमाना
द्वागमाद्वा प्रतीयते॥ न तावत्प्रत्यक्षतो रत्नत्रयस्यातीन्द्रियत्वात्। नाप्यनुमानतस्तदभावाविनाभाविनो लिंगस्य कस्यचिदभावात्॥
नाप्यागमात्तत्र तदभावावेदिनस्तस्याप्यसंभवात्॥ नहि सुरनारकादिवत्तं तदभावप्रतिपादकं किंचित्प्रवचनवचनं संभवति॥ न तत्सु
रत्नत्रयमात्रं तत्त्वं न तत्र स्त्राभिर्विप्रतिपद्यते॥ तस्य मोक्षाय साधकत्वात्॥ अत्र प्रमाणकृतं प्रसाधकं तत्प्रकर्षपर्यन्तप्राप्तं सत्तत्राभावान्मोक्षा
भावः इति नः स्पष्टं न दृष्टोऽविरोधप्रतिपन्ने रत्नत्रये खलु प्रकर्षपर्यन्तप्राप्तं रत्नत्रयमस्माकं दर्शनेन चादृष्टो विरोधः प्रतिपत्तुं शक्यो निप्रसंगा
त्॥ न चाप्रतिपन्नविरोधस्य तस्य तत्राभावो युक्तोऽतुं शक्यो निप्रसंगेरेव॥ अथ मतमनुमानतः स्त्रीणां निर्वाणाभावप्रतीतेस्तत्त्र
त्तद्भावाभ्युपगमोऽयुक्तस्तथाहि॥ नास्ति स्त्रीणां निर्वाणं सप्तमपृथिवीगमनाभावात्संमूर्च्छिमादिवदिति॥ तदसंगतं विपर्ययव्या
प्तेरसिद्धेः सप्तमगमनाभावस्य निर्वाणाभावेनाप्राप्तेः प्रतिबन्धनियम्ये॥ नहि पर्ययेण तद्विपक्षस्य व्याप्तौ नियमो दृष्टो यथाग्निनाधू
मस्य व्याप्तौ धूमाभावेनाग्न्यभावस्य शिंशपात्वस्य च वृक्षत्वेन व्याप्तौ वृक्षत्वाभावस्य शिंशपात्वाभावेन व्याप्तिः॥ न चैवमत्र विपर्ययव्या
प्तिरस्ति तदभावस्य सप्तमपृथ्वीगमनादेर्निर्वाणं प्रत्यकारणत्वादव्यापकत्वाच्च सिद्धः॥ नहि सप्तमपृथ्वीगमनं निर्वाणस्य रत्नत्रय २७७
वत्कारणं सिद्धं॥ गुणस्थानकवद्वा व्यापकं तदभावे निर्वाणाभावः स्यात्॥ न चाकारणव्यापकस्य निवृत्तावकार्यव्यापकनिवृत्तिरतिप्रसंगात्॥
अतः संदिग्धविपक्षव्यावृत्तिकं साधनं चरमदेहैर्निश्चितव्यभिचारं चैते हि तेनैव जन्मना मुक्तिभाजो न सप्तमपृथ्वीगकं

१ तदुक्तम्। २ ज्ञान। ३ नोऽ। ४ प्रतीत। ५ तोऽप्र। ६ गम्य। ७ प्रस्थाने।

सद्वचसुच्यते॥ किंच विषमतयोप्यधस्तादुपरिस्थानतुल्यमासहस्रारं गच्छंति च तिर्यंचस्तदधोगतिविगतो हेतुः। नराधोगतेः स्त्रीपुंसयोः तुल्यं
सामर्थ्यमिति शुभगतावप्यतुल्यं॥ एवमशुभपरिणामस्य शुभपरिणामं प्रत्यहेतुत्वात्॥ तथाहि॥ भुजगखगचतुष्पादसर्पजलचराणां वि
षमाधोगतिः भुजगानामसंज्ञिनां प्रथमायां सरीसृपाणां द्वितीयां खगानां तृतीयां भुजगानां चतुर्थ्यां चतुष्पदानां पंचम्यां स्त्रीणां षष्ठ्यां
जलचराणां सप्तम्यामधोभूमावुत्पादात्॥ श्रूयते ह्यनंतः सामायिकमात्रसंसिद्धाः यदि च स्त्रीणां यथा वा राद्यतिशयपापयो विभव
जन्मानो न संति॥ तथा मोक्षोपि न स्यात् दागमे न रतिवा या भावबन्धो सा भावोप्युक्ता॥ न तस्य परिग्रहे च किंचिन्निर्बंधनं पश्यामः॥ अ
थ स्त्रीणां वस्त्रलक्षणपरिग्रहसद्भावान्मोक्षः तर्हि मोक्षार्थिनां स्त्रीभिरन्याभिः परित्यज्यते॥ न खलु वस्त्रं प्राणाः येनापि हि मुमुक्षुकार्थिना
परित्यज्यते॥ किंतु नन्वि वस्त्रं त्यक्तुं नो कल्प्यते लिंगं यथा अबलासहेतां तासां त्यागनविरोधस्तत्परित्यागेन तर्हि प्रतिलेखनवस्तुत्यागमेव तत्स्या
त्। यथैव हि सर्वैः जैनैः यतिसमर्पितं यत्कैरप्यदिष्टं प्रतिलेखनं मुमुक्षुत्वं च भवति॥ न पुनः परिग्रहस्तथा वस्त्रमप्यविशेषात्॥ यदि च धर्म्मसा
धनानां स्त्रवहितानां परिग्रहत्वं स्यात् नतर्हि शेषपिछाद्यादीनामपि वस्त्रवत्परिग्रहत्वं स्यात्॥ तथा च तदुपादायिनां मोक्षाभावः स्या
त्॥ सत्यपि वस्त्रे मोक्षाप्युपगमे गृहिणः कुतो नो मोक्ष इति चेत् ममत्वसद्भावात्॥ तर्हि गृहीवस्त्रे ममत्वरहितो सन्मतमेव च परिग्र
हः॥ सति हि ममत्वेन सोपि परिग्रहग्रहवान् भवति॥ आर्यिकायास्तु ममत्वाभावादुपसर्गे यास्तु मिवांबरस्य परिग्रहः॥ न हि यतेरपि प्रा
मं गृहं वा प्रविशतः कर्म्मवादस्य तस्यापरिग्रहत्वं ममतारत्वस्फुरणमस्ति॥ अथ वस्त्रे जंतूत्पत्तेस्तर्हि हिंसासद्भावतस्त्वारित्रस्य वा संभवा
त्कथं मोक्षप्राप्तिस्तत्प्रमादाभावे हि सा नोपपत्तेः प्रमादे हि हिंसा प्रमत्तयोगात्प्राणव्यपरोपणं हिंसेत्यभिधानात्॥ अन्यथा पिंछेन वधि
शय्यादौ मुनेरपि हिंसकत्वं स्यात्॥ अत एव केन यत्नेन संचरतो स्वप्रमादाभावाद् हिंसकत्वं आर्यिकायास्त्वप्यहिंसकत्वं स्यादविशेषात् उक्तं
गायाजियदुयमरदुयजीवो॥ अयदाचारस्स णिच्छिदा हिंसा॥ पयदस्स णत्थि बंधो॥ हिंसामित्तेण समिदस्स॥१॥ न च गुरुवेषत्वं यत्नात् स्त्री

न्या. कु. चं. २७५ राणांमोक्षाभावो गणधरादिभिर्व्यभिचारात्॥ तेहिताद्दशादिभिर्वंद्यंतेषच मुच्यंते॥ ततोरत्नत्रयमेवतत्कारणंनवस्त्रत्यागमचेलत्वंवा॥ न
चमायाबाहुल्यात्तासांनिर्वाणाभावः॥ पुंसामपितद्बाहुल्यसद्भावात्॥ मोहोदयोहितत्कारणंसचोभयत्रापिविशिष्टः॥ नचहीं स्त्र
नसत्वाःस्त्रियस्ततोननिर्वांतीत्यभिधातव्यं॥ यतःसत्त्वंनयःशीलसंधारणमिहेष्टव्यं॥ नान्यत्तस्यनिर्वाणंप्रत्यनंगत्वात्तच्चासांसु
सिद्धमेव॥ उक्तंच॥ आर्यावचनं॥ गार्हस्थ्येपिसुसत्त्वाः॥ विख्याताःशीलवत्तयाजगति॥ सीतादयःकथंतास्तपसिविसत्त्वास्तथा॥१॥ तपसि विसत्त्वा
तथा॥ गाथा॥ अट्ठसयमेगसमएण॥ पुरिसाणंणिव्वुईसमक्खा॥ थीलिंगेणयवीसं सेसादसकत्तिबोधव्वा॥२॥ रत्नत्रयागमश्च स्त्री
निर्वाणेप्रमाणं॥ अथवास्त्रीवेदोदयेनस्त्रीवेदःस्त्रत्वेन॥ कथमेवमपिस्त्रीणांनिर्वाणनिषेधोयथैवहिस्त्रीवेदेनपुंसःसिद्धिस्तथा
स्त्रीणामपिस्यात्॥ भावोहिसिद्धेःकारणंकिंचद्रव्यतःपुरुषोभावतःस्त्रीरूपोभूत्वायथानिर्वातितथाद्रव्यतःस्त्र्यपिभावतःपुरु
षोभूत्वाकिंननिर्वातीत्यविशेषात्॥ नचसिद्धेर्वेदःसंभवति॥ अनिवृत्तिबादरसांपरायएवास्यपरिक्षयात्॥ अथभूतपूर्वगत्यातत्पक्ष
क्षेणपारेद्दशानयेनवेदेनकरोतीतितासौमुक्तरत्युच्यते॥ ननुकिमनेनैषपक्षोरत्नत्रयाणवस्तुतमप्रजनत्वस्मादिर्विकारणमस्तिजि॥६॥ अत्र दिगंबरा लि
प्रतिविधीयते॥ यत्तावदुक्तमविकलकारणत्वादित्यादि तत्राविकलकारणत्वादित्यादि॥ तत्राविकलकारणत्वमसिद्धं॥ तत्कारणंहिरत्नत्रयं
तत्किंपरमप्रकर्षप्राप्तंसत्तत्कारणंस्यात्तन्मात्रंवायदितन्मात्रंतर्हिगृहिणामपिनिर्वाणप्रसंगः॥ अथपरमप्रकर्षप्राप्तंतन्नतत्तत्रतस्यपरमप्र
कर्षप्राप्तत्वानुपपत्तेः॥ तथाहि॥ निर्वाणकारणज्ञानादिपरमप्रकर्षःस्त्रीषुनास्ति॥ परमप्रकर्षत्वात्सप्तमपृथ्वीगमनकारणापुण्यपरमप्र २७५
कर्षवत्॥ तथाचेरमयुक्तमदृष्टविरोधप्रतिपत्तेरनुपपन्नेरित्यादि सम्यक्ततोदृष्टार्थस्याविरोधःप्रतिपत्तुमशक्यो तत्तद्ज्ञानादिरितिप्रत्यक्षा
कथंसप्तमपृथ्वीगमनकारणापुण्यपरमप्रकर्षस्यापितत्राविरोधप्रतिपत्तिःस्यात्॥ यदप्युक्तं॥ सप्तमपृथ्वीगमनाभावस्यनिर्वाणाभावेनाव्याप्ते
रित्यादि॥ तदप्ययुक्तमकार्याकारणस्यापितज्ज्ञकोयथाकृत्तिकोदयादेःप्रतिपत्तिदर्शनात् अविनाभावोहिगम्यगमकभावेनिबंधनंनकार्यकारणत्वं

१ सुजातीय। २ अट्ठसय। ३ समक्खा। ४ अनुतरी। ५ सप्तमपृथ्वी। ६ दृष्टमार्ग।

दिसद्वात्रास्येव॥ नखलु तादात्म्यतदुत्पत्त्योरेवाविनाभावो नियतः कृत्तिकोदयादेः शकटोदयादिकं प्रत्यगमकत्वप्रसंगादित्येनचसोग
तोपकल्पितव्याप्तिविचारावसरेसप्रपंचं प्रपंचितं॥ अतस्सत्यसमस्तार्थावगमनादेर्निर्वाणोपलकारणत्वाद्व्यापकत्वाच्चेत्यादिसूक्तं॥ क
थंचैवंवादिनोनिर्वाणाभावात्सभागाभावो निश्चीयते तानयोस्तादात्म्यतदुत्पत्तिलक्षणप्रतिबंधासंभवात्॥ अथात्रैकार्थसमवायः संबंधोस्ति
तस्मादेवानयोर्गम्यगमकभावो भविष्यति॥ ननु नैयायिकस्यमतामतन्नसितांबरस्य नखलु समवायासिद्धेः॥ तस्यैकार्थसमवायसिद्
धसपर्यने॥ तत्सिद्धिपूर्वकत्वात् स्याः श्वसुवात्तिहिस्यापनस्तपोर्गम्यगमकभावे प्रकृतयोरपि॥ सोपि तत्राप्येकार्थसमवायसद्भावात्।
यत्रैवखल्वात्मनि समस्तार्थावगमनयोग्यतासमवेता तत्रैव मुक्तिगमनायोग्यतापि॥ नचसमस्तार्थावगमनाभावात् क्वचिन्निर्वाणनि
षेधः साधयितुमिष्टोयेनोक्तदोषानुषंगः स्यात्॥ किंतर्हि परमतकर्षत्वाद्धेतोरपीनेसिद्धसाध्यव्याप्तिकान्निर्वाणकारणाभावस्तत्रसाध
यितुमिष्टः तदभावाच्च निर्वाणाभावः स्वयमेवततद्रेत्स्यति॥ नखलु निर्हेतुकाकार्यस्योत्पत्तिर्नितिसंगात्॥ ततोयुक्तमुक्तंसमस्तार्थावगमनं त्र
ननिर्वाणस्यरत्नत्रयवत्कारणमित्यादि॥ यदपिचरमदेहैर्निश्चितव्यभिचारमित्याद्युक्तं तदप्ययुक्तं॥ यतः समस्तार्थावगमनाभावस्तन्निर्व
र्त्तनसमर्थस्यकर्म्मोर्ज्जनसामर्थ्याभावः॥ सचस्त्रीष्वेवास्तिनचरमशरीरेषु॥ यतेहिभरतप्रभृतिचक्रवर्त्तिनां चरमशरीराणामपित्रयाणा
कसमयेसमस्तार्थावगमनयोग्यकर्म्मोपार्ज्जनादेवा[illegible]नसमयेतुसर्वार्थसिद्धावितिः॥ उत्कृष्टोहिशुभोऽशुभश्चपरिणामोपर्याप्तकमनुजस्यापारः शुभश्चेत्र
शुभश्चेदपिहेतुभूतंकर्म्मोपार्ज्जनेतत्परिणामस्याप्येचशुभस्यैवसामर्थ्यंनस्त्रियाः॥ यथैवहिनस्यालीवतरासभपरिणामेसामर्थ्याभावस्तथोत्कृष्टशुभ
परिणामेपिउत्कृष्टशुभपरिणामेनमुक्तिः॥ एतेन विषमगमनयोग्यपत्वादित्याद्यपिप्रतिव्यूढं प्रकृष्टगतिप्रारंभहेतुभूतकर्म्मोपार्ज्जनसमर्थस्य
वाशुक्तियोग्यतोपपत्तेः॥ नतद्विपरीतस्य प्रत्यनेहि प्रतिनियतंवाविनरकगतिप्रारंभककर्म्मबंधनप्रतिनियतोत्पादस्यानानाकविनारकाणांसपिताक
र्म्मिणांतिर्यङ्मोकेसर्वेषामपिनियमतः॥ संज्ञिपंचेंद्रियेषुतिर्यक्षुमनुष्येषुचोत्पादः देवानांचतथाविधकर्म्मबंधनप्रतिनियतोत्पादस्यानेकत्कृत्यानां

१ तथेव [illegible] । २ शरीरेषु । ३ अप्रकर्षे । ४ [illegible] । ५ उत्पन्ना[illegible] ।

न्या·कु·चं· निर्यक्लोकस्य ॥ नैवैकेंद्रियेषु च नियमेनोत्पाद इति ॥ न च तथाविधकर्म्मोपार्ज्जनसामर्थ्यं न मुक्तियोग्यता संभवतीति ॥ न मुक्तियोग्यताविचारावस

२७६ रे किंचिदन प्रयोजनं ॥ यस्मात्सप्तमपृथ्वीगमनं तदुत्कृष्टशुभगतिप्रसाधने सामर्थ्यं ॥ तस्याभावात्प्रकृष्टाशुभगतिप्रसाधनेपि तदस्ति यथा पुंसइति स्त्रीणां प्र

कृष्टायां शुभगतौ सामर्थ्यमस्तु परं कुतः प्रकृष्टाशुभगतावपि तथाविधायां तदभ्युपगंतव्यं ॥ तथा च ॥ गाथा ॥ [illegible] नीत्यादि न

दीयागमविरोधः ॥ यच्चान्यदुक्तं ॥ न च वादादिलब्ध्यभावात्संयमाभाव इत्यादि ॥ तदप्युक्तिमात्रं यतो दिक्कुमारादिविक्रियाचारणादिलब्धीनामपि हेतुः संयमवि

शेषो नास्ति ॥ न च मोक्षहेतुरसौ भविष्यतीति कः सुधीः श्रद्दधीत वादादिलब्धिः एवं विंदामः स्थाने पुरुषस्यत्यादि विषयिप्रतिबंधके पुसन्सु च्छलजात्यादिदोषहरेण त

त्त्वप्रतिपादनसामर्थ्यविवक्षितान्यथेरिंदादिलब्धोपादानं अक्षिः चारणलब्धिर्गगनगमनसामर्थ्यमादि शब्दात्क्षीरामधुसर्पिरादिलब्धिपरिग्रहः ॥ न हेतुरत्र

संयमविशेषो न स्त्रीणां प्रवचने प्रतिपादने ॥ यदप्यभिहितमागमे वादादिलब्ध्यतिशयाभावस्सम्यग्संयमाभावोप्युक्तमित्यादि ॥ तदप्यभिधानमात्रं संयमविशेष

निषेधादेवागमेनासां मोक्षाभावप्रतिपादनप्रसिद्धेः ॥ पुंवसिद्धोत्यागमेपुंसां मोक्षसाधनो एवेलकादिसंयमविशेषस्य विधिः ॥ स्त्रीणां तु निषेधः न च कारणा

भावे कार्योत्पत्तिरिति प्रसंगात् ॥ संयममात्रं तु सत्यप्यासां न मोक्षहेतुस्तिर्यग्गृहस्थादिवत् ॥ तथा नास्ति स्त्रीणां मोक्षः परिग्रहवत्वाद्गृहस्थवत् ॥ यदप्युक्तं वीत

सेवनं वस्त्रं परिग्रहः स्यात्संगमेव वस्त्रमित्यादि ॥ तदप्यचारुयतः प्रतिलेखनं नावस्त्रं संयमप्रतिपालनार्थं भगवतोपदिष्टं वस्त्रं तु विलेपमुपदिष्टमिति ॥ तदपि तत्प्र

तिपालनार्थमिति चेत्तथा हि ॥ अभिभूतं शीतपारेयेणाविरतं गोपांगसंदर्शनजनितवित्तभेदैः ॥ पुरुषैरंगनात्यहरन प्रावरणाद्यो दौरितिन च कुमरणादि

रभिभूयंते ॥ न तु नस्तेनाभिरूपगतप्रावरणलाविशेषगुणे निवारकं ॥ नासामल्पसत्वोपेतत्वात्याच्चभिभाव्यत्वाच्चैतत्सुप्रसिद्धेतद्यं विभागेन गवां शाद्वे स्त्री २७६

प्रकृतिरभिभाव्या पुरुषप्रकृतिरभिभाविकेति ॥ तदेतत्पदुष्प्रेष्यं विजृंभितं यासामित्तु च्छसत्वानां प्राणिमात्रेणाप्यभिभवः ॥ ताः सकलत्रैलोक्या

भिभावककर्म्मारातिप्रसप्तलसस्थानोपार्जनमहासत्वप्रसाध्यं प्रसाधयंतीति ॥ यदप्युक्तं ॥ यदि धर्म्मसाधनानां परिग्रहत्वं स्यादित्यादि ॥ न तत्कोपि धर्म्मो

पकरणसाधनत्वं न वस्त्रस्य स्यात् ॥ पुरुषविशेषः संयमविशेषो वा प्रथम [illegible] कथं तत्सुक्तिहेतुरागमविहितविधिना गृहीत्वा प्रमाणात्सागरत्वत्वमत्रु एषु चेत्

वहेतुत्वात्॥गुणपदे तो ह्यस्तु किं हेतुत्वेन नारेरपि तद्धेतुत्वप्रसंगः॥संयमविशेषहेतुत्वं तु न स्यात् रूपपाटवान्तरपरित्यागो हि संयमः॥स च
यावज्जीवं न प्रक्षालनशोषणनिक्षेपादानाचौरहरणादिमनःसंक्षोभकारिणि वस्त्रे गृहीते कथं स्यात्॥प्रत्युत संयमोपघातकमेवैतद्बा
ह्यान्तरग्रन्थ्यप्रतिपंथित्वात्॥नन्वेवं पिंछोपध्यादीनामपि परिग्रहत्वप्रसंगात्कथं तद्धारिणामपि मोक्षः स्यादित्यप्यसारं॥तेषामुद्
मादिदोषपरिहारेणोपादीयमानानां रत्नत्रयोपबृंहणहेतुत्वात्॥नहि ते सिद्धान्तविधिनोपादीयमाना मोक्षहेतोरपकर्तारस्तद्ग्रहणोच्चा
र्वरीणोपि काले विपत्तेरात्मघातित्वं स्यात्॥वस्त्राग्रहे तु नायं दोषः षष्ठाष्टमादिक्रमेणाचतुर्मासक्षपणैः पिंडार्हकमपि त्यज्यते॥परमनैर्ग्रन्थ्य
भाग्भिस्तैः प्रतिलेखनं च न तु स्त्रीभिः कदाचिदप्यत्र॥न च गृहीतेपि वस्त्रे ममेदंभावस्याभावात् न संभवात्परिग्रहत्वं वाच्यं विरोधात्॥बुद्धिपू
र्वं हि पतितं वस्त्रं हस्तेनादाय परिधानात् मूर्च्छारहितत्वानुपपत्तेः॥यद्बुद्धिपूर्वं पतितमप्यादीयते॥न तत्र मूर्च्छाभावो यथाभरणादीनथा
दीयते च स्त्रीभिर्वस्त्रमिति॥एतेनोपसर्गाद्यासक्तभिक्षाचारमपरिग्रहत्वादिप्रत्याख्यातं उपसर्गाद्यासक्ते हि वस्त्रे पतितेप्यबुद्धिपूर्वग्रहण
संभवात्॥यथोच्यते स्त्रीणां वस्त्रत्यागाभ्युपगमे कुलस्त्रीपालनान्यथानुपपत्तेर्दोषाद्यथाग्रहमात्रदोषः॥सकलशास्त्रपरिपालनं गुणः रतिस्त्या
गोपादानयोर्गुणदोषाल्पबहुत्वनिरूपणे भवतां दत्तमुपदिष्टं॥तासामिति॥तदेतदस्माकमभीष्टमेव तत्तत्त्वार्थोपवर्णं विप्रतिपद्यामहे मोदे
ष्वास्माकं विप्रतिपत्तेर्न च तत्र वस्त्रं मोक्षप्रसाधनाय प्रभवति। परिग्रहवदाश्रितत्वात् गृहस्थशीलवत्॥नहि गृहस्थशीलत्यागोपादानयोर्गुण
दोषाल्पबहुत्वनिरूपणे न भगवतोपदिष्टमपि मोक्षप्रसाधनाय भवत्येवं कनखिल्यादिमपि॥अथ तच्चैलं हिंसासंवलितत्वात्तत्र साध
नाय प्रभवति॥तदन्यत्रापि समानं न खलु स्त्रीसंबंधिशीलं हिंसासंवलं न भवति॥जलकालिकादिष्वनेकजंतुसंमूर्च्छनाधिकरणवस्त्रसम
न्वितत्वाद्गृहस्थशीलवत्॥तत्संमूर्च्छनाधिकरणस्य च वस्त्रस्य हिंसानंगत्वे मूर्च्छाजानामपि नयनानर्थकं स्यात्॥परस्पराभिहितं क्षमाद्याभा
वेनासां हिंसानुपपत्तेरित्यादि तदप्यपेशलं॥लोभकषायपरिणामेनासामप्रमत्तत्वानुपपत्तेः॥तत्परिणतेरेव प्रमादत्वात्॥तदुक्तं॥गाथा॥

१ स्त्री। २ स्त्री। ३ उपवासादेः। ४ परिणामो।

न्या·कु·चं· विकलात्तत्स्वसायाः इंद्रियाणि द्रायत्तत्स्वरूपाणि गाय॥ चतुर्थगुणस्थानेऽयोगे॥ हीनिषमादात्तत्पक्रारस्का॥ आरतिलोभकषायपरिणति स्त्रीणां बुद्धि
२७७ पूर्वकत्वस्वीकारएवस्त्रीत्ववशीयते॥ अथ वीतरागत्वेष्यासौ लज्जापनोदार्थं न तत्स्वीकरणमभावान्नात्त्वासां नग्नपरिणतिसिद्धिः॥ नन्वेवं का
मपीडापनोदार्थं कामुकादिस्त्रीकारोऽप्यास्तां किं तस्या विशेषात्॥ अथ तत्पीडासद्भावे वीतरागत्वे नासां विरुध्यते॥ तदेतत्सज्जात्तद्भावे पित्त-
मात्रं॥ खलु वीतरागस्य लज्जा न प्रपद्यते स निरागो वीभत्सादयवच्छादने च्छारूपत्वात्तेषां॥ यो विगतरागो नासौ लज्जावान्॥ यथा विगतरागोपि
गतरागो भवद्भिरभिप्रेतार्थिकेति॥ यदि च वस्त्रत्यागमंतरेण संयमो मुक्तेर्हेतुः स्त्रीणां तु सचेलत्वसाकारणभेदान्मुक्तेरप्यवगम्यतामुपलभ्यते भेद
भि योऽयं भिन्नः संयमः॥ सोऽयं न भिन्नकार्यारंभको यथाऽयतिरहिंसं यमोऽयं नग्नस्वगौथिन्यारंभकोऽयं न भिन्नश्चासचेलाऽकृतयोर्मुक्तिहेतुनया
भिप्रेतत्वान्नार्थिकासंयमइति॥ न चानयोर्मुक्तिभेदो लिंगकलंकर्मस्य क्षयलक्षणायां मुक्तेरुभयोर्भवद्भिस्तुल्यतयोपगमात्॥ किंच सचेलसं
यतत्त्वस्य मुक्तिहेतुत्वे मुमुक्षुर्थिनां च वस्त्रादेरत्यागः कर्तव्यतयोपदिश्येत उपदिश्यते चासौ तेषां तथा ह्याचेलक्यात्स्वं न गतानुपपत्तिः॥ प्रयोगो
वस्त्रं मुक्तेरंगं न भवति मुमुक्षूर्थिनां तत्त्यागस्य कर्तव्यतयोपदिश्यमानत्वात् यथा गोमुमुक्षूर्थिनां कर्तव्यतयोपदिश्यते॥ यत्तु मुक्तेरंगं यथा मि-
थ्यादर्शनादि कर्तव्यतयोपदिश्यते चैषां वस्त्रत्याग इति न मुक्तेरंगं तत्त्यागस्तदर्थिनां कर्तव्यतयोपदिश्यते॥ यथा सम्यग्दर्शनादे
रिति॥ यच्चान्यदुक्तं॥ पुरुषं पुरुषैर्वंद्यत्वात्स्मरणाधरैर्व्यभिचारः स्यादित्यस्य सांप्रतं यतोऽर्हतां तीर्थकरत्वनामपुण्यातिशयप्रशस्तत्व
मम हत्त्वपरप्राप्तत्वेनाखिलजनैर्वंद्यत्वेऽभवन्नवंदकत्वं नहि कश्चिन्नत्सदा स्वाधिकपदाजगत्प्रशस्यत्वेतेवंदकाः भविष्यंति॥ गणधराणां तु तथा
विधपुण्यभावत्वात्स्वपराभावाभावान्न तद्वंद्यत्वं॥ मुक्तिसामग्री तु तीर्थकरेतरेषां सिद्धांतांतर्विधिव्यते॥ आर्यिकास्तु साधिविशिष्यते न हेतुर २७७
त्वयाभावात्॥ तथा स्त्रीणां न निर्ग्रंथपरशास्त्रियतिसहितैः वंद्यपदानर्हत्वान्नपुंसकादिवत्॥ यतीनां हि वंद्यपदं द्विविधं॥ परमपरं च॥ तत्र
परं तीर्थकरत्वलक्षणं॥ अपरमाचार्यादिलक्षणं॥ तदुभयमपि पुंसामेवोपदिश्यते॥ न स्त्रीणां न थाप्यग्रहिणां देवानां च वंद्यपदं द्विविधं॥ परापरमे-

१ सुतानुभावत। २ गाद्गवं। ३ नावास्तु। ४ भद्रादं।

रानत्रनेषांवंधंपरंचक्रवर्त्यादित्वमिंद्रत्वंच॥ अपरंचमहामंडलिकादिसामानिकादिवनरपिपुंसामेवप्रभूयते॥ नस्त्रीणांप्रतिग्रहंच
प्रभुत्वंपुंसामेव॥ नस्त्रीणां॥ तथापिनारीसत्यसतिचपुत्रसैवलपोर्विपक्षांकात्यापिसर्वत्रकार्येधिकारेनतुस्त्रीणांमहतीनांसुरूपाणा
मपि॥ अतोयाएांसांसारिकलक्ष्म्यामप्यधिकारोनास्ति॥ नातांमोक्षलक्ष्म्यामधिकारोभविष्यतीति॥ किमपिमहात्तुतंनतुपरिग्रहत्वाः
स्त्रियोनर्हत्वानासामप्युक्तिस्तत्वाग्रणाधपरीनामप्यमुक्तिः स्यान्महत्त्वात्तीर्थकरत्वप्रियवत्सेषामप्यनर्हत्वाविशेषादित्यप्यमुक्तं
किमेरस्यात्रविधिनिषेधयोरनंगत्वात्॥ पुरुषवर्ग्गादिमहत्वांस्त्रियामधिकत्वेनानःस्त्रीवर्गेनतत्परिहारेणतस्यैवमुक्तिरप्युपगंतव्या
नपुनःकश्चिन्नकोनयाविधिप्रियेणसंभवेपिमुक्त्युपलंभाद्व्यभिचारात्सुद्रार्थ्य॥ मुक्तिंप्रतिस्त्रीणांनतत्समाननानात्वाद्यपितुपुंस्का॥ नरत्वे
रूपएवपुत्रवत्सएवप्रायासोअन्यतस्तुत्राणंतत्रापिनतत्त्वनोहीनत्वेपिपुंस्त्वसमत्वंयुक्तं। पुत्रवर्गोत्तुनीचवर्गस्यसकलव्यवहारेषु
लोकेत्पर्यनविलक्षणमापाप्रसिद्धेः॥ नचस्त्रीणांनमोक्षःपुरुषेपोहीनत्वान्नपुंसकादिवत्॥ नचतेभ्योहीनत्वमासामसिद्धमनंतरमेवास्य
समर्थितत्वात्॥ एतअतएवस्तिइंमनःसारणावारणापरिचोदनादीनिस्त्रीणांपुरुषाःकुर्वंति॥ नस्त्रियःपुरुषाणांतीर्थकराकारधरणव
पुरुषा॥ नस्त्रियःउक्तंच सारणवारणपरिचोयणाइपुरिसोकरेइणहुइत्थी॥ नचनतेमत्वमधिकत्वंवानुकेरंगंकिंतुरत्नत्रयंरीत्याव
र्मवत्॥ नथाहि॥ शिष्याःआचार्येभ्योधिकाःअथवोभवेषांमुक्तिस्तद्दार्थाणामाधिकाराणांवसाभविष्यतीतिवअदाभात्रं॥ यतःशि
ष्याचार्यवहीनाधिकत्वेमपिस्त्रीपुरुषयोर्मुक्तिरविशेषनःस्याद्यस्तियोरपिमुक्तिहेतुभूतरत्नत्रयमविशेषनःस्यात्॥ नचस्त्रीणांतद्
स्तिनहेतुभूतस्याप्रपंचनत्वात्सुभागेवप्रतिषिद्धत्वात्॥ रत्नत्रयमात्रंतुनत्रसदपिननहेतुर्हस्यादेवविमुक्तिप्रसंगात्॥ नहिएवं
इमानिंद्रप्रसाध्येकार्येप्रदीपस्यस्वयमपिसामर्थ्यप्रतीयते॥ यदप्युक्तं गार्हस्थ्येपिपुरुषाःत्स्यादिनरस्यविचारितरमणीयं नहियथाने
कदुर्द्धरपरीषहसहनेनाखिलकर्मनिर्मूलनसमर्थमहासत्वंपुंसांप्रसिद्धं॥ नथाविधंसत्वमपिस्त्रीणामस्ति॥ स्त्रीवर्गोयेस्त्रैयैवसेनारी

नांसत्वप्रकर्षसंभवान्महासत्वाः उच्यंते॥नहितासां पुंसामिवसत्वाधिक्यमस्ति॥कापिकार्पेतथाविषसत्वविकलानां चनासांकर्मंमहासत्त्व
साध्यमुक्तिहेतुरत्नत्रयप्रसमयचनास्त्यात्मनःथाहि।नस्त्रीशरीरंमुक्तिहेतुरत्नत्रयप्रसमयत्नेयेनात्माप्रथमेमहतापापेननिर्वर्तितंसप्तमनारकादि
शरीरवत्॥किंचाखिलकर्मक्षपणप्रारंभहेतोस्तस्यनराश्रयत्वेनोपपद्यते॥नचस्त्रीशरीरस्यतत्प्रारंभहेतुत्वेनोपपद्यते॥नथाहि॥नस्त्रीश
रीरंसकलकर्मक्षपणप्रारंभहेतुर्महतापापेनमिथ्यात्वसहायेनोपार्जितत्वात्नारकादिशरीरवत्॥स्त्रीनिर्वर्तकंहिकर्ममहतापं
तमिथ्यादृष्टेरप्येनोपार्ज्यते॥यद्यपिसासादनसम्यग्दृष्टिरपितदुपार्जयति॥तथाप्यसौसम्यग्दर्शनमवसादयन्॥मिथ्यादर्शनमवस
दृषन्॥मिथ्यादृष्टिरेवमिथ्यादर्शनाभिमुखस्यास्यमिथ्यात्ववर्तिनेनैवव्यपदेशात्॥सम्यग्मिथ्यादृष्टिरपिहिनतत्तन्नार्जयति॥किमंगपुनः
सम्यग्दृष्टिःस्त्रीत्वेनोत्पद्यमानेपिजीवोमिथ्यात्वपरिणतस्यैवोत्पद्यते॥तदुक्तम्॥गाथा॥छसुपुढविसुजोइसि॥सवणभावणसव्वइत्थीसु॥
बारेसमिच्छुववादे।सम्माइट्ठीणउववज्जोदि॥१॥यासांचोत्कृष्टस्थितिनिकरेवपरमाभिरपिनास्तितासांमोक्षप्रसंगःस्यात्तीनिमहत्त्वायाकौशल्यं॥
यच्चोक्तं॥अट्ठसयमेगसमएइत्याद्यागमस्त्रीनिर्वाणप्रमाणमित्यादि।तदप्यनल्पतमोविलसितम्।अस्यागमस्यास्मत्प्रत्यप्रमाणत्वात्तदन्य
प्रमाणबाधितार्थप्रतिपादकत्वात्सुप्रसिद्धं॥यथाचस्त्रीनिर्वाणलक्षणोर्थःप्रमाणबाधितस्तथाप्रपंचतःप्राक्प्रतिपादितमेव॥गाथा॥न
तुंवेदंकोजे पुरिसस्खवगसेढिमारूढा।सेसोदयेणवितहा॥झाणुवजुत्तायतेदुसिज्झंति॥१॥इत्यादेरपिप्रमाणभूतागमस्यतन्निर्वाणप्र
तिपादकस्यसद्भावात्कथंप्राकनागमस्यप्रमाणबाधितार्थप्रतिपादकत्वमागमात्तत्स्त्रीनिर्वाणसिद्धिरित्यपिमनोरथमात्रं।तन्निर्वाणावेदकत्वा २७८
संभवात्॥सहिपुंवेदोदयवत्॥शेषवेदोदयेनापिपुंसामेवापवर्गावेदकउभयत्रप्रत्यासत्त्याभिसंबंधात्॥वस्तुतोहिमोहनीयोदयजन्मानि
नविकाराणित्वभिधीयते॥उदयभावद्रव्यतःपुरुषाइत्यादिनिरुपचरितनाभिधानं॥द्रव्यतःस्त्रीवेदस्यमोक्षसंसाधनसामर्थ्याभावतस्सप्रतिपा
दितत्वात्॥कथंद्रव्यतःस्त्र्यपिभावतःपुरुषोमुक्त्वानिर्वास्यति॥यद्रव्यतोमोक्षसाधनेसमर्थनद्भावतोपितत्रसाधनेसमर्थमेवायतिर्यगादिद्र

मनोमोक्षप्रसाधने समर्था चरणीति॥ अनेनाहृत्यतः पुरुषस्यैव भावतो चोदयन्न कुत्रचिदारूढस्य निःशेषतो निखिलकर्माणि तज्जयनसामर्थ्य
मभ्युपगन्तव्यं लोकवत्। यथैव हि लोके पुरुषो महासत्त्वोपेतो गजतुरगादौ यत्र कुत्रचिदारूढः॥ किंचिद्व्यमल्लमादाय रणरंगे निखि
लवाचुवर्गमुन्मूलयत्॥ परमैश्वर्यमनुभवतीत्याबालं प्रसिद्धं। न पुनर्यथार्थनामावल्लातघाद्यतः पुरुष एव भावतो वेदत्रयाभ्यान
मेवशाधिरूढः शुक्लध्यानानुपमास्त्रमादाय कर्मारातिवर्गमुन्मूलयन् परमैश्वर्यमनुभवतीति॥ यदप्युक्तं सिद्धानो वेदरत्नादि। तत्र
त्वमेवत्न स्त्रसाभिर्वेदास्तुकिरभ्युपगम्यते। कर्मनिचयनिर्दहनसमर्थतीर्थव्रतं शुक्लध्यानलाभात्परमुक्तेरभ्युपगमादिति॥ छ॥
इदानीं शास्त्रकारः शास्त्राध्ययनस्य प्रयोजनं प्ररूपयन्नाह॥ शार्दूलविक्रीडितच्छन्दः॥ भव्यैः पेयं गुरुकलपैरभिरमसे राण्यप्रगुणानं॥
तेभ्योऽन्यस्य न दर्शमर्थविषयाच्छब्दादपभ्रंशतः॥ दूरीभूतनरात्मकारधिगतो बोध्याकलंकं पदं॥ लोकालोककलावलोकनबलप्रत्ये
जिनः स्यात्स्वयं॥१॥ एष श्लोकः॥ प्रवचनपदान्यभ्यस्यार्थास्ततः परिनिष्ठिताः॥ नसकृदवबुद्ध्येद्धोधाद्बुधो हतसंशयः॥ भगवदकलंकानां
स्थानं सुखेन समाश्रितः॥ कथयतु शिवं पंथानं वः पदस्य महात्मनाम्॥२॥ लक्षणसंख्याविषयफलोपेतं प्रमाणनयनिक्षेपस्वरूपप्ररू
पके हि हेतुवादरूपे आगमे स्वरूपदेशापरं पातो यथावदधिगते परमप्रकर्षेण अभ्यस्ते सत्यात्मनो निःश्रेयसपरप्राप्तिलक्षणस्वार्थसंपत्ति
र्भवति॥ तत्संपत्तौ च सद्गुरुजनमोक्षमार्गोपदेशाद्धेरणा परार्थसंपत्तये सो देशतरति॥ इति श्रीभट्टाकलङ्कशशांकानुस्मृतप्रव
चनप्रवेशः समाप्तः॥ इति ग्रन्थः समाप्तः॥ छ॥ ॥शार्दूलविक्रीडितच्छन्दः॥ बोधो मे न तथाविधोऽस्ति न सरस्वत्या प्रदत्तो वरः॥ साहाय्यं
च न कस्यचिद्वचनतोऽप्यस्ति प्रबंधोदये॥ यत्पुण्यं जिननाथभक्तिजनितं तेनायमत्यद्भुतः॥ संजातो निखिलार्थबोधनिलयः साधुप्रसादा
स्पदः॥१॥ कल्याणावहपथ्यः सुवर्णरचितो विद्याधरैः सेवितः॥ स्तुंगांगो विबुधप्रियो बहुविधश्रीको गिरीन्द्रो यथा॥ भ्राम्यद्भूर्लिदरस्सानिप्रभृति
भिः प्राप्तमंतर्दीपपदं॥ न्यायांभोधिनिमंथनस्थिरमसौ स्थेयात्प्रबंधः परः॥२॥ मूलं यस्य समस्तवस्तुविषयं ज्ञानं परं निर्मलं॥ बुध्नं सम्यगहारस्ति

निर्मलं। २ बोधम्। ३ नयः परिनिष्ठिताः। ४ विवादे।

न्या॰ कु॰ चं॰ [redacted] दर्शखिलेसंवारिमानंमहन्॥ ताहीः सर्वनयाः प्रपन्नैर्निवहे निःसेपमालामला॥ जीयाज्जैनमतं ह्रिपोत्र कलिनाः स्वर्गारिभिः सत्

२९८ लैः॥३॥ अ॰ आम्भोजदिवाकरो गुणनिधिर्यो भूज्जगद्भूषणः॥ सिद्धांतादिसमस्तशास्त्रजलधिः श्रीपद्मनंदीप्रभुः॥ तच्छिष्यादकलंकमा

र्गनिरतात्सन्न्यायमार्गोखिलः॥ सुव्यक्तोनुपमप्रमेयरचितो जातः प्रभाचंद्रतः ६॥

श्रीः श्रीः श्रीः अभिभूय निजविपक्षं॥ निखिलमतोद्योतनो गुणाम्भोधिः श्रीः श्रीः

श्रीः सचिनाजयतु जिनेंद्रः॥ शुभं भवतु॥ ---

मिती चैत्र सु॰ ८ सं॰ १९६९॥ इस पुस्तक को बडुकप्रसाद लेखक सा॰ हालश॰ तरबनारसने अपने हाथ से लिखकर तैय्यार किया॥ ह॰ बडुकप्रसाद॰